समाणो भवति सेत्यः से प्रसादादत्थिकारणनिर्दिष्टः उत्तमः पुरुष इति तदप्यसन्न वत्तर्थेपि पर्यायेपते
वेवनइतिवचनात् यदि तेनेश्वराभिप्रेतः स्यात् वेवेदेतं वेवत इति ब्रूयात् मृषा प्रजापतिः किंचान्य
त् नेत्रेणाक्षन्नादीनां स्पष्टः सततः स्वविकाराद्देहत्थुगे प्रवेशो दर्शयित्वा प्रविष्टो यथैवं न सत्त्वमसीत्युपदे
शेन मृषा प्रसज्येत तस्मिंश्च स्त्यादिभीनं नाभविमीति पृक्त उपदेशो भविष्यत् यदि स प्रसादादन्य उत्त
मः पुरुषो भवेन्न यथा भूत्मदमेवेत्यादि प्रणानैवेदं सर्वमिति तेनोपसंहरिष्यत् यदि भूमा जीवादन्यो
भविष्यत्रात्मद्वेतोल्लिहतं इत्यादि स्वन्नेनात्र सर्वं खल्विदं ब्रह्मसिद्धान्तमप्रयोगान्नाभविष्यत् अस्य
गात्माचेत्सर्वं तेनात्तेनाक्षाचानन्नमवेत् तस्मादेकपदवात्मप्रकरणे सिद्धः न चात्मनः संसारित्वमविद्या
ध्यस्तत्वादात्मनि संसारस्य न हि रज्जुशुक्तिकागगनादिषु सर्परजतमलादीनि मिथ्याज्ञानाध्यस्तानि तेषां
भवंतीत्येतेन संसारित्वं मूर्तयाभिरचौ पद्यते नोक्षिहस्येन स्यात्मौन् यच्चास्थितमप्रियेपवमेवेति नापि
यवैलेवेनिसिद्धम् एवं चेत्स्वतिसर्वेपर्यायेणैनदमृतमभयमेतद्ब्रह्मेति प्रजापतेर्वचनम् यदा प्रजा
पतिकश्चन्नृपायाः प्रानेर्वचनम् सत्यमेवनद्भवेत् न चनन्तानकत्वज्ञान्मृषाकर्तव्यमुक्तं ततो गुरुत्व
स्य प्रमाणानश्यानुपपत्तेः ॥ ननु प्रसक्तदुःखाद्यप्रियंवेत्तृत्वमव्यभिचार्यनुभूयत इति चेन्न नादि
रहितेराजीर्णोहं जातोहमात्मभानुभोः कृत्मान्नत इत्यादि प्रत्ययानुभववन्नोपपत्तेः ॥ सर्वमप्येतत्स
र्वमिति चेत्स्वप्नवत्तदेवं दुःखवत्तामयेन दुःखस्मापि उदपानवादिदर्शिनाविनाप्युक्तिरपि नमो हाववि
नापमेवापीनो भवतीति नथाविशेषवनामहाप्रज्ञाः प्रजापतयोपिदेहमात्रात्मदर्शिनो बभूव ॥ नथेन्द्र
स्यात्मविना प्रायभयसानापवैवेनापिकान्यमन्नत तथासा व्याइत्यां देहादिव्यतिरिक्तमवगाम्यापि

ज्ञा॰भा॰ ।१५ ज्ञानस्वरूपमात्मानं वस्तुविषयप्रकाशत्वदर्शनेन तस्यः तथान्ये काणादादिदर्शनाः कषायपक्वमिव बलाद्दि
भिर्वर्तनविभिन्नात्मगुणोऽक्रमात्मरूपस्योपाधयोपि तत्प्रवृत्ताः तथा कर्मिणो बाह्यविषयापहृतचेतसो वेदस्य
णा अपि परमार्थस्वमात्मैकत्वे विनाशमेवं द्वन्द्वमानाद्यटीयं ज्ञावदीहावरोहप्रकारैर्निर्णीतसंसा
चक्रे वंभ्रमेति किमन्येन तद्गजन्तवो विवेकहीनाः स्वभावत एव बहिर्विषयापहृतचेतनत्वात् संसारे दृष्ट्यका
सर्वेषां शैवागोचरत्वमात्रो परमहंसपरिव्राजकैरन्योन्याश्रमिभिर्वेदान्तविज्ञानपरैरेव वेदनीयं सत्यं
मैः प्रकारणचतुष्टयेनानिबद्धं प्राजापत्यं चेमं संप्रदायमनुसरद्भिः तथा ज्ञानमनन्तमपि तत्प्रवनान्यह
तितत्वाशरीरस्य संप्रसादस्याविद्याशरीरेणाविशेषणमेवसंप्रसादस्य शरीरात्समुत्थाय स्वेन रूपेणाभि
निष्पत्तिर्वक्तव्येति रूपतः उच्यते अशरीरो वायुरविद्यमानेशिरः पाण्यादिसङ्कशरीरमस्येत्यशरीरः किंचा
न्येविद्युत्स्तनयित्नुरित्येतानि च शरीराणि तथैव सन्ति वर्षादिप्रयोजनावसाने यथात्मनश्चाटेति भूमि
ष्ठाश्रुतिर्हि लोकसंबोधिनस्माकाशादेशात्कपदिशानि एतानि यथोक्तानि आकाशसमानरूपतामापन्ना
निस्वेन वाय्वादिरूपेण गृह्यमाणान्याकाशाख्यतां गतानि यथा संप्रसादोऽविद्यावस्थायां शरीरात्मभा
वमापन्नः तानि च तथाभूतान्यमनुष्याणु लोकसंबोधिनश्चाकाशादेशात्समनि दिष्टनिवर्षादिप्रयोजननि
हृत्तये कण्ठेविशिराणां पायेसाविशेषपरं ज्योतिः प्रकृष्टप्रैषिकं संपायस्वविज्ञम् अभिनापमात्मस्वरूपं आ
दित्याभितापेनपृथग्भावमापादिताः सन्तः स्वेन स्वेन रूपेणाविद्युदपि स्वेन ज्योतिर्लतावयव रूपेण स्तन
यित्नुरपि स्वेन गर्जितशब्दाशनिरूपेणेत्येवं प्राक्पुरोगमे स्वेन रूपेणाभिनिष्पद्यन्ते यथायं दृष्टान्तो वाय्वादीना
माकाशादिसाम्यगमनवदविद्यायां संसारावस्थायां पाभीरसाम्यमापन्नो हायमनष्ठचोनानेनौणम

रिष्यद्येवंप्रकारंप्रजापतिनेवमुच्यमानयोः केनक्रमेणनाभितेदेहेंद्रियादिधर्मेनत्वमसीतिप्रतिबोधितः
सन्स्वपक्षंसंप्रसादोजीवोस्माच्छरीरादाकाशादिववायवादयः समुत्थायदेहादिवैलक्षण्यमात्मनोरूपमव
गम्यदेहात्मभावानादित्वेप्यनेनस्वेनरूपेणसदात्मनैवाभिनिष्पद्यतेइतिव्याख्यानं उदशरावास्येनरूपेणसं
प्रसादोभिनिष्पद्यतेप्राक्प्रतिबोधाद्धीतिनिमित्तान्तर्यामीभवति यथास्वः पश्चात्तत्प्रकाशमात्ररूपेणात्मना
भिनिष्पद्यतेएवंचसउत्तमःपुरुषःउत्तमस्त्वसौपुरुषश्चेत्युत्तमपुरुषः सएवोत्तमपुरुषोद्दिष्टमपु
रुषोव्याकाशवत्सप्रस्तुतः सम्प्रसन्नःसंप्रसन्नात्मशरीरस्थस्वरूपेणात्मेषाम् उत्तमःपुरुषःसर्वात्मनयास्वरूपे
णावस्थितः तदात्मैकाव्याकृताव्याकृतावयेन्योमःपुरुषःतत्तनिर्वचनोह्ययंगीतासु ॥
सतत्रपर्येतिजक्षत्क्रीडन्रममाणःस्त्रीभिर्वायानैर्वाज्ञातिभिर्वानोपजनंस्मरन्निदंशरीरंसयथाप्रयोग्य
आचरणेयुक्तएवमेवायमस्मिञ्छरीरेप्राणोयुक्तः ॥ सम्प्रसादःस्वेनरूपेणतत्रस्वात्मनिस्वकृतो
यासर्वात्मनयासर्वात्मभूतःपर्येति क्वचिदिंद्राद्यात्मनाजक्षन्भक्षयन्नाभक्ष्यानुच्चावचानीप्सितान्कचि
त्स्त्रीभिर्यानैर्वासंकल्पादेवसमुत्थितैर्ब्रह्मलोकिकैर्वाक्रीडन्त्स्वादिभीरममाणश्चमनसैवनोपजनंस्त्रीपुं
सयोरन्योन्योपगमेनजायतइत्युपजनंशरीरमात्मभावेनवात्मसान्निध्येनजायतइत्युपजनमिदंशरीरंन
स्मरन्नस्मरणंहिदुःखत्वस्मात् दुःखात्मकत्वात्तस्य नत्वनुभूतेचत्रस्मरेदसर्वज्ञत्वप्रसंगात् नहिदोषःयेन।
मिथ्याज्ञानादिविषयोकेदितमननन्ताज्ञानभूतमस्येतितनतदस्मरणेसर्वज्ञत्वहानिः नस्मृत्यमस्त्रेनयदृह
ह्रीतेनवायदनुभूतंतदुष्मादाशुषणोपिस्मरेदंस्यात् नचेदात्मिस्मरतिभ्रविद्यादोषवद्धिर्यदनुभूय
तेतत्सर्वात्मानस्मरतीदंनस्मरणान्नविद्यानिमित्ताभावात् येनाकिंचिद्दोषमृतेनकर्माणोयमानसाः

का॰भा॰
॰१९

कामाश्चनृत्तापि याना श्चत्र भूयं नैवि यामि वेगात्तात्र पश्यन्नेन सर्वात्मभूतेन संबध्यते नः साधेव विमानं
यपते ब्रह्मलोक इति यत्रत्वावत्न भवंतापि ते ब्रह्मण्येव लोके भवंतीति सर्वात्मत्वाद्ब्रह्मणस्तस्य ते नत्र का
मेकः स्यात्मत्वस्य पश्यति नान्यत्कृणोति नान्यद्विजानाति स भूमा कामांश्च ब्राह्मलौकिकान्नपश्यन्नेव मन इति
विरुद्धं यद्येकोयस्मिन्नन्यान्पश्यति मनसैवत्वाणेन पश्यतीति च नैष दोषः स्वत्वेन पर्याहृतत्वात् द
हे द्वैविपरीलायामन्यत्र पश्यत्येव पश्यति दृष्टुरन्यत्वेन कामानामभवात्र पश्यतीति चेति यद्यपि तत्तु मन
के नक्त सापि सर्वं कत्वात्समाने द्वितीयाभावः केन कं पश्येदिति वाक्यमेव श्रुतौ ॥ स्वत्वापादनया
मादिलत्तणः स्वनकामेषु प्रपंचात्तितात्स्वयं नद्रस्तुतः प्रजापतिना नत्र यथा सावत्तित्सामर्थ्य
नेनहृन्नकाव्यमितीदमाप्तेन नत्वाक्रोद्धत्वश्रितिनाद्दर्शन हस्याद्दृष्टः स्वत्वेनायथा प्रयोगपः प्रयोगपरो वाण
प्राणः प्रयुस्मनइति प्रयोगेणास्यावलीवर्दोवायथालोके आचरमनेनेत्याचरणात्स्थानो वानस्मित्राचर
रोप्युक्तस्ताक बलायेव मस्मिन्शरीरे रथस्थानीय प्राणः पंचकर्मेंद्रिय मनो बुद्धि संयुक्तः प्रत्तात्मा विज्ञा
न क्रियाशक्तिद्वयसंमूर्छितात्मात्मक स्वकर्मफलोपभोगनिमित्तं नियुक्तः ॥ अथ यत्रैतदाकाशमनुवि
षण्णं चक्षुः पुरुषादर्शनाय चक्षुर्य एवं वेदेदं जिघ्राणीति स आत्मा गंधाय घ्राणं अथ यो वेदेदमभिव्याहरा
णीति स आत्माभिव्याहरणाय वागथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रमथ यो वेदेदं मन्वानीति स
आत्मा मनो स्य दैवं चक्षुः स वा एष एतेनैव दैवेन चक्षुषा मनसैतान्कामान्पश्यन्नमते य एते ब्रह्मलोके तं वा एत
न्देवा आत्मानमुपासते तस्मात्तेषां सर्वे च लोका आत्ताः सर्वे च कामाः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामा
न्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥ १२ कस्मिन्वरद्रुमस्कोनउक्तोनाभविष्यामि

कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति श्रुतेरणा ज्ञेव सर्वाधिकारी दर्शनश्रवणचेष्टाव्यापारेषु कृतलक्षणो दे
हदेशश्चक्षुरिंद्रियं रूपोपलब्धिद्वारभूतमेष यत्र कृष्णतारोपलक्षितमाकाशं देहच्छिद्रमनुविषण्णमनुगतं विष
क्तमनुगतं तत्र स प्रकृतोऽशरीर आत्मा चाक्षुषश्चक्षुषि भवरतिचाक्षुषस्य दर्शनाय रूपोपलब्धये च
करणं यस्मात् देहादिभिः संहतत्वात् परार्थं सोऽत्र चक्षुषि दर्शनेन लिंगेन दृष्टानेकसंहतत्वाश्रीर
तीति दृष्टान्त इति प्रजापतिनोक्तं सर्वेंद्रियद्वारोपलब्धाणां सर्वविषयोपलब्ध्यादि सर्वमात्मन एव तस्योपलब्धि
हेतुत्वात्कीर्तीनीति विशेषवचनं सर्वश्रुतिषु स्मरणीयमिति तत्स्मंभवतीति च श्रुतिः अथापि योऽस्मिन्देहे
वेदकथं जिघ्राणीति गंधं विजानीयामिति स आत्मा गंधाय गंधविज्ञानाय येन तत् घ्राण
अथ यो वेदेदं वचनमभिव्याहराणीति अभिवदिष्यामीति स आत्मा अभिव्याहरणक्रियासिद्धये करणं वागि
न्द्रियम् ॥ अथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रम् ॥ अथ यो वेदेदं मन्वानीति मनन व्यापा
मिंद्रियासम्बंधं केवलं मन्वानीति मननेन व्यापारयामि इति यो वेद स आत्मा मननाय मनः यो वेद स आत्मैव
दैवं प्रयोगाद्दर्शनमस्य स्वरूपमित्यवगम्यते यथायः शुक्लाप्रकाशयति स आदित्य इत्युक्ते प्रकाशस्वरूपः
स इति गम्यते ॥ दर्शनादिक्रियानिर्वर्त्यमर्थानि चक्षुरादीनि करणानीदं चास्यात्मनः सामर्थ्याद्व्यवगम्यते आत्म
नः सत्तामात्रमेव विज्ञानकर्तृत्वेन नतु व्यापृततया यथा सवितुः सत्तामात्रमेव प्रकाशनकर्तृत्वेन न तु व्यापृत
तया न तथात्मनोऽस्य दैवमस्य कृतमिनं दिवो साधारणं चक्षुरप्रत्येनेनेति वर्तमानकालविषयाण्येवे
न्द्रियाणि अतो दैवं न तानि मननं त्रैकाल्यविषयोपलब्धिकरणं स्मृतिनोऽशेषं च सूक्ष्मव्यवहितादि सर्वोपल
ब्धिकरणं स्मृतिनोऽशेषं च सूक्ष्मव्यवहितादि सर्वोपलब्धिकरणं चेति दैवं चक्षुरुच्यते स वै मुक्तः स्वरूपापन्नो

का. भा.
९२

क्रियाकरणदेहेन्द्रियमनोविप्रयुक्तः सर्वात्मभावमापन्नः सन्नेष व्योमवद्विशुद्धः सर्वेश्वरो मनउपाधिः सन्ने-
श्वरेण मनसैतान्कामान्सवितृप्रकाशवन्नित्यप्रवृत्तेन दर्शनेन पश्यन् रमते का कामानिति विशिनष्टि
य एते ब्रह्मणि लोके ब्रह्मलोके हिरण्यनिधिवद्बाह्यविषयासंगानृतेनापिहिताः सत्कामास्त्वलभ्याला
नित्यर्थः यस्माद्धेष इन्द्राय प्रजापतिनोक्त आत्मा तस्मात्तमात्मानं ततः श्रुत्वा तमात्मानमद्यत्वेऽपि देवा उपासते न
उपासनाच्च तेषां सर्वे च लोका आत्ताः प्राप्ताः सर्वे च कामाः यदर्थं हीन्द्र एकशतं वर्षाणि प्रजापतौ ब्रह्म-
चर्यमुवास तत्फलं प्राप्तं देवैरित्यभिप्रायः तद्युक्तं देवानां महाभाग्यत्वात्त्विदानीं मनुष्याणामस्य
जीवितानामल्पतरप्रसन्नतानां संभवतीति प्राप्तमिदमुच्यते ॥ स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्।
निदानीन्तनोऽपि कोऽपि विद्वानिव यथोक्तमात्मानमनुविद्य विजानातीति ह स्मा माप्नेन किल प्रजापतिरुवाह।
वाचातः सर्वेषामात्मज्ञानेन तत्फलप्राप्तिश्च तुल्यैव भवतीत्यर्थः द्विर्वचनं प्रकरणपरिसमाप्त्यर्थम् ॥ १२ ॥
श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्ये अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरी-
रमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति ॥ १३ ॥ श्यामाच्छबलं प्रपद्य इत्यादि मन्त्राम्नायः पावनो जपा-
र्थश्च ध्यानार्थो वा श्यामो गम्भीरो वर्णः श्याम इव श्यामो हार्दं ब्रह्मात्यन्तदुरवगाह्यत्वात् तद्धार्दं ब्रह्म ज्ञात्वा
ध्यानेन तस्माच्छ्यामाच्छबलं शबल इव शबलोऽरण्याद्यनेककामभिश्रत्वाद्ब्रह्मलोकस्य शबलं तं ब्रह्मलो-
कं प्रपद्ये मनसा शरीरपाताद्वोर्ध्वं गच्छेयम् यस्मादहं शबलाद्ब्रह्मलोकान्नामरूपव्याकरणाय श्यामं
प्रपद्ये हार्दभावं प्रपन्नोऽस्मीत्यभिप्रायः अतस्तमेव प्रकृतिस्वरूपमात्मानं शबलं प्रपद्य इत्यर्थः कथं श्या।
बलं ब्रह्मलोकं प्रपद्य इत्युच्यते अश्व इव स्वानि लोमानि विधूय कंपनेन श्रमं पांस्वादि च रोमतो पनीय यथा निर्मलो

एवं हार्दब्रह्मज्ञानेन विधूय पापं धर्माधर्माख्यं इन्दुरिव राहुग्रस्तस्तस्माद्राहोर्मुखात्प्रमुच्य भास्वरो भवति य
था एवं धूत्वा प्रहाय शरीरं सर्वानर्थाश्रयमिहैव ध्यानेन कृतात्मा कृतकृत्यः सन्नकृतं नित्यं ब्रह्मलोकं संभवा
मीति द्विर्वचनं मन्त्रपरिसमाप्त्यर्थम् ॥ १३ ॥ आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म त
दमृतं स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽह
मापत्सि स हाहं यशसां यशः श्येतमदत्कं श्येतं लिन्दु माभिगां लिन्दु माभिगाम् ॥ १४ ॥ आकाशो वै इत्या
दि ब्रह्मणो लक्षणनिर्देशार्थं साध्यानमाकाशो वै नाम श्रुतिषु प्रसिद्ध आत्मा आकाश इवाशरीरत्वात्सूक्ष्मत्वा
च्च स चाकाशो नामरूपयोः स्वात्मस्थयोर्जगद्बीजभूतयोः सलिलस्येव फेनस्थानीययोर्निर्वहिता वोढा व्या
कर्ता तेन नामरूपे यदन्तरा यस्य ब्रह्मणोऽन्तरा मध्ये वर्तेते नयो वा नामरूपयोरन्तरा मध्ये यन्नामरूपाभ्याम
स्पृष्टं यदित्येतत्तद्ब्रह्म न तु ब्रह्मणा धर्मिणा नामरूपविलक्षणं नामरूपाभ्यामस्पृष्टं तथापि तयोर्निर्वो
ढृ एवं लक्षणं ब्रह्मेत्यर्थः इदमेव चैवमेव ब्रह्मणो नाम नान्यच्चिन्मात्रानुगमान्तर्वर्तिविलक्षणस्वरूपं चैवेत्यगमने न
देवाकाशादिष्टापि कथं न देवगमने इत्यादृश्य आत्मा हि नाम स्वरूपं सर्वजन्तूनां प्रत्यक्चेतनः स्वसंवेद्यः प्रसि
द्धो नैव रूपेण श्रीयापरीरेव्यामवगन्तव्यः सर्वगतं आत्मा ब्रह्म इत्यवगन्तव्यम् न चात्मा ब्रह्मण्यन्नेन समरणाध
मोऽत्र न हर्षमन्त्रः प्रजापतेः स्थानं सभां वेश्म प्रभुविमितं वेश्म प्रपद्ये गच्छेयं किंच यशो नामात्मा।
अहं भवामि ब्राह्मणानां ब्राह्मणा एव हि विशेषतः न तत्स्थानं यशोऽहं भवामि तथा राज्ञां यशो वि
शां च यशसे प्राधिकृता एवेति तेषामप्यात्मा भवामीत्यर्थः न यशोऽहमनुप्रापत्सि अनुप्राप्तुमिच्छामि।
सह हाहं यशसामात्मानं देहेन्द्रियमनोबुद्धिलक्षणानामात्मा यशः किमर्थमहमेवं प्रपद्य इत्याह श्येतं च

का.भा.
२६

र्णिपक्षवदस्य मेरोहितं तेनस्थाद्यं देनाहितमप्यदमं भवत्यित्स्त्रीव्यंजनेनानेष्वविनानेनो बलवीर्यो वै
धर्माणामपदस्य विनाशायितिरन्यत्र यदेवं श्रेयंतेलिङ्गुपिकिलेसाभिगोमाभिगाच्छ्यं यद्विवचनमत्यंतानर्थं हे।
तत्त्वप्रदर्शनार्थं ॥ २४ ॥ तदेतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यः आचार्यकुलाद्वेदमधी
त्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुंबे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदा
त्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभि
संपद्यते न च पुनरावर्तते न च पुनरावर्तते ॥ १५ ॥ अष्टमः प्रपाठकः ॥ ८ ॥ समाप्तेयं छान्दोग्योपनिषत्
तदेतदात्मज्ञानं सोपकरणमोमित्येतदक्षरमित्याद्यैः सहोपासनैः सह चक्रेनं ग्रंथेनोपलक्षणेन ब्र
ब्रह्मा हिरण्यगर्भः परमेश्वरो वा तद्द्वारेण प्रजापतये कश्यपायोवाच सोऽपि मनवे स्वपुत्राय मनुः प्रजाभ्य इत्ये
वं श्रुत्यर्थसंप्रदायपरंपरयागतमुपनिषद्विज्ञानमद्यापि विद्वत्स्ववगम्यते यथेह षष्ठे प्रपाठके त्रयेण प्रका
शितात्मविद्यासफला वगम्यते तथा कर्माण्यनेकश्रुतार्थ इति प्राप्ते तदानर्थक्यप्राप्तिपरिजिहीर्षयेदं क
र्मणो विशुद्धिरनुष्ठीयमानस्याविशिष्टफलवत्त्वेनार्थवत्त्वमुच्यते आचार्यकुलाद्वेदमधीत्य सहार्थतो ध्या
यने कृत्वा यथाविधानं यथा स्मृत्युक्तैर्धर्मैर्युक्तः सन्नित्यर्थः सर्वस्यापि विधेः स्मृत्युक्तस्योपकुर्वाणकं प्रति
कर्तव्यत्वे गुरुशुश्रूषायाः प्राधान्यप्रदर्शनार्थमाह गुरोः कर्म यत्कर्तव्यं तत्कृत्वा कर्मशून्यो योऽतिरिक्तः का
लः तेन कालेन वेदमधीत्येत्यर्थः एवं नियमवताऽधीतो वेदः कर्मज्ञानफलप्राप्तये भवति नान्यथेत्यभि
प्रायः अभिसमावृत्य धर्मजिज्ञासां समापयित्वा गुरुकुलान्निवृत्य न्यायेन दारानाहृत्य कुटुंबे स्थित्वा गार्ह
स्थ्यविहितेन कर्मणि तिष्ठन्नित्यर्थः तत्रापि गार्हस्थ्यविहितानां कर्मणां स्वाध्यायस्य प्राधान्यप्रदर्शनार्थं स्वा

वाक्षरस्य ॥ महिम्ना रसेन महिम्ना महत्त्वेन ऋत्विग्यजमानादिप्राणैरित्यर्थः तथैतस्यैवाक्षरस्य रसेन
व्रीहियवादिरसनिर्वृत्तेन हविषेत्यर्थः यागहोमाद्यक्षरेण क्रियते तच्चादित्यमुपतिष्ठते ततो वृष्ट्यादिक्रमेण
प्राणोऽन्नं च जायते प्राणैरन्नेन च यज्ञस्तायतेऽनेनोच्यते अक्षरस्य महिम्ना रसेनेति ॥ ९ ॥ तत्राक्षरविज्ञान
वतः कर्म कर्तव्यमिति स्थितमाक्षिपति ॥ तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद नाना तु विद्या चावि
द्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति तेनाक्षरेणोभौ यश्चैतदक्षरमेवं यथा
ख्यातं वेद यश्च कर्ममात्रविदक्षरयाथात्म्यं न वेद तावुभौ कुरुतः कर्म तयोश्च कर्मसामर्थ्यादेव फलं स्यात्
किं तत्राक्षरयाथात्म्यविज्ञानेनेति दृष्टं हि लोके हरीतकीं भक्षयतोस्तज्ज्ञातज्ज्ञयोस्तुल्यमेव विरेचनं नैवं य
स्मान्नाना तु विद्या चाविद्या च भिन्ने हि विद्याविद्ये तुशब्दः पक्षव्यावृत्त्यर्थः नोंकारस्य कर्माङ्गत्वमात्रविज्ञा
नमेव रसतमाप्त्यादिगुणवद्विज्ञानेन किं तर्हि ततोऽभ्यधिकम् तस्मात्तदाधिक्यात्फलाधिक्यं युक्तमि
त्यर्थः दृष्टं हि लोके वणिक्शबरयोः पद्मरागादिमणिविक्रये वणिजो विज्ञानाधिक्यात्फलाधिक्यम् त
स्माद्यदेव विद्यया विज्ञानेन युक्तः सन् करोति कर्म श्रद्धया श्रद्दधानश्च सन्नुपनिषदा योगेन युक्तः सन्नित्य
र्थः तदेव कर्म वीर्यवत्तरमविद्वत्कर्मणोऽधिकफलं भवतीति विद्वत्कर्मणो वीर्यवत्तरत्ववचनादविद्व
दपि कर्म वीर्यवद्भवतीत्यभिप्रायः न चाविदुषः कर्मण्यनधिकारः औषस्त्यकाण्डेऽविदुषामप्यार्त्वि
ज्यदर्शनात् रसतमाप्त्यादिगुणविज्ञानमेकमुपासनमध्ये प्रयोजनान्तरादर्शनात् अनेको हि वि
शेषणोऽनेकधोपास्यत्वात् ॥ ॥ खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति खल्वेतस्यैव प्रकृतस्योद्गी
थस्याक्षरस्योपव्याख्यानं भवति ॥ प्रथमः खण्डः ॥ देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध

छ. भा.
५

देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति ते ह नासिक्यं प्राणमुद्गीथमुपासांचक्रिरे तं हासुराः पाप्म
ना विविधुस्तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धोऽथ ह वाचमुद्गीथमुपासांच
क्रिरे तां हासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धाथ ह च
क्षुरुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयं चादर्शनीयं चाथ
ह श्रोत्रमुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं शृणोति श्रवणीयं चाश्रवणीयं च।
पाप्मना ह्येतद्विद्धमथ ह मन उद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं संक।
ल्पयते संकल्पनीयं चासंकल्पनीयं च पाप्मना ह्येतद्विद्धमथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपा।
सांचक्रिरे तं हासुरा ऋत्वा विदध्वंसुर्यथाश्मानमाखणमृत्वा विध्वंसेतैवं हैव स विध्वंसते य एवंविदि।
पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणः नैवैतेन सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा
ह्येष तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवत्येतमु एवान्ततोऽवित्त्वोत्क्रामति व्याददात्येवान्त
त इति देवाश्चासुराश्च देवा दीव्यतेर्द्योतनार्थस्य शास्त्रोद्भासिता इन्द्रियवृत्तयोऽसुरास्तद्विपरीताः स्वेष्वसु।
षु विश्वग्विषयासु प्राणनक्रियासु रमणात्स्वाभाविक्यस्तमआत्मिका इन्द्रियवृत्तय एव ह वै इति पूर्व।
वृत्तोद्भासकौ निपातौ यत्र यस्मिन्निमित्त इतरेतरविषयापहारलक्षणे संयेतिरे सं पूर्वस्य यततेः संग्रा।
मार्थत्वमिति संग्रामं कृतवन्त इत्यर्थः शास्त्रीयप्रकाशवृत्त्यभिभवनाय प्रवृत्ताः स्वाभाविकास्तमोरू।
पा इन्द्रियवृत्तयोऽसुराः तथा तद्विपरीताः शास्त्रार्थविषयविवेकज्योतिरात्मानो देवाः स्वाभाविकतमोरू
पासुराभिभवनाय प्रवृत्ता इत्यन्योन्याभिभवोद्भवरूपः संग्राम इव सर्वप्राणिषु प्रतिदेहं देवासुरसंग्रामो

नादिकालप्रवृत्तइत्यभिप्रायः सहदृश्यमानयोरिविकारूपेणाधर्माधर्मोपपत्तिविज्ञानायकथ्यते प्राणवि
शुद्धिविज्ञानविधिपरतया श्रुतदृश्यमपिदेवाः स्वताः प्रजापतेरपत्यानि प्राजापत्याः प्रजापतिः कर्मज्ञा
नाधिकृतः पुरुषः पुरुषस्यापत्यानि मनुष्याणामेव महाप्रजापतिरिति श्रुतंस्वनवान् तस्यहि प्राप्तोयाः स्वाभाविका
श्चकरणेष्वन्ययोविरुद्धाश्चप्रत्यानीवतद्भवात् तन्तोऽत्यर्थायकर्षलक्षणानिमित्तेष्वदेवाउद्गीथमुद्गीथ।
भक्त्युपलक्षितमौद्गात्रंकर्मानहृत्रस्तनवेतः तस्याधिकेवलस्याहरणासंभवाद्योतिष्टोमाद्यात्कृत्स्नंतदस्य
भिप्रायः तत्किमर्थमाजहुरित्युच्यते अनेनकर्मणैनानस्तानभिभविष्यामइत्येवमभिप्रायाः यदा
यदाचतदौद्गीथंकर्माभिद्दीर्षवस्तदानेदेवानासिक्यंनासिकायांभवंचेतनावंतघ्राणंप्राणमुद्गीथकर्ता
रमुद्गातारमुद्गीथभक्त्युपास्यमिचक्रिरेदृन्तवंतदृत्यर्थः नासिक्यप्राणदृष्ट्योद्गीथाख्यंभक्तवस्तोकारमुपासा
चक्रिरेइत्यर्थः एवंहिप्रकृतार्थपरित्यागोप्रकृतार्थोपादानंचतकृतंनस्यात् स्वेलेनस्यैवात्रहस्यमोंकारोस्य
पास्यतयाप्रकृतः नतुद्गीथोपलक्षितेनकर्मकृत्तदृतवंतदस्यबोद्धव्यादानीमेवकद्ययनासिकाप्राणदृष्ट्योंका
रमुपसंचक्रिरेत्यर्थं नेवदोषाः उद्गीथकर्मात्यपदितनकत्यप्राणदेवतादृष्टोद्गीथमकाव्ययत्नोंकारउ
पास्यत्वेनविवक्षितोनस्वतंत्रोन्यकादर्थानकर्मालनवंतदंतिभुक्तमेवोक्तम तेमवदेवहृतमग्नानाहस्ता
स्वाभाविकतमस्यात्मानोमोतीरूपंनासिकाप्राणंदेवस्वोचनपाप्मनाथसाचगरूपणाविविधुर्विद्धवंतः
संसर्गहृतवेनदृत्यर्थः सहिनासिक्यप्राणःकस्यागंधग्रहणाभिमानासंगाभिभूतविवेकज्ञानोवभूव
सतेनदोषेणपाप्मसंसर्गीवभूव तदिदमुक्तमसुराः पाप्मनाविविधुरिति यस्मादासुरेणपाप्मनाविद्धस्तस्मा
त्तेनपाप्मनाप्रेरितोघ्राणः प्राणेनदुर्गंधग्राहकः प्राणिनामतस्तेनउभयंजिघ्रतिलोकः सुरभिचदुर्गंधिचपाप्म

छा.भा.
५

नाशेषयस्माद्विद्धः उभयग्रहणमविविक्तिनम् यस्मोभयंह्विवाऽत्रिंसाकुंनीतियहत् यदेवेदमप्रतिरूपंजि
घ्रतीतिसमानप्रकरणमन्यत्श्रुतेर्भ्योमुख्यप्राणस्योपास्यत्वायनहि श्रुद्रस्तानुभावार्थो यंविचारः श्रुत्याप्रवर्तितोऽत
श्चवागादिदेवताः क्रमेणविचार्यासुरेणपाप्मनाविद्धाइत्यपोह्यनेसमानमन्यत् अथहवाचंचक्षुःश्रोत्रं
मनइत्याद्युक्तानामप्यन्यासांत्वगस्त्रादिदेवतानामुपलक्ष्याः एवमेताविल्वताःदेवताः पाप्माभिरितिश्रुत्यन्तरात्
आसुरेणविद्धत्वाद्घ्राणादिदेवता अपोह्यथानेनरं यएवायंमुख्ये आस्ये भवो मुख्यः प्राणस्तमसौ शमुपा
सांचक्रिरे तंहासुराः पूर्ववदृत्वाशाप्याविदध्वंसुर्विनष्टाः अभिप्रायमात्रेण कृत्वाकिंचिदपिप्राणस्य कथंविन
ष्टास्तत्रदृष्टान्तमाह यथालोकेऽश्मानमाखणं नशक्यं खनितुंकुद्दालादिभिरपिभेत्तुंनशक्योऽखनयि
त्वाखणमृत्वामर्थलोष्टः पांसुपिंडः क्षुद्रेणखनित्रेणाश्मनिहितोऽश्मभेदनाभिप्रायेणतस्यात्मनः किंचिद
प्यकृत्वास्वयंविध्वंसेतविदीर्येत एवंविदध्वंसुरित्यर्थः एवंविशुद्धोऽसुरैरधर्षितत्वान्मुख्यःप्राणः इत्येवंविदःप्राणा
त्मभूतस्येदंफलमाह यथाश्मानमितिपूर्ववदेनमेवंहैवसविध्वंसते विनश्यतिकोऽसौविस्तारात् यएवं
विदियथोक्तप्राणविदि पापंतदनर्हं कर्तुंकामयते इच्छति यश्चैनमभिदासति हिनस्ति प्राणविदं
प्रत्याक्रोशताडनादिप्रयुंक्ते सोऽप्येवमेवविध्वंसत इत्यर्थः यस्मात्सएषप्राणविद् प्राणभूतत्वादश्माख
णइवाश्माखणोऽधर्षणीयइत्यर्थः ननुनासिक्योऽपिप्राणोवाय्वात्मायथामुख्यस्तत्रनासिक्यःप्राणःपा
प्मनाविद्धःप्राणएवसन्मुख्यःकथंनैषदोषःवाय्वात्मापिसन्मुख्यःस्थानदेवताबलीयस्त्वाद्विद्धःनासिक
स्थानकरणवैगुण्याद्धिद्धः यथावास्यादयः शिक्षावद्गुरुप्रयुक्ताः कार्यविशेषंकुर्वन्तिनान्यहस्तगतास्त
द्वेषवद्घ्राणसंविवताहिसाघ्राणदेवतानमुख्यायस्मान्नविद्धाहेतैर्मुख्यस्थानैर्वेननसहाभिद्रोऽधि

वा विजानाति प्राणेनैव तद्भयं विजानाति लोको न स्वपापकार्यादर्शनाद्यपहतपाप्मापहतो विनाशि
तोपनीतः पाप्मा यस्मात् सोयमपहतपाप्मा एवं विशुद्ध इत्यर्थः यस्माद्वान्यो भविताः कस्मात् प्राणा यामेगवतान्द्वा
णादयोन तथा त्वं भौतिकस्त्वं किं तर्हि सर्वार्थः कथमित्युच्यते तेन नचिकेतेन यदग्नातिथ्यं चितो लोकस्तेन
चितेन धीनेन चैतेन ग्राणादीन वतिपालयति तेन हि तेषां स्थितिर्भवतीत्यर्थः अतः सर्वैर्भविः प्राणैस्ते
विशुद्धः कथं तु न मंत्र्याचितानधीतानां भ्यांस्थिति निदितेषामग्ने इत्युच्यते एतेन त्वं प्राणं मंत्र प्राणास्य हि
मन्त्रपाठे इत्यर्थः अतो नामवरणकाले विज्ञालक्ष्मी नाम भवति प्राणादिमागमंदाय इत्यर्थः अथ प्राणादिदनपा
क्रान्त्यमितेपाते वानेदाकानिः अथि प्राणादिकलापस्य द्वयनेस्त्वं तोनो प्राणात्म्यास्मिमिधानो व्याददाम्य
वास्यविदारणकरोतीत्यर्थः न दरिद्र तत्र लाभे उक्तानस्य लिंगम ॥ ॥ नेहोगिराः द्वितीयमपासांचक्रे एन
मपर्वांगिरसमन्यतेनागानो यद्यसेन नेनो दद्वह स्यनिकद्वीथमपासांचके एनमपवद्वहस्पतिमन्यंते वा
कोहालमाविदान्वकम मदनेमिषीयाणानद्वानावमूवमदसोम्मः कामानागायत्यागिनाद्वेकामानो
भवति यएनदेवं विद्वान् सामदीथमपासे इत्यध्यात्मम ॥ द्वितीयो वरः ॥ नेहोगिराः नमन्त्यं प्राणंद्वा
गिराइत्येवं तणमदीथमपासांचके उपासनाहाननवान् वकोदाल्म इत्येवं वह्नमाणेने संबंधः तथाद्व
इस्पतिर्विद्यायाम्पइ निचोपासांचके वकदस्मेवे संबंधं एहाननवंतः केचित् एनमप्वंगिरसं द्वहस्पतिमा
यास्ये प्राणमन्यंत इतिवचनात् भवन्त्येव यथा श्रुता संभवे संभवति न यथा श्रुतमृषिवादनायामपिद्युंस
नरवनसाकृतचिन इस्माद्येत्तेपन मवसंतमृषिमपितयामध्यमाहत्समदोविस्वामित्रावामदेवोत्रिरित्या

छ॰ भा॰
१

दिऋषीनेव प्राणमापादयति श्रुतिः तथैतान्प्राणोपासकानेति गिरो बृहत्यास्तस्याः प्राणोऽङ्गिरस्त्वभेदनिरा-
नाय प्राणो हि पिता प्राणो माता इत्यादिवच्च तस्माद्वृषिर्गिरा नाम प्राण एव सन्नात्मानमङ्गिरसं प्राणमुपा-
सांचक्रे इत्येतद्यद्यस्मात्तेनाङ्गानां प्राणः सन्नामः तेनाभ्रावेगिरसः तथा वाचो बृहत्याः पतिस्तेनासौ बृहस्प-
तिः तथायास्य आस्याद्यदयते निर्गच्छतीति तेनायास्य ऋषिः प्राण एव सन्नित्यर्थः तथान्योप्युपासक आत्मा-
नमेवांगिरसादिगुणं प्राणमुद्गीथमुपासीतेत्यर्थः न केवलमङ्गिरःप्रभृतय उपासांचक्रिरे तं ह बको दा-
लभ्यस्यापत्यं दाल्भ्यो विदांचकार यथादर्शितं प्राणं विज्ञातवान् विदित्वा च स ह नैमिषीयानां सत्रिणामु-
द्गाता बभूव स च प्राणविज्ञानसामर्थ्यादेभ्यो नैमिषीयेभ्यः कामानागायति स्म ह गीतवान्किलेत्यर्थः तथा-
न्योप्युद्गाता आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुक्तगुणं प्राणमक्षरमुद्गीथमुपास्ते तस्येदं दृष्टं
फलमुक्तं प्राणात्मभावश्चादृष्टं देवो भूत्वा देवानप्येतीति श्रुत्यंतरात्सिद्धमेवेत्यभिप्रायः॥ इत्यध्यात्ममेतदा-
त्मविषयमुद्गीथोपासनमित्युक्तोपसंहारोऽथाधिदैवतमुद्गीथोपासनं वक्ष्यामोऽनावृद्धिसमाधानार्थः द्वितीयः
खंडः २ अथाधिदैवतम् य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायत्युद्यंस्तमो भयम-
पहन्त्यपहंता ह वै भयस्य तमसो भवति य एवं वेद समान उ एवायं चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्ष-
ते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा एतमिमममुं चोद्गीथमुपासीत अथ खलु व्यानमेवोद्गीथमुपासीत ॥ ॥
अथानंतरमधिदैवतं देवताविषयमुद्गीथोपासनं प्रस्तुतमित्यर्थोऽनेकधोपास्यत्वादुद्गीथस्य य एवासौ
आदित्यस्तपति तमुद्गीथमुपासीत आदित्यदृष्ट्योद्गीथमुपासीतेत्यर्थः तमुद्गीथमित्युद्गीथशब्दाक्षरवा-
चीसन्कथमादित्ये वर्तत इत्युच्यते उद्यन्नुद्गच्छन्वै एष प्रजाभ्यः प्रजार्थमुद्गायति प्रजानामन्नोत्पत्त्यर्थं न

ह्यनुद्यति तस्मिन्व्रीह्यादेः पक्तिः स्यात् अत उद्गायतीवोद्गायति यथैवोद्गातान्नार्थमत उद्गीथः सवितेत्यर्थः।
किं चोद्यन्नैशं तमस्तज्जं च भयं प्राणिनामपहन्ति तमेवं सवितारं यो वेद सोऽपहन्ता नाशयिता ह वै भयस्य जन्म
मरणादिलक्षणस्यात्मनस्तमसश्च तत्कारणस्याज्ञानलक्षणस्य भवति यद्यपि स्थानभेदात्प्राणादित्यौ भि
न्नाविव लक्ष्येते तथापि न तत्त्वभेदस्तयोः कथं समान उ एव तुल्य एव प्राणः सवितुर्गुणतः सविता च प्रा
णेन यस्मादुष्णोऽयं प्राणः उष्णश्चासौ सविता किं च स्वर इतीमं प्राणमाचक्षते कथयन्ति तथा स्वर इति प्र
त्यास्वर इति चामुं सवितारं यस्मात्प्राणः स्वरत्येव गच्छत्येव न पुनर्मृतः प्रत्यागच्छति सविता त्वस्तमि
त्वा पुनरप्यहन्यहनि प्रत्यागच्छति अतः प्रत्यास्वरः अस्माद्गुणतो नामतश्च समानावितरेतरं प्राणादित्यावतः
स्तत्त्वाभेदादेतं प्राणमिमममुं चादित्यमुद्गीथमुपासीत अथ खल्विति प्रकारान्तरेणोपासनमुद्गीथस्यो
च्यते व्यानमेव वक्ष्यमाणलक्षणं प्राणस्यैव वृत्तिविशेषमुद्गीथमुपासीत॥ अधुनास्य तत्त्वं निरूप्यते॥
यद्वै प्राणिति स प्राणो यदपानिति सोऽपानोऽथ यः प्राणापानयोः सन्धिः स व्यानो यो व्यानः सा वाक्तस्मादप्राण
न्ननपानन्वाचमभिव्याहरति या वाक्सर्क्तस्मादप्राणन्ननपानन्नृचमभिव्याहरति यर्क्तत्साम तस्मादप्राण
न्ननपानन्साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्ननपानन्नुद्गायति अतो यान्यन्यानि वीर्यवन्ति कर्मा
णि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानंस्तानि करोत्येतस्य हेतोर्व्यानमेवो
द्गीथमुपासीत॥ यद्वै पुरुषः प्राणिति मुखनासिकाभ्यां वायुं बहिर्निःसारयति स प्राणाख्यो वृत्तिविशेषो
वायोः यदपानिति अपश्वसिति ताभ्यामेवान्तराकर्षति वायुं सोऽपानोऽपानाख्या वृत्तिः ततः किमित्युच्यते अथ
य उक्तलक्षणयोः प्राणापानयोः सन्धिस्तयोरन्तरा वृत्तिविशेषः स व्यानो यः सांख्यादिशास्त्रप्रसिद्धः [illegible]

छां॰ भा॰

वृत्तिविशेषो व्यान इत्यभिप्रायः कस्मात्पुनः प्राणापानौ हित्वा मध्यवृत्त्यायासेन व्यान एवोपास्य उच्यते
वीर्यवत्कर्महेतुत्वात् कथं वीर्यवत्कर्महेतुत्वमित्युच्यते यो व्यानः स वाग्व्यानकार्यत्वाद्वाचः यस्माद्व्याननि
र्वर्त्या वाक् तस्मादप्राणन्ननपानन्प्राणापानव्यापारावकुर्वन्वाचमभिव्याहरति उच्चारयति लोकः तथा
वाग्विशेषमृचमृक्संस्थं च साम सामावयवं चोद्गीथमप्राणन्ननपानन्व्यानेनैव निर्वर्तयतीत्यभिप्राय
न केवलं वागाद्यभिव्याहरणमेवातस्मादन्यान्यपि यानि वीर्यवन्ति कर्माणि प्रयत्नाधिक्यनिर्वर्त्यानि य
थाग्नेर्मन्थनमाजेः सरणं धावनं दृढस्य धनुष आयमनं नमनमप्राणन्ननपानंस्तानि क
रोत्यतो विशिष्टो व्यानः प्राणादिवृत्तिभ्यो विशिष्टस्योपासनं न्याय्यः फलवत्त्वाद्राजोपासनवत् एतस्मा
द्धेतोरेतस्मात्कारणाद्व्यानमेवोद्गीथमुपासीत नान्यद्वृत्त्यन्तरं कर्मवीर्यवत्तरत्वफलम् ॥ ॥ अथ खल्
उद्गीथाक्षराण्युपासीत ॥ अथाधुनामक्षराणि माभूवन्निमित्तेना विधिनेहि ॥ उद्गीथ इति प्राण एवोत्प्रा
णेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदं सर्वं स्थितं द्यौरेवोदन्तरिक्षं गीः पृथि
वी थमादित्य एवोद्वायुर्गीरग्निस्थं सामवेद एवोद्यजुर्वेदो गीरृग्वेदस्थं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहो
ऽन्नवानन्नादो भवति य एतान्युद्गीथाक्षराण्युपास्त उद्गीथ इति ॥ उद्गीथस्योद्गीथनामाक्षराणीत्यर्थः ना
माक्षरोपासनेऽपि नामवत एवोपासनं कृतं भवेदमुकमिश्रा इतिवत् प्राण एवोदित्युपास्यमित्यत्र हेतुः प्राण
स्थितिः कथं प्राणस्योत्त्वमित्याह प्राणेन ह्युत्तिष्ठति सर्वो प्राणस्यावसाददर्शनात् अतोऽस्त्युदः प्राणस्य च
सामान्यम् वाग्गीर्वाचो ह गिर इत्याचक्षते शिष्टाः तथान्नं थमन्ने हीदं सर्वं स्थितमतोऽस्त्यन्नथकारयोश्च
सामान्यम् त्रयाणां श्रुत्युक्तानि सामान्यानि तानीतराणि तु रूपेणानुगम्यानि द्यौरेवोत् उच्चैःस्था

नात् अंतरिक्षं गीर्गिरणाल्लोकानाम् पृथिवी थं प्राणिस्थानात् आदित्य एवोत् ऊर्ध्वस्थानात् वायुर्गीः अग्न्यादी
नां गिरणात् अग्निस्थं याज्ञीयकर्मावस्थानात् सामवेद एवोत् स्वर्गसंस्तुतत्वात् यजुर्वेदो गीः यजुषा प्रत्तस्य ह
विषो देवतानां निगरणात् ऋग्वेदस्थं ऋच्यध्यूढत्वात्साम्नः उद्गीथाक्षरोपासनफलमधुनोच्यते दुग्धे दोग्धि अ
स्मै साधकाय का सा वाक् कं दोहं कोसौ दोहो ऽस्याः यो वाचो दोहः ऋगादिशब्दसाध्यं फलमित्यभिप्रायः तं वा
चो दोहं स्वयमेव वाग्दोग्ध्यात्मानमेवोद्गीथ किंचान्नवान्प्रभूतान्नः अन्नादश्च दीप्ताग्निर्भवति य एतानि
यथोक्तानि एवं यथोक्तगुणान्युद्गीथावयवानि विद्वान्सन्नुपास्ते उद्गीथ इति ॥ ॥ अथ खल्वाशीः समृद्धिरुपस
रणानीत्युपासीत ॥ अथ खल्विदानीमाशीः समृद्धिराशिषः कामस्य समृद्धिर्यथा भवेत्तदुच्यते इति वाक्यशेषः
उपसरणान्युपसर्तव्यान्युपगन्तव्यानि ध्येयानीत्यर्थः ॥ कथमित्युपासीत एवमुपासीनस्यथा ॥ ॥ येन सा
म्ना स्तोष्यन्स्यात्तत्साम उपधावेत् यस्यामृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेत् येन
छन्दसा स्तोष्यन्स्यात्तच्छन्द उपधावेत् येन स्तोमेन स्तोष्यमाणः स्यात्तं स्तोममुपधावेत् यां दिशमभिष्टोष्यन्स्यात्तां दिशमुप
धावेत् आत्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स कामः समृध्येत यत्कामः स्तुवीते
ति ॥ येन साम्ना सामविशेषेण स्तोष्यन् स्तोतिक्रियां करिष्यन्स्यात् भवेदुद्गाता तत्साम उपधावेत् उपसर्पेत् चिन्तयेदुत्पत्त्यादिभिः
यस्यामृचि तत्साम तां चर्चमुपधावेत् देवतादिभिः यदार्षेयं साम तमृषिं च यां च देवतामभिष्टोष्यन्स्यात्तां देवतामुपधा
वेत् येन छन्दसा गायत्र्यादिना स्तोष्यन्स्यात्तच्छन्द उपधावेत् अग्निष्टोमादिभिः आत्मानमन्ततः स्वरूपं नामगोत्रादि
भिः सामादिक्रमेण स्वं चात्मानमन्ततोऽन्ते उपसृत्य कामं ध्यायन्नप्रमत्तः स्वरोष्मव्यञ्जनादिभिः प्रमादमकुर्वन् ततो
ऽभ्याशो ह क्षिप्रमेव ह यद्यत्र यस्मा एवंविदे स कामः समृध्येत समृद्धिं गच्छेत् कोसौ यत्कामः यः कामोऽस्य सोऽयं यत्कामः

छां॰ भा॰

थनिरूपणाच्छेषो व्यान इत्यभिप्रायः कस्मात्पुनः प्राणापानौ हित्वा महता आयासेन व्यानस्यैवोपासनमुच्यते
वीर्यवत्कर्महेतुत्वात् कथं वीर्यवत्कर्महेतुत्वमित्युच्यते यो व्यानः सा वाग्व्यानकार्यत्वाद्वाचः यस्माद्व्याननि
र्वर्त्या वाक्तस्मादप्राणन्ननपानन्प्राणापानव्यापारावकुर्वन्वाचमभिव्याहरत्युच्चारयति लोकः तथा
वाग्विशेषामृचमृक्संस्थं च साम सामावयवं चोद्गीथमप्राणन्ननपानन्व्यानेनैव निर्वर्तयतीत्यभिप्राय
न केवलं वागाद्यभिव्याहरणमेवातस्मादन्यान्यपि यानि वीर्यवन्ति कर्माणि प्रयत्नाधिक्यनिर्वर्त्यानि य
थाग्नेर्मन्थनमाजेर्मर्यादायाः सरणं धावनं दृढस्य धनुष आयमनमाकर्षणमप्राणन्ननपानंस्तानि क
रोत्यतो विशिष्टो व्यानः प्राणादिवृत्तिभ्यो विशिष्टस्योपासनं न्याय्यं फलवत्त्वाद्राजोपासनवत् एतस्य
हेतोरेतस्मात्कारणाद्व्यानमेवोद्गीथमुपासीत नान्यद्वृत्त्यन्तरं कर्मवीर्यवत्तरत्वं फलम् ॥ ॥ अथ खलू
द्गीथाक्षराण्युपासीत ॥ अथाधुना नामाक्षराणि मा भूवन्नित्येना विशिनष्टि ॥ उद्गीथ इति प्राण एवो
त्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदं सर्वं स्थितं द्यौरेवोदन्तरिक्षं गीः पृथि
वी थमादित्य एवोद्वायुर्गीरग्निस्थं सामवेद एवोद्यजुर्वेदो गीरृग्वेदस्थं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहो
ऽन्नवानन्नादो भवति य एतान्युद्गीथाक्षराण्युपास्त उद्गीथ इति ॥ उद्गीथस्योद्गीथनामाक्षराणीत्यर्थः ना
माक्षरोपासनेऽपि नामवत एवोपासनं कृतं भवेदमुकमिश्रा इतियद्वत् प्राण एवोदित्यस्मिन्नक्षरे प्राण
दृष्टिः कथं प्राणस्योत्त्वमित्याह प्राणेन ह्युत्तिष्ठति सर्वोऽप्राणस्यावसाददर्शनात् अतोऽस्त्युदः प्राणस्य च
सामान्यम् वाग्गीर्वाचो ह गिर इत्याचक्षते शिष्टाः तथान्नं थमन्ने हीदं सर्वं स्थितमतस्त्वान्नस्य थकारस्य च
सामान्यम् त्रयाणां श्रुत्युक्तानि सामान्यानि तानि तेनानुसृत्योत्तरेष्वपि द्रष्टव्यानि द्यौरेवोत् उच्चैःस्था

नात् अन्तरिक्षं गीर्गिरणाल्लोकानाम् पृथिवी थं प्राणिस्थानात् आदित्य एवोत् ऊर्ध्वस्थानात् वायुर्गीः अग्न्यादी
नां गिरणात् अग्निस्थं याज्ञीयकर्मावस्थानात् सामवेद एवोत् स्वर्गसंस्तुतत्वात् यजुर्वेदो गीः यजुषा प्रत्तस्य ह
विषो देवतानां गिरणात् ऋग्वेदस्थं ऋच्यध्यूढत्वात्साम्नः उद्गीथाक्षरोपासनफलमधुनोच्यते दुग्धे दोग्धि अ
स्मै साधकाय कामान् कः दोहः को सौ दोहो इत्याह यो वाचो दोहः ऋग्वेदादिशब्दसाध्यं फलमित्यभिप्रायः तद्वा
चो दोहस्तं स्वयमेव वाग्दोग्ध्यात्मानमेव दोग्धि किं चान्नवान्प्रभूतान्नः अन्नादश्च दीप्ताग्निश्च भवति य एतानि
यथोक्तानि एवं यथोक्तगुणान्युद्गीथावयवानि विद्वान्सन्नुपास्ते उद्गीथ इति ॥ ॥ अथातः आशीःसमृद्धिरुपस
रणानीत्युपासीत ॥ अथानन्तरमिदानीमाशीःसमृद्धिराशिषः कामस्य समृद्धिर्यथा भवेत्तदुच्यत इति वाक्यशेषः
उपसरणान्युपसर्तव्यान्युपगन्तव्यानि ध्येयानीत्यर्थः ॥ कथमित्युपासीत एवं क्रमेणोपासीत तद्यथा ॥ ॥ येन सा
म्ना स्तोष्यन्स्यात्तत्सामोपधावेत् यस्यामृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेद्येन
च्छन्दसा स्तोष्यन्स्यात्तच्छन्द उपधावेद्येन स्तोमेन स्तोष्यमाणः स्यात्तं स्तोममुपधावेद्यां दिशमभिष्टोष्यन्स्यात्तां दिशमु
पधावेदात्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स कामः समृध्येत यत्कामः स्तुवीते
ति ॥ येन साम्ना सामविशेषेण स्तोष्यन् स्तुतिं करिष्यन्स्याद्भवेदुद्गाता तत्सामोपधावेदुपसरेच्चिन्तयेदुत्पत्त्यादिभिः
यस्यामृचि तत्साम तां चर्चमुपधावेद्देवतादिभिर्यदार्षेयं साम तं चर्षिं यां च देवतामभिष्टोष्यन्स्यात्तां देवतामुपधा
वेद्येन छन्दसा गायत्र्यादिना स्तोष्यन्स्यात्तच्छन्द उपधावेत् अग्निष्टोमादिभिरात्मानमुद्गाता स्वरूपं नामगोत्रादि
भिः सामादिक्रमेण स्वं चात्मानमन्ततोऽन्ते उपसृत्य कामं ध्यायन्नप्रमत्तः स्वरोष्मव्यञ्जनादिभिः प्रमादमकुर्वन् ततो
ऽभ्याशो ह क्षिप्रमेव ह यद्यत्रास्मा एवंविदे स कामः समृध्येत समृद्धिं गच्छेत् कोऽसौ यत्कामः यः कामो यस्यासौ यत्कामः

छां. भा.
८

सन्नत्त्वीतेनिहि स्किंगदागाथो र ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानं देवा वै
मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशंस्ते छन्दोभिरच्छादयन्यदेभिरच्छादयंस्तच्छन्दसां छन्दस्त्वं तानु तत्र मृत्युर्यथा म-
त्स्यमुदके परिपश्येदेवं पर्यपश्यदृचि साम्नि यजुषि ते नु विदित्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन् यदा
वा ऋचमाप्नोत्योमित्येवातिस्वरत्येवं सामैवं यजुरेष उ स्वरो यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य देवा अमृता
अभवन् स य एतदेवं विद्वानक्षरं प्रणौत्येतदेवाक्षरं स्वरममृतमभयं प्रविशति तत्प्रविश्य यदमृता देवास्तदमृ-
तो भवति चतुर्थः खण्डः ४ ओमित्येतदित्यादि प्रकृतस्याक्षरस्य पुनरुपादानमुद्गीथाक्षरमुपासनीयमित्यादरार्थं
च प्रयोगोमाभूदित्येवमर्थम् प्रकृतस्यैवाक्षरस्यामृताभयगुणविशिष्टस्योपासने विधातव्यमित्यारंभः ओमि-
त्यादिव्याख्यानम् देवा वै मृत्योर्मारकाद्बिभ्यतः किं कृतवन्त इत्युच्यते त्रयीं विद्यां त्रयीविहितं कर्म प्राविशन् प्र-
विष्टवन्तो वैदिकं कर्म प्रारब्धवन्त इत्यर्थः तन्मृत्योस्त्राणं मन्यमानाः किं च ते कर्मण्यपि विनियुक्तैश्छन्दोभिर्मन्त्रैर्ज-
पहोमादि कुर्वन्त आत्मानं कर्मान्तरेष्वाच्छादितवन्तः यद्यस्मादेभिर्मन्त्रैराच्छादयंस्तत्तस्माच्छन्दसां मन्त्राणां छादनात्
छन्दस्त्वं प्रसिद्धमेव तानु तत्र देवान्कर्मपरान्मृत्युर्यथा लोके मत्स्यघातको मत्स्यमुदके नातिगम्भीरे परिपश्येत्
बडिशोदकस्रावोपायसाध्यं मन्यमान एवं पर्यपश्यत् दृष्टवान्मृत्युः कर्मक्षयोपायेन साध्यान्देवान्मेन इत्यर्थः
क्वासौ देवान्ददर्शेत्युच्यते ऋचि साम्नि यजुषि ऋग्यजुःसामसंबन्धिकर्मणीत्यर्थः ते नु देवा वैदिकेन कर्मणा सं-
स्कृताः शुद्धात्मानः सन्तो मृत्योश्चिकीर्षितं विदितवन्तो विदित्वा च ते ऊर्ध्वा व्यावृत्ताः कर्मभ्य ऋचः साम्नो यजुषः ऋग्यजुः-
सामसंबद्धात्कर्मण इत्यर्थः तेन कर्मणा मृत्युभयापगमं प्रति निराशास्तदपास्यामृताभयगुणमक्षरं स्वरशब्दितं
प्राविशन्नेव प्रविष्टवन्त ओमित्येतदुपासनपराः ओंकारोपासनपराः संवृत्ता इत्यर्थः एवशब्दोऽवधारणार्थः सन्समुच्चयप्र।

निषेधार्थः कथं उ नास्वरसाद्वा विनमत्तरस्यास्यच्यते यदावेक्षमृच्छमाप्नोति उमिमेवानिस्वरनिपद्वंसामैवेयन्तः
पथउस्वरः कोसायदेनदत्तमेनाश्चमृतममभयेनन्ताविशयथयाउणमेवामृताश्चमयाश्चामवेदेवाः सयान्योपिदेवदे
वेनदत्तरमेवममृतममभयउणविद्वान्प्राणिनिसोति उपासनमेवात्रमृतिरभिप्रेता सनयैवेनदत्तंस्वरसमृ।
तममभयंप्रविशति तन्नाविशयचरानउलेप्रविष्टनामिवराज्ञीनदेवावहिरंतनावत्रपरस्पबहलाणानरंगानाविशे।
षःकिंनर्हियदमृतादेवायेनामृतत्वेनयदमृताश्चभूवन् तेनैवामृतत्वेनविशिष्टमदमृतोभवतिनतृनताना।
धिकतामृतत्वमित्यर्थः ॥ प्राणादिमहर्षिविशिष्टस्योद्गीथस्योपासनमनुक्रमेवानूद्य प्राणवाद्गीथयोरेकत्वेक
त्वानसिद्धमणारसिमभेदगुणविशिष्टस्यस्वरस्योपासनमनेन वत्रफलमिदानीवक्तव्यमित्यारभ्यते ॥ अथखलु
यउद्गीथःसप्रणवोयःप्रणवःसउद्गीथइत्यसौवाआदित्यउद्गीथएषप्रणवः उमितिह्येषस्वरन्नेतीत्यनसपवाह
मभ्यगासिषंतस्मात्त्वमेकोसीतिहकौषीतकिःपुत्रमुवाच रश्मींस्त्वंपर्यावर्तयाद्वहवोवैतेभविष्यतीत्यधि
दैवतं ॥ अथाध्यात्मं यउद्गीथःसप्रणवोबहुवानांयश्चप्रणवस्तेषांसएषकोदोयमउद्गीथवाच्योसौवाआदित्यउ।
द्गीथएषप्रणवः प्रणवएवह्यावाच्यःपिसएवबहुवानांनान्यः उद्गीथआदित्यःकथंउद्गीथःत्वमेतस्मात्मनःतदे
राणिधासामिकालेनगीतवानःस्मादित्यएवमभेदंकृत्वाध्यानेकृतवानस्मात्मनर्थः नेननसाम्नात्वाणनाहमत्वमे
कोसिपुत्रइतिकौषीतकिः कौषीतकस्यापत्यंकौषीतकिःपुत्रमुवाचातःवानु अतोनाभरमीनादित्यमेदेनत्वम
योवर्तयात्मयोवर्तयात्मयर्थः तेयोगात् एवंबहवोवैतेनेनवपुत्राभविष्यतीत्यधिदैवतम् ॥ ॥ अथाध्यात्मम्
यएवायंमुख्यःप्राणस्तमुद्गीथमुपासीतोमितिह्येषस्वरन्नेत्येतमुमेवाहमभ्यगासिषंतस्मात्ममत्वमेकोसीति

छां॰ भा॰
५

ह कौषीतकिः पुत्रमुवाच प्राणं त्वं भूमानमभिगायताद्बहवो मे भविष्यन्तीत्यथ खल्वय उद्गीथः स प्रणवो य
प्रणवः स उद्गीथ इति होतृषदनाद्धैवापि दुरुद्गीतमनुसमाहरतीति॰ पंचमः ॥ अथानेन रश्म्यात्म
तयोच्यते यथ्यवायस्माद्वाः प्राणस्तमुद्गीथमुपासीतेत्यादि पूर्ववत् तथा मितिसंख्यप्राणापिरश्मीनिति आमितो
वेऽतो ऊर्ध्वं त्रिवचनादिभ्यश्च रश्मीनिति तेषामर्थः नहि मरणकालेऽपि तेषां समीपस्थाः प्राणाः सौकरणं सृष्ट्यन्तेऽस्य
नत्सामान्यादादित्यरश्मीनां करणानां च ततो मनुरश्मीन् प्राणसहमूलं तेनैव प्रवाहमभ्यासमिच्छामि सत्यादि पूर्ववदेव अतो वाग
दीनां मुख्यप्राणभेदगुणविशिष्टमुद्गीथं पश्यन्भूमानं मनसाभिगायतात् पूर्ववदावर्तयेत्यर्थः बहवो वै
पुत्रा मे भविष्यन्तीत्येवमभिप्रायः सन्नित्यर्थः प्राणादित्यैकत्वोद्गीथदृष्टेरेकपुत्रत्वफलदोषेणोपालम्भात्प्राणरश्मि
प्राणभेददृष्टेः कर्तव्यतोच्यते नाम्नि बहुपुत्रफलत्वार्थम् ॥ अथ खलु य उद्गीथ इत्यादि प्रणवोद्गीथैक
त्वदर्शनमुक्तम् न तस्य तत्फलमुच्यते होतृषदनात् होता यत्रस्थः शंसति तस्माद्धोतृषदनात् होत्रात्कर्म
णः सम्यक् प्रयुक्तादित्यर्थः नहि देशमात्रात्फलमाहर्तुं शक्यं किं तत् दुरुद्गीतं दुष्टमुद्गीतं दुरुद्गीतमुद्गाने
नेन ... कर्मणि ... इत्यर्थः तदनुसमाहरति अनुसंधत्त इत्यर्थः चिकित्सयेव धातुवैषम्यसमीक
रणमिति ५ अथेदानीं सर्वफलसंपत्त्यर्थमुद्गीथस्योपासनान्तरं विधित्सन्नाह ॥ इयमेवर्गग्निः साम तदेतदेतस्या
मृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयत इयमेव साग्निरमस्तत्साम ॥ अन्तरिक्षमेवर्ग्वायुः साम तदेतदेतस्या
मृच्यध्यूढं साम गीयते द्यौरेवर्गादित्योऽन्तरिक्षमेव सा वायुरमस्तत्साम ॥ नक्षत्राण्येवर्क्चन्द्रमाः साम
तदेतत्साम ऋच्यध्यूढं साम गीयते अथ यदेतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्सामैतत्सादित्या
दि अथ यदेतदादित्यस्य शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमस्तत्साम ॥ ॥ इयमेव पृथिव्यृक् ...

थिवी दृष्टिः कार्या तथाग्निः साम साम्न्यग्निदृष्टिः कथं पृथिव्यग्न्योः ऋक्सामत्वमित्युच्यते तदेतदग्न्याख्यं साम एतस्यां
पृथिव्यामृच्यध्यूढमधिगतमुपरिभावेन स्थितमित्यर्थः ऋचीव साम तस्मादत एव कारणादृच्यध्यूढमेव साम
गीयते इदानीमपि सामगैः यथा च ऋक्सामनी नात्यन्तं भिन्ने अन्योन्यं तथैतौ पृथिव्यग्नी कथं इयमेव पृथिवी
सा साम्नः सार्धनामार्धशब्दवाच्या इतरार्धशब्दवाच्योऽग्निरमः तदेतत्पृथिव्यग्निद्वयं सामैकनामाभिधेयत्वमापन्नं साम तं
स्मान्नान्योन्यं भिन्नं पृथिव्यग्निद्वयं नित्यसंश्लिष्टमृक्सामनी इव तस्माच्च पृथिव्यग्न्योः ऋक्सामत्वमित्यर्थः सा
मादक्षरयोः पृथिव्यग्निदृष्टिविधानार्थमियमेव साग्निरम इति केचित् अन्तरिक्षमेवर्क् वायुः साम इत्यादि पूर्ववत्
नक्षत्राणामधिपतिश्चन्द्रमाः अतः स साम अथ यदेतदादित्यस्य शुक्लं भाः शुक्ला दीप्तिः सैवर्क् ऋग्विनदृष्टिप्रक
र्षेवा अथ यदादित्ये नीलं परः कृष्णं परोऽतिशयेन कार्ष्ण्यं तत्साम तद्ध्येकान्तसमाहितदृष्टेर्दृश्यते अत एवैते
भाःशुक्लकृष्णे सा चामश्च साम ॥ ॥ अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः
आप्रणखात्सर्व एव सुवर्णः तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित
उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद अथ य एषोऽन्तरादित्ये आदित्यमण्डलस्य मध्ये हिरण्मयो हिरण्मय इव हिरण्मयो
न हि हिरण्यविकारत्वं देवस्य संभवति ऋक्सामगेष्णत्वापहतपाप्मत्वासंभवात् न हि सौवर्णे चेतने पाप्मादि
प्राप्तिरस्ति येन प्रतिषिध्येत चाक्षुषे चाग्रहणात् अतो लुप्तोपम एव हिरण्मयशब्दो ज्योतिर्मय इत्यर्थः उत्तरेष्वपि
समाना योजना पुरुषः पुरि शयनात्पूरयति वा स्वेनात्मना जगदिति दृश्यते निवृत्तचक्षुर्भिः समाहितचेतोभिर्ब्र
ह्मचर्यादिसाधनापेक्षैः तेजस्विनोऽपि श्मश्रुकेशादयः कृष्णाः स्युरित्यतो विशिनष्टि हिरण्यश्मश्रुर्हिरण्यकेश इति
ज्योतिर्मया एवास्य श्मश्रूणि केशाश्चेत्यर्थः आप्रणखात् प्रणखो नखाग्रं नखाग्रेण सह सर्वः सुवर्ण इव भारूप

छां. भा.
१.

इत्यर्थः तस्यैवं सर्वतः सुवर्णवर्णस्याप्यक्ष्णोर्विशेषः कथं तस्य यथा कपेर्मर्कटस्यासः कप्यासः आसेरुपवेशना-
र्थस्य करणे घञ् कपिपृष्ठान्तो येनोपविशति कप्यास इव पुण्डरीकमत्यन्ततेजस्व्येवमस्य देवस्याक्षिणी उपमि-
तोपमानत्वान्न हीनोपमा तस्यैवं गुणविशिष्टस्य गौणमिदं नामोदिति कथं गौणत्वं स एष देवः सर्वेभ्यः पाप्मभ्यः
पाप्मना सह तत्कार्येभ्य इत्यर्थः य आत्मापहतपाप्मेत्यादि वक्ष्यति उदित उदितः उद्गत इत्यर्थः अतोऽसावुन्नामा
तमेवं गुणसम्पन्नमुन्नामानं यथोक्तेन प्रकारेण यो वेद सोऽप्येवमेवोदेति उद्गच्छति सर्वेभ्यः पाप्मभ्यः ह वै इत्यवधा-
रणार्थौ निपातौ उदेत्येवेत्यर्थः ॥ ॥ तस्योद्गीथत्वं देवस्यादित्यादीनामिव विवक्षितमाह ॥ तस्यर्क्च साम च गे-
ष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतं
[illegible] ॥ तस्यर्क्च साम च गेष्णौ पृथिव्याद्युक्तलक्षणे पर्वणी सर्वात्मा हि देवः परापरलोककामेशितृत्वा-
दुपपद्यते पृथिव्यग्न्याद्यृक्सामगेष्णत्वं च सर्वयोनित्वात् यत एवमुन्नामा सावृक्सामगेष्णश्च तस्मात् [illegible]
गेष्णत्वान्मे उद्गीथत्वमुच्यते परोक्षेण परोक्षप्रिया हि देवा इति तस्मादुद्गीथ इति तस्मात्त्वेव हेतोरुन्नामत उद्गायतीत्यु-
द्गाता यस्माद्ध्येतस्य यथोक्तस्योन्नाम्नो गाता सावतो युक्ता उद्गातेति नामप्रसिद्धिरुद्गातुः स एष उन्नामा ये चामुष्मा-
दादित्यात्पराञ्चः पराञ्चनास्त्यूर्ध्वा लोकास्तेषां लोकानां चेष्टे न केवलमीशितृत्वमेव च पाति धारयति च स दाधा-
र पृथिवीं द्यामुतेमामित्यादिमन्त्रवर्णात् किंच देवकामानामीष्ट इत्येतदधिदैवतम् देवताविषयं देवस्योद्गी-
थस्य स्वरूपमुक्तम् ६ अधुनाध्यात्ममुच्यते ॥ अथाध्यात्मं वागेवर्क्प्राणः साम तदेतदेतस्यामृच्यध्यू-
ढं साम तस्मादृच्यध्यूढं साम गीयते वागेव सा प्राणोऽमस्तत्साम चक्षुरेवर्गात्मा साम तदेतदेतस्यामृच्यध्यूढं साम।
तस्मादृच्यध्यूढं साम गीयते चक्षुरेव सात्मामस्तत्साम श्रोत्रमेवर्ङ्मनः साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्य।

ध्यूढं साम गीयते श्रोत्रमेव सा मनोऽमस्तत्साम अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्सामेत्यादि
पूर्ववत् यदेतदक्ष्णः शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमः तत्साम अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैव
ऋक् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम स एष ये चैतस्मा
दर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेति ॥ ॥ वागेवर्क् प्राणः साम अधरोपरिस्थानत्वसामान्यात् प्राणो घ्राण
मुच्यते सह वायुना वागेवर्क्सा प्राणोऽमः इत्यादि सर्वं पूर्ववत् चक्षुरेवर्गात्मा साम आत्मेति छायात्मा तत्स्थत्वात्साम श्रोत्रमे
वर्क् मनः साम श्रोत्रस्याधिष्ठातृत्वान्मनसः साम अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं साम आदित्य
दृक्शक्त्यधिष्ठानत्वात्साम अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते पूर्ववत् सैवर्गध्यात्मं वागाद्याश्चाधि
दैवतं च प्रसिद्धा च ऋक् पादबद्धाक्षरात्मिका तथा साम स्तोत्रसंबद्धं साम ऋक्शस्त्रं उक्थं तथा यजुः
स्वाहास्वधावषडादि सर्वमेव वाग्यजुः तत्स एव सर्वात्मत्वात्सर्वयोनित्वाच्चेति ह्यवोचाम ऋगादिप्रकरणात्।
ब्रह्मेति त्रयो वेदास्तस्यैतस्य चाक्षुषस्य पुरुषस्य तदेव रूपमतिदिश्यते किं तद्यदमुष्यादित्यस्य पुरुषस्य हिरण्मय
इत्यादि यदधिदैवतमुक्तम् यावमुष्य गेष्णौ पर्वणी तावेवास्यापि चाक्षुषस्य गेष्णौ यन्नामामुष्य नामोदित्युद्गीथ इति
च तदेवास्य नाम स्थानभेदात् रूपगुणनामातिदेशाद्दीप्तिमत्त्वविषयभेदव्यपदेशाच्चादित्यचाक्षुषयोर्भेद इति।
चेन्न अमुनानेनैवेत्येकस्योभयात्मप्राप्त्यनुपपत्तेः द्विधाभावेनोपपद्यत इति चेत् वक्ष्यति हि स एकधा भवति त्रि
धा भवतीत्यादि न चेतनस्यैकस्य निरवयवत्वाद् द्विधाभावोपपत्तिस्तस्मादध्यात्माधिदैवतयोरेकत्वमेव यत्तु
रूपाद्यतिदेशो भेदकारणमवोचः न तद्भेदावगमाय किं तर्हि स्थानभेदादभेदो मा भूदित्येवमर्थम् स एष चा
क्षुषः पुरुषः ये चैतस्मादाध्यात्मिकादात्मनोऽर्वाञ्चो लोका अवागता लोकास्तेषां चेष्टे मनुष्यसंबन्धिनां च कामानां ॥ ॥

छां. भा. ॥

नत्वहमेवोद्गायामीत्येतेनैवोद्गायेति तस्मादेवन एनये य एवं विद्वान्साम गायति उभौ स गायति सोऽमुनैव
स एष ये चामुष्मात्पराञ्चो लोकास्तांश्चाप्नोति मनुष्यकामांश्च तस्मादु हैवंविदुद्गाता ब्रूयात् कं ते काममागायानी
त्येष ह्येव कामागानस्येष्टे य एवं विद्वान्साम गायति ॥ २२ ॥ न त्वस्मादहमेवोद्गायामीति गायेत स एतमेव
गायेत् यस्मादीश्वरोद्गायेति तस्मादेवं न एवं नयो धनलाभसम्बन्धः तद्वत्तत्स्मर्यः अथ य एतदेवं विद्वानुपास्य
देवमहोदेव विद्वान्साम गायति उभौ स गायति वाक्त्वमादित्यं च तस्यैवंविदः फलमुच्यते सोऽमुनैवादित्येन स एष
ये चामुष्मात्पराञ्चो लोकास्तांश्चाप्नोत्यादित्यसंस्थितो देवाभूत्वेत्यर्थः देवकामांश्च अथानेनैव वाक्त्वेन ये चैत
स्मादर्वाञ्चो लोकास्तांश्चाप्नोति मनुष्यकामांश्च वाक्त्वेनाभूत्वेत्यर्थः तस्मादु हैवंविदुद्गाता ब्रूयाद्यजमानं कमिष्टं
तेन तव काममागायानीत्येष हि यस्मादुद्गाता कामगानस्योद्गानेन कामं सम्पादयितुमीष्टे समर्थ इत्यर्थः कोऽसौ
य एवं विद्वान्साम गायति साम गायति द्विरुक्तिरध्यायसमाप्त्यर्था [illegible] अनेकाधुपास्यत्वादक्षरस्य प्रकरणान्तरेण परोवरीयस्त्व
गुणफलमुपासनान्तरमानिनायेति हासः ॥ ॥ त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्य
चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथां वदाम इति तथेति ह सम
पविविशुः ॥ त्रयस्त्रिसंख्याकाः ह इति ऐतिह्यार्थः उद्गीथे उद्गीथज्ञानं प्रति कुशला निपुणा बभूवुः कस्मिंश्चिद्देश
काले निमित्ते च समेतानामित्यभिप्रायः नहि सर्वस्मिन्जगति त्रयाणामेव कौशल्यमुद्गीथादिविज्ञाने श्रूयते ह्यु
षस्ति जानश्रुति कैकेय प्रभृतयः सर्वज्ञकल्पाः के ते त्रय इत्याह शिलको नामतः शलावतोऽपत्यं शालावत्यः
चिकितायनस्यापत्यं चैकितायनः द्व्यामुष्यायणो दाल्भ्यः [illegible] प्रवाहणो नामतः जीवलस्यापत्यं जैव
लिरित्येते त्रयः ते होचुः अन्योन्यमुद्गीथे वै कुशला निपुणा इति प्रसिद्धाः स्मः अतो हन्त यद्यनुमतिर्भवतामुद्गीथे

ह्रीयतां निमित्तो कथां विचारणां पक्षप्रतिपक्षोपन्यासेन वदामो वादं कुर्म इत्यर्थः तथा च तद्विद्यसंवादे विपरी
तग्रहणनाशः अपूर्वविज्ञानोपजनः संशयनिवृत्तिश्चेत्यतस्तद्विद्यसंयोगः कर्तव्य इति चेतिहासप्रयोजनं तेह तथेत्युक्त्वा शि
लकादीनां तथेत्युक्त्वा समुपविविशुः उपविष्टवन्तः किल तत्र राज्ञः प्रागल्भ्योपपत्तेः स ह प्रवाहणो जैवलिरु
वाचेतरौ ॥ सह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामीति स ह शिलकः शा
लावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति होवाच का साम्नो गतिरिति स्वर इति होवाच स्वरस्य
का गतिरिति प्राण इति होवाच प्राणस्य का गतिरिति अन्नमिति होवाचान्नस्य का गतिरिति आप इति होवाचापां का गति
रित्यसौ लोक इति होवाचामुष्य लोकस्य का गतिरिति न स्वर्गं लोकमतिनयेदिति होवाच स्वर्गं वयं लोकं सामाभिसंस्था
पयामः स्वर्गसंस्तावं हि सामेति भगवन्तौ पूज्यावग्रे पूर्वं वदतां ब्राह्मणयोरित्युक्तलिङ्गाद्राजासौ युवयोर्ब्रा
ह्मणयोर्वदतोर्वाचं श्रोष्यामीति अर्थं वदतोरित्यस्य पुनरेवाचेति विशेषणात् उक्तयोः सह शिलकः शालावत्यश्चै
कितायनं दाल्भ्यमुवाच हन्त यद्यनुमंस्यसे त्वा पृच्छानीत्युक्त इतरः पृच्छेति होवाच लब्धानुमतिराह का साम्नः
प्रकृतत्वादुद्गीथस्य उद्गीथो ह्यत्रोपास्यत्वेन प्रकृतः परोवरीयोगुणस्योमित्येवं सामगतिराश्रयः परायणमिति
एतदेवं पृष्टो दाल्भ्य उवाच स्वर इति स्वरात्मकत्वात्साम्नः यो यदात्मकः स तद्गतिस्तदाश्रयश्च भवतीति युक्तं मृदा
श्रय इव घटादिः स्वरस्य का गतिरिति प्राण इति होवाच प्राणनिष्पाद्यो हि स्वरः तस्मात्प्राणः स्वरस्य गतिः प्राणस्य
का गतिरिति अन्नमिति होवाच अन्नावष्टम्भो हि प्राणः शुष्यति वै प्राणः ऋते अन्नादिति हि श्रुतेः अन्नं दाम इति च श्रुतेः अन्न
स्य का गतिरिति आप इति होवाच अप्संभवत्वादन्नस्य अपां का गतिरिति असौ लोक इति होवाच अमुष्माद्धि लो
कात् वृष्टिः संभवति अमुष्य लोकस्य का गतिरिति पृष्टो दाल्भ्य उवाच स्वर्गममुं लोकमतीत्याश्रयान्तरं सामान।

नयेत क्वास्थिरिति होवाच अतो वयमपि स्वर्गं लोकं सामाभिसंस्थापयामः स्वर्गलोकप्रतिष्ठं साम जानीमहे स्व
र्गः स्वर्गसंस्तावं स्वर्गत्वेन संस्तवनं संस्तावो यस्य तत्साम स्वर्गसंस्तावं हि यस्मात् स्वर्गो वै लोकः साम सस्तावद
ति हि श्रुतिः ॥ तं ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेत
र्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवत्तो वेदानीति
विद्धीति होवाचामुष्य लोकस्य का गतिरिति अयं लोक इति होवाचास्य लोकस्य का गतिरिति न प्रतिष्ठां लोक
मतिनयेदिति होवाच प्रतिष्ठां वयं लोकं सामाभिसंस्थापयामः प्रतिष्ठासंस्तावं हि सामेति तं ह प्रवाहणो जै
वलिरुवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताह
मेतद्भगवत्तो वेदानीति विद्धीति होवाच ८ ॥ तमितरः शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच अप्र
तिष्ठमप्रतिष्ठितं समसंस्थितं परोवरीयस्त्वेन समाप्तगतिमामेत्यर्थो वै इत्यागमे स्मारयति किलेति च दाल्भ्यते
न वै साम यस्त्वसहिष्णुः सामविदेन सोऽनभिज्ञः कालेऽब्रूयात् क्षिप्रं परीतविज्ञानो प्रतिष्ठितं साम प्रतिष्ठितमिति
एवं वादापराधेन मूर्धा शिरस्ते विपतिष्यति विस्पष्टं पतिष्यतीत्येवं कृतस्यापराधिनस्तथैव तद्विपतेन्न संश
यो नत्वहं ब्रवीमीत्यभिप्रायः । ननु मूर्धपातार्हं चेदपराधं कृतवानतः परोक्तात्कृतस्यापि पतेन्मूर्धा न चेदपराधी
न कृतस्यापि न पततीति अन्यथा कृताभ्यागमः कृतनाशश्च स्यातां नैष दोषः कृतस्य कर्मणः शुभाशुभस्य फल
प्राप्तेर्देशकालनिमित्तापेक्षत्वात् तत्रैव पतितस्य मूर्धपातनिमित्तस्याप्यज्ञानस्य पराभिव्याहारनिमित्तापेक्षत्व
मित्येवं कृतो दाल्भ्यश्चाह हन्ताहं भगवतो वेदानीत्युक्त इति होवाच शालावत्यः विद्धीति होवाच
अमुष्य लोकस्य का गतिरिति पृष्टो दाल्भ्यो ह शालावत्यायं लोक इति होवाच अयं हि लोको यागदानहोमादिभि

स्वर्लोके पृथ्वीस्थितः प्रदाने देवा उपजीवंतीति हि श्रुतयः प्रसिद्धं हि सर्वभूतानां धारणीप्रतिष्ठात्वमतः साम्नोप्ययं लोकः प्र
तिष्ठेति युक्तम् अस्य लोकस्य का गतिरित्युक्त आह शालावत्यो न प्रतिष्ठामिमं लोकमतीत्य नयेत्साम कश्चिदेनावयं
प्रतिष्ठां लोके सामाभिसंस्थापयामो यस्मात्प्रतिष्ठासंस्तावं हि प्रतिष्ठात्वेन संस्तुतं सामेत्यर्थः इयं वै रथंतरमिति च।
श्रुतिः तमेवमुक्तवंतं प्रवाहणो जैवलिरुवाच अंतवद्वै किल ते शालावत्य सामेत्यादि पूर्ववत् ततः शालावत्य आ
ह हंताहमेतद्भगवत्तो वेदानीति विद्धीति होवाचेत्युक्त आह ८॥ अस्य लोकस्य का गतिरित्याकाश इति
होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते आकाशं प्रत्यस्तं यंति आकाशो ह्येवैभ्यो ज्यायानाका
शः परायणं स एष परोवरीयानुद्गीथः स एषोनंतः परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एत
देवं विद्वान्परोवरीयांसमुद्गीथमुपास्ते ॥ अस्य लोकस्य का गतिरित्याकाश इति होवाच प्रवाहणः आकाश इति च प
रः आत्माकाशो वै नामेति श्रुतेः तस्य हि कर्म सर्वभूतोत्पादकत्वं तस्मिन्नेव हि भूतप्रलयः तत्तेजोसृजतेति तेजः पर
स्यां देवतायामिति हि वक्ष्यति सर्वाणि ह वा इमानि भूतानि स्थावरजंगमानि आकाशादेव समुत्पद्यंते तेजोबन्नादि
क्रमेण सामर्थ्यादाकाशं प्रत्यस्तं यंति प्रलयकाले तेनैव विपरीतक्रमेण हि यस्मादाकाश एभ्यः सर्वेभ्यो भूते
भ्यो ज्यायान्महत्तरः अतः सर्वेषां भूतानां परमयनं परायणं प्रतिष्ठा त्रिष्वपि कालेष्वित्यर्थः यस्मात्परोवरीयः वरी
यसोप्येष परः परश्च वरीयांश्च परोवरीयान् उद्गीथः परमात्मा संपन्न इत्यर्थः अत एव स एषोनंतः अविद्यमानान्त
स्तमेतं परोवरीयांसं परमात्मभूतमनंतमेवं विद्वान्परोवरीयांसमुद्गीथमुपास्ते तस्यैतत्फलमाह परोवरीयः प
रंवरं विशिष्टतरं जीवनं हास्य विदुषो भवति दृष्टं फलमदृष्टं च परोवरीयसः उत्तरोत्तरविशिष्टतरानेव ब्रह्माका
शांतान् लोकान् जयति य एतदेवं विद्वानुद्गीथमुपास्ते ॥ किंच तं हैतमतिधन्वा शौनक उदरशांडिल्यायोक्त्वोवाच

यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिंल्लोके जीवनं भवति तथामुष्मिंल्लोके लोकः स य
एतमेवं विद्वानुपास्ते परोवरीय एव हास्यास्मिंल्लोके जीवनं भवति तथामुष्मिंल्लोके लोके लोक इति नवमः खण्डः ९ ॥
तमेतमुद्गीथं विद्वानतिधन्वा नामतः शुनकस्यापत्यं शौनकः उदरशाण्डिल्याय शिष्यायैतमुद्गीथदर्शनमुक्त्वो-
वाच यावत्ते तव प्रजायां प्रजासन्तताविति अर्थः उद्गीथं त्वत्सन्ततिजा वेदिष्यन्ते ज्ञास्यन्ति तावन्तं कालं परोवरीयो हैभ्यः
प्रसिद्धेभ्यो लौकिकजीवनेभ्य उत्तरोत्तरविशिष्टतरं जीवनं तेभ्यो भविष्यति तथा दृष्टेऽपि परलोकेऽमुष्मिन्परोवरी-
यांल्लोको भविष्यतीत्युक्तवान् शाण्डिल्यायातिधन्वा शौनकः स्यादेतत्फलं पूर्वेषां महाभाग्यानां नेदंयुगीनानामि-
त्याशङ्कानिवृत्तये आह स यः कश्चिदेतमेवं विद्वानुद्गीथमेतर्ह्युपास्ते तस्याप्येवमेव परोवरीय एव हास्यास्मिंल्लोके
जीवनं भवति तथामुष्मिंल्लोके लोक इति लोके लोक इति । उद्गीथोपासनप्रसङ्गेन प्रस्तावप्रतिहारविषयमप्यु-
पासनं वक्तव्यमितीदमारभ्यते ॥ मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक
उवास स हेभ्यं कुल्माषान्खादन्तं बिभिक्षे तं होवाच नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इति एतेषां मे देहीति हो-
वाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टं वै मे पीतं स्यादिति होवाच न स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमा-
न खादन्निति होवाच कामो म उदकपानमिति स ह खादित्वातिशेषाञ्जायाया आजहार साग्र एव सुभिक्षा बभूव ता-
न्प्रतिगृह्य निदधौ ॥ आख्यायिका सुखावबोधार्था मटचीहतेषु मटच्यो अशनयः ताभिर्हतेषु नाशितेषु कुरुषु कुरु-
सस्येष्वित्यर्थः ततो दुर्भिक्षे जाते आटिक्या अनुपजातपयोधरादिस्त्रीव्यञ्जनया सह जायया उषस्तिर्ह नामतः चक्रस्या-
पत्यं चाक्रायणः इभो हस्ती तमर्हतीतीभ्य ईश्वरो हस्त्यारोहो वा तस्य ग्राम इभ्यग्रामस्तस्मिन्प्रद्राणकोऽन्नालाभाद्द्रा-
न्त्यावस्थां गतो मरणासन्न इत्यर्थः उवासोषितवान्कस्यचिद्गृहमाश्रित्य सोऽन्नार्थमटन्निभ्यं कुल्मा-

षाकमित्वाश्माषान्वादेनेयदुक्योपलभ्यविभिद्वेयाचितवान् तमृषिर्विहस्यवाचेभ्यः नेतोस्मान्याभक्ष्यमाणाड
क्षिप्राणोःउल्माषाश्चन्यविद्येनेयस्यप्रेयाशोमेयमेपनिहिताःशक्तिमाश्मेभाजनेकिंकरोमीत्युक्तःपश्चवाचोषस्तिः
यनेषामेतान्निस्तर्थः मेमस्येदेदीनिहावाच नान्यस्यास्माउषयेलप्रदेशप्रदत्तवान्पानायममीपस्थमुदकं देवाः
हानुपानमित्युक्तःपश्चवाचउक्तिष्टेवैमममेदमुदकंपीनस्याद्यदिपास्यामीत्युक्तवंतंपश्चवाचेनरः किंनस्विदेत
उल्माषाश्युक्तिष्टमित्युक्तआहोषस्तिः नवैस्यजीविष्येनजीविष्यामीमानुउल्माषानावादन्यत्रभक्तयनइतिहोवा
चकामम्रउकानोममेमोदपानेलभ्यनइत्यर्थः अतस्वेनामवस्थामासंप्राविद्यायर्मेयशोवतःस्वात्मपरोपकारसम
र्थेस्यानदपिकर्मेउर्वतोनागःस्पर्शइत्यभिप्रायः तस्यापिजीवितेप्रतिसंशयपयोगनेरेजउष्यितस्तेनतकर्मेदोषायहा
नावलेपेनउर्वतोनरकपातःस्यादेवेत्यभिप्रायाःप्रज्ञाणकस्योपश्रवणात् तांश्चमावादितानिशेषाननिःष्ठिए
जायायैकारुणाराजहार सारकाप्रथउल्माषप्राभिःस्तिमिताप्रोभनेभितालब्धाप्येनेतद्भूवसंहृत्यानयापिष्टी
स्वाभाव्यादनवेज्ञायताउल्माषान्यस्मेदत्वान्यतिहृष्टानिदर्शनिस्मिवती ॥ ॥ सद्प्रानःसंजिहानउवाच य
द्दनानुसलेभमहि लेभमहिधनमात्रंराजासोयक्ष्यते समाश्वेंगत्विज्यैवृत्तीतेतितंजायोवाचहंतपतइमइवउल्मा
षइतितान्स्वादित्वातंयज्ञंविततमेयायतत्रोद्गातॄनास्तावेस्तोष्यमाणानुपविवेशसहप्रस्तोतारमुवाचप्रस्तोतर्या
देवताप्रस्तावमन्वायत्तातांचेदविद्वान्प्रस्तोष्यसिमूर्धातेविपतिष्यतीत्येवमेवोद्गातारमुवाच उद्गातर्यादेवतोद्गीथ
मन्वायत्तातांचेदविद्वानुद्गास्यसिमूर्धातेविपतिष्यतीति एवमेवप्रतिहर्तारमुवाचप्रतिहर्तर्यादेवताप्रतिहारमन्वा
यत्तातांचेदविद्वान्प्रतिहरिष्यसिमूर्धातेविपतिष्यतीतिनेहसमारतास्तूष्णीमासांचक्रिरे सनस्याःकर्मभ्यानानुपात
हृषःकालेसंजिहानःपायनेनिषेवापरित्यजनउवाचपश्चाःशुश्रूषवःयद्दैवेनतिविद्यमानःस्वेनस्तोकंलभे

को.भा.
१४

सदितन्दुक्कात्रेषु समर्थो गत्वा लभेमहि धनमात्रां धनस्यास्येन तेषामेव जीवनं भविष्यति धनलाभे च कारणमाह
राजाऽसौ नातिदूरे स्यानेपुरस्यैन यजमानत्वान्न स्यात्मनेपदं स च राजा मामुपात्रमुपलभ्य सर्वैरार्त्विज्यैरार्त्विकक
र्मभिः ऋत्विक्कर्मप्रयोजनायेत्यर्थः वृणीतेति एवमुक्त्वैनं जायोवाच हे पते इमे एव ये मद्दत्ते
विनिहिता मास्त्वया त्वं गृहाणेति तानवादित्वा मेयज्ञे वान्ज्ञो विततं विस्मारितमृत्विग्भिर्याय तत्र च गत्वोद्गातॄन्
स्तोतॄन्पुरुषानागन्याञ्जास्तुवेन्यस्मिन्स्तावः तस्मिन्नास्तावे स्तोष्यमाणानुपोपविवेश समीपे उपविष्टस्तेषामि
त्यर्थः उपविश्य एवह प्रस्तोतारमुवाच हे प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता प्रस्तावभक्तिम
नुगता तां चेद्देवतां प्रस्तावभजे अविद्वान्सन् प्रस्तोष्यसि विदुषा मम समीपे तत्परोक्षेपि चेद्दिपरेत्र सम
धो कर्ममात्रविदामनधिकार एव कर्मणि स्यात् नत्वानिष्टं अविदुषां कर्मदर्शनात् दक्षिणमार्गश्रुतेश्च नाधिका
रे चाविदुषामत्र एवैको मार्गः श्रूयेत न च स्यान्नकर्मनिमित्त एव दक्षिणमार्गः यज्ञेन दानेनेत्यादिश्रुतेः नथाऽ
समये निश्च विशेषणात् विहन्तमहमेव कर्मण्यनधिकारो न सर्वत्राग्निहोत्रस्नानकर्माध्ययनादिषु चानुज्ञा।
यात्तत्र तत्र दर्शनात् कर्ममात्रविदामप्यधिकारः सिद्धः कर्मणीति मूर्धा ते विपतिष्यतीत्येवमेवोद्गातारं प्रतिहर्ता
रमुवाचेत्यादि समानमन्यत् ते प्रस्तोत्रादयः कर्मभ्यः समारताः उपरताः सन्तो मूर्धपातभयात्तूष्णीमासांचक्रिरेऽन्य
त्वाऽकुर्वन्तमर्थित्वात् १०॥ अथ हैनं यजमान उवाच भगवन्तं वा अहं विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति हो
वाच स होवाच भगवन्तं वा अहमेभिः सर्वैरार्त्विज्यैः पर्यैषिषं भगवतो वा अहमवित्त्यान्यानवृषि भगवांस्त्वेव मे सर्वैरा
र्त्विज्यैरिति तथेत्यथ तर्ह्येत एव समतिसृष्टाः स्तुवतां यावत्त्वेभ्यो धनं दद्यास्तावन्मम दद्या इति तथेति ह यजमा
न उवाच अथानेनैतं हपनमुषस्तिं राजा यजमान उवाच भगवन्तं वै अहं विविदिषाणि वेदितुमिच्छामीति स

ऋतु उषस्तिरस्मि चाक्रायणस्त्वापि श्रोत्रपथमागतः यदीति होवाचोक्तवान् स ह यजमान उवाच सत्यमेवमहं भ।
गवन्तं बहुगुणमन्वैषं सर्वैः स्तुत्विक्कर्मभिरार्त्विज्यैः पर्यैषिषं पर्यैषणं कृतवानस्मि श्रुतिषु भगवतो वाहमवित्त्या।
न्याभेनान्यानिमानवृषे हृतवानस्मि अद्यापि भगवांस्त्वमेव मे मम सर्वैरार्त्विज्यैः स्तुत्विक्कर्माण्येषु मत्विजकर्त्तव्येषु म
होषस्तिः किन्त्वद्य तथैव नन्वेते एव त्वया सर्वे हृतनामया समतिसृष्टाः यत्यक प्रसन्नेन मया अनुज्ञाताः सन्तः स्तुवतां त्वे
तेनत्कार्यं यावत्त्वेभ्यः सर्वेभ्यो धनं दद्याः प्रत्येकमितावन्मम दद्या इत्युक्तस्तथेति ह यजमान उवाच ॥ अथ हैनं
प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत् कतमा सा
देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्र
स्तावमन्वायत्ता तां चेदविद्वान् प्रास्तोष्यो मूर्धा ते व्यपतिष्यत्तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति मा भगवा
नवोचत् कतमा सा देवतेत्यादित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति सैषा देवता
उद्गीथमन्वायत्ता तां चेदविद्वानुदगास्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेत्यथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्या देव
ता प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रतिहरिष्यसि मूर्धा ते व्यपतिष्यतीति मा भगवानवोचत् कतमा सा देवतेत्यन्न
मिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चे
दविद्वान् प्रतिहरिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति १ ११ ॥ अथ हैनमौषस्त्यं वचः श्रुत्वा प्रस्तोतोपससादोष
स्तिं विनयेनोपजगाम प्रस्तोतर्या देवतेत्यादि मा सा भगवानवोचत् सर्वे कतमा सा देवता या प्रस्तावभक्तिमन्वाय
त्तेति पृष्टः प्राण इति होवाच उक्तं प्रस्तावस्य प्राणो देवतेति कथं सर्वाणि स्थावरजङ्गमानि भूतानि प्राणमेवाभि
संविशन्ति प्रलयकाले प्राणमभिलक्षयित्वा प्राणात्मनैवोज्जिहते प्राणादेवोद्गच्छन्तीत्यर्थः उत्पत्तिकालेष्वतः सै।

छां.भा.
२५

या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि प्रस्तवने प्रस्तावभक्तिं कृतवानसि यदि मूर्धा शिरस्ते व्या
पतिष्यत् विपतितमभविष्यत् तथा कृतस्य मया तत्काले मूर्धा ते विपतिष्यतीति अतः साधु कृतं त्वया यास्मान्निषि
द्धः कर्मणो यदुपरमं कार्षीरित्यभिप्रायः तथोद्गातापयुक्तमासोद्गीथभक्तिमन्वायत्ता उद्गाता देवतेति
स्वस्थाहित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति शब्दयन्ति स्तुवन्तीत्यभिप्रायः उच्चैःस्थ
सामान्यात् उत्पास्य सामान्यादिव प्राणेन सैषा देवतेत्यादि पूर्ववत् एवमेवाथ हैनं प्रतिहर्तोपससाद कतमा सा
देवता प्रतिहारमन्वायत्तेति अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेवात्मानं प्रतिसर्वतः प्रतिहर
माणानि जीवन्ति सैषा देवता प्रतिहारसामान्यात् प्रतिहारभक्तिमनुगता समानमन्यत् तथोक्तं मया प्रस्तवेति प्रस्ता
वोद्गीथप्रतिहारभक्तीः प्राणादित्यान्नदृष्ट्योपासीनेन समस्तमभ्यार्थः प्राणाद्यापत्तिः कर्मसमृद्धिर्वा फलमिति ॥११॥
अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वा
न उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको दा
ल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयाञ्चकार ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः संरब्धाः सर्पन्तीत्येवमास
सृपुस्ते ह समुपविश्य हिं चक्रुः ओं मदामों पिबामों देवो वरुणः प्रजापतिः सविताऽन्नमिहाहरदन्नपतेऽन्नमिहाहरा
हरोमिति ॥ ॥ अतीते खण्डेऽन्नाप्राप्तिनिमित्ता कष्टावस्थोक्ता उच्छिष्टपर्युषितभक्षणलक्षणा सा मा भूदित्यन्न
लाभायाथानन्तरं शौवः श्वभिर्दृष्ट उद्गीथ उद्गानं सामातः प्रस्तूयते तत्तत्र ह किल बको नामतः दल्भस्यापत्यं
दाल्भ्यो ग्लावश्च नामतः मित्रायाश्चापत्यं मैत्रेयः वाशब्दश्चार्थे द्व्यामुष्यायणो ह्यसौ वस्तुविषये क्रियास्विव वि
कल्पानुपपत्तेः द्विनामा द्विगोत्र इत्यादि हि स्मृतिः दृश्यते चोभयतः पिण्डभाक्त्वम् उद्गीथे बद्धचित्तत्वादृषावना

द्वहावामाद्वा: स्वाध्याये स्वाध्यायेकत्रैयासाद्धिहिहृठवाजोदनवान् विविज्ञादेशस्योदकाभ्यापास्तद्धवान प्र
तिपालयांचकारेति चैकवचनाल्लिंगोद्देकोसाहृषिहस्तीणकासप्रतिपालनाद्देषः स्वाध्यायकारणमत्रकामन
येतिलह्पतेहात्स्वभिप्रायः अतः स्वाध्यायेनतोषितादेवताऋषिर्वाश्वरूपंगृहीत्वा स्वाध्येतः संलसोऋषयेनद
त्तग्रहणंशाउर्वभूवप्राउस्युकाः नमन्येश्रुक्षस्यानेदत्तलकाः स्थानेउपप्रमेस्योगुहत्कवंतः श्रुत्वेनाभगवानागा
यत्नागानेननिष्पादयन्तिस्यर्थः स्नात्वेयाणंबागादयोवाप्राणमन्तत्रभुजःस्वाध्यायपरितोषिताःसंतोगृहत्वे
गुःपनेस्वरूपमादायेतिगुरुमेवंप्रतिपन्नसपानायामगुभहिताःस्यावेदस्येवन्नकवंतःस्वस्थास्थेनउपावृत्ता
नहलकाचनः दद्वांसित्रवदेयेभ्यासोप्रातःप्रातःकासेउपप्रमोयानेनिद्वेशेकोदसम् समायानेतिप्रस्था
दपाठोवाप्रातःकालकरणेननकालपर्वकर्तव्यार्थम् अत्रदसवासविनरपराह्लानाभिमुखान् नमश्चेवहृव
केदाल्पाग्रावावामेत्रयऋषिःप्रतिपालयाञ्चकारधनीत्नणकृतवानित्यर्थः स्थानलब्धेवाराम्यऋषिःसमन्दा
यथेवेदकर्माणिबहिष्यवमानेनस्तोत्रेणस्तोष्यमाणाउद्गातृपुरुषाःसंरब्धाःसंलग्नाश्चेत्यान्यमेवसर्पतिप्रव
मुखेनात्सोत्यमथकेगृहीत्वासस्तभ्रातृमवंतःपरिभ्रमणेकृतवेनइत्यर्थः नमेवंसमृष्यसमन्तपविशेषापवि
ष्टःसंतोहिवक्रःहिंकारंकृतवेनइत्यर्थः ज्ञमदासोपिवासोदेवोद्यानतनमाद्वहरणावर्षेणाज्ञगानःप्रजापतिःपा
लनात्स्वजानोसविताश्वसविनृनाम्नावेस्यादित्यउच्यतेपतेःपर्यायैःसएवंभूतश्रादित्योब्रमःसम्यमिदाहृदा
हाविति तपवहिंसाताउनरपुत्रःसमेदेवपतेसहिसर्वेस्मात्रस्यप्रसवितृनात्मतिः नहिनस्माकेनाप्रहृतम
त्रमणमात्रमपिजायतेप्राणिनामतोत्रमःसभ्यमिहाहृहाहेत्यभ्यासभ्योदरार्थेञेहति ॥ ९ ॥ अथयावलोको
हृजोकाणावाप्रहेकारस्युद्रमाश्रयकास्त्रात्मेहकारोग्रिरीकभष्रादित्यउकारोनिहवपकौरीविश्वेदेवाअहोयिकार
:

छां॰ भा॰
१५

प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं या वाग्विराडनिरुक्तस्त्रयोदशः स्तोभः संचरो हुंकारो दुग्धेऽस्मै वाग्दोहं यो वाचो
दोहोऽन्नवानन्नादो भवति य एतामेवं साम्नामुपनिषदं वेदोपनिषदं वेद इति प्रथमः प्रपाठकः १ भक्तिविषयो।
पासनं सामावयवसंबद्धमित्यर्थः सामावयवान्तरस्तोभाक्षरविषयाण्युपासनानि संहितान्युपदिश्यन्ते
नं सामावयवसंबद्धत्वाविशेषादयं वाव लोको हाउकारः स्तोभो रथन्तरे साम्नि प्रसिद्धः इयं वै रथन्तरमि।
त्यस्माल्लोकसंबन्धसामान्याद्धाउकारः स्तोभोऽयं लोक इत्येवमुपासीत वायुर्हाइकारो वामदेव्ये साम्नि हाइकारः प्र
सिद्धो वाय्वप्संबन्धश्च वामदेव्यस्य साम्नो योनिरित्यस्मात्सामान्यात् हाइकारं वायुदृष्ट्योपासीत चन्द्रमा अथ।
कारश्चन्द्रदृष्ट्याथकारमुपासीत अन्ने हीदं स्थितमन्नात्मा च चन्द्रः थाकारसामान्याच्च आत्मेहकार इहेति स्तोभः
प्रत्यक्षो ह्यात्मेह इति व्यपदिश्यते इहेति च स्तोभस्तत्सामान्यादग्निरीकारः ईकारनिधनानि चाग्नेयानि सर्वाणि सामा।
नीत्यतस्तत्सामान्यात् आदित्य ऊकारः उच्चैरूर्ध्वं सन्तमादित्यं गायन्त्यूकारश्चायं स्तोभ आदित्यदैवत्ये साम्नि स्तो
भ इत्यादित्य ऊकारो निहव एकारः इत्याह्वानमेकारः स्तोभ एहीति वाह्वयन्तीति तत्सामान्यात् विश्वेदेवा औहोयिकार
वैश्वदेव्ये साम्नि स्तोभस्य दर्शनात् प्रजापतिर्हिंकारः आनिरुक्त्याद्धिंकारस्य चाव्यक्तत्वात् प्राणः स्वरः स्वर इति च
स्तोभः प्राणस्य च स्वरहेतुत्वसामान्यात् अन्नं या या इति स्तोभोऽन्नेन हीदं यातीत्यतस्तत्सामान्यात् वाग्विराडिति स्तो
भो विराडन्नं देवताविशेषो वा वैराजे साम्नि स्तोभदर्शनात् अनिरुक्तोऽव्यक्तत्वादिदं चेदं चेति निर्वक्तुं न शक्यत
इत्यतः संचरो विकल्प्यमानस्वरूप इत्यर्थः कोऽसावित्याह हुंकारस्त्रयोदशः स्तोभो हुंकारोऽव्यक्तो यमेवानिरुक्तो वि
शेषत एवोपास्य इत्यभिप्रायः स्तोभाक्षरोपासनायाः फलमाह दुग्धेऽस्मै वाग्दोहमित्याद्युक्तार्थं य एतामेवं यथो।
क्तलक्षणां साम्नां सामावयवस्तोभाक्षरविषयामुपनिषदं दर्शनं वेद तस्यैतद्यथोक्तं फलमित्यर्थः द्विरभ्यासो

ध्यायपरिसमाप्त्यर्थः सामावयवविषयोपासनविशेषपरिसमाप्त्यर्थं वेत्योम्। इति श्रीशंकरभगवतः कृ
तौ छान्दोग्यभाष्ये प्रथमः प्रपाठकः ॥ १ ॥ समस्तस्य खलु साम्न उपासनं साधु यत्खलु साधु तत्सामेत्याचक्ष
ते यदसाधु तदसामेति तदुताप्याहुः साम्नैनमुपागादिति साधुनैनमुपागादित्येव तदाहुः असाम्नैनमुपा
गादित्यसाधुनैनमुपागादित्येव तदाहुः। अथोताप्याहुः साम नो बतेति यत्साधु भवति साधु बतेत्येव तदाहुः अ
साम नो बतेति यदसाधु भवत्यसाधु बतेत्येव तदाहुः स य एतदेवं विद्वान्सामेत्युपास्तेऽभ्याशो ह यदेनं सा
धवो धर्मा आ च गच्छेयुरुप च नमेयुः। १ । ओमित्येतदक्षरमित्यादि सामावयवविषयमुपासनमनेकफलमुप
दिष्टम् अनन्तरं च स्तोभाक्षरविषयमुपासनमुक्तम् सर्वथापि साम्न एकदेशसंबद्धमेव तदिति अथेदानीं
समस्ते साम्नि समस्तसामविषयाण्युपासनानि वक्ष्यामीत्यारभते श्रुतिः युक्तं ह्येकदेशोपासनानन्तरमेक
देशिविषयमुपासनमुच्यत इति समस्तस्य सर्वावयवविशिष्टस्य पाञ्चभक्तिकस्य साप्तभक्तिकस्य चेत्यर्थः
खलु इति वाक्यालंकारार्थः साम्न उपासनं साधु समस्ते साम्नि साधुदृष्टिविधिपरत्वान्न पूर्वोपासननिन्दा
र्थत्वं साधुशब्दस्य ननु पूर्वत्राविद्यमानं साधुत्वं समस्ते साम्न्यभिधीयते न साधु सामेत्युपास्यत्वोपदेशात्
साधुशब्दः शोभनवाची कथमवगम्यत इत्याह यत्खलु लोके साधु शोभनमनवद्यं प्रसिद्धं तत्सामेत्याच
क्षते कुशलाः यदसाधु विपरीतं तदसामेत्याचक्षते कुशलाः तथैव साध्वसाधुविवेककरणे उताप्याहुः सा
म्नैनं राजानं सामन्तं वोपागादुपगतवान् कोऽसौ येनासाधुत्वमाशङ्क्यमानमभिप्रायः शोभनाभिप्रा
येण साधुनैनमुपागादित्येव तत्तदाहुर्लौकिका बन्धनाद्यसाधुकार्यमपश्यन्तो यत्र पुनर्विपर्ययो बन्धना
द्यसाधुकार्यं प्रपश्यन्ति तत्रासाम्नैनमुपागादसाधुनैनमुपागादित्येव तदाहुः विपर्ययेणासाम नो बतेति

यदासाधुर्भवत्यसाधु वतेत्येव तदाहुः तस्मात्साम साधुशब्दयोरेकार्थत्वं सिद्धम् अतः स यः कश्चित्साधु
सामेति साधुगुणवत्सामेत्युपास्ते समस्तं साम साधुगुणवद्विद्वांस्तस्यैतत्फलमभ्याशो ह यदिति क्षिप्रं ह यदिति क्रि
याविशेषणार्थमेनमुपासकं साधवः शोभना धर्माः श्रुतिस्मृत्यविरुद्धा आ च गच्छेयुरागच्छेयुः न केवल
मागच्छेयुरुप च नमेयुरुपनमेयुश्च भोग्यत्वेनोपतिष्ठेयुरित्यर्थः ॥ १ ॥ कानि पुनस्तानि साधुदृष्टिवि
शिष्टानि समस्तानि सामान्युपास्यानीतीमानि तान्युच्यन्ते लोकेषु पञ्चविधं सामोपासीत पृथिवी हिंका
रोऽग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु अथावृत्तेषु द्यौर्हिंकार आदित्यः प्रस्ता
वोऽन्तरिक्षमुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनं कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च य एतदेवं विद्वाँल्लोकेषु
पञ्चविधं सामोपास्ते २ ननु लोकादिदृष्ट्या तान्युपास्यानि साधुदृष्टिश्चेति विरुद्धं न साध्वर्थस्य लोकादिका
र्येषु कारणस्यानुगतत्वान्मृदादिवद्घटादिविकारेषु साधुशब्दवाच्योऽर्थो धर्मो ब्रह्म वा सर्वथापि लोकादि
कार्येष्वनुगतो यथा घटरुचकादिषु मृत्सुवर्णादि दृष्ट्यनुगतानेव सामावयवानिति विशेषः तथा साधुदृष्ट्यनुगतानेव लो
कादिदृष्टिः धर्मादिकार्यत्वाल्लोकादीनां यद्यपि कारणत्वमविशिष्टं ब्रह्मधर्मयोस्तथापि धर्म एव साधुश
ब्दवाच्य इति युक्तम् साधुकारी साधुर्भवतीति कार्यविषये साधुशब्दप्रयोगात् ननु लोकादिकार्येकम्।
एवं सामानुगतत्वाद्दृश्यमानमेव न दृष्टिरिति साधु सामेत्युपासीतेति न वक्तव्यम् न शास्त्रागम्यत्वाद्दृष्टेः सर्व
त्रेह शास्त्रप्रणीता एव धर्मा उपास्या न विद्यमाना अप्यशास्त्रीयाः लोकेषु पृथिव्यादिषु पञ्चविधं पञ्चभक्ति
भेदेन पञ्चप्रकारं साधु समस्तं सामोपासीत कथं पृथिवी हिंकारः लोकेष्विति या सप्तमी तां प्रथमात्वेन
विपरिणमय्य पृथिवीदृष्टिं हिंकारे पृथिवी हिंकार इत्युपासीत व्यत्यस्य वा सप्तमी श्रुतिं लोकविषयां हिं

कारादिषु दृष्टिर्यथा दिष्टैः किंतोपासीत नत्र पृथिवी हिंकारः प्राथम्यसामान्यात् अग्निः प्रस्तावो ग्नौ हि कर्मा
णि प्रस्तूयंते प्रस्तावश्च भक्तिः अंतरिक्षमुद्गीथो न्तरिक्षं हि गगनं गकारविशिष्टश्चोद्गीथः आदित्यः प्रतिहारः
प्रतिप्राण्यभिमुखत्वान्मां प्रति मां प्रतीति द्यौर्निधनं दिवि निधीयंते हीतो गता इत्यूर्ध्वगतेषु लोकेषु दृष्टिः सा
मोपासनम् अथावृत्तेष्वधोमुखेषु पंचविधमुच्यते सामोपासनम् गत्यागतिविशिष्टा हि लोकाः यथा ते
ष्वावृत्तेष्वेव सामोपासनं विधीयते यतोनस्वावृत्तेषु लोकेषु द्यौर्हिंकारः प्राथम्यादादित्यः प्रस्तावः उदिते ह्या
दित्ये प्रस्तूयंते कर्माणि प्राणिनाम् अंतरिक्षमुद्गीथः पूर्ववत् अग्निः प्रतिहारः प्राणिभिः प्रत्याहरणादग्नेः पृथि
वी निधनं इत आगतानामिह निधनात् उपासने कल्पंते समर्था भवंति हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च गत्यागति
विशिष्टभोग्यत्वेनावतिष्ठंत इत्यर्थः य एतदेवं विद्वांल्लोकेषु पंचविधं समस्तं साधु सामेत्युपास्ते इति स
र्वत्र योजना समस्तविधपंचविधेव २ ॥ वृष्टौ पंचविधं सामोपासीत पुरोवातो हिंकारो मेघो जायते स प्रस्ता
वो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनं वर्षति हास्मै वर्षयति ह य एवं विद्वान्
वृष्टौ पंचविधं सामोपास्ते ३ लोकस्थितेर्वृष्टिनिमित्तत्वादानंतर्यं पुरोवातो हिंकारः पुरोवाताद्युद्ग्रहणा
न्ता हि वृष्टिर्यथा साम्नि हिंकारादिनिधनांतमतः पुरोवातो हिंकारः प्राथम्यात् मेघो जायते स प्रस्तावः प्रा
वृषि मेघजनने प्रस्तावः प्रसिद्धः वर्षति स उद्गीथः श्रैष्ठ्यात् विद्योतते स्तनयति स प्रतिहारः प्रतिहृ
तत्वात् य उद्गृह्णाति तन्निधनं समाप्तिसामान्यात् फलमुपासनस्य वर्षति हास्मा इच्छातस्तथा वर्षति हास
त्यामपि वृष्टौ य एतदित्यादि पूर्ववत् ४ सर्वास्वप्सु पंचविधं सामोपासीत मेघो यत्संप्लवते स हिंकारः यद्वर्ष
ति स प्रस्तावो याः प्राच्यः स्यंदंते स उद्गीथः याः प्रतीच्यः स प्रतिहारः समुद्रो निधनं नेप्सु प्रैत्यप्सुमान्भवति

छां॰ भा॰
१८

य एतदेवं विद्वान्सर्वेषु लोकेषु पंचविधं सामोपास्ते ॥ ४ ॥ वृष्टिः सर्वकर्मात्सर्वासामपामानेनतं मेघो यत्संप्लु
वतो पर्यकीभावेन तरेन रक्षितो भवति मेघो यदेत्र तत्तदा संप्लवत इत्युच्यते मेघ इत्तदपामसंभः सो हिंकारः
यद्वर्षति स प्रस्तावः आपः सर्वतो व्याप्य प्रस्तुता याः प्राच्यः स्यन्दन्ते उद्गीथः श्रेष्ठत्वात् याः प्रतीच्यः स प्रतिहारः स ४
निधनं समुद्रसामान्यात्समुद्रो निधनेन त्रिधनेन त्रारूपं न हाप्सु प्रैति न गच्छति वेद प्रमानस्सामान्यवृत्तिफलम् ॥
ऋतुषु पंचविधं सामोपासीत वसन्तो हिंकारः ग्रीष्मः प्रस्तावः वर्षा उद्गीथः शरत्प्रतिहारः हेमन्तो निधानेन क
ल्पन्ते हास्मा ऋतव ऋतुमान्भवति य एतदेवं विद्वानृतुषु पंचविधं सामोपास्ते ॥ ५ ऋतुष्वत्र व्याख्यायते ।
ऋतुपालिनिमित्तत्वादादानेन तत्त्वं वसन्तो हिंकारः प्राथम्यात् ग्रीष्मः प्रस्तावो यवादि संग्रहः प्रस्तूयते प्रावृत्त
र्थं वर्षा उद्गीथः प्राधान्यात् शरत्प्रतिहारो रोगिणां मृतानां च प्रतिहारात् हेमन्तो निधनं निवाते निधना
त्प्राणिनां फलं कल्पन्ते ह ऋतवः ऋत्व्यवस्थानुरूपं भोग्यं ते नास्माद्युपासकाय नेवः ऋतुमान्नार्तेवैभवोपस
म्पन्नो भवतीत्यर्थः ॥ ५ ॥ पशुषु पंचविधं सामोपासीत अजा हिंकारः अवयः प्रस्तावो गाव उद्गीथः अश्वाः प्रति
हारः पुरुषो निधनं भवन्ति हास्य पशवः पशुमान्भवति य एतदेवं विद्वान्पशुषु पंचविधं सामोपास्ते ॥ ६ ॥
सम्यक्दृष्टेने पशुष्वजा पशवः कालत्रयानन्तरं अजा हिंकारः प्राधान्यात् प्राथम्यात् सहाजाश्चरन्ति पशूनामिति श्रुते :
अवयः प्रस्तावः सहचर्यादजावीनां गाव उद्गीथः श्रेष्ठत्वात् अश्वाः प्रतिहारः प्रतिहरणात् पुरुषाणां पुरुषो निध
नेषु पुरुषाश्रयत्वात् पशूनाम् फलं भवन्ति हास्य पशवः पशुमान्भवति पशुफलेषु भोगत्यागादिभिर्युज्यत इ
त्यर्थः ॥ ६ ॥ प्राणेषु पंचविधं परोवरीयः सामोपासीत प्राणो हिंकारः वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रति।
हारः मनो निधनं परोवरीयांसि वा एतानि परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं।

विद्वान्प्राणेषु पंचविधं परोवरीयः सामोपास्ते इति तत् पंचविधस्य १ परंपरं वरीयस्त्वगुणवत्प्राणदृष्टिगु
णवत्सामोपासीतेत्यर्थः प्राणो घ्राणं प्राणो हिंकारः उत्तरोत्तरवरीयसां प्राथम्यात् वाक्प्रस्तावः वाचा हि
प्रस्तूयते सर्वं वाग्वरीयसी प्राणात् अप्राप्तमप्युच्यते वाचा प्राप्तस्यैव गंधस्य ग्राहकः प्राणः चक्षुरुद्गीथ
वाचो बहुतरविषयं प्रकाशयति चक्षुः अतो वरीयो वाचः उद्गीथः श्रैष्ठ्यात् श्रोत्रं प्रतिहारः प्रतिहृतत्वाद्व
रीयश्चक्षुषः सर्वतः श्रवणात् मनो निधनं मनसि हि निधीयंते पुरुषस्य भोग्यत्वेन सर्वेंद्रियाहृता विषया
वरीयस्त्वं च श्रोत्रान्मनसः सर्वेंद्रियविषयव्यापकत्वात् अतींद्रियविषयोपि मनसो गोचर एवेति यथोक्त
हेतुभ्यः परोवरीयांसि प्राणादीनि तदेतानि एतद्दृष्टिविशिष्टं परोवरीयः सामोपास्ते परोवरीयो हास्य जी
वनं भवतीति वोक्तार्थमिति तु पंचविधस्य साम्न उपासनमुक्तमिति सप्तविधस्य वक्ष्यमाणविषये तु दृष्टिस
माधानार्थे निषेधोऽहिं पंचविधे वक्ष्यमाणे तु दृष्टिः समस्यत इति ॥ १ ॥ अथ सप्तविधस्य वाचि सप्तविधं सा
मोपासीत यत्किंच वाचो हुमिति स हिंकारो यत्प्रेति स प्रस्तावः यदेति स आदिः यदुदिति स उद्गीथः यत्प्रतीति
स प्रतिहारः यदुपेति स उपद्रवः यन्नीति तन्निधनं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एत
देवं विद्वान्वाचि सप्तविधं सामोपास्ते ८ ॥ अथानंतरं सप्तविधस्य समस्तस्य साम्न उपासनमिदमार
भ्यते वाचीति सप्तमी एवंवन्नवाग्दृष्टिविशिष्टं सप्तविधं सामोपासीतेत्यर्थः यत्किंच वाचः शब्दस्य हुमिति यो
विशेषः स हिंकारो हकारसामान्यात् यत्प्रेति प्रशब्दरूपं स प्रस्तावः प्रसामान्यात् यदा इति स आदिः आकारसा
मान्यात् आदिरित्याकारः सर्वादित्वात् यदुदिति स उद्गीथः उत्पूर्वत्वादुद्गीथस्य यत्प्रतीति स प्रतिहारः प्रति
सामान्यात् यदुपेति स उपद्रवः उपोपक्रमत्वादुपद्रवस्य यन्नीति तन्निधनं निशब्दसामान्यात् दुग्धेस्मादस्मा

शुकार्यम् ८ ॥ अथ खल्वमुमादित्यं सप्तविधं सामोपासीत सर्वदा समस्तेन साम मां प्रति मां प्रति सप्तविधं सा
मेति सर्वेण समस्तेन साम तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति सर्वेण समस्तेन साम विद्यात्तस्य यत्पुरो
दयात्स हिंकारः तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिं कुर्वन्ति हिंकारभाजिनो ह्येतस्य साम्नः ॥ अवयवमात्रे सादि
आदित्यदृष्टिः पञ्चविधे सूक्ता प्रथमे चाध्याये अथेदानीं खल्वमुमादित्यं समस्ते साम्न्यवयवविभागशोऽध्यस्य
सप्तविधं सामोपासीत कथं पुनः सामत्वमादित्यस्येत्युच्यते उद्गीथत्वे हेतुवदादित्यस्य सामत्वे हेतुः कोऽसौ सर्व
दा समो वृद्धिक्षयाभावात्तेन हेतुना साम आदित्यो मां प्रति मां प्रतीति चा तुल्यां बुद्धिमुत्पादयत्यतः सर्वेण समोऽतः
साम समत्वादित्यर्थः उद्गीथभक्तिसामान्यवचनादेव लोकादिषूक्तसामान्यात् हिंकारादित्वं गम्यत इति हिंका
रादित्वेनोक्तम् सामत्वे पुनः सवितुरुक्तं कारणं न स्फुटबोधमिति समत्वमुक्तम् तस्मिन्नादित्ये अवय
वविभागश इमानि वक्ष्यमाणानि सर्वाणि भूतान्यन्वायत्तान्यनुगतान्यादित्यमुपजीव्यत्वेनेति विद्यात् कथं
तस्यादित्यस्य यत्पुरोदयाद्धर्मरूपं स हिंकारो भक्तिः तत्रेदं सामान्यं यत्तस्य हिंकारभक्तिरूपं तदस्यादित्यस्य स
पशवो गवादयोऽन्वायत्ताः अनुगता अतस्ते हिंकारभक्तिरूपमुपजीवन्तीत्यर्थः यस्मादेवं तस्मात्ते हिं कुर्वन्ति पशवः प्रा
गुदयात् तस्माद्धिंकारभाजिनो ह्येतस्यादित्याख्यस्य साम्नस्तद्भक्तिभजनशीलत्वाद्धि ते एवं ते ॥ अथ यत्प्र
थमोदिते स प्रस्तावस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशंसाकामाः प्रस्तावभाजिनो ह्येतस्य
साम्नो ध्येयत्वेन गवेषणीयाः स आदित्यस्तदस्य वयांस्यन्वायत्तानि तस्मात्तान्यन्तरिक्षेऽनारम्बणान्यादायात्मानं प
रिपतन्त्यादिभाजीनि ह्येतस्य साम्नः ॥ अथ यत्समध्यमादिने सावित्रं रूपं तदस्यादित्याख्यस्य साम्नः स प्रस्ताव
लदस्य मनुष्या अन्वायत्ताः सर्ववत् तस्मात्ते प्रस्तुतिं प्रशंसां कामयन्ते तस्मात्प्रस्तावभाजिनो ह्येतस्य साम्नो

थ यत्संगवेलायां गवां रश्मीनां संगमनं संगवो यस्यां वेलायां गवां वा वत्सैः सा संगववेला तस्मिन्काले यत्सावि।
त्रं रूपं स आदिर्भक्तिविशेषः ओंकारस्तदस्य वयांसि पक्षिण अन्वायत्तानि यत एवं तस्माद्वयांस्यंतरिक्षेणा।
नारिक्षेनारंबणान्यनालंबनानि आत्मानमादायात्मानमेवावलंबनत्वेनाहृत्यात्मा परिपतंति गच्छंत्यत आका।
रसामान्यादादिभक्तिभाजीनि एतेन साम्नः ॥ ॥ अथ यत्संप्रति मध्यंदिने ऋजुमध्यंदिन इत्यर्थः स उद्गीथभ।
क्तिस्तस्य देवा अन्वायत्ता द्योतनातिशयात्तत्कालेन सामान्येन सत्तमा विशिष्टतमाः प्राजापत्यानां प्राजापत्य।
नानामुद्गीथभाजिनो ह्येतस्य साम्नः अथ यदूर्ध्वं मध्यंदिनात्प्रागपराह्णात् यद्रूपं सवितुः स प्रतिहारः तदस्य गर्भा
अन्वायत्ताः अतस्ते सवितुः प्रतिहाररूपभक्तिरूपेणोर्ध्वं प्रतिहृताः संतो नावपद्यंते नाधः पतंति निगर्भाः संपद्यंत इत्यर्थः
यतः प्रतिहारभाजिनो ह्येतस्य साम्नो गर्भाः अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्याः पशवो।
न्वायत्ताः तस्मात्ते पुरुषं दृष्ट्वा भीताः कक्षमरण्यं श्वभ्रं भयशून्यमित्युपद्रवंति दृष्ट्वोपद्रवणादुपद्रव। उप
भाजिनो ह्येतस्य साम्नः अथ यत्प्रथमास्तमिते अदर्शनं जिगमिषति सवितरि तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मा
त्तान्निदधति पितृपितामहप्रपितामहरूपेण दर्भेषु निक्षिपंति तांस्तदर्थं पिंडान्वा स्थापयंति निधनसंबंधान्नि
धनभाजिनो ह्येतस्य साम्नः पितर एवमेवावयवशः सप्तधा विभक्ते बलमादित्ये सप्तविधं सामोपास्ते तदा
त्माप्तिः फलमिति वाक्यशेषः ॥ ॥ मृत्युरादित्यः अहोरात्रादिकालेन जगतः प्रमापयितृत्वान्मृत्युस्तस्यातितरण
येदं सामोपासनमस्मिन्नारभ्यते सामाक्षरचयनलक्षणया विज्ञेयं परमात्मनो लक्षणया वा यस्मिन्नतिमृत्युमय
हेतुत्वात् यथा प्रथमाध्याये उद्गीथभक्तिनामाक्षराण्युद्गीथ इत्युपास्यत्वेनोक्तानि तथेह साम्नः सप्तविधभक्ति
नामाक्षराणि समाहृत्य त्रिभिस्त्रिभिः समतया साम्नः पारिकस्योपास्यत्वेनोक्ते न उपासनेन मृत्युगोचरा।

छां. भा.
२.

तस्मात्संख्यासामान्येन तेन सप्तविधसाम्नोऽतिक्रान्तत्वेनास्यादित्यस्य मृत्योरतिक्रमणायैव संक्रमणं कस्य
यत्यतिमृत्यु सप्तविधं सामोपासीत मृत्युमतिक्रान्तमतिरिक्तान्तरं संख्येयत्यतिमृत्यु सप्तविधं साम तस्मा
द्वयमभक्तिनामाक्षराणि हिंकार इत्यर्थः अक्षरं भक्तिनाम प्रस्ताव इति च भक्त्यक्षरमेव नाम तन्नूर्वेणास
मसादिरिति द्व्यक्षरं सप्तविधस्य साम्नः संख्यासमा ॐकार आदिमध्याने प्रतिहार इति चतुरक्षरं तत इ
हैकमक्षरमपाक्रियाद्यक्षरयोः प्रतिपन्ने तेन तत्सममेव भवत्युद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं
त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते अतिरिच्यतेन तेन वैषम्ये प्राप्ते साम्नः समत्वकारणायाह तदेक
मपि सदक्षरमिति त्र्यक्षरमेव भवत्यनतत्सम निधनमिति त्र्यक्षरं तत्सममेव भवत्येवं द्व्यक्षराणि समतयाऽऽम्ना
तेषां यथायथं प्राप्तान्यक्षराणि संख्यायैतानि द्वाविंशतानि सप्तभक्तिनामाक्षराणि द्वाविंशतिः तत्रैक
विंशत्यक्षरसंख्ययादित्यमाप्नोति मृत्युम् यस्मादेकविंश इतोऽसावादित्य इत्यादि संख्यया द्वादशमा
साः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश इति श्रुतेः अतिशिष्टेन द्वाविंशेनाक्षरेण परं मृत्योरादि
त्याज्जयमाप्नोतीत्यर्थः यच्चैनदादित्यात्परं किं तत् नाकं कमिति सुखं तत्प्रतिषेधोऽकं तत्र भवतीति नाकं
कमेवेत्यर्थः मृत्युभयत्वाद् दुःखस्य विपाकं च तत् मोनमदुःखं वदितामित्यर्थः तदाप्नोति शुक्र एवापि दार्थ
माह एकविंशतिसंख्ययादित्यस्य जयमाप्नोति परो हास्यैवं विद्वादित्यजयान्मृत्युगोचरात्परो जयो भवति
द्वाविंशस्याक्षरसंख्येत्यर्थः य एतदेवं विद्वानित्याद्युक्तार्थं तस्यैतद्याथार्थं फलमिति द्विरभ्यासः सप्तविधस
विनानाम ग्रहणं पञ्चविधस्य सप्तविधस्य च साम्न उपासनमुक्तम् अथेदानीं गायत्र्यादिनामग्रहणं एवं के
विशिष्टफलानि सामोपासनानि उच्यन्ते यथाक्रमेण गायत्र्यादीनां कर्माङ्गप्रयोगसूत्रैवमनोहिंकारो म

नसः करणवृत्तीनां प्राथम्यात् तदानंतर्याद्वाक् प्रस्तावः चक्षुरुद्गीथः श्रैष्ठ्यात् श्रोत्रं प्रतिहारः प्रतिहृतत्वात् प्राणो
निधनं यथोक्तानां प्राणे निधनात् स्वापकाले एतद्गायत्रं साम प्राणेषु प्रोतं गायत्र्याः प्राणसंस्तुतत्वात् स य एवमे
तद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति अविकलकरणो भवतीत्येतत् सर्वमायुरेति शतं वर्षाणि सर्वमायुः पुरु
षस्य श्रुतेः ज्योक् उज्ज्वलं जीवति महान् भवति प्रजादिभिः महद्यशः कीर्त्या गायत्र्योपासकस्यैतद्व्रतं भवति यन्म
हामनाः स्यात् अक्षुद्रचित्तः स्यादित्यर्थः अभिमन्थतीति सहिंकारः प्रथमत्वात् धूमो जायते स प्रस्तावः आनन्तर्यात्
ज्वलति स उद्गीथः हविःसंबन्धाच्छ्रैष्ठ्यं ज्वलनस्य अंगारा भवन्ति स प्रतिहारः अंगाराणां प्रतिहृतत्वात् उपशमः सा
वशेषत्वात् संशाम्यति निःशेषोपशमः समाप्तिसामान्यान्निधनं एतद्रथन्तरमग्नौ प्रोतं मथने ह्यग्निर्गी
यते रथन्तरं साम इत्यादि पूर्ववत् ब्रह्मवर्चसी वृत्तस्वाध्यायनिमित्तं तेजो ब्रह्मवर्चसं केवलं तेजस्त्विड्भावो वा अन्ना
दो दीप्ताग्निर्भवति प्रत्यङ् अग्नेराचामेद्भक्षयेत् किंचिन्न निष्ठीवेत् श्लेष्मनिरसनं च न कुर्यात् तद्व्र
तं उपमन्त्रयते संकेतं करोतीति प्राथम्यात् सहिंकारः ज्ञापयते तोषयति स प्रस्तावः सहशयनमेकपर्यंकगम
नमुद्गीथः श्रैष्ठ्यात् प्रतिस्त्रीशयनं स्त्रियाश्चाभिमुखीभावः स प्रतिहारः कालं गच्छति मैथुनेन पारं समाप्तिं
गच्छति तन्निधनं एतद्वामदेव्यं मिथुने प्रोतं वायूदकमिथुनसंबंधात् य इत्यादि पूर्ववत् मिथुनी भवत्य
विधुरो भवतीत्यर्थः मिथुनान्मिथुनात् प्रजायते इत्यमोघरेतस्त्वमुच्यते न कांचन कांचिदपि स्त्रियं स्वात्मतल्पप्रा
प्तां न परिहरेत् समागमार्थिनीं वामदेव्यसामोपासनांगत्वेन विधानात् एतस्मादन्यत्र प्रतिषेधस्मृतयो वचन
प्रामाण्याच्च धर्मावगतेर्न प्रतिषेधशास्त्रेणास्य विरोधः तद्व्रतं उद्यन्सविता स हिंकारः प्राथम्यात् दर्शनस्यादि
तः प्रस्तावः प्रस्तवनहेतुत्वात् कर्मणां मध्यंदिन उद्गीथः श्रैष्ठ्यात् अपराह्णः प्रतिहारः पश्वादीनां गृहप्रति

छां.भा.
२२

दर्शनात् यदस्तमयं लत्रिधनं रात्रौ हृदे निधानान्यागिनां वह्न्यादिदेशे स्थानेहतन्मादिस्मदेवमनलात् मप
इत्यादि पूर्ववत् नयनेन निर्देशकृतनम् अभ्रायणः भवणान्मेघः उदकसेचकत्वात् उन्नायमन्यत् एतद्ध रूपेनाम
सामपर्जन्ये प्रोतामनेकरूपत्वाद् आदिभिः पर्जन्यस्यैव रूपा विरूपाश्च सरूपांशाना विप्रभृतीन्य पूर्ववत् एतद्ध
येश्रामानीत्यर्थः वर्षानेन निर्देशकृतनम् वसन्तो हिंकारः प्राधान्यात् ग्रीष्मः प्रस्तावः इत्यादि पूर्ववत् एतद्ध
राजकूलस्थानेवदविराजनि कत्नव ध्यर्थनं वज्ञानवैधर्मे विराजते एवं प्रजाभिर्विहानिस्वकमन्यत् स
नृत्रनिर्देशकृतनम् पृथिवी हिंकार इत्यादि पूर्ववत् साक्रियाद इतिनिमेवबहुवचनेर्वन्य इव लोकेषु प्रोता
लोकीभवतिलोकफलेन संप्रयुज्यत इत्यर्थः लोकान्निर्देशकृतनम् अजाहिंकार इत्यादि पूर्ववत् पशुषुप्रो
तः पशुत्रनिर्देशकृतनम् लोमहिंकारो देहावयवानां प्रथमत्वात् त्वक्प्रस्तावः अनन्तरत्वात् मांसमुद्गीथः स
र्ववत् श्रेष्ठत्वात् अस्थि प्रतिहारः प्रतिहरणत्वात् मज्जा निधनं अन्त्यत्वात् एतद्यज्ञायज्ञीयं नाम साम देहावय
वेषु प्रोतं समगोभवति सामगात्रो भवतीत्यर्थः नाभानहस्तपादादिना विहूर्केनि न कुटिलो भवति पंगुःकुणी
वेत्यर्थः संवत्सरं संवत्सरमात्रे मज्ज्ञो मासानि नाश्नीयात् अभक्षयेत् बहुवचनेन मत्स्यापलक्षणार्थं सर्वदैव।
नाश्नीयादिति वा वचनम् अग्निर्हिंकारः प्रथमस्थानत्वात् वायुः प्रस्तावः अनन्तरं सामान्यात् आदित्य उद्गी
थः श्रेष्ठत्वात् नक्षत्राणि प्रतिहारः प्रतिहरणत्वात् चन्द्रमा निधनं कर्मिणां तत्र निधानात् एतद्राजनं देवता
सु प्रोतं देवतानां दीप्तिमत्त्वात् विद्युत्फलमेतासामेव अग्न्यादीनां देवतानां सलोकतां समानलोकत्वं सार्ष्टि
[तां समानर्द्धितां सायुज्यं सहभावमेकदेहदेहित्वमित्येतत् वा शब्दो वा लोसा हषणः सवाकलवेत्यादिभा।]
वनाविशेषतः फलविशेषोपपत्तेः गच्छति प्राप्नोति समस्तया उपपन्नेषु ब्राह्मणान्निर्देशकृतनम् एतद्वै ब्राह्म

णः प्रत्यहं य एवं वेद निश्नुते ब्राह्मणानि दादेवतानि दैवेति ॥ त्रयीविद्या हिंकारः ऋग्गादिसामत्रयेन तत्र्यं त्रयी
विद्याया ऋग्गादिकार्यतत्त्वतः हिंकारः प्राथम्यात्सर्वेकर्मणां त्रय इमे लोकास्तत्कार्यत्वात्तेन ते प्रस्ता
वः ऋग्गादीनामग्न्यादीनां वेश्रेष्ठत्वात् न ह्यग्न्यादीनां प्रतिहर्तृत्वाद्युपनिधानं सम्यगादीनां च कार्या सामान्यनिधनं
एतत्साम नाम विशेषाभावात्साम समुदायः सामशब्दः सामान्यं सर्वास्मिन्नाते त्रयीविद्यादि दृष्टं त्रयीवि
द्यादिदृष्टानां हिंकारादिसामभक्तयः सामसाः अनीने अपि सामापास्य नेषु येषु मानं यत्साम तद्दृष्टानं
पास्य मितिकर्मांगानां हिंविशेषणान्येव स कार्यं तान् सर्वविषयसाम विदः फलं सर्वं भवति सर्वस्य भ
वतीत्यर्थः निरुपचरितं सर्वं भावहिंदिकस्य कर्मवलिषाम्य उपपत्तिः तदेतत्त्रित्रयं पंचस्तुकामं ते पालि
यानि पंचधा प्रकारेण हिंकारादिविभागेन तानि त्रीणि त्रीणि त्रयीविद्यादीनि तेभ्यः पंचविंशकं ज्यायः ।
मद्वा परं च नातिरिक्तमस्ति तत्ववतरं नास्ति न विद्यत इत्यर्थः तत्रैव सर्वं संतानं भौवायसत्यथा सर्वात्मकं
सामवेद स सर्वं वेद सर्वं सर्वं ह्यस्मै भवतीत्यर्थः सर्वादिशोऽदिकस्य ज्ञस्यैवं विदे वलिभागं हरंति सा एवमेतीत्यर्थ
सर्वमस्मि न वामीति व मेतत्सामोपासीतेनेत्येतदेव व्रतम् द्विकं तिः सामोपासनसमाप्त्यर्थो सामोपास
नप्रसंगेन गानविशेषादिसंपत्त्युत्थानरूपादिष्वपेत फलविशेषसंबंधाद्धिनं दिविशिष्टानं दः स्वर विशेषकृष
भस्यारूकजिसामस्यात्तीति विनर्दि गानमिति वाक्यशेषः तत्साम्नः स्वयं संबंधि पश्चभ्यो हितं पशव्यमग्ने
रग्निदेवत्यं चोद्गीथ इत्याने उद्गमे वं विशिष्ट इत्याप्रार्थयन् इति कश्चिद्यजमानाय आत्मने वा मन्यते तत्र कस्मा
निरुक्तोऽनिरुक्त विशेषितः प्रजापतेः प्रजापतिदेवत्यः समानविशेषेणानिरुक्तत्वात्प्रजापते निरुक्तः स्पष्टः सो
मस्य सोमदेवत्यः स उद्गीथ इत्यर्थः मृदु श्लक्ष्णं वायोरयं वायोर्वा वायुदेवत्यं तेन श्लक्ष्णं बलवद्व प्रयत्नाधिक्या

छां. भा. २२

येन वेदस्य ऐन्द्रस्य क्रौञ्चं क्रौञ्चपक्षिनिनादसमं बृहस्पतेर् अपध्वान्तं भिन्नकांस्यस्वरवद् व
रुणस्य तस्मान् एतान्सर्वानेवोपसेवेत प्रयुञ्जीत वारुणं त्वेवैकं वर्जयेत् अमृतत्वं देवेभ्य आगाययानि साधयानि
स्वधां पितृभ्य आशां मनुष्येभ्यः आशा प्रार्थना प्रार्थितमिष्टं तृणोदकं पशुभ्यः स्वर्गं लोकं यजमानायान्न
मात्मने मह्यमागायानीत्येतानि मनसा चिन्तयन् ध्यायन्नप्रमत्तः स्वरोष्मव्यञ्जनादिभ्यः स्तुवीत सर्वे स्वरा अका
रादय इन्द्रस्य बलकर्तुः प्राणस्यात्मनो देहावयवस्थानीयाः सर्व ऊष्माणः शषसहादयः प्रजापतेर्विराजः का
श्यपस्य वात्मनः सर्वे स्पर्शाः कादयो व्यञ्जनानि मृत्योरात्मानं तमेवं विदमुद्गातारं यदि कश्चित्स्वरेषूपालभेत स्व
रस्त्वया दुष्टः प्रयुक्त इत्येवमुपालब्ध इन्द्रं प्राणमीश्वरं शरणमाश्रयं प्रपन्नोऽभूवं स्वरान्प्रयुञ्जानोऽहं स इन्द्रो यत्त
व वक्तव्यं तत्त्वा प्रति वक्ष्यति स एव देव उत्तरं दास्यतीत्येनं ब्रूयात् अथ यद्येनमूष्मसूपालभेत प्र
जापतिं शरणं प्रपन्नोऽभूवं स त्वा प्रति पेक्ष्यतीति स त्वा चूर्णयिष्यतीत्येनं ब्रूयात् अथ यद्येनं स्पर्शेषूपालभेत मृत्युं
शरणं प्रपन्नोऽभूवं स त्वा प्रति धक्ष्यतीति भस्मीकरिष्यतीत्येनं ब्रूयात् यत इन्द्राद्यात्मानः स्वराद्योऽतः सर्वे स्वरा घोषवन्तो
बलवन्तो वक्तव्याः तथाहमिन्द्रे बलं ददानीति बलमादधानीति तथा सर्व ऊष्माणोऽग्रस्ता अन्तः प्रवेशिता अनिरस्ता
बहिः प्रक्षिप्ता विवृता विवृतप्रयत्नोपेताः प्रजापतेरात्मानं परिददानि प्रयच्छानीति सर्वे स्पर्शा लेशेनानभि
निहिता अनभिनिहिता वक्तव्याः मृत्योरात्मानं बालानिव शनकैः परिहरन् मृत्योरात्मानं परिहराणी
ति ओंकारस्योपासनविध्यर्थं त्रयो धर्मस्कन्धा इत्याद्यारभ्यते नैवं मन्तव्यम् सामावयवभूतस्यैवोद्गीथादिलक्ष
णस्योंकारस्योपासनात् तत्फलं प्राप्यते किं तर्हि यत्सर्वैरपि सामोपासनैः कर्मभिश्चाप्राप्यं तत्फलममृतत्वं
केवलादोंकारोपासनात् प्राप्यत इति तत्स्तुत्यर्थं सामप्रकरणे तदुपन्यासः त्रयः संख्याता धर्मस्य स्कन्धाः।

धर्मस्कंधा धर्मप्रविभागा इत्यर्थः के त इत्याह यज्ञोऽग्निहोत्रादिरध्ययनं सनियमस्य ऋगादेरभ्यासः दानं बहिर्वे।
दि यथाशक्ति द्रव्यसंविभागो भिक्षमाणेभ्य इति प्रथमो धर्मस्कंधो गृहस्थसमवेतत्वात्तन्निर्वर्तकेन गृहस्थेन नि
र्दिश्यते प्रथम इत्यर्थः द्वितीयतृतीयश्रवणात्प्राथम्यं तप एव द्वितीयस्तप इति कृच्छ्रचांद्रायणादि तद्वां
स्तापसः परिव्राड्वा न ब्रह्मसंस्थः आश्रमधर्ममात्रसंस्थः ब्रह्मसंस्थस्त्वमृतत्वमेति श्रवणात् द्वितीयो धर्मस्कंधः॥
ब्रह्मचार्याचार्यकुलेवस्तुं शीलमस्येत्याचार्यकुलवासी अत्यंतं यावज्जीवमात्मानं नियमैराचार्यकुलेवसादयन्
क्षपयन्देहं तृतीयो धर्मस्कंधोऽत्यंतमित्यादिविशेषणान्नैष्ठिक इति गम्यते उपकुर्वाणस्य स्वाध्यायग्रहणार्थत्वान्न।
पुण्यलोकत्वं ब्रह्मचर्येण सर्व एते त्रयोप्याश्रमिणो यथोक्तैर्धर्मैः पुण्यलोका भवंति पुण्यो लोको येषां त इमे पुण्य
लोका आश्रमिणो भवंति शिष्टस्त्वनुक्तः परिव्राड्ब्रह्मसंस्थो ब्रह्मणि सम्यक्स्थितः सोऽमृतत्वं पुण्यलोकविलक्षण
ममरणभावमेति आत्यंतिकं नापेक्षिकं देवाद्यमृतत्ववत् पुण्यलोकात्पृथगमृतत्वस्य विभागकरणाद्यदि च
पुण्यलोकातिशयमात्रममृतत्वमभविष्यत्ततः पुण्यलोकाद्विभक्तं नावक्ष्यत् विभक्तोपदेशाच्चात्यंतिकममृ
तत्वमिति गम्यते अत्र चाश्रमधर्मफलोपन्यासः प्रणवसेवास्तुत्यर्थम् न तत्फलविध्यर्थं स्तुतये च प्रणवसे
वाया आश्रमधर्मफलविधये चेति हि भिद्येत वाक्यं तस्मात्स्मृतिप्रसिद्धाश्रमफलानुवादेन प्रणवसेवाफलम
मृतत्वं ब्रुवन्प्रणवसेवां स्तौति यथा पूर्णवर्मणः सेवा भक्तपरिधानमात्रफला राजवर्मणस्तु सेवा राज्यतुल्यफ।
लेति तद्वत्प्रणवस्तु तत्सत्यं परं ब्रह्म तत्प्रतीकत्वात् एतत्सेवातत्त्वं ब्रह्मप्रपन्नं तत्सेवातत्त्वं परमित्याद्या न्यायान्का
टकेऽपि कं तत्सेवानाममृतत्वम्॥ अत्राहुः केचित् चतुर्णामाश्रमिणामविशेषेण स्वकर्मानुष्ठानात्पुण्यलोकत्वे उ
क्ते ज्ञानवर्जितानां सर्व एते पुण्यलोका भवंतीति नात्र परिव्राड्विशेषितः परिव्राजकस्यापि ज्ञाने यमनियमा।

नपप्रवेति नपप्रवहितीयस इत्यत्रनपःपाठेनपरिव्राडुपसंगृहीतो अतस्तेषामेववचनानां योब्रह्मसंस्थः सब्रा
ह्मणस्यैवकः सोऽमृतत्वमेतीति चतुर्णामधिकृतानां विशेषणात् ब्रह्मसंस्थत्वे प्रतिषेधाच्च स्वकर्मछिद्रेव ब्रह्म
संस्थतानुपपत्तेः नचयदेवाहादिशब्दवद्ब्रह्मसंस्थशब्दः परिव्राजके रूढः ब्रह्मणि स्थितिनिमित्त
स्याविशेषप्रसङ्गात् नहि रूढिर्योगनिमित्तमुपादत्ते सर्वेषां च ब्रह्मणि स्थितिरुपपद्यते यत्र यत्र निमित्त
मस्ति ब्रह्मणि स्थितिस्तत्र तत्र प्रवृत्तिनिमित्तेन वाच्यं वाचकेन संस्थ ब्रह्मसंस्थशब्देन परिव्राडेकविषये संकोचकारणा
भावाद्विरोधप्रसक्तेः नच परिव्राज्याश्रमधर्ममात्रेणामृतत्वं तेनानन्यथावाप्रसंगात् पारिव्राज्यधर्मयुक्त
मेव ज्ञानममृतत्वसाधनमिति चेन्न आश्रमधर्मवाविशेषात् धर्मो वा ज्ञानविशिष्टोऽमृतत्वसाधनमित्यत
दपि सर्वाश्रमधर्माणामविशिष्टेन च वचनमस्ति परिव्राजकस्यैव ब्रह्मसंस्थस्य नान्येषामिति ज्ञानान्मात्।
इति च सर्वोपनिषदां सिद्धान्तः न समाश्रयो ब्रह्मसंस्थः स्वाश्रमधर्मविहितकर्मवतां सोऽमृतत्वमेतीति न कर्मनि
मित्तविद्याप्रत्यययोर्विरोधात् कर्त्रादिकारकक्रियाफलभेदप्रत्ययवतो हि निमित्तमुपादाय देकं विदमका
धीरिति कर्मविधयः प्रवृत्ताः न त्वनिमित्तेन पाहकृतं सर्वपापाणिदर्शनात् सदेकमेवाद्वितीयमात्मैवेदं स
र्वं ब्रह्मैवेदं सर्वमिति शास्त्रजन्यः प्रत्ययो विद्यारूपः स्वाभाविकक्रियाकारकफलभेदप्रत्ययं कर्मविधिनिमित्त
मनुपमृद्य न जायते भेदाभेदप्रत्यययोर्विरोधात् नहि तैमिरिकद्विचन्द्रादिभेदप्रत्ययमनुपमृद्य तिमिरापा।
गमे चन्द्रैकत्वप्रत्यय उपजायते विद्याविद्याप्रत्यययोर्विरोधात् नत्वेवं सति ये भेदप्रत्ययमुपादाय कर्मविध
यः प्रवृत्ताः सर्वेऽपापमर्दिताः सदेकमेवाद्वितीयं नत्वस्य विकारभेदोऽनृतमिति नहि बाध्यमानेन तेनैकत्वप्र
त्ययेन स सर्वकर्मभ्यो निवृत्तः निमित्तनिवृत्तेः स च निवृत्तकर्मा ब्रह्मसंस्थ उच्यते स च परिव्राडेव अन्यस्यासं।

भवात् अन्योन्यनिष्ठभेदप्रत्ययोः सोऽन्यतरपरिशेषत्वन्यतराभावे विज्ञानत्रिदंडकोवेदं प्राप्नुयामिति हि मन्यतेऽनेनैवं
कुर्वता न ब्रह्मसंस्थता वाचारंभमात्रमात्रविकारानृतामिसंधि प्रत्ययवत्त्वात् न चासम्यग्मिथ्योपमर्दितेभेद
प्रत्यये प्रत्यमिदमनेन कर्तव्यमयेति प्रमाणप्रमेयबुद्धिरुपपद्यते आकाशादेवत्वसमत्वबुद्धिविवेकिनः
उपमर्दितेऽपि भेदप्रत्यये कर्मण्यनन्निवर्तते चेत्यागि भेदप्रत्ययोपमर्दनादेकत्वप्रत्ययविधायकवाक्यस्य प्र
माणत्वेन स्यात् अभक्ष्यभक्षणप्रतिषेधवाक्यानां प्रमाणवद्युक्तमेकत्ववाक्यस्यापि प्रामाण्यं सर्वोपनि
षदां तस्य त्वात्कर्मविधीनामप्रामाण्यप्रसंग इति चेन्न अनुपमर्दितभेदप्रत्ययवत्पुरुषविषयत्वात् प्रामाण्योप
पत्तेः स्वप्नादिप्रत्यय इव प्राक् प्रबोधाद्विवेकिनामकरणात्कर्मविधिप्रामाण्यं केदः इति चेन्न कर्मविधयः उक्तेदर्प
नात् नहि कामात्मता न प्रशस्तेनैवेह विज्ञानवद्भिः काम्यानि कर्माणि नानुष्ठीयन्त इति काम्यकर्मविधयः उ।
क्रियेरन् अनुष्ठीयन्त एव कामानाभिरिति तथा ब्रह्मसंस्थैः ब्रह्मविद्भिर्नानुष्ठीयन्ते कर्माणीति न न हि धियः उक्रिये
न्ते ब्रह्मविद्भिरनुष्ठीयन्त एवेति परिव्राजकानां भिक्षाचरणादिवदुक्तत्वे एकत्वप्रत्ययाणामपि तृष्ण्यादीना
अग्निहोत्रादिकर्माणि निवर्तेरन्निति चेन्न प्रामाण्यचिन्तायां पुरुषप्रवृत्तेरदृष्टत्वात् न हि नाम भवदेदिति प्रतिषि
द्धमप्यभिचरणं कश्चित्कर्तुं न तद्वदिति सञ्चोदितेष्वदृष्टेनापि विवेकिनाभिचरणं क्रियते न च कर्मविधिप्र
वृत्तिनिमित्तभेदप्रत्यये बाधितेऽग्निहोत्रादिप्रवर्तकनिमित्तमस्ति परिव्राजकस्येव भिक्षाचरणादौ बुभुक्षादि प्र
वर्तकमिहाप्यकरणप्रत्यवायभयं प्रवर्तकमिति चेन्न भेदप्रत्ययवतोऽधिकृतत्वात् भेदप्रत्ययान्नपमर्दि
तभेदबुद्धिर्विद्यावान् यः स कर्मण्यधिकृत इत्यवोचाम यो ह्यधिकृतः कर्मणि तस्य तदकरणे प्रत्यवायो न नि
वृत्ताधिकारस्य गृहस्थस्येव ब्रह्मचारिणो विशेषधर्मानचरणे एवं हि सर्वः स्वाश्रमस्थत्वेनैकत्वप्रत्ययः परि

ब्र·भा· २४

श्राद्धिति चेन्न स्वस्वामित्वभेदश्रुत्यनिरूपणेः कर्मार्थत्वाश्रुतराश्रमाणामथ कमेऊ वीतेति श्रुते तस्मात्स्वामिना।
भावाल्लिङ्गलेकपदपरिव्राडिन गृहस्थादिः एकत्वप्रत्ययविधिजनितेन प्रत्ययेन विधिनिमित्तभेदप्रत्ययस्याप्रमादि
त्वात् यमनियमाद्युपपत्तेः परिव्राजकस्येति चेत्तत्रुभूतादिनेकत्वप्रत्ययात्स्वरूपावितस्योपपत्तेर्विरूपस्य
त्वात् न च प्रतिषेधस्यैवाप्रामाण्यत्वप्रत्ययात्मनेः प्रागेव प्रतिषिद्धत्वात् नहि ग्राह्योऽस्य केनचिदेवोपपत्तिरुदितोऽपि
सविनाशिपातनिन्नसिद्धेरवतस्मान्निरुद्धनिरूपकर्माभिरुलकपदब्रह्मसंस्थ इति यत्तु नक्तं सर्वेषां ज्ञानावलिमानां
प्राप्येलोके नातिसन्त्यनेनत यद्वोक्तं नपः पाठेन परिव्राडुपुक्त इति निदर्शनं कस्मात्परिव्राजकस्यैव ब्रह्मसंस्थताभं
भवात् स एव स्ववर्णोषितस्येवाचाम एकत्वविज्ञानवतोऽग्निहोत्रादित्रिकर्मानिष्टुभेस्य भेदबुद्धिमनपवहितपः कर्ता।
नैवानाप्यादेनन कर्मकिंवास्य ब्रह्मसंस्थतासामर्थ्यं प्रतिषेधश्च प्रस्तुतः नत्वज्ञानवानेवनिष्ठतकर्मा परिव्राडिति
ज्ञानवैयर्थ्यप्रसङ्गम् यत्तु नक्तं यवववादादिश्रुतवत्परिव्राजकेन रूढो ब्रह्मसंस्थशब्द इति तत्परिहृतम् न
स्यैव ब्रह्मसंस्थतासंभवाज्ज्ञानस्येति यत्तु नक्तं रूढिशास्त्रनिमित्तेनोपादनत इति तत्र गृहस्थानत्यपरिकादिद
र्शनात् गृहस्थितिप्रवृत्त्यानन्तगणादिनिमित्तोपादानाश्रयि गृहस्थपरिव्राजकाश्रमिविशेषविधिरूज्ञानमिति
वननेनिरूढाटप्येनेशास्त्रानयत्र यत्र नात्मनिनिमित्तानितत्र तत्र वनेनेने प्रसिद्धभावात् नचेहापि ब्रह्मसंस्थतेति
हनसर्वकर्मनसाधनपरिव्राडेकविषयात्माश्रमिणामपरमहंसाद्यप्रवृत्तेरव्यभवितमर्हति सर्वात्मनत्वप
लक्षणात् अतश्चेदमेवैकं वेदान्तपारिव्राज्यम् नयज्ञोपवीतत्रिदण्डकमण्डल्वादिपरिग्रह इति मुण्डोऽपरिग्रह इ
तिश्रुतिः अत्याश्रमिभ्यः परमं पवित्रमिति च श्वेताश्वतरीये निःस्तुतिर्निर्नमस्कार इत्यादिस्मृतिभ्यश्च तस्मात्कर्मन
उवैतिपञ्चयः पारदर्शिनः तस्मादलिङ्गो धर्मज्ञोऽव्यक्तलिङ्ग इत्यादिस्मृतिभ्यश्च एतत्साध्यैः कर्मभ्यो गौणं पराप्यनेन २०

त्कृष्णक्रियाकारकफलभेदश्रुतेः समस्तत्वाभ्युपगमात् यस्त्वेवोक्तः स्तुत्यनाभ्युपगमाद्वकार्त्वमभ्युपगम्यते
तदप्यसत् तदभ्युपगतेः सत्त्वाभ्युपगमात् यस्मात् केवलसत्त्वाकार्त्वाभ्युपगमः सोऽप्यसत् कारकश्रुतेरनिव
र्तितत्वात् प्रमाणोत्पन्नस्य हेतोः प्रमाणाजनिते कर्त्तव्यप्रत्ययवत् पृथक्कर्मनिष्ठत्विलक्षणो ब्रह्मसंस्थत्वपरि
भाष्यं चेति सिद्धम् एतेन गृहस्थस्यैकत्वविज्ञाने सति पारिव्राज्यमर्थसिद्धम् ननु भूमादनदोषभाक्स्यादिति
चेन्न वीरहा वा एष देवानां योऽग्नीनुद्वासयत इति श्रुतेर्न दैवोऽन्यादिनवाहुत्यग्रवसः एकत्वदर्शने जाते
ऽपापादेर्ग्निरिवमिति श्रुतेः अतो न दोषभाक् गृहस्थः परिव्राजन्निति यत्तस्योत्पन्नत्वमेतिनित्विरु प्राणायै
माह प्रजापतिर्विराट् कश्यपो वालखिल्या इति एवं अग्निहोत्रयाभ्यपगत अभितापं कृतवान् ध्यानेन तपः
कृतवानित्यर्थः तेभ्योऽभितप्तेभ्यः सारभूता त्रयी विद्या संप्रास्रवत् प्रजापतेर्मनसि प्रतिभादित्यर्थः तामभ्य
तपत् सर्वे वेदस्य त्रयीविद्यायाः एतान्यक्षराणि संप्रास्रवन् व्याहृतयः तास्त्वक्षराण्यभ्यतपत् तेभ्योऽभितप्तेभ्यः
ओङ्कारः संप्रास्रवत् तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृण्णान्येवमोङ्कारेण सर्वा वाक् सन्तृण्णा इति श्रुत्याम्नाना
नि सन्तृण्णानि विज्ञानीयान्यर्थः एवमोङ्कारेण अक्षराणि परमात्मनः प्रतीकभूतेन सर्वा वाक् सन्तृण्णा नेम
तृणाग्रवत् तेषु सर्वाणि इति श्रुतेः परमात्मविकारस्य नामधेयमात्रमिति तदोङ्कार एवेदं सर्वमिति द्विरभ्यास
आदरार्थः लोकादिनिष्पादनवाचनमोङ्कारस्तुत्यर्थमिति सोमपानप्रसङ्गेनकामे गुणभूतत्वात् त्रिवर्त्ती।
कारपरमात्मप्रतीकत्वायामृतत्वहेतुत्वेनोपास्य प्रकृत सैव यज्ञस्याङ्गभूतानि सामहोमसंमन्त्रोऽस्यानुपदि
दिशन्नाह ब्रह्मवादिनो वदन्ति यस्मात्प्रातःसवनं प्रसिद्धं तद्वसूनां तेषु प्रातःसवनसंबद्धायै लोकावशीकृतः ते
षामेव स्वद्वितीयसो कालत्वाह इत्येमाध्यन्दिनसवनं यानेरं तदितीलो वा आदित्ये सुविश्वदेवस्त्रतृतीयसवनं ।

को॰ भा॰
२५

मैनेस्त्रीनीयेलोकोवशीकृत इति यजमानस्य लोकोत्त्यः परिशिष्टो न क्रियते अतः कथं नर्हि यजमानस्य लोको
यदर्थं भूते नैतद्विलोकोस्तीत्यभिप्रायः लोकावयवैर्यजनेयो यजन इति ष्ठुतेः लोकाभावे च स्थाय यजमा
नस्य लोकस्तीक यणा यायं सामहस्यमेवोर्थानलक्षणेनविद्याद्विजानीयात् सोऽतः कथं ज्यायोघस्ते नवायं च
नतस्यकर्तृत्वमप्ययनइत्यर्थः सामादिविज्ञानस्तुतिपरत्वाद्विदुषः कर्तृत्वं कामैर्माद्रविदः प्रतिषिध्यते स्तुत
येच सामादिविज्ञानस्याविदुषः कर्तृत्वप्रतिषेधायवैविधियते वाक्यम् प्राग्वोषस्यकोडे विदुषापि कामैः।
स्तीति देवतमवोचाम प्रयेनइत्यमार्गेण सामायुपार्यविद्वान् कुर्यात् किं न हेत्वमित्याह पराश्चैव प्रातरनुवाक
स्योपाकरणस्य प्रारंभात्तत्पूर्वेण गार्हपत्यस्य पश्चादुदङ्मुखः सन्नुपविश्य सवास्वंववस्तदेवत्यं सामाभिगायेति ।
लोकद्वारमस्य पृथिवीलोकस्य प्राप्तये द्वारमपावृणु इह येन तद्वारेण प्रपश्येम त्वा त्वां राज्यायेति अथानन्तरं
होमं जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते इति पृथिवीलोकनि
वासाये त्यर्थः लोकं मम यजमानाय विन्द लभस्व एष वै मम यजमानस्य लोकः एतागन्ताः स्मः अस्मिंल्लोके
यजमानाहमायुषः परस्तात् इत्येवं मन्त्रार्थः स्वाहेति जुहोति अपजहि परिघमित्येवं लोकद्वारार्गल
मित्येतन्मन्त्रं उक्त्वा उत्तिष्ठन्ते वसवस्तेभ्यः प्रातःसवनं संबद्धं लोकं निष्क्रीतं स्यात् ततस्ते प्रातःसवनं वसे
वो यजमानाय संप्रयच्छन्ति तथाग्नीध्रीयस्य दक्षिणेनोदङ्मुख उपविश्य वैश्वदेवं सामाभिगायति वा
जमानो रुद्रेभ्यो वैराज्यायेति तेन दिक्ष्वादित्यमानेन तथाहवनीयस्योदङ्मुख उपविश्य स आदित्यैदे
वतमादित्येभ्यो वैश्वदेवं च सामाभिगायति मा मेणा स्वाराज्याय साम्राज्यायेति विदितं इत्येवमादिस्थाने प्रत्यक्
विदितापहत्य निबद्धवचनमात्रेविशेषः याजमानेस्वनिदेताः स्वत्रय यजमान इत्यादिलिङ्गात् एषह्येव यजमा।

म एवं विद्यथोक्तसमासाद्देर्विद्वान्यत्नस्य साम्नोपासनया धान्यं वेद यथोक्तं य एवं वेदेति द्विरुक्तिरध्यायपरि
समाप्त्यर्था ॥ इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभ
गवतः कृतौ छान्दोग्योपनिषद्विवरणे द्वितीयः प्रपाठकः २ ॐ श्रीगणेशाय नमः ॐ नमः शिवाय ॐ
असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवंशोन्तरिक्षमपूपो मरीचयः पुत्राः तस्य ये प्राञ्चो रश्मयस्ता
एवास्य प्राच्यो मधुनाड्य ऋच एव मधुकृत ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋच एतमृग्वेदमभ्यतपं
स्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोजायत तद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वा एतद्यदेत
दादित्यस्य रोहितं रूपं ॥ १ ॥ अथ येस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूंष्येव मधुकृतो
यजुर्वेद एव पुष्पं ता अमृता आपस्तानि वा एतानि यजूंष्येतं यजुर्वेदमभ्यतपंस्तस्याभितप्तस्य यशस्तेज इ
न्द्रियं वीर्यमन्नाद्यं रसोजायत तद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वा एतद्यदेतदादित्यस्य शुक्लं रूपम्
अथ येस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्यः सामान्येव मधुकृतः सामवेद एव पुष्पं ता अमृता २
आपस्तानि वा एतानि सामान्येतं सामवेदमभ्यतपंस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोजा
यत तद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वा एतद्यदेतदादित्यस्य कृष्णं रूपं ॥ ३ ॥ अथ येस्योदञ्चो रश्मयस्ता
एवास्योदीच्यो मधुनाड्योथर्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पं ता अमृता आपस्ते वा एतेथर्वा
ङ्गिरस एतदितिहासपुराणमभ्यतपंस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोजायत तद्व्यक्षरत्त
दादित्यमभितोश्रयत्तद्वा एतद्यदेतदादित्यस्य परं कृष्णं रूपं ॥ ४ ॥ अथ येस्योर्ध्वा रश्मयस्ता एवास्योर्ध्वा म
धुनाड्यो गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता अमृता आपस्ते वा एते गुह्या आदेशा एतद्ब्रह्माभ्यतपंस्तस्या

छां. भा.

मितमस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोऽजायत तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य म
ध्ये क्षोभत इव ते वा एते रसानां रसा वेदा हि रसास्तेषामेते रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृता
स्तेषामेतान्यमृतानि ॥ ५ ॥ तद्यत्प्रथमममृतं तद्वसव उपजीवन्त्यग्निना मुखेन न वै देवा अश्नन्ति न पिबं
त्येतदेवामृतं दृष्ट्वा तृप्यंति त एतदेव रूपमभिसंविशंत्येतस्माद्रूपादुद्यंति स य एतदेवममृतं वेद वसूना
मेवैको भूत्वाग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति स या
वदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥ ६ ॥ अथ यद्द्विती
यममृतं तद्रुद्रा उपजीवन्तीन्द्रेण मुखेन न वै देवा अश्नन्ति न पिबंत्येतदेवामृतं दृष्ट्वा तृप्यंति त एतदेव रूपम
भिसंविशंत्येतस्माद्रूपादुद्यंति स य एतदेवममृतं वेद रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैतदेवामृतं दृष्ट्वा तृ
प्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्ता
वद्दक्षिणत उदेतोत्तरतोऽस्तमेता रुद्राणामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥ ७ ॥ अथ यत्तृतीयममृतं तदा
दित्या उपजीवन्ति वरुणेन मुखेन न वै देवा अश्नन्ति न पिबंत्येतदेवामृतं दृष्ट्वा तृप्यंति त एतदेव रूपमभिसं
विशंत्येतस्माद्रूपादुद्यंति स य एतदेवममृतं वेदादित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा
तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता द्विस्ताव
त्पश्चादुदेता पुरस्तादस्तमेतादित्यानामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥ ८ ॥ अथ यच्चतुर्थममृतं त
न्मरुत उपजीवन्ति सोमेन मुखेन न वै देवा अश्नन्ति न पिबंत्येतदेवामृतं दृष्ट्वा तृप्यंति त एतदेव रूपमभिसं
विशंत्येतस्माद्रूपादुद्यंति स य एतदेवममृतं वेद मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्य

ति स य एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तर
त उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥ ४ ॥ अथ यत्पञ्चमममृतं तत्साध्या उप
जीवन्ति ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति त एतदेव रूपमभिसंविशन्त्येतस्मा
द्रूपादुद्यन्ति स य एतदेवममृतं वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव
रूपमभिसंविशत्येतस्माद्रूपादुदेति स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्ध्वमुदेतार्वागस्त
मेता साध्यानामेव तावदाधिपत्यं स्वाराज्यं पर्येता अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता तदे
ष श्लोकः न वै तत्र न निम्लोच नोदियाय कदाचन देवास्तेनाहं सत्येन मा विराधिषि ब्रह्मणेति न ह वा अस्मा उदेति
न निम्लोचति सकृद्दिवा हास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्म
नवे मनुः प्रजाभ्यः तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच इदं वाव तज्ज्येष्ठाय पुत्राय पिता
ब्रह्म प्रब्रूयात्प्रणाय्याय वान्तेवासिने नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेत
देव ततो भूय इत्येतदेव ततो भूय इति ॥ ६ ॥ गायत्री वा इदं सर्वं भूतं यदिदं किंच वाग्वै गायत्री वाग्वा इदं सर्वं
भूतं गायति च त्रायते च या वै सा गायत्रीयं वाव सा येयं पृथिव्यस्यां हीदं सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते
या वै सा पृथिवीयं वाव सा यदिदमस्मिन्पुरुषे शरीरमस्मिन्हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते सैषा
चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तम् तावानस्य महिमा ततो ज्यायांश्च पूरुषः पादोऽस्य सर्वा भूता
नि त्रिपादस्यामृतं दिवीति यद्वै तद्ब्रह्मेतीदं वाव तद्योऽयं बहिर्धा पुरुषादाकाशो यो वै सोऽन्तः पुरुष आकाशोऽयं वा
व सो योऽयमन्तर्हृदय आकाशस्तदेतत्पूर्णमप्रवर्ति पूर्णामप्रवर्तिनीं श्रियं लभते य एवं वेद ॥ १२ ॥ तस्य ह वा

छां. भा.
२

पतस्य हृदयस्य पंचदेवसुषयः स योस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोन्नाद्यमित्युपासीत तेज
स्व्यन्नादो भवति य एवं वेद अथ योस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रं स चंद्रमास्तदेतच्छ्रीश्च यशश्चेत्युपा
सीत श्रीमान्यशस्वी भवति य एवं वेद अथ योस्य प्रत्यङ्सुषिः सोपानः सा वाक्सोग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्य
मित्युपासीत ब्रह्मवर्चस्यन्नादो भवति य एवं वेद अथ योस्योदङ्सुषिः स समानस्तन्मनः स पर्जन्यस्तदेतत्की
र्तिश्च व्युष्टिश्चेत्युपासीत कीर्तिमान्व्युष्टिमान्भवति य एवं वेद अथ योस्योर्ध्वः सुषिः स उदानः स वायुः स आका
शस्तदेतदोजश्च महश्चेत्युपासीतौजस्वी महस्वान्भवति य एवं वेद ते वा एते पंच ब्रह्मपुरुषाः स्वर्गस्य लोकस्य
द्वारपाः स य एतानेवं पंच ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेदास्य कुले वीरो जायते प्रतिपद्यते स्वर्गं
लोकं य एतानेवं पंच ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठे
षु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिस्तस्यैषा दृष्टिर्यत्रैतदस्मिञ्छरीरे सं
स्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृ
णोति तदेतद्दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवं वेद य एवं वेद ॥ १३ ॥ सर्वं खल्विदं ब्रह्म तज्ज
लानिति शान्त उपासीत अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति
स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्व
रसः सर्वमिदमभ्यात्तोवाक्यनादर एष म आत्मान्तर्हृदयेणीयान्व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामा
कतण्डुलाद्वैष म आत्मान्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः सर्वकर्मा
सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोवाक्यनादर एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसं

भवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शांडिल्यः शांडिल्यः ॥ १४ ॥ अंतरिक्षोदरः कोशो भूमि-
बुध्नो न जीर्यति दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलं स एष कोशो वसुधानस्तस्मिन्विश्वमिदं श्रितं तस्य प्रा-
ची दिग्जुहूर्नाम सहमाना नाम दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीची तासां वायुर्वत्सः स य एतमेवं
वायुं दिशां वत्सं वेद न पुत्ररोदं रोदिति सोहमेतमेवं वायुं दिशां वत्सं वेद मा पुत्ररोदं रुदं अरिष्टं कोशं प्र-
पद्येऽमुनामुनामुना भूः प्रपद्येऽमुनामुना भुवः प्रपद्येऽमुनामुनामुना स यदवोचं प्राणं प्रपद्य इति प्राणो वा
इदं सर्वं भूतं यदिदं किंच तमेव तत्प्रापत्सि अथ यदवोचं भूः प्रपद्य इति पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य इ-
त्येव तदवोच अथ यदवोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम् अ-
थ यदवोचं स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य इत्येव तदवोचं तदवोचम् ॥ १५
पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशति वर्षाणि तत्प्रातः सवनं चतुर्विंशत्यक्षरा गायत्री गायत्रं प्रातः
सवनं तदस्य वसवोऽन्वायत्ताः प्राणा वाव वसव एते हीदं सर्वं वासयंति तं चेदेतस्मिन्वयसि किंचिदुपतपे-
त्स ब्रूयात् प्राणा वसव इदं मे प्रातः सवनं माध्यंदिनं सवनमनुसंतनुतेति माहं प्राणानां वसूनां मध्ये यज्ञो
विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति अथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यंदिनं सवनं चतुश्च-
त्वारिंशदक्षरा त्रिष्टुप् त्रैष्टुभं माध्यंदिनं सवनं तदस्य रुद्रा अन्वायत्ताः प्राणा वाव रुद्रा एते हीदं सर्वं रोदयं-
ति तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात् प्राणा रुद्रा इदं मे माध्यंदिनं सवनं तृतीयसवनमनुसंतनुते-
ति माहं प्राणानां रुद्राणां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति अथ यान्यष्टाचत्वारिंशद्वर्षाणि
तत्तृतीयसवनमष्टाचत्वारिंशदक्षरा जगती जागतं तृतीयसवनं तदस्यादित्या अन्वायत्ताः प्राणा वावादित्या

को·आ.
२६

पतेहोदं सर्वं मा दहतेनेचेदस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा आदित्या इदं मे तृतीयसवनमायुरनुसं
तनुतेति माहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो हैव भवति एतद्ध स्म वै तद्वि
द्वानाह महिदास ऐतरेयः स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति स ह षोडशं वर्षशतमजीवत्स।
ह षोडशं वर्षशतमजीवदिति ॥ १६ ॥ स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः अथ यत्पाद्ना
ति यत्पिबति यद्रमते तदुपसदैरेति अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तदेति अथ यत्तपो
दानमार्जवमहिंसा सत्यवचनमिति ता अस्य दक्षिणाः तस्मादाहुः सोष्यत्यसोष्टेति पुनरुत्पादनमेवास्य तन्म
रणमेवावभृथः तद्धैतद्घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचापिपास एव स बभूव सोऽन्तवेला।
यामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशितमसीति तत्रैते द्वे ऋचौ भवतः आदित्प्रत्नस्य रेतसः उ
द्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरं स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति ज्योतिरु
त्तममिति ॥ १७ ॥ मनो ब्रह्मेत्युपासीतेत्यध्यात्मम् अथाधिदैवतमाकाशो ब्रह्मेत्युभयमादिष्टं भवत्यध्या
त्मं चाधिदैवतं च तदेतच्चतुष्पाद्ब्रह्म वाक्पादः प्राणः पादश्चक्षुः पादः श्रोत्रं पाद इत्यध्यात्ममथाधिदैवतम
ग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इत्युभयमेवादिष्टं भवत्यध्यात्मं चाधिदैवतं च वागेव ब्रह्मणश्च
तुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद प्रा
ण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्च
सेन य एवं वेद चक्षुरेव ब्रह्मणश्चतुर्थः पादः स आदित्येन ज्योतिषा भाति च तपति च भाति च तपति च की।
र्त्या यशसा ब्रह्मवर्चसेन य एवं वेद श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः स दिग्भिर्ज्योतिषा भाति च तपति च भाति।

च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद य एवं वेद ॥ ६ ॥ आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानमस
सदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत्तदाण्डं निरवर्तत तत्संवत्सरस्य मात्रामशयत तन्निरभिद्यत ते आण्डक
पाले रजतं च सुवर्णं चाभवतां तद्यद्रजतं सेयं पृथिवी यत्सुवर्णं सा द्यौर्यज्जरायु ते पर्वता यदुल्बं स मेघो नीहारो
या धमनयस्ता नद्यो यद्वास्तेयमुदकं स समुद्रः अथ यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा उलूलवोऽनूदति
ष्ठन्सर्वाणि भूतानि सर्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनूत्तिष्ठन्ति सर्वाणि भूतानि
सर्वे चैव कामाः स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्तेऽभ्याशो ह यदेनं साधवो घोषा आ च गच्छेयुरुप च निम्रेड
रन् ॥ ४ ॥ इति तृतीयः प्रपाठकः ३ ॥ जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस स ह सर्वत
आवसथान्मापयांचक्रे सर्वत एव मेऽत्स्यन्तीति अथ ह हंसा निशायामतिपेतुस्तद्धैवं हंसो हंसमभ्युवाद हो हो यि
भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षीरिति तमु ह परः प्रत्युवा
च कम्वर एनमेतत्सन्तं सयुग्वानमिव रैक्वमात्थेति यो नु कथं सयुग्वा रैक्व इति यथा कृताय विजितायाधरेयाः
संयन्त्येवमेनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति तदु ह जा
नश्रुतिः पौत्रायण उपशुश्राव स ह संजिहान एव क्षत्तारमुवाचाङ्गारे ह सयुग्वानमिव रैक्वमात्थेति यो नु क
थं सयुग्वा रैक्व इति यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कु
र्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति स ह क्षत्तान्विष्य नाविदमिति प्रत्येयाय तं होवाच यत्रारे ब्राह्मणस्या
माह नेत्यादिना बाह्येषु जाग्रद्रूपेषु बाह्यपदार्थेषु व्यवस्थितो द्वयकालत्वेन कालद्वयावच्छेदनकृतः प्र
त्यभिज्ञायमानत्वरूपो विशेषः अन्यहेतुको न भवति कल्पितेऽपि तथाविधविशेषसंभवादित्यत्र दृष्टान्तमा
ह अत्रापि हीति यद्यपि सर्वे जाग्रद्दृष्टं ज्ञाने कल्पितं तथापि तत्र यथोक्तो विशेषो स्फुटः सिध्यति स्वप्ने सर्व
स्वभेदज्ञानस्य कल्पितत्वेऽपि प्रत्यभिज्ञायमानत्वाज्जागरितेऽपि तदुपपत्तेरित्यर्थः १५ ॥ ८

स्वप्नजागरितयोरुभयोरपि मिथ्यात्वे स्फुटास्फुटावभासविभागानुपपत्तेर्वा विशेषेण मिथ्यात्वमित्याशंक्याह अव्यक्ता
इति येमनस्यन्तर्भावनारूपवाद स्फुटाये च मनसो वहिरुपलभ्यमानाः स्फुटा भवन्ति ते सर्वे मनः स्फुरदन्मात्रत्वेन कल्पि-
ता मिथ्यैवेति न वहिरिन्द्रियभेदनिमित्तः स्फुटत्वास्फुटत्वविशेषः न मिथ्यात्वममिथ्यात्वं वा तत्रोपपद्यते मिथ्याभूते
स्वपितदर्शनादित्यर्थः श्लोकार्धं व्याकरोति योपीत्यादिना मनसोन्तर्मनोरथरूपाणां भावानामव्यक्तत्वमस्फु-
टत्वं तत्र हेतुमाह मन इति चक्षुरादियासनेन न मनसो वहिर्भावानां स्फुटत्वेपि तदेवाम मिथ्यात्वकृतमिति श्लोका

योप्यन्तराव्यक्तत्वं भावानां मनोवासनामात्राभिव्यक्तानां स्फुटत्वं वा वहिश्चक्षुरादीन्द्रियान्तरे विशेषो

अव्यक्ता एव येन्तस्ते स्फुटा एव च ये वहिः
कल्पिता एव ते सर्वे विशेषास्त्विन्द्रियान्तरे १४

नासौ भेदो नामस्ति तत्कृतः स्वप्नेपि तथा दर्शनात् किं तर्हि इन्द्रियान्तरकृत एव अतः कल्पिता एव जाग्रज्जावा
अपि स्वप्नभाववदिति सिद्धम् १५॥

वारयति नासाविति सर्वसंप्रतिपन्नमिथ्यात्वेपि स्वप्ने स्फुटास्फुटावविशेषप्रतिभानान्नासौ विशेषो मिथ्यात्वममि-
थ्यात्वं वा प्रयोजयितुं प्रभवतीत्याह स्वप्नेपीति अयं विशेषस्तर्हि केन सिध्यतीत्याशंक्य चतुर्थं पादं व्याख्या माह किं तर्हीति
मनोमात्रसंबन्धादन्तर्भावानां वासनामात्ररूपाणामस्फुटत्वं वहिर्भावानां तु चक्षुरादिवहिरिन्द्रियसंबन्धात्तु स्फुटत्वं
तदेव विशेषो मिथ्यात्वाविशेषेपि सिध्यतीत्यर्थः स्फुटत्वास्फुटत्वप्रतिभासभेदस्यामिथ्यात्वेपि संभवात् सामान्यम-
नुमानमविरुद्धमित्युपसंहरति अत इति ॥

मां० भा०
टि० टी०
८

भवनसर्वस्य कल्पितत्वे साधनः सर्वकल्पना केन द्वारेणेत्याशंक्याह जीवमिति आत्मादिः सर्वं स्वमायावशेन
कल्पयन्नादौ विशिष्टरूपेण जीवं कल्पयते तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः स्वयमेव जीवभावमापद्यते न
ह्यरेणैव नानाविधान्भावान्निर्मिमीते तान् स्मृति वैधर्म्यात्तत्कल्पेषु भावेषु वैशम्याप्राप्तेरित्यर्थः श्लोकस्याव
यवप्रश्नस्त्यापयति बाह्यानामिति पदार्थाः साध्यसाधनतयास्थिताः बाह्याः सुखदुःखे तेनानेन ग्राह्यस्त्वेव
मादयस्त्वाध्यात्मिकास्तेषां परस्परं निमित्तनैमित्तिकतास्ति बाह्यान्निमित्तीकृत्याध्यात्मिक भवति तानपि

बाह्यानामाध्यात्मिकानां भावानामितरेतरनिमित्तनैमित्तिकतया कल्पनायां किं मूलमित्यु
च्यते जीवं हेतुफलात्मकं अहं करोमि मम सुखदुःखे इत्येवंलक्षणं अनेवंलक्षण एव शुद्धे

जीवं कल्पयते पूर्वं ततो भावान्पृथग्विधान् बाह्या
नाध्यात्मिकांश्चैव यथाविद्यस्तथास्मृतिः १६ ॥

आत्मनि रज्ज्वामिव सर्पं कल्पयते पूर्वं ततस्तादर्थ्येन क्रियाकारकफलभेदेन प्राणादीन्नानाविधा
न्भावान्बाह्यानाध्यात्मिकांश्चैव कल्पयते ॥ निमित्तीकृत्येतरस्मिन्नायंते तदेवमितरेतरनि
मित्तनयानैमित्तिकतया च कल्पनायाः मूलत्वं वक्तव्यं निर्मूलकल्पमायामतिप्रसंगादित्यर्थः श्लोकान्तरयोजनया
परिहरति उच्यतः इति हेतुफलात्मकमित्युक्तमेवमनक्ति अहमिति हेतुफलभावविकल्परिशुद्धमात्मस्वरूपं जीव
कल्पनाधिष्ठानं दर्शयति अनेवमिति आरोपस्याधिष्ठानापेक्षत्वात्तत्र दृष्टान्तमाह रज्ज्वामिवेति द्वितीयत्वतो
यथादौ विभज्जते ततः इति तादर्थ्येन प्रथमकल्पितस्य भोक्तृजीवस्य शेषत्वेनेत्यर्थः १६ ॥

यद्यपि जीवः सर्वकल्पनायां मूलभूतो हेतुस्तथापि न स्यात्तत्कल्पनाविशेषाविशेषहेतुव्यतिरेकेण न संभवतीति शं
कते तत्रेति चतुर्थपादेनोत्तरमाह उच्यत इति कल्पितो विशिष्टरूपेणेति शेषः अधिकृतः स्वामित्वेन सम्बद्ध इत्यर्थः इति श
ह्रः श्लोकान्तरयोजनासमाभिप्रायेणतनार्थः प्रकृतकल्पनामेव प्रपंचयति अत इत्यादिना स्वयन्नपानादुपयोगस्तस्यादिसं
भवति अतस्तेन संभवतीत्यन्वयव्यतिरेकरूपाभ्यामभ्यासान्नादिके हेतुरिति कल्पनाविज्ञानमुत्पद्यते ततस्तत्स्वादिके फ

तत्र कल्पनायां को हेतुरित्युच्यते योऽसौ स्वयं कल्पितो जीवः सर्वकलनासामधिकृतः स यथा विद्यो
याहृशो विद्याविज्ञानमस्येति यथा विद्यस्तथाविधैव स्मृतिस्तस्येति तथास्मृतिर्भवतीत्यर्थः इति अ
तो हेतुकल्पनाविज्ञानात् फलविज्ञानं ततो हेतुफलस्मृतिः ततस्तद्विज्ञानं तदर्थक्रियाकारकत
त्फलभेदविज्ञानानि तेभ्यस्तत्स्मृतेश्च पुनस्तद्विज्ञानमिति एवंवासनाख्यान्मिकोऽन्येतरेतरनि
मित्तनैमित्तिकभावेनानेकधा कल्पयते १९ ॥ ॥ ॥

लाभमिति कल्पनाविज्ञाने जायते ततः परेच्छुरुक्तयोरुभयोरपि हेतुफलयोः स्मृतिरुद्भवति ततश्च फलसा
धनसमानजातीयेकर्तव्यताविज्ञानं ततश्चाभिलषितत्स्वादिफलार्थिवेन यागादिक्रियातत्कारकतदङ्गलाभ
तत्फलान्ननिष्पत्यादीनि विशेषविज्ञानानि भवंति ततो हेत्वादिस्मृतिः ततस्तदनुष्ठानं ततश्च फलमित्यनेन
क्रमेण मिथो हेतुहेतुमत्तया कल्पना भवतीत्यर्थः प्रकृतां कल्पनामुपसंहरति एवमिति १९ ॥
श्रीरामचंद्राय नमो नमस्ते १ ॥ ॥

मां॰ भा॰ टि॰ टी॰ २

इदानीं जीवकल्पनानिमित्तं निरूपयति अनिश्चितेति श्लोकस्य तात्पर्यं दर्शयितुं तत्रेत्युक्तं कीर्तयति तत्रेति पूर्वे
श्लोकः समाप्यर्थः जीवकल्पनाया नित्यत्वायोगात् निमित्तवत्त्वं तत्कल्पनायाश्च वक्तव्ये निमित्तमनुपपन्नं मेवेति
वस्तुत्वे च निमित्तवत्त्वासिद्धेर्जीवकल्पनायाश्चेतनात्वात्कार्यभूतापि कल्पना नावकल्पते इत्याशंक्य तत्र मेव
तत्त्वेन श्लोकात्त्राणप्रवृत्तार्थमाचष्टे दृष्टान्तेनेति स्वमसाधारणं रूपं रज्जुत्वं तेनेति यावत् अनवधारितत्वमेव
स्फोरयति एवमेवेति रज्जुर्वयमित्यनेन प्रकारेणेत्यर्थः अज्ञानावधारणादिति कारणं सूचयति मदेति

तत्र जीवकल्पना सर्वकल्पनामूलमित्युक्तं सैव जीवकल्पना किंनिमित्तेति दृष्टान्तेन प्रतिपाद
यति यथा लोके स्वेन रूपेणानिश्चितानवधारिता एवमेवेति रज्जुर्मन्दान्धकारे किं सर्प उदकधारा दं
ड इति वानेकधा विकल्पिता भवति पूर्वं स्वरूपानिश्चयनिमित्तं यदि हि पूर्वमेव रज्जुः स्वरूपेण निश्चि

अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः १७

ता स्यात् न सर्पादिविकल्पोऽभविष्यत् यथा स्वहस्ताङ्गुल्यादिषु एष दृष्टान्तः तद्वद्धेतुफलादि
संसारधर्मानर्थविलक्षणतया स्वेन विशुद्धविज्ञप्तिमात्रम् ॥ पूर्वं रज्जुस्वरूपनिश्चयात् प्रागव
स्थायामित्यर्थः सर्पादिकल्पनायाः सत्त्वं यत्कल्पनाया सत्यव्यतिरेकसिद्धमुपादानमुपन्यस्यति स्वरूपेति एतदेव व्यतिरेकद्वा
रा विवृणोति यदि हीति देवदत्तस्य हस्तादौ यथैव वस्तुतद्रूपेणावतिष्ठते तु सर्पादिविकल्पो यथा नोपलभ्यते तत
था रज्ज्वां तत्स्वरूपेण निश्चिते नासौ युक्तस्तथा च रज्जौ तानादेव सम्भवतीत्यर्थः उपपादितं दृष्टान्तमनूद्य
दार्ष्टान्तिकमभिसन्धानश्चार्थं पादार्थमाह एवं इति हेतुफलादीत्यादिशब्देन कर्तृत्वभोक्तृत्वरागद्वेषा
दिरुक्ते विलक्षणत्वमेव स्फुटयति स्वेनेति अनात्मरूपेणेति यावद्वि...मविशुद्धत्वं जन्मादिराहित्यमाकारा

[illegible] ॥

तन्मात्रत्वमयुक्तं सामान्यविशेषभावादित्याशंक्याह सत्त्वेति नचतन्मात्रत्वमसिद्धमेवमिति सत्ताविशिनष्टि श्रद्दधयति
सच्चिदानंदाद्वयात्माविद्याविलसितद्वैतमित्यत्रप्रमाणंसूचयति एषइति श्रुतेस्तत्रकृतयत्नाविवत्तत्रोपलभ्यतेयत्र
हिद्वैतमिवभवतीत्याद्याश्रुतेस्ततत्यातिभासयोः सिद्धात्मावेदयत्यः श्रुतयः श्रुतेतेनाद्वैतत्वंद्वैतस्याविद्याविजृंभित
मितिप्रमाणसिद्धमित्यर्थः १७ अविद्याकृतान्जीवकल्पनेन्यान्नयसत्वेनोक्तं तदेवेदानीं व्यतिरेकमुखेन दर्शयति
निश्चितायामिति रज्जुरेवेति रज्ज्वां निश्चितायां तदज्ञाननिवृत्तेस्तदज्ञकृतसर्पादिविकल्पः सर्वथा निवर्तते रज्जुमात्रं

सत्ताद्वयरूपेण निश्चितत्वाज्जीवप्राणाद्यनंतभावभेदेनात्माविकल्पितइति एवंसर्वोपनिषदांसिद्धांतः
मय्येवेदंकल्पितम् १८ रज्जुरेवेति निश्चये सर्वविकल्पनिवृत्तौ रज्जुरेवेति चाद्वैतं यथा तथा नेति नेती

निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः १८ ॥

तिसर्वसंसारधर्मशून्यप्रतिपादकशास्त्रजनितविज्ञानसूर्यालोककृतात्मविनिश्चयः ॥

चावशिष्यते तद्वदात्मनिश्चितो निश्चयो यदा संपद्यते तदा सर्वस्यात्माविद्याकल्पितस्य जीवादिविकल्पस्याद्व
तेरद्वैतमेवात्मतत्त्वं परिशिष्यते तस्मादात्माविद्याविजृंभितजीवकल्पनेत्यर्थः दृष्टान्तभागं व्याचष्टे रज्जुरिति त
द्वदित्यादिव्याकरोति तद्वदिति सर्वस्यापि संसारात्मनो धर्मस्यात्मन्यारोपितस्यासत्त्वावेदकं यच्छ्रुतिप्रमाणं तेन जनि
तं विज्ञानमेव सूर्यालोकस्तत्कृतो यो यमात्मविनिश्चयः सएवाद्वितीयः शिष्यते द्वैतं पुनः सर्वमेवमाष्टंतं भ
वतीत्यर्थः ॥ १८ ॥ रामायनमः

मां॰ भा॰ टी॰ ११

आत्मविनिश्चयमेव विशिनष्टि आत्मैवेति सर्वमिदमात्मैवेत्युक्ते श्रुतिवेन(?)स्योच्यते पूर्वभाविनाकारणेन संस्पृष्टश्
न्यापूर्वः पश्चाज्ञाविनाकार्येणासंबंधविधुरोनपरः अन्तरं छिद्रं तच्छून्योनन्तरः चिदेकरसत्वस्य प्रत्यक्त्वासबाह्य
त्वे कार्यकारणस्पृष्टमभयकल्पनाविष्टानत्वेन ततोप्यन्तरत्वादित्याह सबाह्येति विशेषणत्रयं कौटस्थ्य
मेव स्थापयितुमर्थं जन्मादिसंबंधाभावे कारणमविद्यासंबंधराहित्यं दर्शयति अभयइति न खल्वविद्यातत्का
र्येण संबंधमन्तरा भवति नत्वपूर्णत्वेन कारणानपेक्षत्वादित्याह एकइति द्वैताद्वैतव्याहत्यर्थमवधारण
नेत्वविद्याया निराश्रयत्वानुपपत्तेराश्रयान्तरस्य चासत्वात्तत्त्वेवसा प्रविशतीति चेत्सत्यमविद्यादृष्ट्यातस्यास्तत्त्वे

आत्मैवेदं सर्वमपूर्वोनपरोनन्तरोबाह्यः सबाह्याभ्यन्तरोजः अजरोमरोमृतोभयः एक एवाद्वयइति १८
यद्यात्मैकएवेति निश्चयः कथं प्राणादिभिरनन्तैर्भावैरेतैः संसारलक्षणैर्विकल्पितइति उच्यते शृणु

प्राणादिभिरनन्तैश्च भावैरेतैर्विकल्पितः मायैषा तस्य देवस्य ययायं मोहितः स्वयं १९

मायैषा तस्यात्मदेवस्य यथा मायाविना विहिता माया गगनमतिविमलं कुसुमितैः सपलाशैस्तरु
भिराकीर्णमिव करोति तथेयमपि देवस्य मायाययायमपि मोहितइव मोहितो भवति ममममायाउरत

प्रवेशोपिवस्तुदृष्ट्या नास्मिन्नास्मिन्नत्यवेष्टुं प्रभवतीत्यभिप्रेत्याह अद्वयइति १८ आत्मनो द्वितीयत्वेकथमनेकैर्भा
वैस्तस्य विकल्पितत्वमित्यभिप्रायात्प्रतिपत्त्या प्रश्नमवतिष्ठते प्राणादिभिरिति सिद्धान्तीसाभिसंधिमद्वयाद
यत्नान्तरमाह मायेति चोद्यभागं विभजते यदीति उत्तरार्धमनूद्य व्याकरोति उच्यतइति मायामेवदृष्टान्ते
न स्पष्टयति यथेति तामेव मायाकार्यद्वारास्फोरयति तथेति यथालौकिकोमोहितो मोहप्रवृत्तिपारमार्थिक्य
ते तथायमात्मा स्वयमेव मायास्वधाम्नो मोहितो भवत्यतो मोहद्वारात्मत्वमेव मायायितेति निरस्यर्थः मायायामो

केते प्राणादयो नेताभावायेनात्मा विकल्प्यते माययेत्यपेक्षायां प्राणादिविकल्पनामेवाह इति प्राण इति प्राणो हिरण्यगर्भस्त
टस्थेश्वरो वा सजगतो हेतुरिति प्राणविदो हैरण्यगर्भा यावैशेषिकादयश्च कल्पयन्ति तदिदं कल्पनामात्रं स्वतन्त्रस्य हिरण्यगर्भ
स्य सर्वेजगद्धेतुत्वे मानाभावात् पौरुषेयाऽगमस्यापौरुषेयश्रुतिविरोधे स्वार्थे मानतायोगात् तटस्थेश्वरवादस्य च प्र
माणयुक्तिविहीनस्य प्रतिपन्नमशक्यत्वादित्यर्थः कल्पनान्तरं दर्शयति भूतानीति चेति पृथिव्यप्तेजोवायवस्तत्त्वानि
तानि चत्वारि भूतानि जगत्कारणानीति लौकायतिकाः तदपि कल्पनामात्रं नहि भूतानि स्वतः सिद्धानि जडत्वविरोधात्
नापि परतः सिद्धानि स्वगुणस्य चैतन्यस्य स्वग्राहकत्वायोगाद्बाह्यग्राहिणोऽस्य स्वग्राह्यविषयत्वादर्शनात् ततो भूतानि जग

प्राण इति प्राणविदो भूतानीति च तद्विदः गुणा
इति गुणविदस्तत्त्वानीति च तद्विदः २० ॥

त्कारणानीति कल्पनैवेत्यर्थः सत्त्वरजस्तमांसि त्रयो गुणाः साम्येनावस्थिता जगतो महदादिलक्षणस्य कारणमिति सां
ख्यास्तदपि कल्पनामात्रं साम्येनावस्थितानां कारणत्वे प्रलयाभावप्रसंगात् वैषम्यभजनस्य च निर्हेतुकत्वे सदापातात् सहेतु
कत्वे हेतोर्नित्यत्वे प्राचीनदोषानुषङ्गात् अनित्यत्वे हेत्वन्तरापेक्षायामनवस्थानादित्याह गुणा इति कल्पनान्तरमाह तत्त्वानी
ति चेति आत्माविद्याशिवा इति सेश्वरपक्षे त्रीणि तत्त्वानि सर्वजगत्प्रवर्तकानीति शैवा मन्यन्ते तदपि कल्पनामात्रमात्मनो
भिन्नत्वे शिवस्य घटादिवत्त्वप्रसंगादभिन्नत्वे तत्त्वानां त्रित्वव्याघातादित्यर्थः २० ॥ राम ॥

मा॰ भा॰
टि॰ टी॰
१२

पकस्यात्मनो विश्वादयः पादाः सर्वव्यवहारहेतवो भवंतीत्यपि कल्पनामात्रं निरंशस्यात्मनोंशप्रभेदादुपपन्नेरित्याह
पादाः इति वात्स्यायनप्रभृतीनां कल्पना कथयति विषयाः इतीति शब्दादयो विषया भूयो भूयो भज्यमानास्तत्त्वमिति
विभ्रममात्रं विषस्य विषयाणां चेदूरमत्यंतमंतरेऽपभुक्तविषहेति विषयाः स्मरणादपीति विषयानुसंधानस्यमिति
नत्वानेषामपारमार्थिकत्वतभावानुपपन्नेरित्यर्थः भूर्भुवः स्वरिति त्रयो लोका वस्तुभूताः संतीति यो तार्किकास्तदेवाप्त
कल्पनामात्रं ध्यानभेदेन त्रिवितरानंत्यस्फुरत्त्वात् स्वातंत्र्यस्य चासिद्धत्वादित्याह लोकाः इति श्रुत्यादयो देवास्ते भाभ्य
नेत्यफलदातारो नेश्वरस्तथेति देवताकाण्डोपासनादपि कल्पनामात्रं भ्रमस्तदाविभ्रमयन्नमपेक्ष्यफलदातृत्वे तेषां भत्ते
भ्यो विशेषाभावप्रसंगात् स्वातंत्र्येणोपकारकत्वेन तदाराधनवैयर्थ्यान्तरक्तानामपि विप्रतिपत्तिदर्शनात्तन्मता

पादाः इति पादविदो विषया इति तद्विदः लोकाः इति लोकविदो देवाः इति च तद्विदः २१
वेदाः इति वेदविदो यज्ञाः इति च तद्विदः भोक्तेति च भोक्तृविदो भोज्यमिति च तद्विदः २२॥

दस्याकिंचित्करत्वादित्याह देवाः इति चेति २१ ऋग्वेदादयो वेदाश्चत्वारस्तत्त्वानीति पाठका वदंति तदपि कल्पना
मात्रं न हि वेदा लौकिकवर्णातिरिक्ताः दृश्यन्ते क्रमवतामेव वर्णानां वेदशब्दवाच्यत्वां गीकारात्क्रमश्चोच्चारणोप
लब्ध्योरनंतरगतो वर्णेषारोप्यते तथा च न तथाविधक्रमवतां वर्णानामारोपितेन रूपेण वेदशब्दवाच्यत्वात्केनो वेदानां
परमार्थतेत्याह वेदाः इति ज्योतिष्टोमादयो यज्ञा वस्तुभूता भवंतीति बौधायनप्रभृतयो याज्ञिका मन्यंते तदपि श्र
तिमात्रं यज्ञो ह्याम्नायाम्नातो द्रव्यदेवतात्यागः स च क्वैकस्मिन्यजतिवितानाभावात्समुदायस्यावस्तुत्वादित्याह यज्ञा इति
चेति भोक्तेति आत्मा न कर्तेति सांख्यास्तत्र भोगाय दिविक्रियावीक्रियते न हि कथं नानित्यत्वादिप्रसंगः स्वभावतस्त
दास्यादिति विषयसन्निधौ भोक्तृत्वे भ्रांतिरेवेत्याह भोक्तेति चेति सूपकारास्तु भोज्यं वस्त्विति प्रतिजानते तदपि
न मधुरादिरसभोजनकमनना दृष्टदेवान्यथात्वदर्शनादेकावस्थासंभवादित्याह भोज्यमिति चेति २२॥ १२

आत्मा सूक्ष्मोणुपरिमाणः स्यादिति केचित्तन्नपुरायदप्योषशरीरव्यापिवेदानुसंधानासिद्धेरित्याह सूक्ष्म इतीति स्थूलो
देहोहं प्रत्ययादात्मेति लोकायतभेदस्तच्च न मृतस्यापि संज्ञानाविशेषाच्चैतन्यप्रसंगादेकैकस्य च भूतस्य चेतनत्वाद
र्शनात्संघातस्य चावस्तुत्वादित्याह स्थूल इति चेति मूर्तो त्रिशूलादिधारी महेश्वरश्चक्रादिधारी वा परमार्थो भवतीत्या
गमिकास्तदपि भ्रान्तिमात्रं स्वसदादिशरीरवत्तस्यापि शरीरस्य पांचभौतिकत्वाल्लीलाविग्रहकल्पने च विग्रहाभावे
लीलायोगादयुक्तमित्याह मूर्त इति अमूर्तः सर्वाकारशून्यो निःस्वभावः परमार्थ इति शून्यवादिनस्तदपि कल्प
नामात्रं परमार्थतो निःस्वभावस्येति ग्राह्यतानादित्याह अमूर्त इति चेति २२॥ कालः परमार्थ इति ज्योतिवि

सूक्ष्म इति सूक्ष्मविदः स्थूल इति च तद्विदः मूर्त इति मूर्तविदो मूर्त इति च तद्विदः २३ ॥
काल इति कालविदो दिश इति च तद्विदः वादा इति वादविदो भुवनानीति तद्विदः २४ ॥

दस्तच्च न कालेको मुहूर्तादिव्यवहारायोगात्तत्तन्नानात्वेपि न स्वातंत्र्यमन्यविषयत्वेन प्रतीतेः उदयकाल
इत्यादिना क्रियाधर्मत्वेन प्रतीतेः स्फुटत्वान्न च क्रियाधर्मत्वं कालेपि तदुत्पत्तिदर्शनादन्यथा कालानवच्छिन्नत्वेन
क्रियानित्यत्वापातादित्याह काल इति चेति स्वरोदयविदस्तु दिशः परमार्थ इत्याहुस्तदपि भ्रान्तिमात्रं तद्विदामपि पर
जयदर्शनादित्याह दिश इति चेति धात्वादी मन्त्रवादश्च तन्त्रादयो वादा वस्तुभूता भवन्तीति केचित्तदपि कल्पनामात्रं ना
म्नादिस्वभावोवस्थितेन ह्येव कनकादिस्वभावसंभवात्मन्त्रवादेपि कालदृष्टो न जीवतीति अकालदृष्टः स्वयमेवोन्यास
नीति अभ्युपगमाद्धामोहमात्रमित्याह वादा इति भुवनानि चतुर्दश वस्तूनीति भुवनकोशविदस्तदपि कल्पना
मात्रं तेषामदृष्टत्वान्न च क्वचनेभ्यस्तद्दर्शने तेषां मिथो विप्रतिपत्तिदर्शनादित्याह भुवनानीति २४ ॥

मनएवात्मेति लोकायतभेदस्तदपिभ्रांतिमात्रं तेषस्यात्मेक्लेशाद्यनुपपत्तेरस्यातेश्चचवदवदनात्मत्वात्करणत्वा
च्चदीपवदात्मतायोगादित्याह मनइति बुद्धिरेवात्मेति बौद्धास्तेषामपिभ्रांतिमात्रमेवतत्स्यक्षणभङ्गमिचाराद्धेयएव
घटवदवित्तिकत्वेघनादित्याह बुद्धिरिति चेति चित्रमेवबाह्याकारशून्यंविज्ञानंतदेवात्मेत्यपरे तत्रापिप्रागुक्तान्याया
त्रिविधाद्यास्तुत्पभ्रांतित्वमित्याह चित्रमिति धर्माधर्मौ विधिनिषेधचोदनागम्यौपरमार्थाविति मीमांसकास्तदपि
कल्पनामात्रं देशकालादिशुधर्माधर्मयोर्विप्रतिपत्तिदर्शनादित्याह धर्मेति २५ प्रधानंमूलप्रकृतिर्महदहंकारत
न्मात्राणीतिसप्तप्रकृतिविकृतयः पंचज्ञानेंद्रियाणिपंचकर्मेंद्रियाणिपंचविषयाः मनश्चेकमितिषोडश
विकाराः पुरुषस्तद्द्रष्टास्वभाव इतिपंचविंशतिसंख्याकेः प्रपंचोवास्तितिसांख्याः तच्चकल्पनामात्रंपंचवि
शतिविशेषणस्यावतीकत्वेपर्याप्त्यावतीकत्वेचव्यावर्त्यप्रमित्यप्रमित्योरनुपपत्तेरित्याह पंचविंश

मनइतिमनोविदोबुद्धिरितिचतद्विदः चित्रमितिचित्रविदोधर्माधर्मौचतद्विदः २५॥
पंचविंशकइत्यन्येषड्विंशइतिचापरे एकत्रिंशकइत्याहुरनंतइतिचापरे २६॥

कइति पातंजलाः पुनरीश्वरमधिकंप्रपंतः षड्विंशतिपदार्था इतिकल्पयंति तदयुक्तमीश्वरस्यपुरुषा
न्तर्भावादधिकत्वानुपपत्तेरंतर्भावेचघटवदनीश्वरत्वप्रसंगादित्याह षड्विंशइतिचेति पाशुपतास्तु
रागविद्यानियतिकालकलामायाधिकास्तएवैकत्रिंशत्पदार्था इतिब्रुवते तत्रक्लेशादेरपिरागविद्ययोरंत
रभेदवदास्मितादेरपितद्भिन्नत्वेनसंख्यातिरेकात्तस्यरागोपलक्षितत्वेनतस्यापिविद्योपलक्षितत्वेनन्यूनतापाताच्चवि
द्यामाययोश्चैकत्वादवांतरभेदचेनियतावपितदुपपत्तेः संख्यातिरेकेत्वादवस्थकालकलादेचतत्स्यादि
रित्याह एकत्रिंशकइति अनंतः पदार्थभेदानवियतोस्तीतिकेचित् तदपिनवादिनोविवादवर्शनाद्विवादस्यचा

लोकानुरंजनमेव तत्त्वमिति चेल्लौकिकास्तदपि विभ्रममात्रं लोकस्य भिन्नरुचित्वात्तदनुरंजनस्येश्वरेणापि कर्त्तुमश
क्यत्वादित्याह लोकानिति । दक्षप्रभृतयस्त्वाश्रमाः परमार्थ इति समर्थयन्ते तदसद्देहस्याश्रमस्य शास्त्रार्थेनेश्वरादेरपि प्रम
गात् ज्ञानेऽस्थूलविवेचनत्वात्तन्मूलस्याश्रमस्य दर्शयितुमशक्यत्वात्सत्कार्यस्य च देहसमवायित्वेनापारलौकिक
त्वायोगाद्देहसंयोगात्मनि तदसमवायादित्याह । प्राश्रमानीति । वैयाकरणास्तु स्त्रीपुंनपुंसकशब्दजातेन

लोका लोकविदः प्राज्ञा आश्रमा इति तद्विदः ।
स्त्रीपुंनपुंसके लैंगाः परापरमथापरे २२ ॥

त्वमिति वर्णयन्ति । न तदप्ययुक्तं स्त्र्यादेः शब्दस्वभावत्वे सर्वादीनां त्रिलिंगत्वायोगादेकस्यानेकस्वभावत्वा
संभवाद्दोषान्तिकधर्मत्वे च तस्यावस्तुत्वप्रसंगादित्याह स्त्रीपुंनपुंसकमिति । ह्रस्वादीनपि दीर्घत्वेन परं चापरं चे
ति केचित्तत्र परिच्छेदकत्वादपि ब्रह्मत्वायोगाद्दस्तातोऽपशिष्ठत्वस्य तद्भावादित्याह परापरमिति २२
॥ ॥ ॥

मो॰ भा॰ टि॰ टी॰ २४

सृष्टिर्वा लयो वा स्थितिर्वा तत्त्वमिति निगोतामिकास्तदपि कल्पनामात्रं सतो सतश्चोत्पत्त्याद्यभावस्य वक्ष्यमाणत्वादि
निर्विवक्षितमाह सृष्टिरित्यादिना यथोक्तकल्पनानामधिष्ठानं सूचयति सर्वं चेति उत्पादनाशानुदाद्‌नाश्च कल्प
नाभेदायावं नो विद्यते तत्सर्वेषु प्रकृतानामन्येषां कल्पनावस्थायां कल्प्यते नात्मनः कल्पितत्वे सर्वस्य कल्पितत्वे
नाधिष्ठानायोग्यादित्यर्थः प्राणादिश्लोकेषु प्राणशब्दार्थमाह प्राण इति तस्यैव बीजात्मनो विकारविशेष

प्राणः प्राज्ञो बीजात्मा तत्कार्यभेदा हीतरे स्थित्यन्ताः अन्ये च सर्वे लौकिकाः सर्वप्राणिपरिकल्पि
ताभेदाः रज्ज्वामिव सर्पादयस्तच्छून्ये आत्मन्यात्मस्वरूपानिश्चयहेतोरविद्यया कल्पिता इति पि

सृष्टिरिति सृष्टिविदो लय इति च तद्विदः स्थितिरिति स्थितिविदः सर्वे चेह तु सर्वदा २८

ण्डीकृतोऽर्थः प्राणादिस्थित्यन्तानां श्लोकानां प्रत्येकं पदार्थव्याख्याने फल्गुप्रयोजनत्वान
कृतः २८॥

त्वादितरेषां ततोऽत्यन्तभिन्नतेत्याह तत्कार्येति अतिमयपदार्थं स्फुटयति अन्य इति कुलधर्मो ग्रामधर्मो
देशधर्मश्चेति एते सर्वे शब्देन गृह्यन्ते तेषामात्मनि तदज्ञानादेव कल्पितत्वे सतीह दृष्टान्तं स्फुटयति रज्ज्वामिति
आत्मनोऽधिष्ठानयोग्यत्वार्थं कल्पनाशून्यत्वमाह तच्छून्य इति किमिति समुदायार्थः श्लोकानामुच्यते श्लो
कानां प्रत्येकं पदार्थव्याख्यानमेतेषु किं न स्यादित्याशङ्क्याह प्रत्येकमिति २८ ॥ १४

लौकिकानां परीक्षकाणां च कतिपयकल्पनाभेदानुवादद्वारेणानन्तवादशेषतत्त्वेषामहमहं तमशकावत्स्थूलसदे
यमात्रव्याचष्टे यं भावमिति पादत्रयं विभजते किं बहुनेत्यादिना तमेव भावं विशिनष्टि योदर्शितश्चेति सकथं
द्रष्टारं तत्तीत्यपेक्षायामाह स्वसाविति साधकप्रकृपनादात्म्यमापद्यत्यर्थः तत्त्वप्रकारं प्रकटयति स्वेनेति
सात्ताद्साधारणरूपत्वेन तत्रैव निष्ठामापद्यते ततोऽन्यत्र प्रवृत्तिरूपामकल्पनां निवारयतीत्यर्थः चतुर्थं पादं व्या
चष्टे तस्मिन्निति २९ एतेनान्यत्र प्रवृत्तिनिरोधे हेतुरुक्तः तद्धि प्राणादीनामात्मवदेव नातिकत्वप्राप्तमित्याशं

किं बहुना प्राणादीनामन्यतमं मत्कमनुक्त्वान्यं यं भावं पदार्थं दर्शयेद्यस्य चाचार्योऽन्यो वा ऽ
हमिदमेव तत्त्वमिति स तं भावमात्मभूतं पश्यत्ययमहमिति वा ममेति वा तं च द्रष्टारं स भावोऽव
ति योदर्शितो भावो सोऽभूत्वा रक्षति स्वेनात्मना सर्वतो ति हृणद्धि तस्मिन्नाग्रहः स्तद्ग्रहस्त

यं भावं दर्शयेद्यस्य तं भावं स तु पश्यति तं चावति स भूत्वासौ तद्ग्रहः समुपैति तं २९
एतैरेषोऽपृथग्भावैः पृथगेवेति लक्षितः एवं यो वेद तत्त्वेन कल्पयेत्सोऽविशङ्कितः ३०

दभिनिवेशादिदमेव तत्त्वमिति स तं गृहीतारमपैति तस्यात्मभावं निगच्छतीत्यर्थः २९
एतैः प्राणादिभिरात्मनोऽपृथग्भूतैरपृथग्भावैरेषआत्मारज्जुरिव सर्पादिकल्पनारू
पैः पृथगेवेति लक्षितोऽभिलषितो निश्चितो मूढैरित्यर्थः ॥

कथं कल्पितानामधिष्ठानातिरेकेणावस्तुत्वात्स्वैवमित्याह एतैरिति उक्तस्तानस्त्वर्थमाह
एवमिति पूर्वार्धं व्याकरोति एतैरिति ॥ राम ॥ ॥

भा॰ भा॰ टी॰ २५

कल्पितानामधिष्ठानातिरेकेण सत्तास्फुरणयोरभावात्तद्द्वारेणात्मनि भेददर्शनमविवेकिनामस्तु तदन्येषां कथ
मप्यलाभादित्याशंक्याह विवेकिनामिति प्राणादीनामात्मव्यतिरेकेण सत्वे प्रमाणमाह इदमिति उक्तार्थं योज
यति एवमिति तत्त्वेनात्मवेदनोपायं सूचयति श्रुतितइति स्वप्रहृष्यवज्ञाग्रद्दृश्यानां मिथ्यात्वसाधकौ दृश्यत्वादि
हेतुस्तु युक्तिरित्युच्यते यथोक्तविज्ञानवान् वेदकिंकरो न भवति किं तु मयैव वेदार्थो ज्ञातः स एव वेदार्थो भवतीत्य
र्थः विभागतो वेदार्थव्याख्यानमभिनयति इदमिति ज्ञानकाण्डसाक्षाद्द्वैतवस्तुपरः कर्मकाण्डस्तु साध्य

विवेकिनां तु रज्जामिव कल्पिताः सर्पादयो नात्मव्यतिरेकेण प्राणादयः सन्तीत्यभिप्रायः
इदं सर्वं यदयमात्मेति श्रुतेः एवमात्मव्यतिरेकेण सत्वे रज्जुसर्पवदात्मनि कल्पितानाना
मात्मानं च केवलं निर्विकल्पं यो वेद तत्त्वेन श्रुतितो युक्तितश्च सो विशंकितो वेदार्थं वि
भागतः कल्पयेत् कल्पयतीत्यर्थः इदमेवं परं वाक्यमदोन्यत्परमिति न द्यानध्यात्मवि
द्वेदार्थं न वेत्ता तेषां शक्नोति तत्त्वतः न ह्यनध्यात्मवित्कश्चित्क्रियाफलमवाप्नुयात् इति हि
मानववचनं २ ॥

साधनसंबंधबोधनद्वारा परस्मात्तस्मिन्पर्यवसितं सर्ववेदा यत्पदमामनन्तीति श्रुतेरित्यर्थः आत्मविदो वे
दार्थवित्वमुक्त्वाऽनात्मविदो नहीति तदेव हि वेदार्थो तत्वं यत्प्रत्यगात्मस्वरूपमतश्चाध्यात्मविदेव याथात्म्येन तत्व
ज्ञाने प्रभवतीत्यर्थः उक्तेर्थे स्मृतिमुदाहरति नहीति क्रियाशास्त्रे न प्रमाणमुच्यते तत्फलं तत्त्वज्ञानमग्नि
होत्रादिक्रियायाश्च बुद्धिशुद्धिद्वारा तस्मिन्पर्यवसानादित्यर्थः ३ ॥ राम ॥ २५

याभिर्युक्तिभिरस्मिन्प्रकरणे द्वैतस्य मिथ्यात्वं कथ्यते तासां प्रमाणानुग्राहकत्वात् तन्नाभासत्वमवधेयमित्याह
स्वप्नेति श्लोकस्य तात्पर्यार्थमाह यदेतद्द्वैतस्येति असत्त्वे सत्त्वप्रतिभानं कथमित्याशंक्य श्लोकान्तराणि व्याच
ष्टे स्वप्नश्चेति प्रसारितानि तत्र तत्र प्रकरतां प्रापितानि पण्यानि क्रयविक्रययन्त्राणि येषामापणानां गृहहट्टवृते
प्रसारितपण्यापणास्ते च गृहाश्च प्रासादाश्च स्त्रीपुंजनपदाश्च तेषां व्यवहारस्तैराकीर्णमिति नियोजनात् [illegible] नात्र
यमन्वयः [illegible] त्रिकमाह यथा चेति गंधर्वनगरं चकारार्थः नेह नानास्ति किंचनेत्यादयो वेदान्ताः द्वैतस्य व

यदेतद्द्वैतस्यासत्त्वमुक्तं युक्तितस्तदेतद्वेदान्तप्रमाणावगतमित्याह स्वप्नश्च माया च स्वप्नमाये असद्व
स्त्वात्मिके सत्ये सद्वस्त्वात्मिके इव लक्ष्येते अविवेकिभिः यथा च प्रसारितपण्यापणगृहप्रासादस्त्रीपुंजनपद
व्यवहाराकीर्णमिव गंधर्वनगरं दृश्यमानमेव सदकस्मादभावतां गतं दृष्टं यथा च स्वप्नमाये दृष्टे असद्रूपे न

स्वप्नमाये यथा दृष्टे गंधर्वनगरं यथा तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ३१ ॥

तथा विश्वमिदं द्वैतं समस्तमसद्दृष्टं कैरित्याह वेदान्तेषु नेह नानास्ति किंचन इन्द्रो मायाभिः पुरुरूप
ईयते आत्मैवेदमग्र आसीत् ब्रह्मैवेदमग्र आसीत् द्वितीयाद्वै भयं भवति न तु तद्द्वितीयमस्ति यत्र
त्वस्य सर्वमात्मैवाभूदित्यादिषु विचक्षणैर्निपुणतरवस्तुदर्शिभिः पंडितैरित्यर्थः तमःश्वभ्रनिभं
दृष्टं वर्षबुद्बुदसन्निभम् नाशप्रायं सुखाद्धीनं नाशोत्तरमभावगमिति व्यासस्मृतिः ३१ ॥

सतोसत्त्वे स्मृतिमपि दर्शयति तम इति तमसि अंधकारे रज्ज्वामधिष्ठाने भुजंगमिति यज्ज्ञानं भाति तन्निभं तत्तुल्य
म् विवेकिभिर्विज्ञानं स्वरूपं दृष्टं न चातीव चेचलमालादितं नाशप्राये वर्तमानकालेपि तद्योग्यतासत्त्वात् च द्वैतं कस्मा
दपि स्वकरणमुपलभ्यते न [illegible] सुखदुःखोपभोगान्तरं दृश्यते तच्च नाशोत्तरं तन्नाशाद्ध्वंसमसत्त्वमेवोपगच्छति न तद्वि त
स्य परमार्थत्वं प्रमाणाभावादित्यर्थः ३२ ॥ रामाय नमः ॥ ॥

मा॰ आ॰ प्रमाणशक्तिभ्यां द्वैतमिथ्यात्वसाधनेनाद्वैतमेव पारमार्थिकमिति स्थिते निर्धारितमर्थं संक्षिपति नेत्यादिना ।
द्वि॰ टी॰ श्लोकस्य तात्पर्यार्थमाह प्रकरणेति कोसौ प्रकरणार्थस्तस्य वा संग्रहे किं सिध्यति तदाह यदेति व्यवहारमात्र
२९ स्याविद्याविषयत्वेपि किं स्यादिति चेत्तदाह तदेति चतुर्थपादार्थमाह उत्पत्तीति उक्तमेवार्थं प्रश्नप्रतिवचना

प्रकरणार्थोपसंहारार्थोयं श्लोकः यदा वितथं द्वैतमात्मैवैकः परमार्थतः सन्तदा इदं निष्पन्नं भवति सर्वोयं लौकिको वैदिकश्च व्यवहारोऽविद्याविषय एवेति तदा न निरोधः निरोधनं निरोधः प्रलयः उत्पत्तिर्जननं न बद्धः संसारी जीवः साधकः साधनोन्मोक्षस्य मुमुक्षुर्मोचनार्थी मुक्तो विमुक्तबंधः उत्पत्तिप्रलययोरभावाद्बद्धादयो न सन्तीत्येषा परमार्थता कथमुत्पत्तिप्रलययोरभाव इति

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ३२ ॥

उच्यते द्वैतस्यासत्त्वात् यत्र हि द्वैतमिव भवति यत्रहत्रानेवपश्यति आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं एकमेवाद्वितीयं इदं सर्वं यदयमात्मा इत्यादिश्रुतिभ्यो द्वैतस्यासत्त्वं सिद्धं सतो ह्युत्पत्तिः प्रलयो वा स्यान्नासतः शशविषाणादेर्नाप्यद्वैतमुत्पद्यते प्रलीयते वा अद्वयं चोत्पत्तिप्रलयवच्चेति विप्रतिषिद्धं यस्तु पुनर्द्वैतसंव्यवहारः स रज्जुसर्पवदात्मनि प्राणादिलक्षणः कल्पित इत्युक्तम् ॥

भ्यां प्रपंचयति कथमित्यादिना द्वैतासत्त्वं श्रुत्यवष्टम्भेन स्पष्टयति यत्र हीति द्वैतस्यासत्त्वे कथमुत्पत्तिप्रलयौ न स्यातामित्याशंक्याह किं द्वैतस्यैतौ किं वाद्वैतस्येति आद्यं विकल्पं दूषयति सतो हीति द्वितीयं प्रत्याह नापीति व्यावहारिकद्वैताङ्गीकारात्तस्यैवोत्पत्तिप्रलयाविष्यताशंक्याह यस्त्विति ॥ १९

विमतस्तत्वतो नोत्पत्तिप्रलयवान् कल्पितत्वाद्रज्जुसर्पवदित्यत्र दृष्टान्तासिद्धिमाशंक्य रज्जुसर्पस्य रज्ज्वामुत्पत्तिप्रलयौ मनसि वा द्वयोर्वेति विकल्प्य प्रथमं प्रत्याह नहीति रज्ज्वां यथोक्तौ सर्वेषामुपलब्धिप्रसङ्गादित्यर्थः द्वितीयं दूषयति नचेति बहिरुपलब्धिविरोधादित्यर्थः तृतीयं निरस्यति नचेति उभयोर्न मनोरज्ज्वोर्लक्षणान्न रज्जुसर्पस्योत्पत्तिप्रलयौ युक्तौ दृष्टाधारस्यानुपलम्भादित्यर्थः रज्जुसर्पवद्द्वैतस्य मानसत्वाविशेषान्न तत्वतो जन्मविनाशौ दृष्टान्तेपि शंक्याविति दार्ष्टान्तिकमाह तथेति द्वैतस्य नक्वचिच्छिन्नात्मनिकौ जन्मविनाशाविति शेषः मानसत्वासिद्धिमाशंक्याह

नहि मनोविकल्पनाया रज्जुसर्पादिलक्षणायाः रज्ज्वां प्रलय उत्पत्तिर्वा नच मनसि रज्जुसर्पस्योत्पत्तिः प्रलयो वा नचोभयतो वा तथा मानसत्वाविशेषाद्द्वैतस्य नहि नियते मनसि सुषुप्ते वा द्वैतं गृह्यते अतो मनोविकल्पनामात्रं द्वैतमिति सिद्धं तस्मात्सूक्तं द्वैतस्यासत्वान्निरोधाद्यभावः परमार्थतेति यद्येवं द्वैताभावे शास्त्रव्यापारो नास्ति द्वैतविरोधात् तथा च सत्यद्वैतस्यावस्तुत्वं प्रमाणाभावाच्छून्यवादप्रसंगः ५

नहीति अन्वयव्यतिरेकाभ्यां द्वैतं मनोविकल्पनामात्रमिति निगमयति अत इति नच मनो द्वैतस्य दर्शनमात्रे निमित्तमिति युक्तं भ्रमसिद्धस्य रज्ज्वातसत्ताया प्रमाणाभावादित्यभिप्रेत्य प्रकृतमुपसंहरति तस्मादिति निरोधाद्यभावस्य परमार्थत्वे तत्रैव शास्त्रव्यापाराद्द्वैते तदव्यापारादभावबोधनेव्यापृतस्याभावबोधने व्यापारविरोधाद्द्वैतमप्रामाणिकं प्राप्तमिति शंकते यद्येवमिति अद्वैतस्य प्रामाणिकत्वाभावे किं स्यादित्याशंक्याह तथा चेति ॥

गो·भा·
टि·टी·
१२

अद्वैतस्याप्रामाणिकत्वेपि कुतः शून्यवादो द्वैतस्य सत्त्वादित्याशंक्याह द्वैतस्येति नाप्रामाणिकः शून्यवादो युक्तो अधिष्ठानत्वायोगात्
यथा रज्ज्वामारोपितसर्पादेः रज्ज्वधिष्ठाने न हि निरधिष्ठानोऽभ्रमोस्ति तथाद्वैतकल्पनाया निरधिष्ठानत्वायोगात् नेत्यादिना
दधिष्ठानत्वेनाद्वैतमास्थेयमित्यकारप्रकरणे परिहृतमेतच्चाद्यं कथमज्ञावयसीति सिद्धान्तवाद्याह नित्यामात्र
तत्र शून्यवादी स्वसत्तानुसारेण दृष्टान्तासंप्रतिपत्त्या चोदयति आहेति स्वमतसंमतं स्वप्नदृष्टान्तेन तन्नियामात्र
सिद्धमात्रेणापि प्रतिबोधनसंभवाद्भ्रमबाधे परिशिष्यमानस्यावधेः सत्यत्वात् रज्ज्वादेर्दृष्टान्ताद्वैतभ्रमबाध

द्वैतस्य चाभावात् न रज्जुसर्पादिविकल्पनाया निरास्पदत्वानुपपत्तिरिति प्रयुक्तमेतत् कथमज्ञी
वयसीत्याह रज्जुरपि सर्पविकल्पस्यास्पदभूता विकल्पितैवेति दृष्टान्तानुपपत्तिः न विकल्पना

तयेऽविकल्पितस्याविकल्पितत्वादेव सत्त्वोप ॥
पत्तेः रज्जुसर्पवदसत्त्वमिति चेन्नैकान्तेनाविक ॥
ल्पितत्वात् अविकल्पितरज्ज्वेणवत्स्वाकारोपाभावविज्ञानात्

साक्षित्वया स्फुरत अद्वैतस्याकल्पितत्वादेव सत्त्वान्न शून्यताप्रसक्तिरित्युत्तरमाह नेत्यादिना अद्वैतस्य सदप्रामा
णिकत्वाद्रज्जुसर्पवदिति तदकल्पितत्वासिद्धिः शंकते रज्ज्विति रज्जुसर्पस्यासत्त्वे भ्रान्तिविषयत्वं प्रयोजकमात्मन
स्तु भ्रमसाक्षित्वात्तद्विषयत्वेन भ्रमाविषयत्वात्सत्त्वमित्युत्तरमाह नैकान्तेनेति अप्रामाणिकत्वहेतोरनैकान्तिकत्वदोषा
न्तरमाह अविकल्पितेति नायं सर्पो रज्जुरेवेति सर्पाभाववत्तानष्टं वेकं परावर्तितरज्जुत्वनिश्चयात्प्रागवस्थायां प्रामाणिक ९
त्वाभावेपि सत्त्वेवाप्तानो रज्ज्वेणोऽभ्युपगम्यते तथा सदेवप्रामाणिकत्वाभावेपि सत्त्वे बाधाभावविज्ञानीत्यर्थः ॥

आत्मनो ऽसत्ताभावे ऽवेतत्स्यमाह विकल्पायितत्वेति आत्मनो हि तत्प्रमाधिष्ठानत्वेन संभावितत्वाद्बाधसाक्षित्वेन परि
शिष्टत्वात्सर्वे प्रमोत्पत्तेः सतः सिद्धत्वात्प्रमाणाविषयत्वे ऽपि नास्ति शून्यतेत्युक्ते इदानीं प्रमितत्वधर्मिणि प्रतिषेधद
र्शनादात्मनो ऽप्रमितत्वेन तत्र हेतोभावप्रसाधकं शास्त्रमयुक्तमिति शङ्कते कथमिति प्रतिपन्नेधर्मिणि प्रतिषेधा
त्प्रमिते प्रतिषेधस्य विशेषणाविकल्पादेवानुभवगमाद्यात्मनश्च सर्वकल्पनाधिष्ठानाकारेणास्फुरणं स्वीकर
णात्तत्सिद्धप्रतिपन्ने हि तत्प्रतिषेधः संभवतीति परिहरति नैष दोष इति अप्रमाविषयस्यात्मनो ऽवभासात्तु गगनतया ऽस्फु

विकल्पितत्वप्राविकल्पनोत्पत्तेः सिद्धत्वाभ्युपगमादसत्तानुपपत्तिः कथं पुनः स्वरूपे ऽप्यापाण
भावे शास्त्रस्य विज्ञाननिवर्तकत्वं नैष दोषः स्वात्मस्वरूपे ऽविदात्मनिष्ठे तस्याविद्याख्यत्वात् कथं
स्वव्यवहेतुः स्वीकृतत्वात्तो ऽमनोजीर्णादेवान्यथा मिथ्यात्वोक्तः कर्तापि फलीसंबन्धो विपुक्तः स्त्रीणा
त्वहो ऽहं ममपदे इत्येवमादयः सर्वे आत्मन्यध्यारोप्यन्ते आत्मेति तु वृत्तः सर्वत्राव्यभिचारात् यथा
सर्पधारादिभिदेष्वपि रज्जुः यदा चेवं विशेषस्वरूपस्य तत्त्वस्य सिद्धत्वात् कर्तव्यं शास्त्रेणाज्ञातकरं चेष्ट
स्याज्ञाताज्ञानुकारिते ऽप्रमाणायते ऽनः ॥

रणमघटमानमित्यादि पत्ति कथमिति स्वप्रकाशत्वेन सतो निर्विकल्पकस्य स्फुरणे ऽपि सविकल्पकव्यव
हारे समारोपितसंसृष्टाकारेणाप्रमविषयत्वमविरुद्धमित्याह घाव्याहमित्यादिना उक्तन्यायेनात्मप्रतीतेः सि
द्धत्वात्प्रतिपन्नेनास्मिन् हि तत्प्रतिषेधस्य सकरतेति कासितमाह यदा चेति न केवलमारोपितविशेषाणां वि
शेष्यस्यात्मनः स्वरूपस्फुरणस्य सिद्धत्वादेव तत्त्वाद्धेरणकर्तेत्यनवतवादतेन ऽमामाणप्रसंगाच्चेवमित्याह
अनूक्तेति ॥ राम ॥

भा. टी. १८

...रत्वात्मनिष्ठेन निषेधकत्वेपि शास्त्रस्य फलाभावादप्रामाण्यप्रसङ्गमित्याशंक्याह अविद्येति प्रतिषेधशास्त्रादप
नात्मप्रतिबंधस्वरूपावस्थानं फलमित्यर्थः निःशेषदुःखनिवृत्तिनिरतिशयानंदावाप्तिश्च परं श्रेयो न स्वरूपावस्था
नमित्याशंक्याह स्वरूपेति इति प्रसिद्धमेतच्छास्त्रेष्विति शेषः द्वैतनिवर्तकत्वे शास्त्रस्य कारकत्वं स्यादित्याशंक्याह
स्वाविद्यादीति अस्वाविद्यादेः स्वाभाविकत्वादात्मनि स्फुरत्तस्फुरणमनुपपन्नमित्याशंक्य धर्मविषयस्फुर्तीदमंशा
देरस्वाभाविकोपि रजतादिभेदो दोषमाहात्म्याद्यथा न प्रतिभाति तथाचिंत्यशक्त्या विद्याप्रभावादात्मनि स्फुर

अविद्याध्यारोपितस्वाविद्यादिविशेषप्रतिबंधादेयात्मनः स्वरूपेणानवस्थानं स्वरूपावस्थानं च श्रेयः
तिस्वाविद्यादिनिवर्तकं शास्त्रमात्मन्यस्वाविद्यादिप्रत्यायकत्वेन नेति नेति अस्थूलादिवाक्यैरात्मस्वरू
पवदस्वाविद्याद्यपि स्वाविद्यादिभेदेपुनाहृतोस्तिधर्मः यद्यनुद्भूतः स्यात्तदाध्यारोप्येत स्वाविद्यादिलक्ष
णो विशेषः यथोक्तत्वात्तेण विशेषवत्यमोक्षीतत्वा तस्मान्निर्विशेष एवात्मनि स्वाविद्यादयो विशेषाः
कल्पिताः यतस्स्वाविद्यादिशास्त्रमात्मन स्वस्वाविद्यादिविशेषनिरस्तार्थमेवेति सिद्धं सिद्धं निवर्तक
त्वादित्यागमविरोधसूत्रम् ३२ ॥

त्वपि स्वाविद्याद्युत्थासविरोधस्वाविद्यादिरूपेणास्फुरणमविरुद्धमित्याह आत्मेति विपर्ययमात्रउपपत्तिरित्याह
यदीति उक्तमर्थं संक्षिप्य निगमयति तस्मादिति अस्वाविद्यादेरकल्पितत्वमसिद्धमाशंक्य निरस्यति अस्थूल
मशोकोत्तरमित्यादिवाक्यशास्त्रशब्देन दृष्टान्ते उक्तेर्थे द्रविडाचार्यसंमतिमाह सिद्धेविति ब्रह्मणि परानास्थ
त्यत्वभावेपि सिद्धमेव शास्त्रस्य प्रामाण्यमभावबोधनमनुत्पन्नत्वात् परसंसृष्टैः स्थूलादिरूपत्वत्पदैः स्वाभा
विकद्वैताभावबोधनेनाध्यस्तनिवर्तकत्वादिति सूत्रार्थः ३२ ॥ राम ॥ ॥ १८

यदुक्तं निरोधाद्यभावस्य परमार्थेनेति तदयुक्तं सामान्यविशेषात्मकं कुम्भनानारूपमिति मतेति रोधादेः सम्भवत्वात्
यदुक्तं नि रोधाद्यभावस्य परमार्थेनेति तदयुक्तं सामान्यविशेषात्मकं कुम्भनानारूपमिति मते निरोधादेः समस्यत्वा-
दित्याशंक्याह भावैरिति भावाव्याहृत्ता विशेषास्तेषव्यभिचारित्वात्सतो रूपं सर्ववदद्वयमव्यङ्गं सामान्यं विशेषाकार-
रैरवस्तुभूतैः सामान्याकारेण च तादृशेनाद्वयम्व्याहृत्तानुगतरूपेण सत्तादिविदेकत्वात् सत्ता सैव मुहैमोहमाहात्म्या-
त्कल्प्यते नवस्तुतः सामान्यविशेषभावोऽस्ति परस्पराश्रयत्वादित्यर्थः विशेषाणामसत्त्वे कथं सत्त्वेन व्यवहारः
स्यादित्याशंक्य सत्तादात्म्येन कल्पितत्वात्तेषां सत्त्वेन व्यवहारोपपत्तिरित्याह भाताश्च इति प्रत्यगतसत्ताकारेण
कल्पिताः सत्त्वव्यवहाराः भवन्तीति शेषः सामान्यविशेषभावस्य कल्पितत्वात् खण्डैकरसत्वेन वस्तुनः सिद्धे निरोधा-
द्युः साधनत्वमनुचितमिति फलितमाह तस्मादिति श्लोकतात्पर्यं दर्शयति सर्वेति निरोधादि सर्वविशेषाभावो

पूर्वश्लोकार्थस्य हेतुमाह यथा स्वप्नासद्भिः सर्पधारादिभिरद्वयेन च रज्ज्वादिरूपेण सता अयं सर्परज्जुधारा

भावैरसद्भिरेवायमद्वयेन च कल्पितः भावा अप्यद्वयेनैव तस्मादद्वयता शिवा २२ ॥

दण्डोऽयमिति वा रज्जुरूपमेव कल्प्यते एवं प्राणादिभिरनन्तैरसद्भिरेवाविद्यमानैः न परमार्थतः नद्यप्र-
चलितेमनसि काश्चिद्भावाउपलभ्यते शङ्कितेकेनचित् न चात्मनः ॥

पलक्षितेवस्तुवस्तुभूतमिति पूर्वश्लोकार्थस्तस्य सामान्यविशेषात्मके वस्तुनि विशेषाणामाश्रित्य निरोधादेः सम्भा-
व्यत्वात्सत्त्वमाशंक्यते तेन तस्य साधनापत्तायां तन्मदर्शनपरोऽयं श्लोकः स्यर्थः तत्र पूर्वार्धं व्याचष्टे यथेति स्वप्नाव-
स्थायां मनसा व्याचष्टे यथेत्यादिना संसृष्टरूपेण कल्पितत्वेऽपि स्वरूपेणानारोपितत्वाद्रज्जुस्वरूपस्यावहारिकसत्यत्वे तथा-
विद्यमानैरयमात्मा कल्प्यते न परमार्थेन तेषां सत्त्वमिति शेषः कथं प्राणादीनां परमार्थेनासत्त्वमित्याशंक्यान्वयव्यतिरे-
काभ्यां तेषां मनः स्फुरितमात्रप्रतीतेः सत्त्वं संभवति इत्याह नहीति या मनःपरिणामत्वात् मनश्चलनं मनोरूपेण विद्यमाना दृश्या-
दिनां परमार्थेन सत्त्वमित्याशंक्याह नचेति नहि विभोरात्मनो न भावचलनेनावास्तवमेव कल्प्यते न चेतरभावेति

॥ [illegible]

प्राणादीनामात्मपरिणामत्वासंभवं फलितमाह प्रचलितस्येति प्रचलितं चलितं यस्य सतया दृश्यस्येवात्मनो भासमा-
नाभावाः न परमार्थतः सन्तो भवितुमर्हन्ति तद्रूपत्वं ज्ञात्वादिना स्वभवन्मिथ्यात्वसिद्धेरित्यर्थः एवं प्राणादिभावानां
मिथ्यात्वं साध्य फलितं दर्शयन्स्वीधीतत्वेनोपाख्यानमुपसंहरति अत इति अद्वयस्य परमार्थत्वात्तदात्मना कथम-
नाकल्पितः स्यादित्याशंक्य स्वरूपेणाकल्पितस्य संसृष्टरूपेणाकल्पितत्वमिष्टमित्याह परमार्थसतेति अविद्या-
वशादिष्टा कल्पना न स्वभाववशादित्याह सदेति प्राणादीनामसत्वेन कथं व्यवहारगोचरत्वमित्याशंक्य तृतीय-
पादार्थमाह तेचेति कल्पितानां प्राणादिभावानामधिष्ठानसत्तया सत्वेन सत्त्वावकल्प्यते तेषामधिष्ठानाद्वे

प्रचलनमपि प्रचलितस्येवोपलभ्यमाना भावा न परमार्थतः सन्तः कल्पिता इति शंक्याः अतो सद्भि-
रेव प्राणादिभावैरद्वयेन च परमार्थसत्तात्मनाऽद्वयवस्तु सर्वविकल्पास्पदं श्रुतेनायं स्वयमेवात्माक-
ल्पितः सदैकस्वभावोपि सन् तेच प्राणादिभावा अप्यद्वयेनैव सत्तात्मनो विकल्पिताः नहि निरा-
स्पदा काचित्कल्पनोपपद्यते अतः सर्वविकल्पनास्पदत्वादनेनात्मनाद्वयस्याव्यभिचारात् क-
ल्पनावस्थायामप्यद्वयताशिवा कल्पना एव तु शिवा रज्जुसर्पादिवत्त्रासकारिण्याहिताः अद्व-
यता अभया अतो सेवा शिवा २२॥

ता नियमाभावादित्याशंक्याह नहीति सर्वविकल्पनास्पदाधिष्ठानेव दृश्यते न चासतोऽधिष्ठानत्वमारोपितानु-
वेधाभावात् तदनुवेधात्मसतोऽधिष्ठानत्वमिष्टव्यं तथा च प्राणादिभावानां वस्तुतोऽसत्वेपि सति कल्पितानां सत्त्वेन व्य-
वहारसिद्धिरित्यर्थः चतुर्थपादार्थमाह अतश्चेति स्वेनेति विशेषणं संसृष्टरूपेणाव्यभिचारांगीकारार्थम् कल्पना-
दशायामेवाद्वयताशिवेत्याशंक्य कल्पनामात्रस्याशिवत्वान्नैवमित्याह कल्पनेति त्रासादीत्यादिशब्देन
हर्षशोकादयो गृह्यन्ते यदुक्तमद्वयताशिवेति तदुपपादयति अद्वयतेति २२ ॥

किंच किमिदं नानाभूतं द्वैतमात्मतादात्म्येन वा सिध्यति स्वातंत्र्येण वेति विवेक्तव्यं नाद्य इत्याह नात्मभावेनेति इदं हि
नानाभूतं द्वैतं नात्मतादात्म्येन सेद्धुमर्हति तदुक्तं यो विरुद्धस्वभावयोस्तादात्म्यायोगाद्भेदादिशून्यात्मतादात्म्ये द्वै
तस्य नानात्वासिद्धेरित्यर्थः द्वितीयं दूषयति न स्वेनेति स्वेन स्वतंत्रप्रतीत्योः स्थानयेन नानात्वलक्षणस्वातंत्र्येणापि नेदं
द्वैतं सेद्धुं पारयति तथा स्वातंत्र्ये सति श्रोत्मत्वप्रसंगादनात्मनो द्वैतत्वापातादित्यर्थः किंच किमिदं द्वैतं परस्परं पृ
थग्वा पृथग्वेति विवेक्तव्यं नाद्य इत्याह न पृथगिति नहि किंचिदपि द्वैतं परस्परं पृथग्भावेन सिध्यति पृथक्त्वस्य

कृतश्चाद्वयता शिवा नानाभूतं पृथक्त्वमन्यस्यान्यस्मादपरत्र दृष्टं तत्राप्राशिवं भवेत् तदाज्ञाद्वये परमार्थ

नात्मभावेन नानेदं न स्वेनापि कथंचन ॥
न पृथङ्नापृथक् किंचिदिति तत्त्वविदो विदुः ३४

सत्यात्मनि प्राणादिसंसारजातमिदं जगदात्मभावेन परमार्थस्वरूपेण निरूप्यमाणं नानावस्तु

स्वप्रतियोगिरूपाः वच्छिन्नत्वेनान्योन्याश्रयत्वादुर्वचनत्वादित्यर्थः नापि किंचिदन्योन्यमपृथक्
भूतं सिध्यति घटपटादिशब्दानां पर्यायत्वप्रसंगाद्व्यवहारलोपापातादित्याह नापृथगिति अतो वास्तवाकारेण
सर्वथा निरूपणासहमेव द्वैतमिति फलितमाह इति तत्त्वेति यदुक्तमद्वयता शिवेति तत्र हेत्वन्तरमपराप्यरं तेष्वा
कस्य दर्शयति कृतश्चेति तदेव स्फुटयति नानाभूतमित्यादिना नानाभूतमित्यस्य पर्यायोपादानं पृथक्त्वमिति तस्य
भयकारणत्वं प्रकटयति अन्यस्येति तत्र व्याघ्रचौरादाविति यावत् तद्भयकारणभेददर्शनमद्वये वस्तुनि नास्ती

अथ स्वस्तमधिष्ठानरूपेण तत्त्वतो निरूप्यमाणमसदेव भवतीत्यत्र दृष्टान्तमाह यथेति प्रदीपप्रकाशेनाधिष्ठा
नमात्रतया समारोपितः सर्पो यदा निरूप्यते तदा नासौ तद्व्यतिरेकेण सिध्यति तथा जगदपीदं तदात्मस्वरू
पेण निरूप्यमाणं स्वात्मत्वेन न सिध्येदित्यर्थः एवं प्रथमपादं व्याख्याय द्वितीयपादं व्याचष्टे नापीति कदा
चिदपीति कल्पनावस्थायां प्रागूर्ध्वं चेत्यर्थः न पृथगित्यस्यार्थमाह तथेति पृथक्त्वस्य अन्योन्याश्रयत्वेन

यथा रज्जुस्वरूपेण प्रदीपप्रकाशेन निरूप्यमाणेन न नानाभूतः कल्पितः सर्पो ऽस्ति
तद्वत् नापि स्वेन प्राणाद्यात्मने द्वैविध्यते कदाचिदपि रज्जुसर्पवत्कल्पितत्वादेव तथा
ऽन्योन्येन पृथक्त्वाणादिवस्तु यथा ऽस्मान्महिषः पृथग्विद्यत एव अतो ऽस्त्वाज्जगत्पृ
थग्विद्यते ऽन्योन्यपरेण वा किंचिदित्येवं परमार्थतत्त्वमात्मविदो ब्राह्मणा विदुः
अतो ऽशिवहेतुत्वाभावाद्द्वयतैव
शिवेत्यभिप्रायः
३८ ॥

द्वैवचनत्वाद्वैधर्म्योदाहरणे तु प्रातीतिके पृथक्त्वमधिकृत्यानिहृदम् नापृथगित्यादि व्याकरोति अतश्चेति
द्वैतस्य प्राग्युक्तन्यायेनासत्त्वात्तु तदन्योन्यवा परेण त्वनामहापृथग्भूतासेतुसहेति अतो ऽनिरूपत्वात्तु किं
चिद्द्वैतेनामास्तीति ब्रह्मविदां मतमित्यर्थः दृष्टं हि द्वैते भयहेतुस्तद्भेदेन द्वैतमभयमेवेत्युपसंहरति

किमिति यथोक्तमद्वैतं सर्वेषां न प्रतीति गोचरतामाचरतीत्याशंक्याह वीतेति रागादिप्रतिबंधरहितानामेव य
थोक्तमद्वैतदर्शनं न सर्वेषामित्यर्थः श्लोकस्य तात्पर्यमाह तदेतदिति सतिश्चतदुपायप्रवृत्तावप्यकरातीतिशे
षः आदिपदेन सम्यग्दर्शनप्रतिबंधकाः सर्वे दोषाः संगृह्यंते रागादिविमोकोयदा कदाचिदनधिकारिणामप
पि संभवत्यतो विशिनष्टि सर्वदेति सदा रागादिराहित्यं विवेके सत्तं प्रपंचयति मुनिभिरिति विवेकेचपद
शक्तेर्वाक्यतात्पर्यस्य च परिज्ञानं कारणमित्याह वेदेति एवं हि सम्यग्ज्ञानाधिकारिणां साधनचतुष्टयसं

तदेतत्सम्यग्दर्शनं दृश्यते वीतरागभयद्वेषक्रोधादिसर्वदोषैः सर्वदा मुनिभिर्मननशीलैः विवे
किभिर्वेदपारगैरवगतवेदार्थतत्त्वज्ञानिभिः निर्विकल्पः सर्वविकल्पशून्यो ऽयमात्माहृष्टउप
लब्धो वेदांतार्थतत्परैः प्रपंचोपशमः प्रपंचो द्वैतभेदविस्तारस्तस्योपशमो ऽभावो यस्मिन्स आत्मा

वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः निर्विकल्पो ह्ययं दृष्टः प्रपंचोपशमोऽद्वयः ३९

प्रपंचोपशमः अत एवाद्वयः विगतदोषैरेव पंडितैर्वेदांतार्थतत्परैः संन्यासिभिः परमात्मा द्रष्टुं
शक्यः नान्यै रागादिकलुषितचेतोभिः स्वपक्षपातदर्शनैस्तार्किकादिभिरित्यभिप्रायः ३८।

पक्षमुक्त्वा तद्विषयं निरूपयति निर्विकल्प इति आत्मनश्चात्मत्वादिशंकां वारयति उपलब्ध इति हि
शब्दद्योतितमर्थमाह वेदेतेति सर्वविकल्पशून्यत्वमात्मनः स्फुटयितुं प्रपंचोपशम इति विशेषणमात्मनः
प्रभाववद्बहुव्रीहिणा प्रसङ्ग्दृश्यते हेतुहेतुमद्भावेन पुनरद्वैतविशेषणयोर्मीमांसयति अत एवेति सम्यग्द
र्शनाधिकारिणं दर्शितानुपसंहरति विगतेति अनधिकारिणो दर्शयन् वैशेषिकत्वेनाधिकारिणाम्ब
भिज्ञानमपि तदंतर्भावं सूचयति नान्यैरिति ॥ ३९ ॥ राम ॥

...टी. २१

मिथ्याज्ञानप्रपञ्चसंस्काराद्वैतार्थतात्पर्यवतां पण्डितानामपि नाद्वैते प्रत्ययस्थिति दार्ढ्यं सिध्यतीत्याह तस्मा तस्मादित्यस्यार्थं
दिति शास्त्राद्वैतमवगम्य स्मृतिसंततिं कुर्वतो लोकानुवर्तने विधिनियममाह अद्वैतमिति अद्वैतावगतिदार्ढ्य
माह यस्मादिति एवमिति निर्विकल्पत्वादिपरामर्शः विदित्वा शास्त्रतोऽवगम्येत्यर्थः अद्वैतावगतिं विभजते
ऽद्वैते स्मृतिसंततिकर्तव्यतायां नियमविधिमभ्यनुजानाति अद्वैत इति अद्वैतमित्यादि

यस्मात्सर्वमर्थप्रमानुपपत्त्याद्द्वयं शिवमभयमत एवं विदित्वा एनमद्वैते स्मृतिं योजयेत् अ
द्वैतावगमायैव स्मृतिं कुर्यादित्यर्थः तच्चाद्वैतमवगम्याहमस्मि परं ब्रह्मेति विदित्वा अना

तस्मादेवं विदित्वैनमद्वैते योजयेत्स्मृतिं अद्वैतं समनुप्राप्य जडवल्लोकमाचरेत् ३६

याद्यः तीतं साक्षादपरोक्षादजमात्मानं सर्वलोकव्यवहारातीतः जडवल्लोकमाचरेत् अ
प्रख्यापयन्नात्मानमहमेवंविध इत्यभिप्रायः ३६ ॥

तच्चेति जडसदृशस्य कथं लोकाचरणे प्रवृत्तिः एवं का विना दित्याशङ्क्याह सर्वलोकेति लौकिक
व्यवहारानतीत्य विद्वाञ्जडवदाचरणं कीदृशमित्यपेक्षायां चतुर्थपादमनूद्य तात्पर्यमाह जडव
दिति एवंविधोऽहमित्यात्मानं विद्याभिजनादिभिरप्रख्यापयन् जडवदेव विद्वाँल्लोकमाचरेदिति योज
ना ३६ ॥ राम ॥

नन्वपरापरदेवतयोः स्तुतिपूर्वकप्रणामस्य श्राद्धादिक्रियायाश्च कर्तव्यतया प्रतिबंधात्कथं विद्वांसो जडवदाचरणमिति तत्राह निःस्तुतिरिति तथापि जीवनाकांक्षापि स्यात्तन्मात्राश्रयस्य दिग्भ्रष्टतेऽावश्यकत्वाजडोऽनडस्मात्कथमित्याशंक्याह चलेति चलं चाचलं च चलाचले ते निकेतो यस्याश्रयः सन्तथेति यावत् तथापि कौपीनाच्छादनाशनपानादिदेहस्थितिप्रयोजनकायेत्तया प्रवृत्तिश्चावश्यविद्वांसो जडवत्स्वतेत्याशंक्याह यतिरिति आकांक्षाशून्यं केवलं धीरत्र यामिश्राचष्टे कयेत्यादिना वर्णाश्रमाभिमानवतस्तत्तत्कर्मस्ववर्तमानस्य कथमिदं विपरीतमिदमित्याशंक्याह त्यक्तेति पारमहंस्यपारिव्राज्यप्रतिपत्त्यभशाकांक्षामाणिकत्वा

कथाचर्ययास्लोकमाचरेदित्याह स्तुतिनमस्कारादिसर्वकर्मवर्जितस्त्यक्तसर्वबाह्येषणः प्रतिपन्नपरमहंसपारिव्राज्यस्याभिप्रायः एतेवैतमात्मानं विदित्वेत्यादिश्रुतेः नडवद्यस्तदात्मानं स्तुति...

निःस्तुतिर्निर्नमस्कारो निःस्वधाकार एव च चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् ॥ ३८

त्यरायणादुत्पादिस्यतेश्च चलाचलनिकेतः चलं शरीरं प्रतिक्षणमन्यथाभावादचलमात्मतत्त्वं दाकदाचिदाहारादिव्यवहारनिमित्तमाकाशवदचलस्वरूपमात्मतत्त्वमात्मनो निकेतमाश्रयं आत्मास्थितिं विस्मृत्याहमिति मन्यते यदा तदा चलो देहो निकेतो यस्य ॥ दितिवस्तेवं श्रुतिस्मृति

सिद्धत्वादित्याह एतमिति विदित्वेत्यादि निकेते देहे तमुत्थानहेतुत्वेनोच्यते तस्मिन्नेव परस्मिन्वस्तुनि विषयातरेभ्यो आहृत्य बुद्धिर्येषामिति तथा तदेव परं वस्तु आत्मानि रूपचरितं स्वरूपं येषां ते तथोच्यते तस्मिन्नेव परस्मिन्नात्मनि निष्ठा निश्चयेन स्थितिर्येषां तेन तथेत्याह तन्निष्ठा इति तदेवात्मभूतं परं वस्तु परमायनं परा गतिर्येषां ते तथेत्याह तत्परायणा इति आदिशब्देन सर्वकर्माणि मनसा संन्यस्य सर्वाकांक्षाशून्ये कदापुनश्चलो देहो विद्वन्निकेतो भवति तत्राह यदेति श्रवेति विवर्ततिहि कालविशेषे विवर्तितव्यवहारे निमित्ते स्वात्मास्थितिमनुक्तविशेषणकेवलं...

स्मृत्याहंकारममकारपरवशो यदा विद्वान् भवति ह ते नेदृतियोजना ॥

मां०
द्वि०
२२

स्वभावतस्त्वचलमात्मस्वरूपमेवास्य निकेतनं चलेश्च वः शरीरमपदार्शिते विस्मरणाद्वारेणेति निगमयति सो-
यमिति अविद्वांसो विद्याबार्थ्यमावर्त्य कीर्तयति नपुनरिति चतुर्थपादार्थमाह सचेति ३७ अहमेव परं ब्रह्म न
मत्तोऽन्यदस्ति किंचिदिति स्मृतिसम्मतिकरणमपि न कालविशेषनियतं किंतु नैरन्तर्येण कर्तव्यमित्याह त-
त्वमिति आध्यात्मिकं शरीरादिकल्पितं तत्त्वमधिष्ठानमात्रं दृष्ट्वा बाह्यतो देहाद्बहिर्वास्थितं पृथिव्यादि च
कल्पितत्वेनावस्तुत्वादधिष्ठानमात्रमेवेत्यनुभूय स्वयमपि द्रष्टृपरमार्थवस्तुस्वभावमापन्नस्तेनैवासक्तचे-

सोऽयमेवं चलाचलनिकेतो विद्वान् न पुनर्बाह्यविषयाश्रयः स च यादृच्छिको भवेत् यदृच्छाप्राप्तकौ-
पीनाच्छादनग्रासमात्रदेहस्थितिरित्यर्थः ३७ बाह्यं पृथिव्यादि तत्त्वमाध्यात्मिकं च देहादिलक्षणं रज्जुसर्पा-

तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ३८

दिवत्स्वप्नमायादिवच्चासत् वाचारम्भणं विकारो नामधेयमित्यादिश्रुतेः आत्मा च सबाह्याभ्यन्तरो
ह्यजः अपूर्वोऽनपरोऽनन्तरोऽबाह्यः कृत्स्नः आकाशवत्सर्वगतः सूक्ष्मोऽचलो निर्गुणो निष्कलो निष्क्रियः
तत्सत्यं स आत्मा तत्त्वमसीति श्रुतेः

तः बाह्येभ्यो विषयेभ्यो व्यावृत्तबुद्धिस्तस्मिन्नेव तत्त्वे परमार्थभूते प्रतिष्ठितस्तद्दर्शननिष्ठः स्यादित्यर्थः पृथि-
व्यादेर्देहादेश्च प्रत्येकं परमार्थत्वसंभवे कथमद्वैतनिष्ठासिद्धिरित्याशंक्याचष्टे बाह्यमित्यादिना किं तदु-
भयोस्तत्त्वं तदाह रज्जुसर्पवदिति उक्तस्य विकारजातस्यासत्त्वे प्रमाणमाह वाचारम्भणमिति द्रष्टुरात्मनोऽपि दृश्य-
प्रतियोगित्वात्तस्य वाचारम्भणत्वमित्याशंक्याह आत्मा चेति भवतु परस्यात्मनस्तत्त्वं तदागमवचननिर्देशाऽक्तल-
क्षणे तथापि द्रष्टुरात्मनोऽनयणोक्तरूपत्वमित्याशंक्याह तत्सत्यमिति विशेषणानि तु प्राचीनानि तत्र राग

प्रश्नाः स्यात्कतमा कतमेत्यादिरप्रश्नानेकर्तव्यः स्यात् ॥ ॥ इति विमृष्टं भवति ॥ विमर्शः कृतो भव
ति विमर्शे हि कृते सति प्रतिवचनोक्तिरुपपन्ना वागेवर्क्प्राणः सामोमित्येतदक्षरमुद्गीथः तद्वा एत
न्मिथुनं यद्वाक्च प्राणश्चर्क्च साम च तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते ॥ वागृचावेक
त्वेनाह्णमत्वव्याख्यानः सर्वं साह्वाप्यानत्वादाप्तिगुणसिद्धये वाक्प्राणावृक्सामयोनी इति वागेव
र्क्प्राणः सामेत्युच्यते यथाक्रममृक्सामयोन्योर्वाक्प्राणयोर्ग्रहणे हि सर्वासामृचां सर्वेषां च साम्ना
मवरोधः कृतः स्यात् सर्वर्क्सामावरोधे ऋक्सामसाध्यानां कर्मणामवरोधः कृतः स्यात् तदवरोधे च स
र्वे कामा अवरुद्धाः स्युः ओमित्येतदक्षरमुद्गीथ इति भक्त्याशङ्का निवर्त्यते तद्वा एतदिति मिथुनं निर्दि
श्यते किं तन्मिथुनमित्याह यद्वाक्च प्राणश्चेति सर्वं कर्मकारणभूतौ मिथुनं ऋक्च साम चेति ऋ
क्सामकारणभूतावृक्सामशब्दावित्यर्थः तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते न तु स्वातन्त्र्येण।
ऋक्च साम च मिथुनम् अन्यथा हि वाक्च प्राणश्चैकं मिथुनं ऋक्च साम चापरं मिथुनमिति द्विमि
थुने स्यात् तथा च तदेतन्मिथुनमित्येकवचननिर्देशो नोपपन्नः स्यात् तस्मादृक्सामयोन्योर्वाक्
प्राणयोरेव मिथुनत्वं तदेतदेवंलक्षणं मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते एवं सर्वकामाप्तिगुणवि
शिष्टं मिथुनमोंकारे संसृष्टं विद्यत इत्योंकारस्य सर्वकामाप्तिगुणवत्त्वं सिद्धं वाङ्मयत्वमोंकारस्य प्रा
णनिष्पाद्यत्वं च मिथुनेन सह संबन्धं मिथुनस्य कामापयितृत्वं प्रसिद्धमिति दृष्टान्त उच्यते ॥ ॥ यदा मि
थुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्ष
मुद्गीथमुपास्ते यथा लोके मिथुनौ मिथुनावयवौ स्त्रीपुंसौ यदा समागच्छेतां ग्राम्यधर्मतया संस्पृशेया

छ.भा.
३

नोतदापयतः आपयतः वै यजमानस्य सर्वे तेन स्यतो कामं तथा यस्मात् प्रविष्टेन मिथुनेन सर्व्वकामा
वासिता आत्वमोंकारस्य सिद्ध इति मन्त्रिसायाः तद्रुपासकोप्युद्गाता तद्धर्मा भवतीत्याह आपयिता ह वै का
मानां यजमानस्य भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते तस्मै तस्य यथोक्तं फलमित्यर्थः
यथा यथोपास्ते तेन तदेव भवतीति श्रुतेः ॥ ॥ समृद्धिगुणवांश्चोंकारः कथं ॥ तद्वा एतदनुज्ञाक्षरं य
द्धि किं चानुजानात्योमित्येव तदाहेषो एव समृद्धिर्यदनुज्ञा तद्वा एतत् प्रकृतमनुज्ञाक्षरं यदनुज्ञा च सा
नेन तदनुज्ञानमिति निपातकम् इत्यर्थः कथमनुज्ञेत्याह श्रुतिरेव यद्धि किं च यत्किंचलोके ज्ञानं धनं वानुज्ञा
नाति विद्वान् धनी वा तदनुज्ञामनि जानन् ओमित्येव तदाह तथा च वेदे ओमित्यादिश्यामित्येवहि वा वेत्यादि ॥
तथा लोकेऽपि तदेव तद्गृहाणमीत्यन्यैः ओमित्याह अतएषा उ एव एषैव समृद्धिर्यदनुज्ञा यानुज्ञा सा स
मृद्धिस्तन्मूलत्वादनुज्ञायाः समृद्धो ह्योमित्यनुज्ञां ददाति तस्मात् समृद्धिगुणवानोंकार इत्यर्थः समृद्धि
गुणोपासकत्वात्तद्धर्मा सन् ॥ ॥ समर्द्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमु
पास्ते ॥ समर्द्धयिता कामानां यजमानस्य भवति य एतदेवं विद्वानित्यादि पूर्ववत् ॥ ॥ अथेदानीम
क्षरं स्तौति उपास्यत्वात् प्ररोचनार्थं कथम् ॥ तेनेयं त्रयी विद्या विद्या वर्तते ॥ तेनाक्षरेण प्रकृतेन येयं
वेदादिलक्षणा त्रयी विद्या त्रयी विद्ध्येन कर्मेत्यर्थः ॥ ॥ नहि त्रयी विद्यैवाश्रवणादिभिर्वर्तते क
र्मेत्तथा प्रवर्त्तते तन्नहि निर्मल सिद्धेकथम् ॥ ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति इति लिंगाच्च
सोमयागादिनिर्गच्छते ॥ ॥ तत्तु कर्म ॥ एतस्यैवाक्षरस्यापचित्यै अपचितिः पूजार्थं परमात्मप्रतीकं हि १२
तेन तदपचितिः परमात्मन एव सा स्यात् कर्मणा तत्सम्भ्यर्च्यसिद्धिं विन्दति मानव इति स्मृतेः ॥ ॥ किं चैतस्यै

इत्येवमेतमक्षरमुद्गीथमक्षरावयवत्वादुद्गीथशब्दवाच्यमुपासीत कर्माङ्गावयवभूते ओंकारे परमात्म
प्रतीके दृढामैकाग्र्यलक्षणां मतिं सन्तनुयात् ॥ ॥ स्वयमेव श्रुतिरोंकारस्योद्गीथशब्दवाच्यत्वे हेतुमाह
ओमिति ह्युद्गायति ओमित्यारभ्य हि यस्मादुद्गायति अत उद्गीथ ओंकार इत्यर्थः ॥ ॥ तस्योपव्याख्यानं
तस्याक्षरस्योपव्याख्यानमेवमुपासनमेवंविभूत्येवंफलमित्यादिकथनमुपव्याख्यानं वर्त्तत इति शेषः
एषां भूतानां चराचराणां भूतानाम् ॥ ॥ पृथिवी रसः । गतिः परायणमवष्टम्भः ॥ ॥ पृथिव्या आपो र
सः अप्सु ह्योता च प्रोता च पृथिवी अतस्ता रसः पृथिव्याः ॥ ॥ अपामोषधयो रसः अप्परिणामत्वादोषधी
नां तासामोषधीनां पुरुषो रसः अन्नपरिणामत्वात्पुरुषस्य तस्यापि पुरुषस्य वाग्रसः पुरुषावयवानां
वाक् सारिष्ठा अतो वाक् पुरुषस्य रस उच्यते तस्या अपि वाच ऋग्रसः सारतरा ऋचः साम रसः सारतरम्
तस्यापि साम्न उद्गीथो रसः प्रकृतत्वादोंकारः सारतमः एवं स एष रसानां रसतमः उद्गीथाख्य ओंकारो भू
तादीनामुत्तरोत्तररसानामतिशयेन रसो रसतमः परमः परमात्मप्रतीकत्वात् परार्ध्यः अर्धं स्थानं परं च
तत्स्थानं परार्धं तदर्हतीति परार्ध्यः परमात्मस्थानार्हः परमात्मवदुपास्यत्वादित्यभिप्रायः अष्टमः पृथि
व्यादिरससंख्यायाम् य उद्गीथः य उद्गीथावयवस्तत्क्रमम् कतमा सा ऋक् कतमत्तत्साम कतमो वा स उद्गी
थः कतमा कतमदिति वीप्सादरार्था ननु वा बहूनां जातिपरिप्रश्ने डतमच् न चात्र ऋग्जातिबहुत्वं कथं डत
मच्प्रयोगः नैष दोषः जातौ परिप्रश्नो जातिपरिप्रश्न इत्येवं विग्रहे जातावाक्यव्यक्तीनां बहुत्वोपपत्तेः न
तु जातेः परिप्रश्न इति विगृह्यते ननु जातेः परिप्रश्न इत्यस्मिन्विग्रहे कतमः कठ इत्युदाहरणमुपपन्नं जातौ
परिप्रश्न इति तु न युज्यते तत्रापि कठादिजातावेव व्यक्तिबहुत्वाभिप्रायेण परिप्रश्न इत्यदोषः यदि जातेः परि

छा.भा.
३

नोतदापयतः आपयन्तः वै खल्वान्यस्मै तेन स्यातां कामं तथा सर्वान् प्रविष्टेन मिथुनेन सर्वकामा
वाप्तिः । आत्मैवोंकारस्य सिद्धमित्यभिप्रायः तदुपासकोऽप्युक्तान् कामान् भवतीत्याह आपयिता ह वै का
मानां यदेवं मानस्य भवति य एतदेवं [illegible] एवमक्षरमुद्गीथमुपास्ते तस्येतस्य यथोक्तं फलमित्यर्थः
यथायथोपास्ते तेन तदेव भवतीति श्रुतेः ॥ ॥ समृद्धिगुणवांश्चोंकारः कथं ॥ तदाह तदनुज्ञाक्षरं
हि किं चिदनुजानात्योमित्येव तदाहैष एव समृद्धिर्यदनुज्ञा तद्धेतत्त्वमनुज्ञाक्षरं यदनुज्ञा च समृद्
धेतुत्वं इति यो कामभवत्यर्थः कथमनुज्ञेत्याह श्रुतिमिव यद्धि किं चयति च लोके ज्ञानं धनं वानु
नातिविद्वान्धनी वा तत्र तत्रानुमतिं कुर्वन्नोमित्येव तदाह तथा च वेदे ओमित्यादिन्यासमिति ह्यावोचेत्यादि ॥
तथा लोकेऽपि तव देयं ते गृह्णामीत्युक्तः ओमित्याह अतएव ओ एव एष एव समृद्धिर्यदनुज्ञा यानुज्ञा साम
मृद्धितन्मूलत्वादनुज्ञायाः समृद्धो हि ओमित्यनुजानाति तस्मात् समृद्धिगुणवानोंकार इत्यर्थः समृद्धि
गुणोपासकत्वान्न दर्मावन ॥ ॥ समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमु
पास्ते ॥ समर्धयिता कामानां यजमानस्य भवति य एतदेवं विद्वानित्यादि पूर्ववत् ॥ ॥ अथेदानीम
क्षरस्तुतिरुपास्यत्वात् रोचनार्थं कथम् ॥ तेनेयं त्रयीविद्या विद्या वर्तते ॥ तेनाक्षरेण प्रकृतेन येयं
वेदादिलक्षणा त्रयीविद्या त्रयीविहितेन कर्मेत्यर्थः ॥ ॥ नहि त्रयीविद्यैव साक्षाद्वर्णादिभिर्वर्तते क
र्मैव तथा प्रवर्तते ननु इति प्रसिद्धेः कथम् ॥ ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति इति लिङ्गा
त्सोमयाग इति गम्यते ॥ ॥ तच्च कर्म ॥ एतस्यैवाक्षरस्यापचित्यै अपचितिः पूजार्थं परमात्मप्रतीकं हि
तेन तदपचितिः परमात्मन एव सा स्यात् कर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इति स्मृतेः ॥ ॥ किं चैतस्य

छा॰ भा॰ २

द्गीथभक्त्यवयवत्वादुद्गीथशब्दवाच्यमुपासीत कर्माङ्गावयवभूते ओंकारे परमात्म
प्रतीके दृढामैकाग्र्यलक्षणां मतिं संतनुयात् ॥ ॥ स्वयमेव श्रुतिरोंकारस्योद्गीथशब्दवाच्यत्वे हेतुमाह
ओमिति ह्युद्गायति ओमित्यारभ्य हि यस्मादुद्गायति अत उद्गीथ ओंकार इत्यर्थः ॥ ॥ तस्योपव्याख्यानम्
तस्याक्षरस्योपव्याख्यानमेवमुपासनमेवं विभूत्येवं फलमित्यादिकथनमुपव्याख्यानं प्रवर्तत इति शेषः
एषां भूतानां चराचराणां भूतानाम् ॥ ॥ पृथिवी रसः । गतिः परायणमवष्टम्भः ॥ ॥ पृथिव्या आपो र
सः अप्सु ह्योता च प्रोता च पृथिवी अतस्ता रसः पृथिव्याः ॥ ॥ अपामोषधयो रसः अप्परिणामत्वादोषधी
नां तासामोषधीनां पुरुषो रसः अन्नपरिणामत्वात्पुरुषस्य तस्यापि पुरुषस्य वाग्रसः पुरुषावयवानां
वाक्सारिष्ठा अतो वाक्पुरुषस्य रस उच्यते तस्या अपि वाच ऋग्रसः सारतरा ऋचः साम रसः सारतरम्
तस्यापि साम्न उद्गीथो रसः प्रकृतत्वादोंकारः सारतरः एवं स एष उद्गीथाख्य ओंकारो भू
तादीनामुत्तरोत्तररसानामतिशयेन रसो रसतमः परमः परमात्मप्रतीकत्वात् परार्ध्यः अर्धं स्थानं परं च
तत्स्थानं परार्धं तदर्हतीति परार्ध्यः परमात्मस्थानार्हः परमात्मवदुपास्यत्वादित्यभिप्रायः अष्टमः पृथि
व्यादिरससंख्यायाम् यदुद्गीथः यदुद्गीथावयवस्सहस्त्रेणम् कतमा कतमर्क् कतमत्कतमत्साम कतमः कतमो वा स उद्गी
थः कतमः कतम इति वीप्सादरार्था ननु वा बहूनां जातिपरिप्रश्ने डतमच् न ह्यत्र ऋग्जातिबहुत्वं कथं डतम
चः प्रयोगः नैष दोषः जातौ परिप्रश्नो जातिपरिप्रश्न इत्येवं विग्रहे जातावेकस्यां बहूनां व्यक्तीनां बहुत्वोपपत्तेः न
तु जातेः परिप्रश्न इति विगृह्यते ननु जातेः परिप्रश्न इत्यस्मिन्विग्रहे कतमः कठ इत्युदाहरणमुपपन्नं जातौ
परिप्रश्न इति न युज्यते तत्रापि कठादिजातावेव व्यक्तिबहुत्वाभिप्रायेण परिप्रश्न इत्यदोषः यदि जातेः परि

ह्मविषयाणि मनोमयः प्राणशरीर इत्यादीनि कर्मसमृद्धिफलानि च कर्मांगसंबंधीनि रहस्यसामान्यान्म
नोवृत्तिमात्रसामान्याच्च यथा हि तज्ज्ञानं मनोवृत्तिमात्रं तथान्यान्यप्युपासनानि मनोवृत्तिरूपाणीत्यस्ति हि सा
मान्यम् कस्तर्हि तज्ज्ञानस्योपासनानां च विशेषः उच्यते स्वाभाविकस्यात्मन्यक्रिये ध्यारोपितस्य कर्त्रादि
कारकक्रियाफलभेदविज्ञानस्य निवर्तकमद्वैतज्ञानं रज्ज्वादाविव सर्पाद्यध्यारोपलक्षणाज्ञानस्य रज्ज्वादि
स्वरूपनिश्चयः प्रकाशनिमित्तः उपासनं तु यथाशास्त्रसमर्पितं किंचिदालंबनमुपादाय तस्मिन्समान
चित्तवृत्तिसंतानकरणं तद्विलक्षणप्रत्ययानन्तरितमिति विशेषः तान्येतान्युपासनानि सत्त्वशुद्धिकरत
त्वेन वस्तुतत्त्वावभासकत्वाद्द्वैतज्ञानोपकारकाण्यालंबनविषयत्वात्सुखसाध्यानि चेति पूर्वमुपन्यस्यन्ते
तत्र कर्माभ्यासस्य दृढीकृतत्वात्कर्मपरित्यागेनोपासन एव दुःखं चेतःसमर्पणं कर्तुमिति कर्मांगविषय
मेव तावदादावुपासनमुपन्यस्यते अथ मूलम् ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति
तस्योपव्याख्यानं एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रसः ओषधीनां पुरुषो रसः
पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः स एष रसानां रसतमः परमः परार्ध्योऽष्टमो
यदुद्गीथः कतमा कतमर्क् कतमत्कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति मूलम् ॥ ॥ ओमित्येत
दक्षरमुद्गीथमुपासीत ओं ओमित्येतदक्षरं परमात्मनो नेदिष्ठमभिधानम् तस्मिन्हि प्रयुज्यमाने स प्रसी
दति प्रियनामग्रहण इव लोकः तदिहेति परं प्रयुक्तमभिधायकत्वाद्व्यावर्तितं शब्दस्वरूपमात्रं प्रतीय २२
तया यथार्चादिवत्परमात्मनः प्रतीकं संपद्यते एवं नामत्वेन प्रतीकत्वेन च परमात्मोपासनसाधनं श्रेष्ठ
मिति सर्ववेदान्तेष्ववगतम् जपकर्मस्वाध्यायाद्यन्तेषु च बहुशः प्रयोगात्प्रसिद्धमस्य श्रैष्ठ्यम् अतस्तदेत

केवदेनेवाचाजीवंति कथं प्राणेन प्राणेन पश्यंतश्चक्षुषा शृण्वंतः श्रोत्रेण ध्यायंतो मनसैवं सर्वकरणचेष्ट
उर्वन्त इत्यर्थः एवं वयमप्यजीविष्मेत्यर्थः आत्मनोश्रेष्ठत्वं प्राणोपदेशाय पुनः प्रविवेश ह वाक्पुनः स्वा
व्यापारे प्रवृत्ता बभूवेत्यर्थः समानमन्यत् चक्षुर्होच्चक्राम मनो होच्चक्रामेत्यादि यथा बाला अमनसो अ
हृदमनस इत्यर्थः एवं परीक्षितेषु वागादिषु प्राणेन तेषु समत्वात् प्राणः उच्चिक्रमिषन् कोपात् उत्क्रमिषत् किमक
रोदित्युच्यते यथा लोके सुहयः शोभनोऽश्वः पत्नीमां पड्वीशशंकून् बंधनकीलान् परीक्षणाय प्रहतेन कशया द
नः संखिदेत् समुत्खनेत् समुत्पाटयेदेवमितरान् वागादीन् प्राणान् समखिदत् सम
त्पाटितवान् ते प्राणाः संचालिताः संतः स्वस्थानेस्थानमनुपस्थातुमशक्ताः सन्तो मुख्यं प्राणमेत्य ऊचुः हे भ
गवन् एधि भव नः स्वामी यस्मात्त्वं नोऽस्माकं श्रेष्ठोऽसि मा चोत्क्रमीरिति अथ हैनं वागादयः प्राणस्य
श्रेष्ठत्वं कार्येण पाटयन्त आहुर्बलिमिव राज्ञो विशः कथं वागाह स्म उवाच यदहं वसिष्ठोऽस्मि यदीति क्रियावि
शेषणं यद्वसिष्ठत्वगुणोऽस्मीत्यर्थः त्वं तद्वसिष्ठः तेन वसिष्ठत्वगुणेन त्वं तद्वसिष्ठोऽसि न इत्यर्थः अथ
वा न कश्चिदपि क्रियाविशेषणमेव तत्त्वं तद्वसिष्ठोऽसि यो वसिष्ठत्वगुणोऽहं तेनात्मना ते निषेव्यामि मन इत्येनत् तथा
ऽन्येषां यथा चक्षुः श्रोत्रं मनः श्रेष्ठमिति इदं वचनं वा उक्तमिदं वागादिभिर्मुख्यं प्राणं प्रत्यभिहितं यस्माद्वै लोके
वाचो न चक्षूंषि न श्रोत्राणि न मनांसीति वागादीनि करणान्याचक्षते लोकाः किं तर्हि प्राणा इत्ये
वाचक्षते कथयंति यस्मात् प्राणो ह्येवैतानि सर्वाणि वागादीनि करणजातानि भवति अतो मुख्यं प्राणं प्रमेव
एवं प्राणादिभिरुत्क्रमितिम्रकाशमर्थं स्वपक्षं निर्हीयंति ॥ ननु कथमिदं युक्तं चेतनावत् इव बाह्यादि
श्रेष्ठत्वाय विवदमानं संस्पर्धेषु वृत्तिः नहि चक्षुरादीनां वाचं प्रत्याख्याय प्रत्येकं वचनेन संभवति तथा

का॰भा॰
५२

मोदेहात्पुनः प्रवेशो ब्रह्मगमने प्राणस्य निर्दोषपद्यते तत्रास्मादिचेतनावद्देवताधिष्ठितत्वाद्वागादीनां चेत-
नत्वं तावत्सिद्धमागमतः तार्किकसमयविरोध इति चेत् देहस्यैकस्मिन्ननेकचेतनावत्त्वेन स्थूलस्यानित्यस्य बाह्यानां
णानाभ्युपगमात् येनावदोषः समभ्युपगन्तेनितार्किकास्मन्मनआदिकार्यकरणानां साध्यात्मिकानां बाह्यानां चेतनाव
त्त्वं पृथिव्यादीनामीश्वराधिष्ठितानामेव नियमेन प्रवृत्तिसिद्धेरित्यादिवत् नचास्माभिरस्याध्यात्मनाव
स्यापि देवताश्रयत्वं भोक्तृत्वमभ्युपगम्यते किं तर्हि कार्यकरणवतीनां दितासां प्राणैकदेवताभेदानामध्यात्मा
धिभूताधिदैवभेदकोटिविकल्पानामध्यात्मनाप्राणानियते धारभ्युपगम्यते सत्यकरणः प्राणादे
न्वेनात्रहीनाः पश्यन्तः सर्वगोत्वकारो इत्यादिमंत्रवर्णात् हिरण्यगर्भं पश्यत जायमानं हिरण्यगर्भं जन
यामास पूर्वमित्यादिवचनाच्छ्रुतेरीयाः पदेनि भोक्तृकर्मफलसंबंधो देहे न हि लब्धाणा जीव इति वस्याः वा
गादीनां चेत्स्ववादः कल्पितताविशेषान्त्यद्यमनितरकार्यप्राणाश्रेष्ठतानिर्धारणार्थम् यथा लोके पुरुषाश्चन्या
न्यमात्मनः श्रेष्ठताय विवदमानाः केचिद्गुणविशेषाभिज्ञं पृष्ठं निकनाः श्रेष्ठो गुणैरिति तेनोक्ताः पृथक्पृथ
गादः कार्यं साधयितव्यचक्रे न येनादः कार्यं साध्यते स वः श्रेष्ठ इत्युक्तास्तथैवायचक्रे तथात्मनो न्यस्य वा श्रे
ष्ठतां निर्धारयति तच्छ्रेष्ठं संवादं वागादिषु कल्पितवती श्रुतिः कथं नाम विहायावागादीनामेकैकस्याभावेऽपि
न हि पश्यामो जीवति प्राणस्य निप्राणाः श्रेष्ठतां प्रतिपद्यते इति तथा च श्रुतिः कौषीतकिनाम् जीवति वागपेतो मूका
न्हि पश्यामो जीवति चक्षुरपेतोऽन्धान्हि पश्यामो जीवति श्रोत्रापेतो बधिरान्हि पश्यामो जीवति मनोपेतो।
बालान्हि पश्यामो जीवति बाहुच्छिन्नो जीवत्यूरुच्छिन्नस्यायामसद्भावाद्वाक्यमेतद्भविष्यतीत्ययं किंचिदिदंसा
सभ्यशालाकृतिस्मृतिहायः नहायन्तदमिष्यतः प्राणा बापरिष्टाद्भिः परिदधाति सोमकोहवासो भवत्

मां॰ भा॰
म॰ टी॰
३२

ओंकारस्तुरीयभावमापन्नस्तं स्तौति अमात्र इति यथोक्तप्रणवप्रतिपत्तिविहीनस्य जननमरणमात्रभागी
न पुरुषार्थभाग्भवतीति विद्यारहितं निन्दति नेतर इति पादविभागस्य मात्राविभागस्य चाऽभावादोंकारस्य
तुरीयः सन्नमात्रो भवतीत्याह अमात्र इति ननु कथमनेनापरिच्छित्तिरोंकारस्य तुरीयस्योच्यते नहि तत्र
परिच्छित्तिरेवाऽस्तीत्याशंक्याह नैतावत्त्वमिति अनर्थात्मकद्वैतसंस्पर्शाभावादप्रतिबंधेन परमानंद
त्वे तस्मिन्नाविर्भवतीत्यभिप्रेत्याह सर्वेति यथाव्याख्यातः एवार्थो नोक्तविशेषवानित्यर्थः नत्वयथोक्ते

अमात्रस्तुरीय ओंकारो मीयतेऽनयेति मात्रा परिच्छित्तिः साऽनंता यस्य सोऽनंतमात्रः नैतावत्त्व
मस्य परिच्छेत्तुं शक्यत इत्यर्थः सर्वद्वैतोपशमत्वादेव शिवः ओंकारो यथाव्याख्यातो विदितो ये

अमात्रोऽनंतमात्रश्च द्वैतस्योपशमः शिवः ओंकारो विदितो येन स मुनिर्नेतरो जनः २९
इति माण्डूक्योपनिषद्व्याख्याने गौडपादभगवतः कृतौ ओंकारनिर्णये प्रथमं प्रकरणं १

न स परमार्थतत्त्वस्य मननान्मुनिः नेतरो जनः शास्त्रविदपीत्यर्थः २९ इति श्रीगोविंदभगवत्पादपू
ज्यशिष्यस्य श्रीपरमहंसपरिव्राजकाचार्यस्य शंकरभगवतः कृतावागमशास्त्रविवरणे प्रथमं प्रक
रणं माण्डूक्यव्याख्याने समाप्तम् श्रीशंकरस्वामिने नमः सहस्रकृत्वः ॥

प्रणवपरिज्ञानरहितस्या
पि शास्त्रपरिज्ञानवत्त्वाज्जन्मोपलक्षितसंसारभाक्त्वे न पुरुषार्थासिद्धिः सैव शास्त्रविदोपि तत्त्वज्ञानाभाव
मत्वे पुरुषार्थासिद्धिरित्यभिप्रेत्याह नेतर इति तदेवं प्रणवद्वारेण निरुपाधिकमात्मानं मननं संध्यानस्य पुरु
षार्थपरिसमाप्तिर्नेतरेषां बहिर्मुखानामिति स्थितम् २९ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानंद
पूज्यपादशिष्यभगवदानंदज्ञानविरचितायां गौडपादीयभाष्यटीकायां प्रथमं प्रकरणं समाप्तम् शुभं स ११२१

२२

मायेत्यनेकोदाहरणमुत्पद्यमानस्यानेकविधत्वबोधनार्थं प्रणवस्य परमात्मतत्त्वं प्राप्तस्याविकृतत्वमेव समायाश
क्तिवशाज्जगदुत्पन्नमित्यत्र दृष्टान्तमाह यथेति यथा मायावी स्वगतविकारमन्तरेण मायाहस्त्यादि विकृतजालस्य
मायावशादेव हेतुर्यथा चरज्ज्वादयः स्वगतविकारविरहिणः स्वाज्ञानादेव सर्पादिहेतवस्तथायमात्मा प्रणवभू
तः स्ववहारदशायां स्वाविद्यया सर्वस्य हेतुर्भवति अतो युक्तं तस्य परमार्थावस्थायां पूर्वोक्तविशेषणवत्त्वमि
त्यर्थः द्वितीयार्धं विभजते एवं हीति पूर्वोक्तविशेषणसंपन्नमित्यावत् तस्य सर्वहेतोः सहायां
तरापेक्षा नास्तीति सूचयति तत्त्वाणादेवेति तदात्मभावमित्यत्र तच्छब्देनापूर्वादिविशेषणं परमार्थेव

यथा मायाव्यादयः एवं हि प्रणवमात्मानं मायावव्यादिस्थानीयं ज्ञात्वा तत्क्षणादेव तदात्म
भावं व्रजतीत्यर्थः २७ सर्वप्राणिजातस्य स्मृतिप्रत्ययास्पदे हृदये स्थितमीश्वरं प्रणवं वि

प्रणवं हीश्वरं विद्यात्सर्वस्य हृदि संस्थितं सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति २८

विद्यात् सर्वव्यापिनं व्योमवदोंकारमात्मानमसंसारिणं धीरो बुद्धिमान्मत्वा न शोचति शोकनि
मित्तानुपपत्तेः तरति शोकमात्मविदित्यादिश्रुतिभ्यः २८ ॥

स्योपास्यत्वे २७ ब्रह्मबुद्ध्या प्रणवमभिध्यायतो हृदयाख्ये देशमुपदिशति प्रणवं हीति परमार्थदर्शिनस्तद्देश
घनवच्छिन्नवस्तुदर्शनादात्यन्तिकशोकाभावं तत्र को मोहः कः शोक इत्यादिश्रुतिसिद्धमनुवदति सर्वव्यापिनमिति
हृदयदेशे प्रणवभूतस्य ब्रह्मणो ध्येयत्वे हेतुं सूचयति स्मृतिप्रत्ययेति बुद्धिमानिति विवेकिनमुच्यते मत्वेति साक्षा
कारमवाप्येति विवक्षिते विवेकद्वारा तत्र साक्षात्कारमति शोकनिवृत्तौ हेतुमाह शोकमिति तस्य हि निमित्तमात्मा
ज्ञानं तस्यात्मसाक्षात्कारतो निवृत्तौ शोकानुपपत्तिरित्यत्र प्रमाणमाह तरतीति आदिशब्देन भिद्यते हृदयग्रन्थिरित्या

पादानां मात्राणां चान्योन्यमेकत्वेन ज्ञाते तद्विभागविधुरमोंकारं ब्रह्म तद्ध्यायतो भवति कृतार्थ इति दर्शयति ओंकार
मिति तस्मात्पादानां मात्राणां चान्योन्यमेकत्वादित्यर्थः तदेकत्वेऽप्युक्तमोंकारस्योभयविभागशून्यं ब्रह्मत्वं ज्ञातव्यमीया
दित्याह ओंकारमिति उक्तार्थस्य तात्पर्यार्थमाह एवमिति प्रणवानुसंधानकृपालस्य प्रणवज्ञानेनैव सर्वहेतोऽपवाद
केन कृतार्थतां भवतीत्युक्तम् २४ इदानीं तदनभिज्ञस्य परोपदेशमात्रशरणस्य ध्यानकर्तव्यतां कथयति युञ्जीते
ति तत्र मनसः समाधानं ब्रह्मणि कर्तव्यं किमिति प्रणवे तत्कर्तव्यमेतदुच्यते तत्राह प्रणवे नित्येति समाधानविषय
माह यथेति तुरीयरूपे यथोच्यते तत्र हेतुमाह यस्मादिति तदेव साधयति नहीति तत्रैव त्रिरीकृत्य तानुकूल्यमाह
विद्वानिति २५ कीदृशास्तर्हि प्रणवो मंदानां मध्यमानां चाधिकारिणां ध्येयो भवतीत्याशंक्याह प्रणवो हीति उक्तमपि

ओंकारं पादशो विद्यादित्यर्थः एवमोंकारज्ञाने दृष्टार्थमदृष्टार्थं वा न किंचित्प्रयोजनं चिन्तयेत् कृतार्थत्वादित्यर्थः २६
युञ्जीत समाधानं यथाख्यातेन परमार्थरूपे प्रणवे चेतो मनः यस्मात्प्रणवो ब्रह्म निर्भयं नहि तत्र सहायुक्तमेण
भयं विद्यते क्वचित् विद्वान्न बिभेति कुतश्चनेति श्रुतेः २५ परापरब्रह्मरूपः प्रणवः परमार्थतः सोऽपि मात्रापादेषु पराए
वात्मा ब्रह्मेति न पूर्वं कारणमस्य विद्यत इत्यपूर्वः नास्यान्तरं भिन्नजातीयं किंचिद्विद्यत इत्यनन्तरः तथा बाह्यमन्यन्न

ओंकारं पादशो विद्यात्पादा मात्रा न संशयः ओंकारं पादशो ज्ञात्वा न किंचिदपि चिन्तयेत् २४ युञ्जीत प्रणवे चे
तः प्रणवो ब्रह्म निर्भयम् प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् २५ प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः
अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः २६ सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम्

विद्यत इत्यबाह्यः अपरं कार्यमस्य न विद्यत इत्यनपरः सबाह्याभ्यन्तरो ह्यजः सैन्धवघनवदित्यर्थः २६ आदिमध्यान्ताश्च
त्रिस्थितिप्रलयाः सर्वस्यैव मायाहस्तिरज्जुसर्पमृगतृष्णिकास्वप्नादिवदुत्पद्यमानस्य वियदादिप्रपंचस्य कारिणं कीदृ
शस्तर्हि प्रणवः समस्तज्ञानगोचरो भवति तत्राह अपूर्व इति परापरब्रह्मात्मना प्रणवो मंदमध्यमाधिकारिणां ध्येयतया
कृतीति पूर्वार्धं व्याचष्टे परेति उत्तमाधिकारिणस्तु सर्वविशेषशून्यमेकरसं प्रत्यग्भूतं यद्ब्रह्म तद्रूपेण प्रणवः समस्तज्ञाना
धिगम्यो भवतीत्युक्तार्थं विभजते परमार्थत इत्यादिना उक्तेऽर्थे प्रमाणं सूचयति सबाह्येति २६ यदोंकारस्य प्रणवस्य तात्पर्यमा
पन्नस्य तुरीयस्य पूर्ववदनन्तरत्वमित्यादि विशेषणमुक्तं तत्र हेतुमाह सर्वस्येति यथोक्तविशेषणप्रणवप्रत्यञ्चप्रतिप
द्यतत्कृतार्थो भवतीत्याह एवं हीति पूर्वार्धं व्याकरोति सर्वस्यैवोत्पद्यमानस्योत्पत्तिस्थितिलयाः यथोक्तप्रणवाधीना

एतमवादेयावर्ण्यविवर्तवादेयोतियेनमराहरति मा
यति ॥

मां॰ भा॰ प्र॰ टी॰ १२

इह तद्बीजभूतमज्ञानेन तुरीये स्वबुभुत्सया मेदं दध्येवं तेषामात्मानं तुरीये प्रविष्टो विद्वान् नासौ पुनरुत्थानमर्ह
तिकारणमंतरेण तद्योगादित्यर्थः तुरीयमेव पुनरुत्थानबीजभूतं भविष्यतीत्याशंक्याकार्यकारणावि
निर्मुक्तस्य तस्य तद्योगान्मैवमित्याह तुरीये स्थिति मुक्तस्यापि पूर्वसंस्कारात्पुनरुत्थानमाशंक्य दृष्टां
तेन निराचष्टे नहीति एवं वदित्यविवेकावस्थायामिवेत्यर्थः नहि विवेकिना रज्जुसर्पविवेकविज्ञानवता

तुरीयस्य बीजमात्रं न हि रज्जुसर्पयोर्विवेके रज्ज्वां प्रविष्टः सर्पः बुद्धिसंस्कारात्पुनः पू
र्ववन्न हि विवेकिनामस्त्यस्येति सेदमध्यमपि योऽत्र प्रतिपन्नसाधकभावी नोऽस्त्या
र्गगामिनोऽसस्यासिनो मात्राणां पादानां च लक्ष्म सामान्यविदा यथावदुपास्यमा
नः ॐकारो ब्रह्मप्रतिपत्तये आलंबनी भवति तथा च वक्ष्यति आश्रमास्त्रिविधा ही
नेत्यादि एवं वदत्येते श्लोका भवति यथोक्तैः सामान्यैः पादा एव मात्रा मात्राश्च पादाः

मिति यावत् बुद्धिसंस्कारादीप्यत्र बुद्धिशब्देन सर्पभ्रांतिर्गृह्यते उक्तमाधिकारिणमोंकारद्वारेण परवि
शुद्धब्रह्मात्मैक्यविद्यामुपनेतुं तद्वतिलक्षणमुक्तफलमिदानीं सदानां च कथं ब्रह्मप्रतिपत्त्या फलप्राप्तिरि
त्याशंक्याह सेदेति तेषामपि क्रममसंकीर्णविहृदेत्यर्थः तत्रैव वाक्यशेषानुकूल्यं कथयति तथा चेति
यथापूर्वमाचार्यैरोंकारार्थप्रकाशकाः श्लोकाः प्रणीतास्तथोत्तरेऽपि श्लोकाः प्रत्युक्ते ये एवं स भवेन्मौना
ह एवंविदिति ॐकारस्य पादशो विद्याकीटैर्त्याशंक्याह पादाश इति ॥ राम ॥

प्रत्ययैकतत्समोंकारसंवेदनं त्रिमात्रेणोंकारेणाध्यस्तेन तादात्म्यादोंकारो निरुच्यते तेन तस्य परेण ब्रह्मणोंकारममात्रादि
ष्कृत्या विवस्यते तामिवतार्यमाकरोति अमात्र इत्यादिना केवलत्वमद्वितीयत्वं विशेषणेन तत्सम्पादयति अभिधाने
ति अभिधानेवाभिधेयमनश्चिन्नानिवृत्त्यार्थीभावस्याभिधास्यमानत्वात्तयोर्मूलात्तानलयेणेतीणानादि ति
हेत्वर्थः अव्यवहार्यश्चेदात्मा नास्त्येवेत्याशंक्य विकारज्ञानविनाशणवयिनं नात्मनो विशेषाणैर्नैवमित्याह प्रप
चैति तस्य च सर्वानर्थाभावोपलक्षितस्य परमानन्दत्वेन पर्यवसाने सूचयति शिव इति तस्यैव सर्वद्वैतकल्प

अमात्रो मात्रायस्य नास्ति सोमात्रः ओंकारश्चतुर्थस्तुरीय आत्मैव केवलः अभिधानाभिधेयरूप
योर्वाङ्मनसयोः क्षीणत्वादव्यवहार्यः प्रपंचोपशमः शिवोऽद्वैतः संवृत्तः एवं यथोक्तविज्ञानवता

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपंचोपशमः शिवोऽद्वैत एवमो
ंकार आत्मैव संविशत्यात्मनात्मानं य एवं वेद अत्रैते श्लोका भवंति

प्रयुक्तं ओंकारस्त्रिमात्रस्त्रिपाद आत्मैव संविशत्यात्मना स्वेनैव स्वं पारमार्थिकमात्मानं य एवं
वेद परमार्थदर्शी नां ब्रह्मविदोत्तृतीयं वीजभावं दग्ध्वात्मानं प्रविष्ट इति न पुनर्जायते ॥

नापिष्टानत्वेनावस्थानमभिप्रेत्याह अद्वैत इति ओंकारः तुरीयः सन्नात्मैवेति यदुक्तं तदुपसंहरति एवमिति
यथोक्तविज्ञानेन पादानां मात्राणां चैकत्वे च पादा मात्राश्च तुरीयात्मन्योंकारमात्रे सर्वे पूर्वे विभागाश्च तरोत्तरांतर्भा
वेन क्रमादात्मनि पर्यवस्यतीत्येवं लक्षणेन तद्विज्ञाप्रयुक्तः सन्नोंकारो मात्राः पादाश्च स्वस्मिन्नंतर्भाव्यावस्थित
स्यात्मनो भेदमसहमानस्तद्रूपो भवतीत्यर्थः इत्येकं तस्य फलमाह संविशतीति सुषुप्ते ब्रह्मप्राप्तस्य पुनरुत्था
नवदस्यापि पुनर्जन्म स्यादित्याशंक्याह परमार्थेति सुषुप्तस्य पुनरुत्थानं बीजभूताज्ञानस्य सत्त्वादुपपद्यते

मो॰ भा॰ अकारप्रधानमोंकारं ध्यायतो यथा वैश्वानरप्राप्तिस्तथोकारप्रधानेन तमेव ध्यायतस्तैजसस्य हिरण्यगर्भस्य प्राप्ति
टी॰ र्भवतीत्याह तथेति यस्तु मकारप्रधानमोंकारं ध्यायति तस्य प्राज्ञाव्याकृतप्राप्तिर्वक्तेत्याह मकारश्चेति क्रि
यापादानवृत्तिरिहभयत्रविवक्षिता चतुर्थं पादं व्याचष्टे त्रीणीति स्थूलप्रपंचो जागरितं विश्वश्चेत्येतत्त्रि
तयमकारमात्रं सूक्ष्मप्रपंचः स्वप्नः तैजसश्चेतत्त्रितयमकारमात्रं प्रपंचद्वयकारणं सुषुप्तं प्राज्ञश्चेतत्त्रितयं

तथोकारः तैजसं मकारश्चापि पुनः
प्राज्ञं च प्राप्नोनयतेऽप्यनवर्त्तते त्रीणि
त्वमकारे बीजभावलयादमात्रेऽोंका
रे गतिर्नैव विद्यते क्वचिदित्यर्थः ॥

मकारमात्रं तत्राऽपि सर्वं पूर्वमुत्तरोत्तरभावमापद्यते तदेवं सर्वमोंकारमात्रमिति ध्यानावस्थितस्य यदेता
वेतेकालमोमिति रूपेण प्रतिपत्त्रनत्वाद्विशुद्धब्रह्मैवेत्याचार्योपदेशसमन्वयसम्यग्ज्ञानेन एवोक्तसर्वा
विभागानिमित्तात्तानस्य मकारत्वेन गृहीतस्य तत्र ब्रह्मण्येव शुद्धे पर्यवसितस्य न क्वचिद्गतिरूपपद्यते
परिच्छेदाभावादित्यर्थः ॥

तृतीयपादस्य तृतीयमात्रायाश्चैकत्वाध्यासे सामान्यद्वयं स्फुटत्वाद्दर्शितं विशदयति मकारेति अत्रत्यार्थस्य पूर्ववदेव
स्तात्वात्रास्यर्थमाह मकारेत्यंशति २१ विश्वादीनां मकारादीनां च यत्तुल्यं सामान्यमुक्तं तद्विज्ञानफलमौति त्रिष्विति य
श्चोक्तस्थानत्रयं जागरादि तेषु मेषु च धामसु चेति त्रितयं तुल्यं पादानां मात्राणां चेति शेषः उक्तसामान्यसामिहत्यकर्थमिति
रित्यादि महामुनिरित्यस्यार्थमाह ब्रह्मविदिति २२ पूर्वोक्तसामान्यज्ञानवतो ध्यानविशेषस्य फलविभागं दर्श

मकारेत्यप्राज्ञस्यापीति लयाद्युत्कृष्टे सामान्यमित्यर्थः २१ यथोक्तस्थानत्रये तुल्यमुक्तं सामान्यं वेत्ते
वमेवैतदिति निश्चितो यः स पूज्यो वन्द्यश्च ब्रह्मविल्लोके भवति २२ यथोक्तैः सामान्यैरात्मपादानां मात्रा

मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम् मात्रासंप्रतिपत्तौ तु लयसामान्यमेव च २१
त्रिषु धामसु यत्तुल्यं सामान्यं वेत्ति निश्चितः स पूज्यः सर्वभूतानां वन्द्यश्चैव महामुनिः २२
अकारो नयते विश्वमुकारश्चापि तैजसं मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः २३

भिः सहैकत्वं कृत्वा यथोक्तोंकारं प्रतिपद्य यो ध्यायी तं तमकारो नयते विश्वं प्रापयति अकार
लब्धेनोकारविद्वान्वैस्वानरो भवतीत्यर्थः ॥

यति अकारश्चेति यत्र तु पादानां मात्राणां च विभागो नास्ति तस्मिन्नोंकारे तुरीयात्मनि व्यवस्थितस्य प्राप्त
प्राप्त्यप्राप्ति विभागो नास्तीत्याह नामात्र इति ओंकारस्य ध्यायिनमकारो विश्वं प्रापयतीत्युक्तमप्युक्तं वि
स्वप्राप्त्यध्यानमन्तरेण सिद्धत्वात्कार्यस्य चाध्येयस्यातः फलप्रापकत्वायोगादित्याशंक्याह अकारेति तदा
लब्धे नन्तरप्रयानमस्तितियावत् ॥

मां॰ भा॰ प्र॰ टी॰ १९

तत्रतत्रैकत्वज्ञाने फलभेदकथनादुपासनाभेदमाशंक्याङ्गेषु फलभेदश्रुतेरर्थवादत्वमुपेत्याह अत्रेति पा
दानां मात्राणां च क्रमादेकत्वविज्ञाने फलकथनं सर्वाप्त्यादिमात्रास्वर्थवादः साक्षात्संनिधिप्रधानस्योङ्कारध्यानस्य
साधने यदोंकारात्मतत्वं तस्य स्तुतावुपयुज्यते न च तदेवैकमुपासनमितरस्य तदङ्गत्वोपास्तिवैदिकत्वमित्य
र्थः पादानां मात्राणां च यदेकत्वं संनिमित्तं श्रुत्योपन्यस्तं तत्र श्रुत्यर्थविवरणरूपान् सर्वत्र वेदवत् श्लोकानवतारयति अ

अत्रावान्तरफलवचनं प्रधानसाधनस्तुत्यर्थं विश्वस्याकारमात्रत्वं यदा विवक्ष्यते तदाप्त्यादित्वं सामा
न्यमुत्कटमुद्भूतं दृश्यते इत्यर्थः १९ अत्वविवक्षायामित्यस्य व्याख्यानं मात्रासंप्रतिपत्ताविति

अत्रैते श्लोका भवन्ति विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटम् मात्रासंप्रतिपत्तौ स्या
दाप्तिसामान्यमेव च १९ तैजसस्योत्वविज्ञाने [illegible] उत्कर्षो दृश्यते स्फुटं मात्रासं
प्रतिपत्तौ स्यादुभयत्वं तथाविधम् २०॥

विश्वस्याकारमात्रत्वं यदा संप्रतिपद्यते इत्यर्थः
आप्तिसामान्यमेव चोक्तं समित्यनुवर्तते चशब्दात् १९ तैजसस्योत्वविज्ञाने उकारत्वविवक्षायामु
त्कर्षो दृश्यते स्फुटं स्पष्टमित्यर्थः उभयत्वं च स्फुटमेवेति पूर्ववत्सर्वं २०॥ अत्रेति प्रथमपादस्य प्रथममा
त्रायाश्चाभेदोपपादनार्थमुक्तं सामान्यद्वयं विशदयति विश्वस्येति अकारत्वेनादिरस्य साविति शेषः पुनरुक्तिपरिहारद्वा
राविवक्षितमर्थमाह अत्रेति अनुवृत्तिद्योतिकं दर्शयति चशब्दादिति १९ द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वोपप
योजकद्वयं श्रुत्युक्तमनूद्य तैजसस्येति स्फुटमिति क्रियाविशेषणं तथाविधमित्यस्यार्थं स्फुटमित्याह स्फुटमेवेति उत्व
विज्ञान इत्यस्य व्याख्यानं मात्रासंप्रतिपत्ताविति तस्य व्याख्यानं समेवमित्युच्यते न तत्पूर्ववत् इहव्यमित्युच्यते पूर्वव

टीका २०॥

२९

ज्ञानमंततेहकर्षानामक्रतामित्रस्याः भेदावेदनं तस्येष्टत्वाभावे कथं फलत्वमित्याशंक्याचष्टे विज्ञानेति यत्तद्विष
तत्फलत्वमेव प्रकटयति अप्रद्वेष्य इति साहत्यभेदेन फलभेदमावेद्य द्विविधसाहत्यमप्युक्त्वैकत्वविज्ञानफलमाह अग्र
ज्ञाविदिति तृतीयपादस्य तृतीयमात्रायाश्चैकत्वमप्यन्यस्याति सप्तमेति सर्ववेदेकत्वप्रयोजकमत्रापि अग्रश्च पूर्ववक
त्सावियति केनेत्यादिना मानसेवविद्दृणोति मीयन्त इति ओमित्योंकारस्यैवैतत्वेनोक्ताः सत्यकारोकारौ

विज्ञानसंततिं वर्धयतीत्यर्थः समानस्त्वस्यश्चमित्रपक्षस्यैव शत्रुपक्षाणामपि अप्रद्वेष्यो भवति अब्रह्म
विदस्य कुले न भवति य एवं वेद स्वप्नस्थानः प्राज्ञो यः सर्गोकारस्य मकारस्तृतीया मात्राकेन सामान्येनेत्या
ह सामान्यमिदमत्रामितेर्मितिर्मानं मीयते इव हि विश्वतैजसौ प्राज्ञेन प्रलयोत्पत्त्योः प्रवेशनिर्गमाभ्यां प्र

समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मि
तेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद ॥

प्रस्थेनेव यववास्तथा ओंकारसमा
प्तौ पुनः प्रयोगे च प्रविश्य निर्गच्छत इवाकारोकारौ मकारे अपीतेर्वा अपीतिरप्यय एकीभावः ओंकारोच्चा
रणेऽन्त्येऽक्षरे एकीभूताविवाकारोकारौ तथा विश्वतैजसौ सुषुप्तकाले प्राज्ञे अतो वा सामान्यादेकत्वं
प्राज्ञमकारयोः विद्वत्फलमाह मिनोति ह वा इदं सर्वं जगद्याथात्म्यं जानातीत्यर्थः अपीतिश्च जगत्कार

प्रथमं मकारे प्रविश्य पुनस्तस्मान्निर्गच्छन्ताविवोपलभ्येते तेन मकारे यि मानसामान्यमिति वक्तव्यमित्यर्थः एकी
भावमेव स्फोरयति ओंकारेति मकारवत्प्राज्ञेऽपि तद्दर्शिसामान्यमित्याह तथेति उक्तस्यापि सामान्यस्य फलमा
ह अतो वेति सामान्यद्वयद्वारेण प्राज्ञमकारयोरेकत्वज्ञानेनाविवतितेफलवत्त्वादित्याह विद्वदिति अविदुषोऽपि
जगद्विषयज्ञानमस्तीत्याशंक्याविशिनष्टि जगद्याथात्म्यमिति तद्याथात्म्यं चामात्रत्वं प्रलयभवनमनिष्टत्वान्न फ

मां भा
प्र. टी
२८

सामान्यांतरमाह आदिरिति तदेव स्फुटयति यथैवेति उकारो मकारश्चेत्युभयमपेक्ष्य प्रथमपाठादादिमत्वं मकारस्य द्रष्टव्यं विश्वस्यापि जागरितादिमत्वं तैजसमात्रमपेक्ष्य आद्यस्थाने वर्तमानत्वादित्यर्थः उक्तस्य सामान्यांतरस्य फलं दर्शयति तस्मादिति किमर्थं सामान्यद्वारा तयोरेकत्वमुच्यते तद्विज्ञानस्य फलवत्वादित्याह तदेकत्वेति साहस्य विकल्पादेव फलेविकल्पः द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वमुपदिशति स्वप्नेत्यादिना यथा प्रथमपादस्य प्रथममात्रायाश्चैकत्वे सामान्यमुक्तं तथा द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वसिद्ध्यै सामान्यं वक्तव्यं तदभावे तदारोपायोगादिति पृच्छति केनेति सामान्योपन्यासपूर्वकमेकत्वारोपं साधयति आहेति अकारस्य सर्ववाग्व्यापकत्वेनो

आदिरस्य विद्यते इत्यादिमत्तत्य यथैवादिमदकाराख्यमक्षरं तथैव वैश्वानरः तस्माद्वा सामान्यादकारत्वं वैश्वानरस्य तदेकत्वविदः फलमाह आप्नोति ह वै सर्वान्कामानादिः प्रथमश्च भवति महतां य एवं वेद यथोक्तमेकत्वं वेदेत्यर्थः स्वप्नस्थानः तैजसो यः स उकारस्याकारो द्वितीयमात्राकेन सामान्येनेत्याह

आदिमत्वाद्वाप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद स्वप्नस्थानः तैजस उकारो द्वितीयमात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसंततिम्

उत्कर्षात् अकारादुत्कृष्ट इव ह्युकारः तथा तैजसो विश्वादुभयत्वाद्वा अकारमकारयोर्मध्यस्थ उकारः तथा विश्वप्राज्ञयोर्मध्ये तैजसः अत उभयभाक्त्वसामान्यात् विद्वत्फलमुच्यते उत्कर्षति ह वै ज्ञानसंततिम् ॥

त्कृष्टत्वस्य स्पष्टत्वात् कथं तस्मादुकारस्योत्कर्षो वर्ण्यते तत्राह अकारादिति अकारस्योत्कर्षवास्तवेऽपि पाठक्रमादुकारस्योत्कर्षत्वमौपचारिकमिवकारस्याप्यमर्थं स्पष्टयति यथा अकारादुकारोत्कर्षो दर्शितः तथा विश्वात्तैजसस्योत्कर्षो वक्तव्यः स्वप्नाभिमानिनः स्थूलाभिमानिनः सकाशादुत्कर्षस्य युक्तत्वादित्याह तथेति उकारे तैजसयोर्न प्रत्येकमुभयत्वमेकत्वस्योभयत्वाद्वा तादित्याशंक्याकरोति अकारेति मध्यस्थत्वादुकारस्तैजसयोरुभयभाक्त्वसामान्यं तस्मात्तयोरेकत्वमाकमारोपितमित्याह अत इति यथोक्तैकत्वविज्ञानफलवत्वादुपादेयमिति सू

ज्ञानमंततेहक्क्षीनामङ्कताश्चितस्याः भेदावेदनं तस्येष्टत्वाभावे कथं फलत्वमित्याशंक्याचष्टे विज्ञानेति एतद्द्वयं
तस्पत्वमेवप्रकटयति अप्रद्वेष्य इति साह एषभेदेन फलभेदमावेद्य द्विविधमाह एष प्रवृत्तैकत्वविज्ञानफलमाह अत्र
ज्ञाविदिति तृतीयपादस्य तृतीयमात्रायाश्चैकत्वमप्यस्याति सुषुप्तेति सर्ववेदैकत्वप्रयोजकमत्रापि प्रश्नपूर्वक
मुपवर्णयति केनेत्यादिना मानसेवविद्वणोति मीयत इति ओमित्योंकारस्य नैरंतर्येणाभ्यासात्सत्यकारोकारौ
विज्ञानसंततिं वर्धयतीत्यर्थः समानस्तुल्यश्च मित्रपक्षस्यैव शत्रुपक्षाणामपि अप्रद्वेष्यो भवति अब्रह्म
विदस्य कुलेन भवति य एवं वेद सुषुप्तस्थानः प्राज्ञो यः सुगोकारस्य मकारस्तृतीयमात्राकेन सामान्येनेत्या
ह सामान्यमिदमत्रामितेर्मितिर्मानं मीयते इव हि विश्वतैजसौ प्राज्ञेन प्रलयोत्पत्त्योः प्रवेशनिर्गमाभ्यां प्र

समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मि
तेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद ॥ अमात्रेनैवयवास्तथा ओंकारसमा

प्तौ पुनः प्रयोगे च प्रविश्य निर्गच्छत इवाकारोकारौ मकारे अपीतेर्वा अपीतिरप्यय एकीभावः ओंकारोच्चा
रणे अन्त्यसे अक्षरे एकीभूताविवाकारोकारौ तथा विश्वतैजसौ सुषुप्तकाले प्राज्ञे अतो वा सामान्यादेकत्वं
प्राज्ञमकारयोः विद्वत्फलमाह मिनोति ह वा इदं सर्वं जगद्याथात्म्यं जानातीत्यर्थः अपीतिश्च जगत्कार णात्मा भवतीत्यर्थः

अथ समं मकारे प्रविश्य पुनस्तस्मान्निर्गच्छंताविवोपलभ्येते तेन मकारेपि मानसामान्यमिति वक्तव्यमित्यर्थः एकी
भावमेव स्फोरयति ओंकारेति मकार एव प्राज्ञेपि तदस्ति सामान्यमित्याह तथेति उक्तस्यापि सामान्यस्य फलमा
ह अतो वेति सामान्यद्वयद्वारेण प्राज्ञमकारयोरेकत्वज्ञानेनाविवर्तिते फलवत्वादित्याह विद्वदिति अविद्वोपि
जगद्विषयज्ञानमस्तीत्याशंक्याविशिनष्टि जगद्याथात्म्यमिति तद्याथात्म्यं चात्माभ्रांतत्वे प्रलयभवनमनिष्टत्वान्नफ लमित्याशंक्याह जगदिति ॥

सामान्यांतरमाह आदिरिति तदेव स्फुटयति यथैवेति उकारो मकारश्चेत्युभयमपेक्ष्य प्रथमपाठादादिमत्वमकारस्य द्रष्टव्यं विश्वस्यापि नरादिमत्वं तैजसमात्रत्वमपेक्ष्याद्यस्थाने वर्तमानत्वादित्यर्थः उक्तस्य सामान्यांतरस्य फलं दर्शयति तस्मादिति किमर्थं सामान्यद्वारा तयोरेकत्वमुच्यते तद्विज्ञानस्य फलवत्वादित्याह तदेकत्वेति साहश्यविकल्पादेव फलविकल्पः द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वमुपदिशति स्वप्नेत्यादिना यथा प्रथमपादस्य प्रथममात्रायाश्चैकत्व सामान्यं प्रदर्शितं तथा द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वे सत्येव सामान्येनोच्यते तदभावे तदारोपायोगादिति पृच्छति केनेति सामान्योपन्यासपूर्वकमेकत्वारोपं साधयति आदेति अकारस्य सर्ववाग्व्यापकत्वेना

आदिरस्य विद्यते इत्यादिमत् यथैवादिमदकाराख्यमक्षरं तथैव वैश्वानरः तस्माद्वा सामान्यादकारत्वं वैश्वानरस्य तदेकत्वविदः फलमाह आप्नोति ह वै सर्वान् कामानादिः प्रथमश्च भवति महतां य एवं वेद यथोक्तमेकत्वं वेदेत्यर्थः स्वप्नस्थानः तैजसो यः स उकारस्याकारो द्वितीयमात्राकेन सामान्येनेत्याह

आदिमत्वादाप्नोति ह वै सर्वान् कामानादिश्च भवति य एवं वेद स्वप्नस्थानस्तैजस उकारो द्वितीयमात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसंततिम्

उत्कर्षात् अकारादुत्कृष्ट इव ह्युकारः तथा तैजसो विश्वादुभयत्वाद्वा अकारमकारयोर्मध्यस्थ उकारः तथा विश्वप्राज्ञयोर्मध्ये तैजसः अत उभयभाक्त्वसामान्यात् विद्वत्फलमुच्यते उत्कर्षति ह वै ज्ञानसंततिम् ॥

त्कृष्टत्वस्य स्पष्टत्वात् कथं तस्मादुकारस्योत्कर्षो वर्ण्यते तत्राह अकारादिति अकारस्योत्कर्षो वास्तवे पि पाठक्रमादुकारस्योत्कर्षत्वमौपचारिकमिवकारस्यात्ममर्थं स्पष्टयति यथा अकारादुकारोत्कर्षो दर्शितः तथा विश्वात्तैजसस्योत्कर्षो वक्तव्यः सूक्ष्माभिमानिनः स्थूलाभिमानिनः सकाशादुत्कर्षस्य युक्तत्वादित्याह तथेति उकारतैजसयोर्न प्रत्येकमुभयत्वमेकत्वस्योभयत्वव्याख्यातादित्याशंक्य व्याकरोति अकारेति मध्यस्थत्वादुकारतैजसयोरुभयभाक्त्वसामान्यात् तयोरेकत्वं शक्यमारोपयितुमित्याह अत इति यथोक्तैकत्वविज्ञाने फलवत्वादुपादेयमिति स

तत्रज्ञानसमर्थानां मध्यमानामुत्तमानां चाधिकारिणामध्यारोपापवादाभ्यां पारमार्थिकं तत्वमुपदिष्टमिदानीं तत्वग्रह॥
णासमर्थानां मध्यमाधिकारिणामात्मध्यानविधानारोपदृष्टिमेवावष्टभ्य व्याचष्टे अभिधेयेत्यादिना अध्यक्षरमित्येतद्व्या
करोति अक्षरमिति अध्यक्षरमित्यत्र किं पुनस्तदक्षरमिति प्रश्नपूर्वकं उत्पादयति पुनरित्यादिना तस्याविशेषणेन तद्द
शयति सोयमिति आत्माधियाह पादशो विभज्यते मात्रामधिकृत्य पुनरोंकारोवतिष्ठते तत्कथं याह पादशो विभज्यमानस्या
धिमात्रत्वमिति पृच्छति कथमिति पादानां मात्राणां चैकत्वादेतदविरुद्धमित्याह आत्मन इति पादानां मात्राणां च म

अभिधेयप्रधानोंकारश्चतुष्पादात्मेति व्याख्यातो यः सोयमात्माध्यक्षरं अक्षरमधिकृत्याभिधानप्राधा
न्येन वर्ण्यमानोध्यक्षरं किं पुनस्तदक्षरमित्याह ओंकारः सोयमोंकारः पादशः प्रविभज्यमानोधिमात्रं मात्रा
मधिकृत्य वर्तत इत्यधिमात्रं कथमात्मनो ये पादास्ते ओंकारस्य मात्राः कास्ता अकार उकार मकार इति तत्र

सोयमात्माध्यक्षरमोंकारोधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति जागरित
स्थानो वैश्वानरोकारः प्रथममात्राप्तेः॥

विशेषनियमः क्रियते जागरितस्थानो वैश्वानरो यः स ओंकारस्याकारः प्रथममात्रा केन सामान्येने
त्याह आप्तेराप्तिर्व्याप्तिः अकारेण सर्वा वाग्व्याप्ता अकारो वै सर्वा वागिति श्रुतेः तथा वैश्वानरेण जगत्त
स्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा इत्यादिश्रुतेः अभिधानाभिधेययोरेकत्वं चावोचाम

ध्ये विश्वात्मे विशेषस्याकारविशेषत्वं नियमयति तत्रेति विश्वाकारयोरेकत्वमाह प्रथमस्यारोपयितुं शक्यमन्यत्रस
त्यपि तस्मिन्नारोपसंदर्शनात् तथा च किं तदारोपप्रयोजकं साहचर्यमिति पृच्छति केनेति सामान्योपन्यासपरां श्रुति
मवतारयति आहेति आप्तिरेवाकारस्य श्रुत्युपन्यासेन अनाक्षिप्त करोति अथात्माभिधेयविकयोरेकत्वं पूर्वमुक्तमु
पेत्य विश्वस्य वैश्वानरस्य जगद्व्याप्तिं श्रुत्यवष्टम्भेन स्पष्टयति तथेति किं च सामान्यद्वारा वाच्यवाचकयोरेकत्वमारोप्य

न भवति तयोरेकत्वमप्रागुक्तमित्याह अभिधानेति

प्रपंचस्यासत्वेशून्यवादः स्यादित्याशंक्याह रज्जुवदिति प्रपंचस्य कालत्रयेपि सत्ताभावेनाविकृतमद्वैतमविरुद्धमि
त्युपसंहरति तस्मादिति १७ प्रकारान्तरेणाद्वैतानुपपत्तिमाशंक्य परिहरति विकल्पइति यदि केनचिद्द्वैतज्ञानतत्व
ज्ञानेन कार्येण शास्त्रादिविकल्पो द्वैतं तया विकल्पितस्तथा प्रसो बाधितो निवर्त्तेत न तत्ताविकमद्वैतं विरुद्ध
मद्वैतं तत्वज्ञानात्प्रागवस्थायामेव तत्वोपदेशनिमित्तीकृत्य यतः शास्त्रादिभेदोनूद्यते उपदेशप्रयुक्ते तत्वज्ञाने
निवृत्ते न किंचिदपि द्वैतमस्तीत्यद्वैतमविरुद्धमित्यर्थः श्लोकव्याख्यामाशङ्कामाह नन्विति तदनिवृत्तेरा
द्वैतासिद्धिने च शास्त्रादिभेदस्य कल्पितत्वादविरोधस्तथा सति सत्याभासवद्द्वैतज्ञाने द्वैतज्ञानानुपपत्तिरित्यर्थः
सत्याभासस्याप्यासत्यात द्वैतेपि कल्पितस्य चाशास्त्रादेस्तत्वज्ञाने द्वैतं प्रतिबिंबादिवदुपपन्नमित्यत्र नमाह
रज्जुवन्मायावद्वाद्वैतं परमार्थतः तस्मान्न कश्चित्प्रपंचः प्रवृत्तो निवृत्तो वास्तीत्यभिप्रायः १७ ननु शा
स्त्राणां शास्ता शिष्य इति विकल्पः कथं निवर्त्तत इत्युच्यते विकल्पो विनिवर्त्तेत यदि केनचित्कल्पितः स्या

विकल्पो विनिवर्त्तेत कल्पितो यदि केनचित् उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते १८

त् यथा प्रपंचो माया रज्जुसर्पवत्तथायं शिष्यादिभेदविकल्पोपि प्राक्प्रतिबोधादेव उपदेशनिमि
त्तोयं तु उपदेशादयं वादः शिष्यः शास्ता शास्त्रमिति उपदेशकार्ये तु ज्ञाने निर्वृत्ते ज्ञाते परमार्थत
द्वैतं न विद्यते १८॥ उच्यत इति शिष्यः शास्ता शास्त्रमित्ययं विकल्पो विभागः सोपि निवृत्ति
योग्यत्वादवस्तु तत्वज्ञानबाध्यत्वादद्वैतार्थविरोधीत्यर्थः शिष्यादिविभागस्य कल्पितत्वं दृष्टान्तेन स्पष्टयति
यथेति मायाविना प्रयुक्ता माया यथा कल्पितेषु तेषु यथा च सर्पधारादिविकल्पितः तथायं प्रपंचः सर्वो
विकल्पितत्वस्तु न भवतीति प्रपंचितेन तथैव प्रपंचैकदेशः शिष्यादिरपि ज्ञानात्कल्पितः सत्वज्ञानहेतो
रागवचनमित्युक्तमुपसंहरति अत इति उपदेशात्प्रागिव तस्माद्द्वैतं भेदानुवर्त्तनामित्याश
का विरोधिमज्ञावान्न्येवामित्याह उपदेशेति ॥१८॥ श्रीरामचन्द्रायनमोनमः ॥ ~ ॥

तत्वज्ञानसमर्थानां मध्यमानामुत्तमानां चाधिकारिणामध्यारोपापवादाभ्यां पारमार्थिकं तत्वमुपदिष्टमिदानीं तत्वग्रहणासमर्थानां मध्यमाधिकारिणामात्मध्यानविधानारोपदृष्टिमेवावष्टभ्य व्याचष्टे अभिधेयेत्यादिना अध्यक्षरमित्येतद्वा करोति अक्षरमिति अध्यक्षरमित्यत्र किं पुनस्तदक्षरमिति प्रश्नपूर्वकं तदुत्पादयति पुनरित्यादिना तस्याविशेषणं तत्त्वद शायति सोयमिति आत्माहियाद्दशोविभज्यतेमात्रा मधिकृत्य पुनरोंकारो व्यवतिष्ठते तत्कथं याद्दशोविभज्यमानस्तामात्रा मधिमात्रमिति पृच्छति कथमिति पादानां मात्राणां चैकत्वादेतदविरुद्धमित्याह आत्मन इति पादानां मात्राणां च

अभिधेयप्रधानोऽोंकारश्चतुष्पादात्मेति व्याख्यातो यः सोयमात्माध्यक्षरमक्षरमधिकृत्याभिधानप्राधान्येन वर्ण्यमानोध्यक्षरं किं पुनस्तदक्षरमित्याह ओंकारः सोयमोंकारः पाद्दशः प्रविभज्यमानोऽधिमात्रं मात्रामधिकृत्य वर्तत इत्यधिमात्रं कथमात्मनो ये पादास्ते ओंकारस्य मात्राः कास्ता अकार उकार मकार इति तत्र

सोयमात्माध्यक्षरमोंकारोऽधिमात्रं पादमात्रा मात्राश्च पादा अकार उकारो मकार इति जागरित
स्थानो वैश्वानरोकारः प्रथममात्राप्तेः ॥

विशेषनियमः क्रियते जागरितस्थानो वैश्वानरोयः स ओंकारस्याकारः प्रथममात्रा केन सामान्येनेत्याह आप्तेराप्तिर्व्याप्तिः अकारेण सर्वा वाक्व्याप्ता अकारो वै सर्वा वागिति श्रुतेः तथा वैश्वानरेण जगत्स्वरूपं तस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजा इत्यादिश्रुतेः अभिधानाभिधेययोरेकत्वं चावोचाम

ध्ये विश्वाख्ये विशेषस्याकारविशेषत्वं नियमयति तत्रेति विश्वाकारयोरेकत्वमाह येषु सत्यारोपयितुं शक्यमन्यत्र सत्यैवतास्मिन्नारोपसंदर्शनात्तथा च किं तदारोपप्रयोजकं साद्दृश्यमिति पृच्छति केनेति सामान्योपन्यासपरां श्रुतिं सव्यनारयति आहेति व्याप्तिमेवाकारस्य श्रुत्युपन्यासेन प्रमाणयति प्रकारेणेति अधात्मादिदैविकयोरेकत्वं प्रदर्शितम् पैन्य विश्वस्य वैश्वानरस्य जगद्व्याप्तिं श्रुत्यवष्टम्भेन स्पष्टयति तथेति किंच सामान्यद्वारा वाच्यवाचकयोरेकत्वमारोप्य

नभवति तयोरेकत्वमप्रागुक्तं नास्तीत्याह अभिधानेति

प्रपंचस्यासत्वे शून्यवादः स्यादित्याशंक्याह रज्जुवदिति प्रपंचस्य कालत्रयेपि सत्ताभावेनात्विकमद्वैतमविरुद्धमि
त्युपसंहरति तस्मादिति ॥ प्रकारान्तरेणाद्वैतानुपपत्तिमाशंक्य परिहरति विकल्प इति यदि केनचिद्धेतुना तत्व
ज्ञानेन कार्येण शास्त्रादिविकल्पो द्वैतं तथा विकल्पितस्तथापि सो बाधितो निवर्तेत न तु तात्विकमद्वैतं विरुद्ध
मद्वैतमिति ननु ज्ञानात्प्रागवस्थायामेव तत्वोपदेशनिमित्तीकृत्य यतः शास्त्रादिभेदो न स्यात उपदेशप्रवृत्तेर्ज्ञाने
निवृत्ते न किंचिदपि द्वैतमस्तीत्यद्वैतमविरुद्धमित्यर्थः श्लोकव्यावर्त्यामाशंकामाह नन्विति तदनिवृत्तेर्ना
द्वैतसिद्धिर्न च शास्त्रादिभेदस्य कल्पितत्वादविरोधस्तथा सति श्रुताभासवदुक्तज्ञानहेतुत्वानुपपत्तिरित्यर्थः
श्रुताभासस्याव्यामस्यात द्वैतविकल्पितस्य चाज्ञाद्वैतज्ञानहेतुत्वं प्रतिबिंबादिवदुपपन्नमित्युत्तरमाह
रज्जुवन्मायावद्वाद्वैतं परमार्थतः तस्मान्न कश्चित्प्रपंचः प्रवृत्तो निवृत्तो वास्तीत्यभिप्रायः ॥ ननु शा
स्त्राणां शिष्यः इति विकल्पः कथं निवर्तेतेत्यत उच्यते विकल्पो विनिवर्तेत यदि केनचित्कल्पितः स्या

विकल्पो विनिवर्तेत कल्पितो यदि केनचित् उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥

तु यथा प्रपंचो मायारज्जुसर्पवत्तथायं शिष्यादिभेदविकल्पोपि प्राक्प्रतिबोधादेव उपदेशनिमि
त्तोस्तु उपदेशादयं वादः शिष्यः शास्ता शास्त्रमिति उपदेशकार्ये तु ज्ञाने निर्वृत्ते ज्ञाते परमार्थत
त्वे द्वैतं न विद्यते ॥१८॥
उच्यत इति शिष्यः शास्ता शास्त्रमित्ययं विकल्पो विभागः सोपि निवृत्ति
योग्यत्वादवस्तु ज्ञानबाध्यत्वाद्द्वैतार्थविरोधीत्यर्थः शिष्यादिविभागस्य कल्पितत्वं दृष्टान्तेन स्पष्टयति
यथेति मायाविना प्रयुक्ता माया यथा कल्पितेष्यते यथा च सर्पधारादिविकल्पितः तथायं प्रपंचः सर्वो
विकल्पितत्वात्तत्त्वं न भवतीति प्रपंचिते तथैव प्रपंचैकदेशः शिष्यादिरपि ज्ञानात्कल्पितः सन्नज्ञानहेतो
मिथ्येत्यर्थः किमिति ज्ञानात्पूर्वमसौ कल्प्यते तत्राह उपदेशेति उपदेशमुद्दिश्य यथोक्तविभा
गवचनमित्युक्तमुपसंहरति अत इति उपदेशात्प्रागिव तस्मादूर्ध्वमपि भेदोनुवर्ततामित्याशं
का विरोधिसद्भावान्नैवमित्याह उपदेशेति ॥१८॥ श्रीरामचंद्रायनमोनमः ॥ ~ ॥

अग्रहणान्यथाग्रहणसंबंधवैधुर्ये हेतुत्वाविशेषणद्वयमित्याह यस्माच्चेति तत्त्वमेवं लक्षणमस्यात्मनः किं माया
तमित्याशंक्याह तुरीयमिति तदाविशिष्टेनाचार्येणाविशिष्टे शिष्टे प्रतिबोधनावस्थायामित्यर्थः १६ तुरीयमद्वैत
मित्युक्ते तदयुक्तं प्रपंचस्य द्वितीयस्य सत्त्वादित्याशंक्याह प्रपंचइति प्रपंचनिवृत्त्या तुरीयप्रतिबोधात् तदद्विती
यत्वमविरुद्धमिति सैद्धांतिकीमाशंकां पूर्ववाद्यनुवदति प्रपंचेति तर्हि पूर्वं प्रपंचनिवृत्तेरनिवृत्तस्य तस्य सत्त्वा
न्नाद्वैतसिद्धिरस्तीति पूर्ववाद्येवब्रवीति अनिवृत्तइति सिद्धांती श्लोकेनोत्तरमाह उच्यतइति किं प्रपंचस्य वस्तु
त्वमत्याद्याद्वैतानुपपत्तिरुच्यते किं वावस्तुत्वमिति विकल्प्याद्ये द्वैतानुपपत्तिमंगीकरोति सत्यमिति अद्वैतेत
र्हि कथमुपपद्येतेत्याशंक्य प्रपंचस्यावस्तुत्वपक्षे तदुपपत्तिरित्याह रज्ज्वामिति यथा सर्पो रज्ज्वां कल्पितो वस्तु

यस्माच्चानिद्रमस्वप्नं तस्मादजमद्वैतं तुरीयमात्मानं बुध्यते तदा ॥ १६ ॥ प्रपंचनिवृत्त्या प्रतिबुध्यते अनिवृ
त्ते प्रपंचे कथमद्वैतमिति उच्यते सत्यमेवं स्यात्प्रपंचो यदि विद्येत रज्ज्वां सर्प इव कल्पितत्वान्न तु स विद्यते वि

प्रपंचो यदि विद्येत निवर्तेत न संशयः मायामात्रमिदं द्वैतमद्वैतं परमार्थतः १७ ॥

द्यमानश्चेन्निवर्तेत न संशयः न हि रज्ज्वां भ्रान्तिबुद्ध्या कल्पितः सर्पो विद्यमानः सन् विवेकतो निवृत्तो ने
वं मायाविना प्रयुक्ता तद्दर्शिनां चक्षुर्बंधापगमे विद्यमाना सती निवृत्ता तथेदं प्रपंचाख्यं मायामात्रं द्वैतम्

तो नास्ति तथा प्रपंचोऽपि कल्पितत्वान्नैव वस्तुतो विद्यते तथा च तात्विकमद्वैतमविरुद्धमित्यर्थः उक्तमर्थं व्यतिरेकमुखे
न साधयति विद्यमानश्चेदिति यथात्मा निष्कारणाधीनः सन्न प्रपंचो विद्येत ततः कृतकस्यानित्यत्वनियमान्निवृत्तिरव
श्यंभाविनी कार्यस्य च निवृत्तिर्नाम कारणसंसर्गः ततः सति कारणे प्रपंचनिवृत्तेरनात्यंतिकत्वाद् द्वैतानुपपत्तिराशंक्ये
त न च कारणाधीनः सन् प्रपंचोऽस्ति तस्य कल्पितत्वेनावस्तुत्वादित्यर्थः प्रपंचस्य मायया विद्यमानत्वं न वस्तुत्वमिति दृष्टा
णाभावमुपपादयति न हीत्यादिना सर्पो हि रज्ज्वां भ्रान्त्या कल्पितो नायं सर्पो रज्जुरेषेति विवेकधिया निवृत्तो नैव वस्तु
तो विद्यते बाधितस्य कालत्रयेऽपि सत्त्वाभावात् मायाच इंद्रजालशब्दवाच्या मायाविना प्रदर्शिता पार्श्वस्थानां माया
दर्शनवतां चक्षुर्गतस्य यथार्थदर्शनप्रतिबंधकस्यापगमे सति सम्यक्त्वे सम्यग्दर्शनेन निवृत्ता सती नैव वस्तुतो विद्या

मां॰ भा॰ करातत्त्वबोधो विपर्यासस्तयहेतुर्भवतीत्यपेक्षायामाह अनादीति प्रतिबुध्यमानेनत्वमेवविशिनष्टि अजमि
टी॰ ति जीवशब्दवाच्यमर्थं निर्दिशति योयमिति परमात्मैवजीवभावमापन्नः संसरतीत्यर्थः तस्य कथं जीवभावा
२९ पत्तिरित्यपेक्षा कार्यकारणबद्धत्वादित्याह स इति परमात्मोभयलक्षणेनस्वापेनसम्मोजीवोभवतीत्यत्र
यः स्वापमुभयलक्षणमेवप्रकटयति ततेत्यादिना मायालक्षणेनोभयत्रसंबध्यते स्वप्नमेवव्यन
क्ति ममेत्यादिना स्वापपरिगृहीतस्यैवप्रतिबोधनावकाशोभवतीत्याह यदेति यदासमस्तदाबुध्यत इति

योयंसंसारीजीवः स उभयलक्षणेनतत्त्वाप्रतिबोधरूपेणबीजात्मनान्यथाग्रहणलक्षणेनचाना
दिकालप्रवृत्तेनमायालक्षणेनस्वप्नेनममायंपिताऽयंपुत्रोयंनप्ताक्षेत्रंपशवोहमेषांस्वामीसुखीदुःखी
क्षयितोहमनेनवर्धितश्चानेनेत्येवंप्रकारान्स्वप्नान्स्थानद्वयेपिपश्यन्स्वपितियदावेदान्तार्थतत्त्वाभिज्ञे
नपरमकारुणिकेनगुरुणानास्येवंत्वंहेतुफलात्मकः किंतुतत्त्वमसीतिप्रतिबुध्यमानोयदातदैवं

अनादिमाययासुप्तोयदाजीवःप्रबुध्यते अजमनिद्रमस्वप्नमद्वैतंबुध्यतेतदा १६

प्रतिबुध्यते कथंनास्मिन्बाह्यमाभ्यंतरंजन्मादिभावविकारोस्ति अतोजं सबाह्याभ्यंतरम
र्वभावविकारवर्जितमित्यर्थः यस्माज्जन्मादिकारणभूतंनास्मिन्नविद्यातमोबीजंनिद्राविद्य
तेइत्यनिद्रं अनिद्रंहितत्तुरीयं अतएवास्वप्नंतन्निमित्तत्वादन्यथाग्रहणस्य ॥

प्रबोधः प्रतिबोधकेविनष्टे वेदान्तार्थेति कथंप्रतिबोधनंतदाह नास्तीति अनुभूयमानवत्त्वमेवमिथ्यते
यदोक्तविशेषणेनगुरुणाप्रतिबुध्यमानःशिष्यः तदासावेवंवक्ष्यमाणप्रकारेणप्रतिबुद्धोभवतीत्युक्तं त
मेवप्रकारंप्रश्नपूर्वकं द्वितीयार्धव्याख्यानेनविशदयति कथमित्यादिना अस्मिन्निति समस्याद्बोध्यात्म
न्यपि पराम्रष्टव्ये बाह्यकार्यमान्तरकारणंतच्चोभयमिहनास्ति ततोजन्मादेर्भावविकारस्यनात्रावकाशः स
भवतीत्यर्थः अथवा नातिनविशेषणे संप्रमाणंयोजयति सबाह्येति अजत्वादेवनिद्रेकार्याभावे कारणस्य हरिः
प्रमाणाभावंनवक्तव्यशक्यत्वादितिमत्वाह यस्मादिति अनिद्रत्वहेतूक्तनाविशेषणेनतद्दर्शयति अतएव २९

तयोरन्यथाग्रहणाग्रहणे च वैशिष्ट्यमपेत्य प्रागपि सूचितमित्याह अत इति द्वितीयं पादं विभजते प्राज्ञस्त्वि
ति द्वितीयार्धं व्याचष्टे नोभयमिति तुरीये निद्रास्वप्नयोरदर्शने हेतुमाह विरुद्धत्वादिति अज्ञानतत्कार्ययोर्नित्य
विज्ञप्तिरूपे तुरीये विरुद्धत्वादनुपलब्धिरित्यत्र दृष्टान्तमाह सवितरीवेति तुरीये वस्तुतो नाविद्यातत्कार्ययोः संग
तिरस्तीति अङ्गीकृत्य प्रागपि सूचितमित्याह अतो नेति १४ कदा तर्हि स्वप्नो भवतीत्यपेक्षायामाह अन्यथेति नि
द्रां तर्हि कदेति संदिहानं प्रत्याह निद्रेति तुरीयप्रतिपत्तिसमयं संगिरते विपर्यास इति श्लोकव्यावर्त्यमाकाङ्क्षां
दर्शयति कदेति कदा स्वप्ननिष्ठो भवति कदा निद्रानिष्ठः स्यादित्यपि द्रष्टव्यं प्रश्नत्रयस्योत्तरं श्लोकेन दर्शयति

अतस्तौ कार्यकारणबद्धौ विश्वतैजसौ प्राज्ञस्तु स्वप्नवर्जितः केवलयैव निद्रया युत इति कारणबद्ध इत्युक्तं नोभ
यं पश्यतीति तुरीये निश्चिता ब्रह्मविदो विरुद्धत्वात्सवितरीव तमः अतो न कार्यकारणबद्ध इत्युक्तस्तुरी
यः १४ कदा तुरीये निश्चितो भवतीति उच्यते स्वप्नजागरितयोरन्यथा रज्ज्वां सर्पवद्गृह्णतः तत्त्वमाभ

अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः । विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते १५ ॥

वति निद्रा तत्त्वमजानतस्तिसृष्ववस्थासु तुल्या स्वप्ननिद्रयोस्तुल्यत्वाद्विश्वतैजसयोरेकराशित्वमन्यथा
ग्रहणप्राधान्यादग्रहणगुणभूता निद्रेति तस्मिन्विपर्यासः स्वप्नः तृतीये तु स्थाने तत्त्वाज्ञानलक्षणा निद्रैव केव
ला विपर्यासः अतस्तयोः कार्यकारणस्थानयोरन्यथाग्रहणाग्रहणलक्षणविपर्यासे वा कार्यकारण
बन्धरूपे परमार्थतत्त्वाप्रतिबोधतः क्षीणे तुरीयं पदमश्नुते तदुभयलक्षणबन्धरूपं तत्रापश्यंस्तुरीये निश्चितो

उच्यत इति तत्र कदा स्वप्नो भवतीति प्रश्नं परिहरति स्वप्नेति अवस्थाद्वये स्वप्नदृष्टिरित्यर्थः द्वितीयप्रश्नं समाधत्ते
निद्रेति तिसृष्विति त्रिषु तयोरिति द्विवचनं कथमित्याशंक्याह स्वप्ननिद्रयोरिति विश्वतैजसावेकराशिः प्राज्ञो द्वि
यः ततः श्लोके द्विवचनमविरुद्धमित्यर्थः प्रथमराशौ विपर्यासस्वरूपं कथयति अन्यथेति द्वितीयराशौ विपर्या
सविशेषं दर्शयति तृतीये त्विति द्वितीयार्धं तात्पर्यतो व्याकरोति अत इति द्विवचनस्योपपन्नत्वाद्विपर्यास
स्य च विभागेन निर्धारितत्वादित्यर्थः तृतीयप्रश्नं प्रतिविधत्ते तदेति तत्त्वप्रबोधाद्विपर्यासतत्त्वावस्थायामित्यर्थः १२ ॥

मां॰ भा॰
अ॰ टी॰
२५

अनुमानप्रयुक्तां तुरीये विकारणबद्धत्वाशङ्कां परिहरति द्वैतस्येति श्लोकस्य तात्पर्यं गृह्णाति निमित्तान्तरेति विमतं
कारणबद्धं द्वैताग्रहणवत्त्वात्प्राज्ञवदित्यनुमानमेव दर्शयन्निमित्तान्तरमेव स्फारयति कथमिति अनुमानकृताशङ्का
निवर्तकत्वेन श्लोकमवतारयति प्राज्ञेति प्राज्ञस्यान्तरभाविप्रबोधादिकार्यापेक्षया नियतपूर्वभावित्वं कारणब
द्धत्वप्रयोजकं न च तुरीयस्य तदस्तीत्यप्रयोजको हेतुरित्याह यस्मादिति किं च तुरीयस्य विशुद्धचिद्धातुत्वप्र
साधनप्रमाणबाधात्कालात्ययापदिष्टो हेतुरित्याह सदेति न च पूर्वोक्तोपाधेः साधनव्याप्तिः तुरीये स्यादन्तरभा
विकार्यापेक्षया नियतप्रागभावित्वाभावादिति मत्वाह तत्त्वेति दोषद्वयवत्त्वेनानुमानस्याभासत्वे फलितं

निमित्तान्तरस्याप्रामाणिकात्वे समर्थोऽयं श्लोकः कथं द्वैताग्रहणस्य तुल्यत्वात्कारणबद्धत्वं प्राज्ञस्यैव न तु तुरीय
स्येति शङ्काशङ्का निवर्तते यस्माद्बीजनिद्रायुतस्तत्त्वाप्रतिबोधो निद्रा सैव च विशेषप्रतिबोधप्रसवस्य

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते १३
स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः १४

बीजं सा बीजनिद्रा तया युतः प्राज्ञः सदा ह्यक्तभावनात् तत्त्वाप्रतिबोधलक्षणबीजनिद्रा तुरीये न वि
द्यते अतो न कारणबद्धत्वमित्यभिप्रायः १३ स्वप्नोऽन्यथाग्रहणं सर्पवद्रज्ज्वां निद्रोक्ता तत्त्वाप्रतिबोधलक्ष
णं तम इति ताभ्यां स्वप्ननिद्राभ्यां युक्तौ विश्वतैजसौ १४॥ माह अतो नेति १३ कार्यकारणबद्धौ ताविष्टौ इति
श्लोकोक्तमर्थमनुभवावष्टम्भेन प्रपंचयति स्वप्नेति ननु तैजसस्यैव स्वप्नयुक्तत्वं युक्तं न तु विश्वस्य प्रबुध्यमानस्य तद्योगो
युज्यते प्रबुध्यमानेन तथा ज्ञानात्करणस्य विश्वस्यापि विश्वतैजसौ स्वप्ननिद्रायुताविति तत्र स्वप्नशब्दार्थमाह स्वप्न इति य
था रज्ज्वां सर्पो गृह्यमानोऽन्यथा गृह्यते तथात्मनि देहादिग्रहणमन्यथाग्रहणमात्मनो देहादित्वेन ग्रहणं स्वप्न इति
युक्तिसिद्धत्वात्तेन स्वप्नशब्दितेनान्यथाग्रहणेन संसृष्टत्वं विश्वतैजसयोरविशिष्टमित्यर्थः तथापि निद्राग्रहणस्ये
व निद्रायुक्तातत्त्वप्रबोधवत्ता विश्वस्येत्याशङ्क्याह निद्रेति उक्ताभ्यां स्वप्ननिद्राभ्यां विश्वतैजसयोर्वैशिष्ट्यनिराकरण [illegible] २४॥ २५

प्राज्ञस्य कारणबद्धत्वं साधयति नात्मानमिति तुरीयस्य कार्यकारणाभ्यामसंस्पृष्टत्वं स्पष्टयति तुर्यमिति श्लोकव्याव
र्त्यां साशंकामाह कथमिति वाशङ्का कथमित्यस्यार्थः स्फुटं प्रथमार्धवाक्येनपादत्रयं व्याचष्टे यस्मादिति विलक्ष
णमनात्मानमिति यावत् अनृतमित्यस्य व्याख्यानमविद्याबीजप्रसूतमिति द्वैतं द्वितीयमसत्यमित्यर्थः वैधर्म्योदा
हरणं यथेति प्राज्ञस्य विभागाविज्ञानाभावे फलमाह ततश्चेति यथोक्तनमसिकार्यलिंगमनुमानेन सूचयति अ
न्यथेति द्वितीयवाक्यं चतुर्थपादव्याख्यानेन प्रत्याख्यास्यति यस्मादित्यादिना सदेव तुरीयादन्यस्याभावात्

कथं पुनः कारणबद्धत्वं प्राज्ञस्य तुरीयस्य वा तत्त्वाग्रहणान्यथाग्रहणलक्षणो बन्धो नु सिद्ध्यत इति यस्मा
दात्मविलक्षणमविद्याबीजप्रसूतं वाह्यं द्वैतं प्राज्ञो न किंचन संवेत्ति यथा विश्वतैजसौ ततश्चासौ तत्त्वा
ग्रहणेन तमसान्यथाग्रहणबीजभूतेन बद्धो भवति यस्मात्तुरीयं तत्सर्वदृक्सदा तुरीयादन्यस्याभावा

नात्मानं न परांश्चैव न सत्यं नापि चानृतं प्राज्ञः किंचन संवेत्ति तुर्यं तत्सर्वदृक्सदा १२

त्सर्वदा सदैवेति सर्वं च तद्दृक्चेति सर्वदृक्तस्मात्तत्त्वाग्रहणलक्षणं बीजं तत्र तत्प्रसूतस्यान्यथाग्रहण
स्यापि अत एवाभावो नहि सवितरि सदा प्रकाशात्मके तद्विरुद्धमप्रकाशनमन्यथाप्रकाशनं वा संभव
ति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति श्रुतेः अथवा जाग्रत्स्वप्नयोः सर्वभूतावस्थः सर्ववस्तुदृगाभा
सस्तुरीय एवेति सर्वदृक्तदृशान्यदस्तीत्यद्रष्टेत्यादिश्रुतेः १२॥

रीयमेव सर्वं तच्च सदा दृक्स्वरूपमिति
यस्मात्तस्मादितियोजना तत्रेति परिपूर्णचिदेकतानं तुरीयं परामृश्यते अत एवेति कारणाभावे कार्यानुप
पत्तेरित्यर्थः तुरीये तत्त्वाग्रहणान्यथाग्रहणयोरसंभवं दृष्टान्तेन साधयति नहीति यस्मात्तुरीयस्य सदा दृग्
रूपत्वमतस्तत्र प्रमाणमाह नहि द्रष्टुरिति चतुर्थपादे प्रकारान्तरेण योजनेति अथवेति तत्रापि श्रुतिमनुकू
लयति नान्यदिति १२॥

नीतः अन्नादिष्विव रज्ज्वादिषु सर्पाद्यर्थे तद्विवरणरूपान् श्लोकानवतारयति अत्रेति विविधं स्थानत्रयमस्मादुद्भवतीति तस्मात्
तुरीयाद्विभज्यते नहि तुरीयातिरेकेण स्थानत्रयमात्मानं धारयति सर्वदुःखानामाध्यात्मिकादिभेदभिन्नानां
हेतुर्नात्र साधारणमिति यावदीशानपदमप्रयुक्तं प्रभुपदमप्रयुज्यमानमप्यौनरुक्त्यमित्याशङ्क्याह ईशान इति तुरीयस्य
दुःखनिवृत्तिं प्रति सामर्थ्यमस्ति स्वभावान्न कदाचिदपि दुःखं स्पृशतीत्याशङ्क्याह तद्विज्ञानेति सकृद्रूपेणाव्ययात्मत्वा
त्याशङ्क्याविक्रियत्वाद्रूपादिति तत्र प्रश्नपूर्वकमद्वितीयत्वहेतुमाह एतत्कुत इति अतो द्वितीयस्याभावहेतोरव

ईशानस्तुरीयस्यात्मा ईशानस्यास्य पदस्य व्याख्यानं प्रभुरिति दुःखनिवृत्तिं प्रति भवतीत्यर्थः तद्विज्ञान
निमित्तत्वाद्दुःखनिवृत्तेः अव्ययः न व्येति स्वरूपान्न व्यभिचरतीति यावत् एतत्कुतः यस्मादद्वैतः सर्वभावा
नां रज्जुसर्पवन्मृषात्वात् स एष देवो द्योतनात् तुरीयश्चतुर्थः विभुर्व्यापी स्मृतः १० विश्वादीनां सामान्यविशेष
भावो निरूप्यते तुरीयायाथात्म्यावधारणार्थं कार्यं क्रियत इति फलभावः कारणं करोतीति बीजभावः

अत्रैते श्लोका भवन्ति निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः अद्वैतः सर्वभावानां देवस्तुर्यो
विभुः स्मृतः १० कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ११

तत्त्वाग्रहणान्यथाग्रहणाभ्यां बीजफलभावाभ्यां तौ यथोक्तौ विश्वतैजसौ बद्धौ संगृहीताविष्येते प्राज्ञस्तु
बीजभावेनैव बद्धः तत्त्वाप्रतिबोधमात्रमेव हि बीजं प्राज्ञत्वे निमित्तं ततो द्वौ तौ बीजफलभावौ तत्त्वाग्रह
णौ तुर्ये न सिध्यतः न विद्येते न संभवत इत्यर्थः ११ ॥

भावादिदोषः विश्वादीनां दृश्यमानत्वात्तुरीयस्याद्वितीयसिद्धिरित्याशङ्क्याह सर्वभावानामिति अवस्थात्रयातीतस्य तुरीयस्य श्लोकेन लक्षणेन विद्वद्भवसिद्धमिति सूचय
ति विश्वतैजसयोरुभयबद्धत्वे सामान्ये प्राज्ञस्य कारणमात्रबद्धत्वं विशेषः अत्थेदं निरूपणं कीदृगुपयुज्यते तत्राह तुर्येति प्रा
ज्ञस्य कारणमात्रबद्धत्वं साधयति तत्त्वाप्रतिबोधेति त्रयाणामेवात्र विशेषोऽस्थितेन प्रकृते तुरीये किमायातमित्याशङ्क्या

२५

विशेषणांतरस्य पुनरुक्तिं परिहरन्नर्थभेदमाह अंतरिति स्थानिधर्मस्य स्थानधर्मस्य च प्रतिषेधो नतःप्राज्ञेन परामृष्य
ते चांतरागद्वेषादिरहितमविक्रियं कूटस्थमित्यर्थः शिवं परिशुद्धं परमानंदबोधरूपमिति यावत् यस्माद्धेतोरभावो
पलक्षितं तस्मात्तुर्यमित्याह यत इति अद्वैतमित्येतद्व्याचष्टे भेदेति सर्वोविशेषविषयत्वभावे कथं चतुर्थमि
त्याशंक्याह प्रतीयमानेति चतुर्थतुरीययोरर्थाख्येयत्वेनापौनरुक्त्यं तस्योक्तविशेषणत्वेपि समार्कि मायातमि
त्याशंक्याह सत्त्वात्मेति आत्मनियथोक्तविशेषणानि तेन प्रतिभांतीत्याशंक्याह सविज्ञेय इति तदेतद्व्याचष्टे

अंतःप्रज्ञत्वादिस्थानिधर्मप्रतिषेधः कृतः प्रपंचोपशममिति जाग्रदादिस्थानधर्माभाव उच्यते
अत एव शांतमविक्रियं शिवं यतोद्वैतं भेदविकल्परहितं च तुर्यं तुरीयं मन्यंते प्रतीयमानपादत्र
यरूपवैलक्षण्यात् स आत्मा स विज्ञेय इति प्रतीयमानसर्पभूच्छिद्रदंडादिव्यतिरिक्ता यथा र

प्रपंचोपशमं शांतं शिवमद्वैतं चतुर्थं मन्यंते स आत्मा
स विज्ञेयः ॥

ज्जुस्तथा तत्त्वमसीत्यादिवाक्या र्थ आत्मा अद्रष्टो द्रष्टा न हि द्रष्टुर्दृष्टेर्वि
परिलोपो विद्यते इत्यादिभिरुक्तो यः स विज्ञेयः इति भूतपूर्वगत्या ज्ञाते द्वैताभावः प्राप्तेनेज्ञस
विस्खलत्वानां सर्वदुःखानां निवृत्तेः ॥ प्रतीयमानेति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अवि-
नाशित्वादित्यादिवाक्यानि प्रतीकोपादानेन दर्शयति न हि द्रष्टुरिति आत्मन्यव्यवहार्ये कुतो विज्ञेयत्वमि
त्याशंक्याह भूतपूर्वमविद्यावस्थायां प्राज्ञेयता आगतिस्तथेदानीमपि विज्ञेयत्वमुक्तमित्याह भूतेति वि
द्यावस्थायामेवाकिमिति ज्ञातृज्ञानज्ञेयविभागो न भवति तत्राह ज्ञात इति ज्ञानेन तत्कारणस्याज्ञानस्या
पनीतत्वादित्यर्थः ॥

ननु चैतन्यस्याव्यभिचारः स्वप्रस्य स्फुरणव्याप्ततया साधकस्फुरणस्यावश्यकत्वादित्याह नस्वप्नस्येति स्वप्र
प्रसाधकस्फुरणस्य सत्त्वे प्रमाणमाह नहीति निषेधशास्त्रालोचनया निर्विशेषत्वे तुरीयस्योक्ते तदेव हेतुं कृत्वा
ज्ञानेन्द्रियाविषयत्वमाह अत एवेति दृष्टस्यैवार्थक्रियादर्शनाददृष्टत्वादर्थक्रियारहितत्वमिति विशेषणेनाग्रा
ह्य यस्मादिति अदृष्टमित्यनेनाग्राह्यमित्यस्य पौनरुक्त्यं परिहरति कर्मेन्द्रियैरिति अलक्षणमित्युक्ते सत्यज्ञा
नमनन्तमित्यादिलक्षणोपलम्भादित्याशंक्याह अलिङ्गमिति कोऽयं वान्यानकः प्राप्यादित्यादिलिङ्गोप

नस्वप्नस्यानुभूयमानत्वात् नहि विज्ञातुर्विपरिलोपो विद्यत इति च श्रुतेः अत एवादृष्टं यस्माददृष्टं
तस्मादव्यवहार्यमग्राह्यं कर्मेन्द्रियैः अलक्षणमलिङ्गमित्येतत् अननुमेयमित्यर्थः अत एवाचिन्त्य

अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारम्

अत एवाव्यपदेश्यं शब्दैः एकात्मप्रत्ययसारं जाग्रदादिस्थानेष्वेकोऽयमात्मेत्यव्यभिचारी यः प्र
त्ययस्तेनानुसरणीयं अथवा एक आत्मा प्रत्ययः सारं प्रमाणं यस्य तुरीयस्याधिगमे तत्तुरीय
मेकात्मप्रत्ययसारं आत्मेत्येवोपासीतेति श्रुतेः

न्यायविरुद्धमेतदित्याशंक्याह अननुमेयमिति
प्रत्यक्षानुमानाविषयत्वप्रयुक्तं विशेषणेनाह अत एवेति मनोविषयत्वाभावादेव शब्दाविषयत्वे शब्दप्र
वृत्तिनिमित्तप्रवृत्तिहेतुकत्वादित्याह अत एवेति तर्हि यथोक्तवस्तुनोऽस्येव प्रमाणाभावादित्याशंक्याह एकात्मेति प
रोक्षार्थविषयतया विशेषणं व्याख्याय परोक्षार्थतया व्याकरोति अथवेति अपरोक्षात्मप्रत्ययस्यात्मनि प्रमाणत्वे
बृहदारण्यकश्रुतिमुदाहरति आत्मेत्येवेति यज्ञात्मेति श्रुतिवाक्ये नापि प्रमाणत्वादिलक्षणात्मा वदात्मा मेः सचषात्रेन्मा
तीतः श्रुतिभ्यो वा तत्प्रमेवेकरसं परमात्मानं प्रत्यक्तेन गृहीत्वा तत्त्विष्टत्वं निष्ठतो ह्यात्मनो वस्था त्रयातीतस्य तुरीय

ज्ञानस्य जन्मातिरिक्तव्यापाराभावाज्जन्मनश्चैदेतन्निषेधेनैवोपलक्षयात् ज्ञानान्तरेविषयस्फुरणाजननायानवस्था
नादेरपि तादृग्भेनिहन्त्येव ज्ञानं प्रथयवासितमित्युपसंहरति तस्मादिति प्रतिषेधजनितं विज्ञानमेव प्रमाणं तस्याप
राजन्मैव तेन समानकालेवानर्थनिवृत्तिरिति योजना तत्र हेतुमाह बीजाभावेति सुषुप्ते हि स्वप्नजागरिते प्रतिबीजा
भावः तस्माद्विशेषविशेषविज्ञानाभावरूपतद्विशेषविज्ञानानां सर्वेषां घनमेकं साधारणमविभक्तं सुषुप्तमि
ति तत्प्रतिषेधो नेत्यादिना संभवतीत्यर्थः प्रकृते सर्पादीनां रज्ज्वादौ भ्रान्तिप्रतिपन्नानां प्रतिषेधादसत्त्वमात्मनि

तस्मात्प्रतिषेधविज्ञानप्रमाणव्यापारसमकालेवात्मन्यध्यारोपितानां तःप्रज्ञत्वाद्यनर्थनिवृत्तिरिति
सिद्धं नान्तःप्रज्ञमिति तैजसप्रतिषेधः न बहिःप्रज्ञमिति विश्वप्रतिषेधः नोभयतःप्रज्ञमिति जाग्रत्स्वप्न
योरन्तरालावस्थाप्रतिषेधः न प्रज्ञानघनमिति सुषुप्तावस्थाप्रतिषेधः बीजभावाविवेकरूपत्वात् न

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञं ॥

प्रज्ञमिति युगपत्सर्वविषयप्रज्ञातृत्वप्रतिषेधः नाप्रज्ञमिति चैतन्यप्रतिषेधः कथं पुनरन्तःप्रज्ञत्वा
दीनामात्मनि गम्यमानानां रज्ज्वादौ सर्पादिवत्प्रतिषेधादसत्त्वं गम्यत इति उच्यते ज्ञस्वरूपाविशेषेपी
तरेतरव्यभिचारादसत्त्वं रज्ज्वादाविव सर्पधारादिविकल्पितभेदवत् सर्वत्राव्यभिचारात् ज्ञस्वरूपस्य सत्यत्व
म् सुषुप्ते व्यभिचरतीति चेत् ॥ तत्प्रमाणेन गम्यमानानामसतः प्रज्ञत्वादीनां न प्रतिषेधो युज्यते मानविरोधादि
तिशंकते कथमिति प्रामाणिकत्वस्यासिद्धत्वाद्युक्तमेतत् प्रज्ञत्वादीनामसत्त्वमिति परिहरति उच्यत इति विमत
मसत्यं व्यभिचारित्वात्संप्रतिपन्नवदित्याह ज्ञस्वरूपेति तस्य विशेषाव्यभिचारः तत्र रज्ज्वादाविवेत्युदाहरणमन्तःप्रज्ञ
त्वादीनामितरेतरव्यभिचार इति दर्शने सर्पधारादीति विमतं सत्यमव्यभिचारित्वाद्रज्ज्वादिवदित्याह सर्वत्रेति तस्य च
सत्यत्वे सर्वकल्पनाधिष्ठानत्वमसिद्धिरिति भावः अव्यभिचारित्वहेतोरसिद्धिं शंकते सुषुप्त इति ॥

तथेहापि तमोनिवृत्तौ प्रमाणं निरूपणोति घटस्फुरणं तार्थिकं न च तस्य स्थायित्वमभिव्यंजकप्रमातृव्यापारस्या-
स्थिरत्वादित्यर्थः किंच घटादेर्जडस्य संविदपेक्षत्वात्तत्र संविदो मानफलत्वेपि नात्मनस्तु जडसंविदकत्वान्मानस्यारोपि-
तस्य सर्वनिवर्तकत्वमन्तरेण संविज्ञानकत्वव्यापारः संभवतीत्याह न चेति तुरीयात्मनि संवेदनजननव्यापारेण प्र-
माणस्य प्रकल्प्यते तस्य संविदात्मकत्वादारोपितनिवृत्तिव्यतिरेकेण मानजन्यफलस्य संविदनपेक्षत्वादित्युक्ते त-
त्र चेदनंतरमाह अतः प्रमातृत्वादीति आश्रयाभावेनाश्रितप्रमाणाभावान्न तत्त्वेन तस्य व्यापारानुपपत्तिरित्यत्र

न च तद्दृश्यात्मन्यध्यारोपितांतःप्रमातृत्वादिविवेककरणे प्रवृत्तस्य प्रतिषेधविज्ञानप्रमाणस्यानुपा-
दित्सितांतःप्रमातृत्वादिनिवृत्तिव्यतिरेकेण तुरीयव्यापारोपपत्तिः अतः प्रमातृत्वादिनिवृत्तिसमकालमेव
प्रमातृत्वादिभेदनिवृत्तेः तथा च वक्ष्यति ज्ञाते द्वैतं न विद्यत इति ज्ञानस्य द्वैतनिवृत्तिलक्षणव्यतिरेके-
ण लक्षणांतरानवस्थानात् अवस्थाने चानवस्थाप्रसंगात् द्वैतानिवृत्तिः ॥

वाक्यशेषमनुकूलयति तथा चेति किंच ज्ञानाधीनद्वैतनिवृत्त्यवच्छिन्नलक्षणातिरेकेण न लक्षणांतरं ज्ञाने
स्यात्तत्पारयति न चास्थिरं ज्ञानं व्यापाराय पर्याप्तं तथा च ज्ञानस्य द्वैतनिवृत्तिव्यतिरेकेणात्मनि व्यापा-
रोत्पत्तिरित्याह ज्ञानस्येति ननु ज्ञानं द्वैतनिवर्तकमपि न स्वात्मानं निवर्तयति निवर्त्यनिवर्तकभावस्यैकत्र विरो-
धात् अतो यावन्निवर्तकं स्यात्स्यादिति तत्राह अवस्थाने चेति निवर्तकस्य ज्ञानस्य द्वैतनिवृत्तेरनंतरमपि निवर्त-
कांतरमपेक्ष्यावस्थाने च तस्य तस्य निवर्तकांतरस्याप्यपेक्षत्वाद्द्वैतस्यापि विज्ञानस्य निवर्तकत्वासिद्धिः न च
ज्ञानस्य स्वानिवर्तकत्वानुपपत्तिः स्वपरविरोधिनो बहुना ह्युपलंभादित्यर्थः ॥ रामचंद्राय नमः ॥

शाब्दस्य संस्पृष्टपरोक्षज्ञानहेतोरसंस्पृष्टापरोक्षज्ञानहेतुत्वायोगात्तरीयज्ञाने प्रमाणांतरमेष्टव्यमिति पक्षं प्रत्याह
तरीयेति तस्य हि साक्षात्कारेण शब्दातिरिक्तं प्रमाणमन्वेष्यं शब्दस्य विषयानुसारेण प्रमाहेतुत्वाद्विषयस्य च तरीय
स्यासंस्पृष्टापरोक्षत्वादित्यर्थः तरीयसाक्षात्कारे प्रसंख्यानाख्यं साधनांतरमेष्टव्यमिति पक्षं प्रतिक्षिपति साधनां
तरेचेति प्रसंख्यानस्याप्रमाणत्वान्न प्रमारूपसाक्षात्कारं प्रति हेतुत्वेनेति भावः यथा रज्जुरियं न सर्पो नेति विवेकधीस
मुदयदशायामेव रज्जौ सर्पनिवृत्तिः फलसिद्धे स्वसाक्षात्कारस्य फलांतरं प्रमाणांतरं साधनांतरं वा नस्यपेक्ष
स्मज्ञानत्वैतापीत्याह रज्जुरिति विषयगते प्राक्तनस्य प्रमाणफलं नाध्यस्तनिवृत्तिरित्याशंक्याह यथाग्निमिति स्वविषयात्ता
ज्ञापनयनाय प्रवृत्ता प्रमाणक्रिया स्वविषये भावरूपमतिशयमाधत्ते चेदपनयार्थक्रियात्वविशेषात् छिदिरपि छेद्य
तरीयाधिगमे प्रमाणांतरं साधनांतरं वा नस्यपेक्ष्यं रज्जुसर्पविवेकसमकालं स्वरज्ज्वां सर्पनिवृत्तिफले सतिर
ज्वाधिगमस्येयतोपगतस्तमापनयव्यतिरेकेणाचरितार्थितामेव प्रमाणं व्याप्रियते तेषां छेद्यावयवसंबंधवि
योगव्यतिरेकेणान्यत्रावयवेऽपि छिदिर्व्याप्रियत इत्युक्तं स्यात् यदा तु नचेदं तमसो विवेककरणे प्रवृत्ते
प्रमाणमनुयायित्वात्तत्तमसो निवृत्तिफलावसानाच्छिदिरिव छेद्यावयवसंबंधविवेककरणे प्रवृत्तात्
दवयवद्वैधीभावफलावसानान्नेदानीं तरीयकं घटविज्ञानेन न तत्प्रमाणफलम् ॥
संयोगापनयनातिरिक्तमतिशयमादध्यान्न च संयोगविनाशातिरिक्ते विभागे सम्प्रतिपन्निरस्ति प्राक्तनस्य च प्रा
काशाते ज्ञानवन्नार्थनिष्ठत्वमप्रकाशत्वेनार्थं न मार्थीत्तीति भावः अज्ञाननिवर्तकमेव प्रमाणमिति पक्षे विषयस्य
रणकारणाभावाद्विषयसंवेदनं तस्यादित्याशंक्याह यदेति यदा हि तमसा समावृतोऽर्थो व्यवहारयोग्योऽस्ति इति तस्यत
मसा निःप्रत्यक्षव्यवहारयोग्यतापादने प्रवृत्ता हि प्रमाणं प्रवर्तते न चानुत्पादितस्य तस्यातिशयस्याप्रमेयस्य तमसोति
हेतिलवणयरापर्यवस्यति तदाचरसंवेदनमार्थिकं प्रमाणफलं न भवति यथा छिदिक्रियाच्छेद्यस्य तरोरवयव
योर्मिथः संयोगनिरसने प्रवृत्ता सती तयोरेव छेद्यावयवयोर्द्वैधीभावे फले पर्यवस्यति न त्वन्यत्रावयवेऽपि छिदिः ।

॥ टि व छ दि

यथाविधिमुखेन प्रवृत्तेन तत्त्वमसीतिवाक्येन स्थानत्रयसाक्षिणस्त्वंपदलक्ष्यस्य तत्पदलक्ष्यब्रह्मतालक्षणया बोध्य-
तेन पश्चान्निषेधशास्त्रेणापि तात्पर्यवृत्त्या जीवस्य तुरीयब्रह्मत्वं प्रतिपादयिष्यत इत्याशयेनाह तत्त्वमसीति नन्वस्थान-
त्रयविशिष्टस्यात्मनो नैव तुरीयात्मत्वं तुरीयग्रन्थेन प्रतिपाद्यते तुरीयस्य विशिष्टाद्भिन्नलक्षणत्वेनात्यन्तभिन्नत्वा-
दाह यदिहीति प्रातिभासिकवैलक्षण्येऽपि विशिष्टोपलक्ष्ययोरात्यन्तिकवैलक्षण्याभावान्न तात्त्विकं तुरीयस्य वि-
शिष्टादन्यत्वं अन्यथा ह्यत्यन्तभिन्नयोर्मिथः सम्पर्शविरहितयो रूपायोगे यभावायोगात्तुरीयप्रतिपत्तौ विशि-
ष्टस्य हानत्वाभावादन्यस्य चात्यन्तप्रतिपत्तिहानस्याद्दर्शनात्तुरीयाप्रतिपत्तिरेव स्यादित्यर्थः शास्त्रात्तु प्रतिपत्तिः
स्यादितिचेन्नेत्याह शास्त्रेति न हि शिष्टरूपामनूद्यविशेषणापायोद्देशेन तस्य तुरीयत्वमुपदिशति भेदेचा-

तत्त्वमसीतिवत् यदि हि प्रपञ्चस्यात्मविलक्षणं तुरीयमन्यत्तत्प्रतिपत्तिद्वाराभावात् शास्त्रोप-
देशानर्थक्यम् शून्यतापत्तिर्वा रज्जुरिव सर्पादिभिर्विकल्प्यमानास्थानत्रयेऽपि आत्मैक एवातः
प्रज्ञादित्वेन विकल्प्यते यदा तदातः प्रज्ञादित्वप्रतिषेधविज्ञानप्रमाणसमकालमेवात्मन्यनर्थ-
प्रपञ्चनिवृत्तिलक्षणं फलं परिसमाप्तमिति ॥

स्यपतिके तदानर्थक्यान्न शास्त्रात्तत्प्रतिपत्तिरित्य-
र्थः मा तर्हि तुरीयप्रतिपत्तिरभूदिति चेत्तत्राह शून्येति विशिष्टस्यैव प्रतिपत्त्या तुरीयस्याप्रतिपत्तौ प्रतिप-
त्तस्य विश्वादेर्विशिष्टस्य प्रत्युदस्तत्वादन्यस्य चाप्रतिपन्नत्वान्नैरात्म्यधीरेवापद्येतेत्यर्थः भेदपक्षस्तु यथोक्त-
दोषवशान्न संभवति तर्हि माभूदभेदपक्षोऽपि कथं निर्वहतीति चेत्तत्र किं फलपर्यन्तं युज्यते किं वा प्रमाणान्त-
रमथवा साधनान्तरमिति विकल्प्याद्यं दूषयति रज्जुरिवेति यथा रज्जुरधिष्ठानभूता सर्पधारादिभिर्विकल्प्यते तथाप्ये-
क एवात्मा स्थानत्रयेऽपि यदातः प्रज्ञत्वादिना विकल्प्यमानो वक्ष्यमाणमासते तदा तदनुवादेनातः प्रज्ञत्वादिप्रतिषेधजनि-
तेयत्प्रमाणरूपविज्ञानं तदव्यवहितसमानकालमेवात्मन्यनर्थनिवृत्तिरूपफलसिद्धमिति न फलपर्यन्तयोगावक- २१

ननु तुरीयमशेषविशेषशून्यं नात्मत्वेनावगंतुं शक्यते तत्त्वेनाभावादिति तत्राह नचेति सर्वोपनिषदामित्युक्तमे
वोदाहरणलेशेन दर्शयति तत्त्वमसीति निषेधमुखेनैव तुरीयस्य प्रतिपादने न विधिमुखेनेत्युपपाद्य हन्तानुवा
दपूर्वकमत्र ग्रंथमवतारयति सोयमित्यादिना बीजांकुरस्थानीयमिथो हेतुहेतुमद्भावेनावस्थितमित्यर्थः
स्वबीजात्मकं कार्यकारणविनिर्मुक्तमिति यावत्तत्र हेतुं सूचयति परमार्थेति तस्य विधिमुखेन निर्देशानुपप
निष्प्रपंचतामभिप्रेत्याह सर्पादीति किं मन्त्ररूपग्रन्थेन तुरीयं प्रतिपाद्यते किं वा तत्स्थानत्रयवैलक्षण्यविक्ष

नच तुरीयस्यात्मत्वानवगमे कारणमस्ति सर्वोपनिषदां तादात्म्येनोपलब्धत्वात् तत्त्वमसि अ
यमात्मा ब्रह्म तत्सत्यं स आत्मा यत्साक्षादपरोक्षाद्ब्रह्म सबाह्याभ्यंतरो ह्यजः आत्मैवेदं सर्व
मित्यादीनां सोयमात्मा परमार्थः परमार्थरूपश्च न ह्यपादिरुक्तः तस्यापरमार्थरूपमविद्याकृ
तं रज्जुसर्पादिसमं पादत्रयलक्षणं बीजांकुरस्थानीयमथेदानीमबीजात्मकं परमार्थस्वरू
पं रज्जुस्थानीयं सर्पादिस्थानीयोक्तस्थानत्रयनिराकरणेनाह नान्तःप्रज्ञमित्यादि नन्वात्मनश्चतु
ष्पात्त्वं प्रतिज्ञाय पादत्रयकथनेनैव चतुर्थस्यान्तःप्रज्ञादिभ्योन्यत्वे सिद्धे नान्तःप्रज्ञमित्यादिप्रति
षेधोनर्थकः न सर्पादिविकल्पप्रतिषेधेनैव रज्जुस्वरूपप्रतिपत्तिवदत्रापि अवस्थस्यैवात्मनस्तुरीयत्वे
न प्रतिपिपादयिषितत्वात् ॥

ते प्रथमे प्रतिपादकस्य विधानव्यतिरेकादस्य निषेधानर्थक्यं द्वितीये
पि तदानर्थक्यमापद्येत प्रज्ञानैर्वाक्यादस्य च सिद्धेरिति मन्वानः शंकते नन्विति ननु तुरीयं विधिमुखेन बोध्यं
तत्स्वरूपप्रकाशनात् सिद्धप्रकाशाद्युदयात् तथापि समारोपितविश्वादिरूपेण प्रतिपन्नं तन्निषेधेन बोध्यते तदनिषे
धे तस्य यथावदप्रथनात् तेन निषेधानर्थक्यमिति परिहरति न सर्पादीति तुरीयस्य पादत्रयविलक्षणस्वार्थादेवासि
द्धावपि जीवात्मनः स्थानत्रयविशिष्टस्य तुरीयब्रह्मस्वरूपमिति नोपदेशमन्तरेण सिध्यतीति तुरीयग्रंथो र्थवानि

किंच वाच्यते तुरीयस्यानिष्यमाने तत्र शब्दप्रवृत्तौ निमित्तं वक्तव्यं तच्च षष्ठी वा रूढिर्वा जातिर्वा क्रिया वा गुणो वेति वि
कल्पपंचकं प्रत्याह नहीति तुरीयातिरिक्तस्यावस्तुत्वात्तस्य तुरीयस्य च वस्तुभूतसंबंधाभिहितविषयाभावेऽतः षष्ठ्यर्थः
द्वितीयं दूषयति नापीति विशिष्टरूपेण विषयत्वे पि स्वरूपेणानिरूपाधिकात्मनात्तद्विषयत्वाज्ञात गवादाविव रूढि
रवत्तरतीत्यर्थः नच तृतीयः गवादाविवाः द्वितीये तुरीयसामान्यविशेषभावस्याभिधानमयोग्यत्वादिति सत्वाह गवा
दिवदिति नच तुरीयः पाचकादाविवा क्रियते तुरीयः क्रियावत्वस्य शब्दप्रवृत्तिनिमित्तस्य वक्तव्यस्य युक्तत्वादित्याह ना
पि क्रियावत्वमिति न पंचमः उत्पलादौ नीलादिशब्दवात्रिगुणो तुरीये गुणवत्वस्य शब्दप्रवृत्तिनिमित्तस्य वक्तुमशक्य

नहि सदमतोः संबंधः शब्दप्रवृत्तिनिमित्तभागवत्वात्तत्रापि प्रमाणान्तरविषयत्वेन स्वरूपेण गवा
दिवत् नापि क्रियावत्वं पाचकादिवत् नापि गुणवत्वं नीलादिवत् अतो नाभिधानेन निर्देशम
र्हति शशविषाणादिसमत्वान्निरर्थकत्वं तर्हि नात्मतावगमे तुरीयस्यानात्मत्वस्यावाच्यत्वान्निर्हेतु
त्वात् शुक्तिकावगमे रजतत्वस्यायाः नहि तुरीयस्यात्मत्वावगमे सत्यविषयात्तस्यादिदोषाणा
संभवोस्ति ॥

क्तत्वादित्याह नापीति तदेवं तुरीयस्यावाच्यत्वानुमानेन शब्दप्रवृत्तिनिमित्तान्यत्वाद्यर्थ वा पित्तमिति फलित
माह अतश्चेति यदि तुरीयस्यात्मनाक्ति विशिष्टज्ञानत्वादिमत्वं तर्हि नरतिषाणादिवद्रविवत् ह्येरपि निष्फ
लवत्वं विशिष्टज्ञानत्वादिवतो राज्यादेरुपासनस्य फलवत्त्वोपलंभादिति शंकते शशविषाणादीनि यथा शु
क्तिरियमित्यवगमे रजतादिविषयत्वस्याभ्यावर्त्यते तथा तुरीयं ब्रह्माहमित्यात्मत्वेन तुरीयस्यासत्वात्कामे
स्यानात्मविषयात्तस्याप्यवच्छिद्यते तदेवमात्मत्वेन तुरीयावगमस्य सत्वीकाराद्यनिवर्तकत्वादनर्थकत्वाशंकाभ्यु
क्तितिपरिहरति नेत्यादिना तुरीयस्यात्मत्वावगमे सति सर्वानर्थहेतुत्तस्यादोषनिवृत्तिलक्षणफलमुक्तं विद्वद्भव

यदुक्तं कालात्मस्फूर्तिं भूतानामिति तत्राह नहीति अधिष्ठानभूतरज्ज्वादीनां स्वभावस्फूर्तित्वात्तासां नादेवसर्पाद्याभास
त्वेन प्रमाणेन खापरस्य स्वमायाशक्तिवशादाकाशाद्याभासत्वमात्मनः आकाशः संभूत इति श्रुतेः ननु कालस्य भूतकारणत्वं प्रमा
णाभावादित्यर्थः पादत्रये व्याख्यातेऽव्याख्येयत्वेन क्रमवर्णस्यास्य चतुर्थपादं व्याख्यातमन्त्रग्रेण प्रवृत्तिरित्याह चतुर्थ
इति ननु पादत्रयवद्विधिमुखेनैव चतुर्थः पादोऽपि व्याख्यायतां किमिति निषेधमुखेन व्याख्यायते तत्राह सर्वेति सर्वाणि
याद्यप्रवृत्तिनिमित्तानि षष्ठी गुणक्रिया जातिः शून्यतान्तरीयस्य वाच्यतायोगान्निषेधद्वारेण तन्निर्देशः संभवतीत्यर्थः सा
क्षात्वाच्यताभावे यथा तथापि तन्निर्दिदिक्षितं तत्त्वं यदि चतुर्थो विधिमुखेन न निर्दिष्टः शक्यते तर्हि शून्यमेव तत्स्यादित्यत निषे
नहि रज्ज्वादीनामविद्यास्वभावव्यतिरेकेण सर्पाद्याभासत्वे कारणत्वं शक्यं वक्तुं चतुर्थः पादः क्रमप्राप्तो
वक्तव्य इत्याह नान्तःप्रज्ञमित्यादि सर्वशब्दप्रवृत्तिनिमित्तशून्यत्वात्तस्य शब्दानभिधेयत्वमिति विशेषप्रति
षेधेनैव च तुरीयं निर्दिदिक्षिति शून्यमेव तर्हि तत्र मिथ्याविकल्पनिमित्तत्वानुपपत्तेः नहि रजतसर्पपु
रुषमृगतृष्णिकादिविकल्पाः शुक्तिरज्जुस्थाणूषरादिव्यतिरेकेणावस्त्वास्पदाः शक्याः कल्पयितुं एवं त
र्हि प्राणादिसर्वविकल्पास्पदत्वात्तुरीयस्य शब्दवाच्यत्वमिति न प्रतिषेधैः प्रत्याय्यत्वमुदकाधारादेरिव
घटादेः न प्राणादिविकल्पस्यासत्त्वाच्छुक्तिकादिष्विव रजतादेः ॥ धेनैव निर्दिश्यमानत्वात्तथाविधेना
स्यार्थवदिति शंकते शून्यमेवेति नन्वतुरीयस्य शून्यत्वमनुमानेनयुक्तं विमतं सदधिष्ठानं कल्पितत्वात्तथाविधरजता
दिवदित्यनुमानात्तुरीयस्य सत्त्वसिद्धेरित्युत्तरमाह तत्रेति दृष्टान्तेसाधयति नहीति रजतादीनां सदनुविद्धबुद्धि
बोध्यत्वादवस्त्वास्पदत्वायोगात् तद्वदेव प्राणादिविकल्पानामपि नावस्त्वास्पदत्वं सिद्धमित्यर्थः यद्यधिष्ठानत्वं
तुरीयस्येष्टं तर्हि वाच्यत्वमधिष्ठानत्वात् घटादिवदिति प्रक्रमभंगः स्यादिति चोदयति एवं तर्हीति किं प्रातिभासिक
मधिष्ठानत्वं हेतूक्रियते किंवा तात्त्विकं नाद्यः तस्य तात्त्विकवाच्यत्वासाधकत्वात् न तात्त्विके तद्वाच्यत्वेऽप्रक्रमो न विरुद्धेन नहि
तीयः शुक्त्यादिषु कल्पितरजतादेरवस्तुत्ववत्तुरीयेऽपि कल्पितप्राणादेरवस्तुत्वात्तन्निमित्तयोगिकाधिष्ठानत्वस्य तात्त्विक

[illegible] ॥

मा॰ प्र॰ टी॰ १९

भगवतः सृष्टिविषयः ८॥

सृष्टिचिंतकानामेव सृष्टिविषये विकल्पांतरमुपन्यासयति इच्छामात्रमिति ज्योतिर्विदां कल्पनाप्रकारमाह ८
कालादीति परमेश्वरस्येच्छामात्रं सृष्टिरित्यत्र हेतुमाह मन्यते इति यथा लोके कुलालादेः संकल्पनामात्रेण घटादिक
येन सृष्टिरिष्टा नामरूपाभ्यामंतरेण कार्यं संकल्पवादिनस्तन्निर्माणाभ्युपगमात् तथा भगवतः सृष्टिः संकल्पनामा
त्रान्न तदतिरिक्ता काचिदस्तीति केषांचिदीश्वरवादिनां मतमित्यर्थः ८ यथा तथा वास्तु सृष्टिस्तस्याः किं प्रयो
जनमित्यत्र विकल्पद्वयमाह भोगार्थमिति सिद्धांतमाह देवस्येति कः स्वभावो नामेत्युक्ते नैसर्गिको यतो दामा
याशाद्यर्थस्तत्राह स्वयमिति पूर्वपक्षाणामपवादं सूचयति आप्तेति देवस्य परमेश्वरस्य स्वभावः सृष्टि
ति स्वभावपक्षे नैसर्गिकमायाविनाभिन्ना सृष्टिरिति मतं सिद्धांतत्वेनाश्रित्य चतुर्थपादेन दूषणमुच्यते पक्षयो

इच्छामात्रं प्रभोः सत्यसंकल्पनात् सृष्टिर्घटादिः संकल्पनामात्रं न संकल्पनातिरिक्तं कालदेः सृष्टिरिति केचि

इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः कालात्प्रसूतिं भूतानां मन्यंते कालचिंतकाः ८
भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे देवस्यैष स्वभावोयमाप्तकामस्य का स्पृहा ९

द् ८ भोगार्थं क्रीडार्थमिति चान्ये सृष्टिं मन्यंते अनयोः पक्षयोर्दूषणं देवस्यैष स्वभावोयमिति देव
स्य स्वभावपक्षमाश्रित्य सर्वेषां वा पक्षाणामाप्तकामस्य का स्पृहेति ९॥ एतयोरितियोज्यमीश्वरस्येच्छ
यैवाक्षेपेन सृष्टिरित्येकः पक्षः स्वप्नस्वरूपा मायायामरूपा वा सृष्टिरिति पक्षद्वयमीश्वरस्य सत्यसंकल्पस्य सृष्टिरिति पक्ष
त्रानरं कालादेव जगतः सृष्टिरीश्वरादीश्वरस्तूदासीनः तत्र विकल्पांतरं भोगार्थं क्रीडार्थं सृष्टिरिति फलगतविकल्पद्वयं
तेषां सर्वेषामेव पक्षाणां दूषणं चतुर्थपादेनोक्तमिति पक्षांतरमाह सर्वेषामिति नोवल्लाप्तकामस्य परमात्मनो माया
विनाविभूतिक्षेपन्नसुपयुज्यते न च स्वप्नमायाभासारूपमंतरेण स्वप्नमायासृष्टिर्दृष्टुं शक्यते वस्तुनो रेवतयोर्यस्तच्छ
द्वप्रयोगात् न च परमात्मनः स्वभावस्य परस्य विना मायामिच्छा संगच्छते नहि तस्य सत्ताविक्रियस्येच्छादिभाक्त्वं युक्तं न च

१९

चेतनाचेतनात्मकस्य जगतः सर्गे प्रस्तुते स्वमतविवेचनार्थं मतांतराण्युपन्यस्यति विभूतिप्रसवमिति ईश्वरस्य विभूति
विस्तारः स्वकीयैश्वर्यख्यापनं सृष्टिरिति यदि सृष्टेर्वस्तुत्वशंकायां पक्षांतरमाह स्वप्नेति कुतः सृष्टिचिंतकानामेतन्मतं
नन्वविरोधमेव किं न स्यात्तत्राह नेति सृष्टेरपि वस्तुत्वाद्धि सृष्टिचिंतकानामपि तत्रादरो भविष्यतीत्याशंक्याह इदं इति
मायामयी सृष्टिरादरविषया न भवतीत्यत्र दृष्टांतमाह नहीति मायाहीत्यादि शब्दे न तत्कार्यं गृह्यते दृष्टांतांतो विश्वम मा
र्थेदार्ष्टांतिके योजयति तथैवेति तर्हि परमार्थचिंतकानां कुत्रादर इत्याशंक्य सदृष्टांतमुत्तरमाह सूत्रेत्यादिना

विभूतिर्विस्तार ईश्वरस्य सृष्टिरिति सृष्टिचिंतका मन्यंते न तु परमार्थचिंतकानां सृष्टावादर इत्यर्थः इंद्रो मा
याभिः पुरुरूप ईयत इत्यादिश्रुतेः न हि मायाविनं सूत्रमाकाशे निक्षिप्य तेन सायुधमारुह्य चक्षुर्गोचरतामती
त्य युद्धेन खंडशः छिन्नं पतितं पुनरुत्थितं च पश्यतां तत्कृतमायादिसतत्त्वचिंतायामादरो भवति तथैवायं माया

विभूतिं प्रसवं त्वन्ये मन्यंते सृष्टिचिंतकाः स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ७॥

विनः सूत्रप्रसारणसमः सुषुप्तसमाधिविकासस्तदारूढमायाविसमश्च तत्स्थः प्राज्ञतैजसादिः सूत्रतदारूढा
भ्यामन्यः परमार्थो मायावी स एव भूमिष्ठो मायाछन्नो दृश्यमान एवास्थितो यथा तथा तुरीयाख्यपरमार्थतत्त्व
मनस्तच्चिंतायामेवादरो मुमुक्षूणामार्याणां न निष्प्रयोजनायां सृष्टावादर इत्यतः सृष्टिचिंतकानामेवैते वि
कल्पा इत्याह स्वप्नमायासरूपेति स्वप्नसरूपा मायासरूपा चेति ७॥

याछन्नत्वमदृश्यमानत्वे हेतुस्तुरीयाख्येना
त्मस्वरूपेभ्यो विश्वतैजसप्राज्ञेभ्यो व्यतिरिक्तं तदस्पष्टमिति शेषः परमार्थतत्त्वचिंतादिसम्यग्धीहारफलव
तीनस्वेष्टेस्ततः सृष्टावनादरस्तत्त्वनिष्ठानामित्याह नेति परमार्थचिंतकानां सृष्टावनादरादपरमार्थनिष्ठानामे
व सृष्टौ विशेषचिंतेत्यत्रैवार्थे द्वितीयार्धमवतारयति इच्छेति जाग्रज्ज्ञानानामर्थानामेव स्वप्नप्रथनात्स्वप्नसत्यत्वे मा
यायाश्च मणिदिलक्षणायाः सत्यत्वांगीकारादनयोर्विकल्पयोः सिद्धांताद्वैषम्यमुन्नेयम् ७॥

मा॰ भा॰ टी॰ प्र॰ १९

प्रपञ्चयति प्रवर्तयति ॥

कार्यकारणयोरुभयोरपि भवत्वसत्त्वमित्याशंक्याह दृष्टं चेति अविद्ययानाद्यनिर्वाच्यया कृताश्च ते मायाबीजात्मत्व
त्वस्य तेषामविद्यैव मायेत्यङ्गीकारात्तेषां रज्ज्वादेः कल्पितसर्पादीनामधिष्ठानभूतरज्ज्वादिरूपेण सत्त्वं दृष्टमिति योज
ना विमतं सदुपादानकल्पितत्वाद्रज्जुसर्पवदित्यर्थः दृष्टान्तस्य साध्यविकलत्वं शंकितं परिहरति नहीति विवदि
तं दृष्टान्तमनूद्य दार्ष्टान्तिकमाह यथेत्यादिना प्राणशब्दितं बीजमसत्तानुपलम्भलक्षणं न तदात्मनेति यावत् तदेवम
चेतनं सर्वं जगत्प्राग्जन्मनो बीजात्मनास्थितं प्राणबीजात्मा व्यवहारयोग्यतया जनयतीत्युपसंहरति इत्यत
इति चतुर्थपादप्रतीकमादाय व्याकरोति चेतोंशूनित्यादिना रवेरंशवो यथा वर्तन्ते तथा पुरुषस्यांशवश्चे

दृष्टं च रज्जुसर्पादीनामविद्याकृतमायाबीजोत्पन्नानां रज्ज्वाद्यात्मना सत्त्वम् नहि निरास्पदा रज्जुसर्प
मृगतृष्णिकादयः क्वचिदुपलभ्यन्ते केनचित् यथा रज्ज्वां प्राक्सर्पोत्पत्तेः रज्ज्वात्मना सर्पः सन्नेवासी
देवं सर्वभावानामुत्पत्तेः प्राक् प्राणबीजात्मनैव सत्त्वमित्यतः श्रुतिरपि वक्ति ब्रह्मैवेदमात्मैवेद
मग्र आसीदिति सर्वं जनयति प्राणः चेतोंशून् चैव पुरुषश्चिदात्मकस्य पुरुषस्य चेतोरूपा ज
लार्कसमाः प्राज्ञतैजसविश्वभेदेन देवतिर्यगादिदेहभेदेषु विभाव्यमानाश्चेतोंशवो ये तान्पुरु
षः पृथग्विषयभावविलक्षणान् अग्निविस्फुलिङ्गवत्सलक्षणान् जलार्कवच्च जीवलक्षणांस्त्वन्
यान्सर्वभावान्प्राणो बीजात्मा जनयति यथोर्णनाभिः यथाग्नेर्विस्फुलिङ्गा इत्यादिश्रुतेः ॥

तन्यात्मकस्य चेतोरूपाश्चैतन्याभासा जीवाश्चेतोंशवो निर्दिष्टास्ते तान्पुरुषो जनयतीत्यत्र संबंधः तेषां चि
दात्मकात्पुरुषान्नो भेदाभावं विवक्षित्वा विशिनष्टि जलार्केति भेदधीस्तु तेषामुपाधिभेदादित्याह प्राज्ञेति पृथ
गिति स च चित्पुरुषस्य जीवसृष्टेर्नेदं विकथयति विषयेति यथाग्निना समानरूपा विस्फुलिङ्गा जन्यन्ते तथा चिदात्म
ना समानस्वभावा जीवास्तेनोत्पाद्यन्ते विषयविलक्षणानां त्वप्राणेन बीजात्मना तेषां समानत्वेन चान्यापायानां जीवाना
मुत्पादकाश्चिदात्मनस्तत्त्वतो भिन्नत्वेन जलपात्रप्रतिबिम्बादित्यादीनां बिम्बभूतात्तत्त्वतो भेदाभावान्नात्वि

१९

किंचाज्ञानं तत्कार्यं च प्रतिशतादिष्टदृष्टान्तस्याः विशिष्टताद्दृष्टाभेदे च प्रमाणाभावाद् अज्ञानं तदेकत्वमित्याह द्र
ष्टावेति द्वितीयार्धं विभजते यो वेदेति कथमेतावता भोगप्रयुक्तदोषराहित्यं तत्राह भोज्यस्येति यद्यपि भोक्तैक
स्यैव सर्वं भोग्यमित्यवगतं तथापि कथं सर्वं भुञ्जानो भोगप्रयुक्तदोषवान्न भवतीत्याशङ्काह नहीति उक्तमर्थं दृष्टा
न्तेन स्पष्टयति नद्यग्निरिति स्वविषयान्काष्ठादीन्दग्ध्वा न हीयते वर्धते वाग्निरिति संबन्धः ५ एवं योनिरित्यत्र प्राप्तस
प्रपञ्चकारणत्वं प्रतिज्ञातं तत्र सत्कार्यमसत्कार्यं प्रति वा कारणमिति संदेहे निर्धारयितुमारभते प्रभव इति तत्रा
बीजं तदभेदमाह सर्वमिति पुरुषोऽपि सर्वमचेतनं जगदुपाधिभूतं तमः प्रधानं गृहीत्वा जनयति अत एव पुरुषका
रणवाचिप्राणपदं प्रयुज्यते एवं सच्चैतन्यप्रधानश्चेतनश्चेतनस्यांशुवदवस्थिता जीवा इति विश्वकल्पे जीवाना भा

दृष्टान्ताः विशेषाच्च प्रकीर्तितः यो वेद तदुभयं भोज्यभोक्तृतयाऽनेकधा भिन्नं स भुञ्जानो न लिप्यते भोज्य
स्य सर्वं स्यैकस्य भोक्तुर्भोज्यत्वात् न हि यस्य यो विषयः स तेन हीयते वर्धते वा नद्याग्निः स्वविषयं दग्ध्वा काष्ठा

प्रभवः सर्वभावानां सतामिति विनिश्चयः सर्वं जनयति प्राणश्चेतोंशून्पुरुषः पृथक् ६

दितरद ५ सतो विद्यमानानां स्वेनाविद्याकृतेन नामरूपमायाख्यरूपेण सर्वभावानां विषतेजस्प्राज्ञभेदानां प्रभ
वऽत्पत्तिः वक्ष्यति च वंध्यापुत्रो न तत्त्वेन मायया वापि जायत इति यदि ह्यसतामेव जन्म स्याद्ब्रह्मणोऽव्यवहार्य
स्य ग्रहणद्वाराभावादसत्त्वप्रसङ्गः॥

सम्भूतानुत्पादयति एवं चेतनाचेतनात्मकमशेषं जगदसंकीर्णं संपादय
तीत्यर्थः ननु सतो भावानां सत्त्वादेव प्रभवो न संभवति अतिप्रसङ्गादित्याशङ्क्य पूर्वार्धं व्याचष्टे सतामिति स्वेनावि
द्यात्मना विद्यमानानामेवाविद्याकृतेन मायामयमारोपितस्वरूपं तेन प्रभवः संभवतीत्यर्थः असज्जन्मनिरसन
मन्तरेण कथं सज्जन्म निर्धारयितुं शक्यमित्याशङ्क्याह वक्ष्यतीति जन्मनः एवं सर्वस्य सत्त्वं च कारणव्यापारसाध्य
त्वासिद्धेर्मिथ्यात्वे च कथं सतामेव प्रभवो भावानामित्याशङ्क्याह यदीति कार्यप्रपञ्चस्यासतैककारणस्य ब्रह्मणः कार्यस्याव्यवहार्य
त्वाभावात्तस्य ग्रहणद्वारभूतस्य लिङ्गस्याभावादसत्त्वमेव सिद्धेत् न कार्येण लिङ्गेन कारणं ब्रह्मारूढमपि सदित्यवगम्यते न चे

दसद्भवेत्तस्य कारणेन संबन्धीत्यसदेव कारणमपि स्यादित्यर्थः॥

श्रुतिस्सतोर्थं परिकल्पते यतो ब्रह्मणः सकाशाद्वाचः सर्वा मनसा सह अवकाशमप्राप्य निवर्तंते तद्ब्रह्मानंदरूपं वि
द्वान्न बिभेति नेति नेतीति वीप्सया सर्वमारोपितमपाक्रियते आदिशब्देन स्थूलादिवाक्यसंग्रहः तेन बीजनिरासेन शु
द्धब्रह्मस्वरूपं परिकल्पते चेद्बीजत्वं च कथं तस्य वेति सिध्यतीत्यर्थः आचार्येणोक्तं नास्त्रकारणानिरिक्तं शुद्धं ब्रह्मास्तीत्याश
ंकनात् अजमित्यादिवाक्यशेषान्मैवमित्याह तामिति उक्तन्यायेन वस्तुतस्तस्यामवस्थायामप्याकृतस्य देहः त्रिभवात्रिधा देहे
ष्ववस्थित इति कथमजमित्याशंक्याह बीजेति विश्वादीनां त्रयाणां त्रिधा देहेष्ववस्थितिप्रतिपादनेनात्मन एव त्रिधाभो
गनिगमयाति विश्वोहीति ३ भोगमुक्तं तृप्तिमपुनात्रिधाविभजते स्थूलमिति ४ उदाहृतश्लोकयोर्व्याख्यानायैता

तामवीजावस्थां तस्यैव प्राज्ञशब्दवाच्यस्य तुरीयत्वेन देहादिसंबंधरहिता पारमार्थिकी रूपं वस्तुतः
बीजावस्थापि न किंचिदवेदिषमित्युत्थितस्य प्रत्ययदर्शनाद्देहेनु भूयत एवेति त्रिधा देहेष्ववस्थि

विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् आनंदभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत ३
स्थूलं तर्पयते विश्वं प्रविविक्तं तु तैजसं आनंदश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ४ त्रिषु
धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः वेदैतदुभयं यस्तु स भुंजानो न लिप्यते ५॥

तदस्तु च्यते उक्तार्थौ श्लोकौ ३ ४ त्रिषु धामसु जाग्रदादिषु स्थूलप्रविविक्तानंदाख्यं भोज्यमेकं त्रि
धाभूतं यश्च विश्वतैजसप्राज्ञाख्यो भोक्तैकः सोहमित्येकत्वेन प्रतिसंधानात् ॥

निवारयति उक्तार्थाविति ४ प्रकृतभोक्तृभोग्यपदार्थद्वयपरिज्ञानस्यावांतरफलमाह त्रिष्विति एवार्थं
व्याचष्टे जाग्रदादिष्विति भोग्यत्वेनैकत्वेपि त्रैविध्यमवांतरभेदादुक्तं येयं भोक्तुरेकत्वे हेतुमाह सोहमिति योहं
स्वप्नः सोहं स्वप्नं प्राप्तः यश्च स्वप्नमद्राक्षं सोहमिदानीं जागर्मि इति एकत्वं प्रतिसंधीयते न च तत्र बाधकम
स्तितदुक्तं भोक्तुरेकत्वमित्यर्थः ॥

नतेषां तु नहत्यानेहेत्वभावादित्याशंक्य सुषुप्तानां प्रलीनानां च न तर्हि पुनरुत्थाने हेत्वभावस्तत्स्यत्वादित्याह बी
जाभावेति नन्वनाद्यनिर्वाच्यमज्ञानं संसारस्य बीजभूतं नास्त्येव यद्ब्रह्मणो विशेषग्रहणमयग्रहणं मिथ्याज्ञानं तत्संस्का
राणामज्ञानशब्दवाच्यत्वात्तत्राह ज्ञानेति अज्ञोहमित्यज्ञानमपरोक्षमग्रहणस्य च ग्रहणप्रागभावस्य नापरोक्ष
त्वमिंद्रियसन्निकर्षाभावादनुपलब्धिगम्यत्वाच्च श्रोतिसंस्कारयोश्चाभावे तत्कार्यत्वादुपादानापेक्षणादात्मनश्च
केवलस्यानहेतुत्वान्नउपादानत्वेनानाद्यज्ञानसिद्धेः किंच देवदत्तप्रमातृत्विष्टप्रमा प्रागभावातिरिक्तानादिप्र
ध्वंसिनी प्रमात्वाद्यज्ञदत्तप्रमावत् न च तदभावे सम्यग्ज्ञानार्थवत्त्वं वारणीकृत्वेन श्रोतेस्तदनिवर्त्यत्वात्संस्कारस्य
च सत्यपि सम्यग्ज्ञाने क्वचिदनुवृत्तिदर्शनान्न चाग्रहणस्य तन्निवर्त्यत्वं ज्ञानस्य तन्निवृत्तित्वादतो ज्ञानदा

बीजाभावविशेषात्ज्ञानदाह्यबीजाभावे च ज्ञानानर्थक्य
प्रसंगः तस्मात्स्वबीजात्सुषुप्तमेनैव सतः प्राणत्वव्यपदेशः सर्वश्रु
तिषु च कारणत्वव्यपदेशाच्च तत एवाक्षरात्परतः परः सबाह्याभ्यन्तरो
ह्यजः यतो वाचो निवर्तन्ते नेति नेतीत्यादिना बीजभावत्वापनयने
न व्यपदेशः ॥

इति संसारबीजभूतमनाद्यनिर्वाच्यमज्ञानं ज्ञानस्यार्थवत्त्वायास्थेयमन्यथा तदानर्थक्यप्रसंगादित्यर्थः सुषुप्तस्य ब्र
ह्मणो वाक्यप्रकरणाभ्यां विवक्षितत्वाभावे फलितमाह तस्मादिति ब्रह्मणः शबलस्यैव प्राकरणिकत्वाद्धाकोपित
स्मिन्प्राणशब्दाद्युक्तप्राणशब्दस्याव्याकृतविषयत्वमिति भावः यतोनाद्यनिर्वाच्याज्ञानशबलस्यैव कारणत्वं ब्रह्म
णो विवक्षितमत एव कारणनिषेधेन परिशुद्धब्रह्मश्रुतिषु पादिश्यते तदेतदाह अत एवेति अक्षरमव्याकृतं तच्च कार्योप
तया परं तस्मात्परो यः परमात्मा स हि कार्यकारणाभ्यामस्पृष्ट एव तेनेवाद्यकार्यं प्रपञ्चं कारणमिति तिनाभ्यासहतत
कल्पनाधिष्ठानत्वेन वर्तमानस्थितिदानस्य च समाचितानसत्तज्ञानमादिसमस्तविक्रियाशून्यत्वेन कूटस्थः ॥

ग्रंथगतादिशब्देन सर्वेश्वरत्वादिविशेषणं गृह्यते प्राणशब्दस्य पंचवृत्तौ वायुविकारे रूढत्वात् अव्याकृतविषयत्वं रूढिविरोधादिति शंकते कथमिति अन्यत्र रूढत्वेपि श्रौतप्रयोगवशात् अव्याकृतविषयत्वं प्राणशब्दस्य युक्तमित्यभिप्रेत्याह प्राणबंधनमिति प्रकरणस्य ब्रह्मविषयत्वात् ब्रह्मण्येव प्रकृते वाक्ये प्राणशब्दप्रयोगात् अव्याकृतविषयत्वे तस्य प्रकृतप्रकरणविरोधादिति शंकते नन्विति प्रकरणस्य ब्रह्मविषयत्वेपि ब्रह्मणः सकलकारणस्य शबलत्वाभ्युपगमादस्मिन्नपि वाक्ये तत्रैव प्राणशब्दप्रयोगात् युक्तं तस्याव्याकृतविषयत्वमित्यभिप्रेत्याह नैष दोष इति संग्रहवाक्यं प्रपंचयति यद्यपीति तत्रेति प्राणबंधनवाक्ये परामृश्यते जीवशब्दः सर्वस्यैव कार्यजातस्योपलक्षणं प्रकरणवाक्ययोर

कथं प्राणशब्दवाच्यत्वमव्याकृतस्य प्राणबंधनं हि सोम्य मन इति श्रुतेः ननु तत्र सदेव सोम्येति प्रकृतं सद्ब्रह्म प्राणशब्दवाच्यं नैष दोषः बीजात्मकत्वाभ्युपगमात् सतः यद्यपि सद्ब्रह्म प्राणशब्दवाच्यं तत्र तथापि जीवप्रसवबीजात्मकत्वमपरित्यज्यैव प्राणशब्दत्वं सतः सच्छब्दवाच्यता च यदि हि निर्बीजरूपं विवक्षितं ब्रह्माभविष्यत् नेति नेति यतो वाचो निवर्तन्ते अन्यदेव तद्विदितादथो अविदितादित्यवक्ष्यत न सत्तन्नासदुच्यते इति स्मृतेः निर्बीजतयैव चेत्सति लीनानां संपन्नानां सुषुप्तप्रलययोः पुनरुत्थानानुपपत्तिः स्यात् मुक्तानां च पुनरुत्पत्तिप्रसंगः ॥

यद्यपि परिशुद्धब्रह्मविषयत्वे का क्षतिरित्याशंक्य परिशुद्धस्य ब्रह्मणः शब्दप्रवृत्तिनिमित्तागोचरत्वात् तत्र शब्दावाच्यतानुपपन्ना नैवमित्याह यदि हीति न केवलं निरुपाधिकं निर्विशेषं ब्रह्म वाङ्मनसयोरगोचरमिति श्रुतेरेव निर्धार्यते किं तु स्मृतेरपीत्याह न सदिति किं च कार्यजातप्रतिबीजभूतात्मानवहिततया शुद्धत्वेनैवास्मिन्प्रकरणे ब्रह्म विवक्षितं चेत्तर्हि सता सोम्य तदा संपन्नो भवतीति जीवानां सत्संपत्तिश्रवणात् ब्रह्मणः सत्त्वहितस्य शुद्धत्वे सुषुप्त्यादौ तत्र लीनानामेकीभूतानां जीवानां पुनरुत्थानं नोपपद्यते दृश्यते च पुनरुत्थानं तेन शबलमेव ब्रह्मात्र विवक्षितमित्याह निर्बीजतयेति सुषुप्त्यादौ शुद्धे ब्रह्मणि संप

विशेषाभिमाननिरोधे प्राणस्याऽव्याकृतत्वं कुतः सिद्धमित्याशङ्क्याह यथेति परिच्छिन्नाऽभिमानिनो प्राणलयो मरणे तत्राभिमाननिरोधेनाविशेषापत्तिः
भिमाननिरोधे प्राणानामनुपाधिमव्याकृतो यथेष्यते तथैव प्राणाभिमानिनोऽपि तदभिमाननिरोधे प्राणस्याव्याकृतत्वं प्रसिद्धमित्यर्थः
सुषुप्तिस्तत्राव्याकृतता प्राणस्य प्रागुक्तदृष्टान्तेनाविशिष्टा ततो विशेषाभिमाननिरोधे प्राणस्याव्याकृतत्वं प्रसिद्धमिति श्रुतेः तथा
किं च यथाधिदैविकमव्याकृतं जगत्प्रसवबीजं तद्वदेतदप्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत इति श्रुतेः तथा विशेषाभिमानिनां
प्राणानामप्यनुपाधिमव्याकृतत्वं प्रसवबीजं तथा च कार्ये प्रतिप्रसवबीजरूपत्वमविशिष्टमुभयोरिति लक्षणेन विशे-
षादव्याकृतप्राणयोरेकत्वसंप्रतिपत्तिरित्याह प्रसवेति समानमित्यनुकर्षणार्थश्चकारः उपाधिस्वभावालोचनया

यथा प्राणलये परिच्छिन्नाभिमानिनां प्राणोऽव्याकृतः तथा प्राणाभि-
मानिनोऽप्यविशेषापन्नाव्याकृततासमाना प्रसवबीजात्मकत्वं च तदध्य-
क्षश्चैकोऽव्याकृतावस्थः परिच्छिन्नाभिमानिनामध्यक्षाणां चतेनैकत्वमि-
ति पूर्वोक्तविशेषणमेकीभूतः प्रज्ञानघन इत्याद्युपपन्नं नामित्युक्तहेतुवाच्य

सुषुप्ताव्याकृतयोरभेदमभिधाय उपहितस्वभावालोचनयापि तयोरभेदमाह तदध्यक्षश्चेति सुषुप्ताव्याकृता-
वस्थः सुषुप्तावस्थश्च तयोरुपहितस्वभावयोराध्यात्मिकाधिदैविकयोरेकोऽधिष्ठाता चिदात्मा तेनापि तयोरे-
कत्वसिद्धमित्यर्थः सुषुप्ताव्याकृतयोरेवमेकत्वं प्रसाध्य तस्मिन्नव्याकृते सुषुप्ते प्रागुक्तं विशेषणमुपयुक्तमित्याह
परिच्छिन्नेति यद्यपि विशेषानभिव्यक्तिमात्रेणैकीभूतत्वादीनि विशेषणमुपपादितं तथापि परिच्छिन्नाभि-
मानिनामुपाधिप्रधानानां तत्र तत्राध्यक्षाणां चोपहितानामव्याकृतेनैकत्वमतोऽपि प्रागुक्तविशेषणोपपत्तिरि-
त्यर्थः किं चाध्यात्माधिदैवयोरेकत्वमिति प्रागुक्तहेतुसद्भावाच्चोपयुक्तं सुषुप्ते प्राणे प्राणात्मन्यव्याकृते यथोक्तं विशेषण

किंच पुरुषस्य मनोमयत्वश्रवणात्तस्य विशेषणत्वाच्च हिरण्यगर्भस्य तत्प्रधानत्वात्तन्मात्रनिष्ठत्वेन सो हिरण्यगर्भो भवितुमर्हतीत्याह मनोमय इति प्राणस्य प्रागुक्तमव्याकृतत्वमाक्षिपति नन्विति सुषुप्ते हि प्राणो नामरूपाभ्यां व्याकृतो ऽस्ति श्वासव्यापारस्य पार्श्वस्थैरिति स्पष्टं दृष्टत्वादित्यर्थः किंच तस्यामवस्थायां वागादीनि करणानि प्राणात्मकानि भवंति तएतस्यैव सर्वे रूपमभवन्निति श्रुतेः अतो ऽपि प्राणस्याव्याकृतत्वमयुक्तमित्याह तदात्मकानीति अनेन न्यायेन प्राणस्याव्याकृतत्वायोगाद्व्याकृतेन प्राणेनात्मना सुषुप्तस्यावस्थाया मयुक्तमिति निगमयति कथमिति एकलक्षणत्वाद्व्याकृतप्राणयोरेकत्वोपपत्तेरित्युत्तरमाह नैष दोष इति अव्याकृतं हि देशकालवस्तुपरिच्छेदशून्यं प्राणो ऽपि सौषुप्तद्रष्टुस्तथा न

नन्वव्याकृतः प्राणः सुषुप्ते तदात्मकानि करणानि भवंति कथमव्याकृतता नैष दोषः अव्याकृतस्य देशकालविशेषाभावात् यद्यपि प्राणाभिमाने सति व्याकृतत्वमेव प्राणस्य तथापि पिंडपरिच्छिन्नविशेषाभिमाननिरोधः प्राणे भवतीत्यव्याकृत एव प्राणः सुषुप्ते परिच्छिन्नाभिमानवताम् ॥

हि सौषुप्तद्रष्ट्रा तत्कालीनस्य प्राणस्य देशादिपरिच्छेदो ऽवगम्यते तथा च लक्षणविशेषादव्याकृतप्राणयोरेकत्वमविरुद्धमित्यर्थः तस्याऽयं प्राणो ममायमिति देशपरिच्छेदप्रतिभानादेकलक्षणत्वाभावान्न प्राणस्याव्याकृतत्वमित्याशंक्याह यद्यपीति परिच्छिन्नाभिमानवतां मध्ये प्रत्येकं ममायमिति प्राणाभिमाने सति प्राणस्य यद्यपि व्याकृतत्वमेव भवति तथापि सुषुप्त्यवस्थायां पिंडेन परिच्छिन्नो यो विशेषस्तद्विषयो ऽयं ममेत्यभिमानस्तस्य निरोधस्तस्मिन्भवतीति प्राणो ऽव्याकृत एवेति योजना प्रतिबुद्धदृष्ट्या विशेषाभिमानविषयत्वेन व्याकृतत्वे ऽपि सुषुप्तदृष्ट्या तदुपसंहारादव्याकृतत्वं प्राणस्याविरुद्धमिति भावः ॥ राम ॥

जाग्रत्येव सुषुप्तिं दर्शयति आकाशेचे

स्यानन्दये दृष्टाभेदशंकां निरवकाशेति दर्शयितुमेवकारः तृतीयं पादं व्याकुर्वन् जाग्रत्येव सुषुप्तिं दर्शयति आकाशे चे प्राणो भूतानां लक्षणं लक्षितो भ
ति यो विषयस्तेन सम्बन्धमुपगतः स्वप्नः स्मरणात्मसम्बाहत्वोद्दद्यावच्छिन्नाकाशास्थितः सन् [illegible] तरत्वमतश्चैकीभूतो विषयविषय्या क
वति नहि तस्य रूपविषयदर्शनस्मरणे परिदृष्टविशिष्टाकाशनिविष्टस्य प्राप्तादर्शान्तरत्वमतश्च सप्रकीभूतो विषयाभावादिति हेतुमभ
रहितो यो व्यवनप्रज्ञो विशेषविज्ञानविरहितरूपान्तर रहितानतिष्ठतीत्यर्थः उक्तमर्थं प्रपंचयन्मनोव्यापाराभावादिति हेतुमा
क्याचष्टे दर्शनेत्यादिना अविशेषेणाव्याकृतरूपेणेत्यर्थः अवस्थानं जागरादि तेषु प्रमितिशेषः यदुक्तमव्याकृतेन प्रा
णात्मनाहृदयेऽवस्थानमिति तत्र प्रमाणमाह प्राणो हीति यो हि प्राणो ध्यात्मप्रसिद्धः स वागादीन्प्राणात्मनि संहृत्य संहरति
नीति प्राणस्याध्यात्मं वागादिसंहर्तृत्वमुक्तं अधिदैवं च यो वायुः सूत्रात्मा सोऽप्यग्न्यादीनात्मनि संहरतीत्यग्न्यादि संहर्तृत्वं

आकाशे च हृदि स्मरणात्मव्यापारोपरमे प्राप्त एकीभूतोऽव्यवनप्रज्ञ एव भवति मनो
व्यापाराभावात् दर्शनस्मरणे एव हि मनःस्पन्दिते तदभावे ह्येव विशेषेण प्राणात्म
नावस्थानं प्राणो ह्येवैतान्सर्वान्संवृङ्क्त इति श्रुतेः तैजसो हिरण्यगर्भो मनःस्थत्वात्
लिंगमनोमयायं पुरुष इत्यादि श्रुतिभ्यः ॥

वायोरुक्तं अध्यात्माधिदैवयोश्चैकत्वात्प्राणस्य वायोश्च वागादिष्वग्न्यादिषु संहर्तृत्वेनाव्याकृतस्य संवर्गविद्यायां
सूचितत्वाद व्याकृतेन प्राणात्मना सुषुप्ते प्राप्तस्याऽवस्थानमिति युक्तमेवोक्तमित्यर्थः एवमेव विश्वविराजोरेकात्म्या
नेन तैजससूत्रात्म्याकृतयोरेकत्वस्य दर्शितत्वात्तैजस हिरण्यगर्भयोरुक्तमभेदं वक्तुमिदानीमुपन्यस्यति तैजस इति
तत्र हेतुमाह मनःस्थत्वादिति हिरण्यगर्भस्य समष्टिमनोनिष्ठत्वं तैजसस्य व्यष्टिमनोगतत्वात्तयोश्च समष्टिव्यष्टिमनो
सोरेकत्वाभिप्रायेण [illegible]पि तैजसहिरण्यगर्भयोरेकत्वमाचितमित्यर्थः किंच हिरण्यगर्भस्य क्रियाशक्त्युपाधेर्लिंगात्मतया
प्रसिद्धत्वात्तस्य च सामानाधिकरण्यश्रुत्या मनसा महाभेदावगमात्मनो निष्ठस्य तैजसस्य युक्तो हिरण्यगर्भत्वमित्याह लिंगमिति

काल्पनिको जीवभेदो वास्तवो वेति विकल्प्य आद्यमंगीकृत्य द्वितीयं दूषयति नेत्यादिना एको हि परो देवः सर्वेषु भूतेषु
समं स्थितेन अस्थितेन च समाहृत्य तिष्ठतीति श्रवणाद् वस्तुतो भेदो नास्तीत्युक्तं हेतुं साधयति एक इति सर्वेषु क्षेत्रेषु व्य-
वस्थितं क्षेत्रज्ञं मामीश्वरं विद्धीति भगवतो वचनाद् वस्तुतो भेदासिद्धिरित्याह क्षेत्रज्ञं चेति सर्वेषु भूतेषु क्षेत्रज्ञ एव आत्मा
एकः कथं तर्हि प्रतिभूतं भेदप्रथेत्याशंक्याह अविभक्तं चेति तत्तत्तो विभागोऽपि देहकल्पनया भेदधीरित्यर्थः ननु
करणेषु सर्वेषु विशेषाभावाद् दक्षिणे चक्षुषि विशेषनिर्देशो युज्यते यद्यपि करणान्तरेभ्यस्तत्र प्राधान्यमुक्तं
तथापि नायाद् दक्षिणविशेषणमित्याह सर्वेष्विति आत्मानुभवाभ्यां निर्देशविशेषसिद्धिरित्यर्थः यद्यपि दे-

न वस्तुतो भेदानभ्युपगमात् एको देवः सर्वभूतेषु गूढ इति श्रुतेः क्षेत्रज्ञं चापि मां विद्धि सर्व-
क्षेत्रेषु भारत अविभक्तं च भूतेषु विभक्तमिव च स्थितम् इति स्मृतेः सर्वेषु करणेषु विशे-
षेऽपि दक्षिणाक्षिण्युपलब्धिपाटवदर्शनात् तत्र विशेषेण निर्देशोऽविरुद्धः दक्षिणादिगतो
रूपं दृष्ट्वा निमीलिताक्षस्तदेव स्मरन्नन्तः स्वप्नवदेव वा मनसा रूपाभिव्यक्तं पश्यति य-
थातत्र तत्स्थानत्वम् अतो मनस्यन्तस्तैजसोऽपि विश्व एव ॥

हृद्देशभेदे विश्वोऽनुभूयते तथापि कथं जागरिते तैजसोऽनुभूयते इत्याशंक्य द्वितीयं पादं व्याचष्टे दक्षिण इति
यथा स्वप्ने जागरितवासनारूपेणाभिव्यक्तमर्थजातं द्रष्टा अनुभवति तथैव जागरिते दक्षिणे चक्षुषि द्रष्टा वैश्वानरावस्थि-
तेऽसन्निकृष्टं रूपं दृष्ट्वा पुनर्निमीलिताक्षो दृष्टमेव रूपं रूपोपलब्धिजनितसंस्कारवासनात्मना मनस्यन्तरभिव्यक्तं स्मर-
न् विश्वस्तैजसो भवति तथा च तयोर्भेदाशंका नावतरतीत्यर्थः स्वप्नजागरितयोर्विलक्षणत्वाद् द्रष्टृविश्वतैजसयोरपि
वैलक्षण्यमुचितमित्याशंक्याह यथेति जागरितपदार्थजातं द्रष्टा पश्यति तथैव स्वप्नेऽपि तदुपलभते ततो नानयोर्वैलक्ष-

सिद्धिरित्यर्थः द्वितीयपादस्थानत्वाभावसंगतेति स्वप्नश्च
१५

विश्वतैजसप्राज्ञानां स्थानत्रयं क्रमेण संचरतामेकमेव वस्तुतो भवतीत्यत्र हेतुं तदेवं विवक्षन्नाह दक्षिणेति श्लोकस्यार्थः जाग्रदवस्थायामि
त्यर्थोऽभिशङ्क्याह जागरितेति न चैकस्यामवस्थायामेकस्मिन्नेव देहे भिन्नत्वमात्मनस्तद्धार्दादिभिरिष्यते देहाभिमानश्च जागरितेऽपि से
तित्वदेहे व्यवस्थितत्वोक्त्या विशेषणं न हि तत्र व्यवस्थितत्वं यदात्मनः सर्वगतस्य तदभिमानित्वं नास्तीति सिद्धमित्यर्थः मुखं द्वारस्य पलाद्धि
भवति तेन तस्यामेवावस्थायामेकस्मिन्नेव देहे त्रयाणामनुभवात्तेषां मिथो भेदो नास्तीति सिद्धमित्यर्थः आत्मप्राधान्यादित्याह आथासेने
स्थानं शारीरमानेहेशमानस्यैकस्य मिदमुपलब्धौ विशेषायतनमुपदिश्यते स्थानान्तरापेक्षया प्राधान्यादित्याह आथासेने
ति श्रूयते ध्याननिष्ठेति शेषः उक्तेऽर्थे श्रुतिं संवादयति इन्ध इति हृदयाकाशे कण्ठे हृदाद्धृदाद्धूतायास्ता न्यायोऽथि

जागरितावस्थायामेव विश्वादीनां त्रयाणामनुभवप्रदर्शनार्थोऽयं श्लोकः दक्षिणाक्षीति दक्षिणमक्ष्येव
मुखं तस्मिन्प्राधान्येन द्रष्टा स्थूलानां विश्वोऽनुभूयते इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुष इति श्रुतेः

दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः आका
शे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ॥

इन्धो दीप्तिगुणो वैश्वानर आदित्यान्तर्गतो वैराज आत्मा चक्षुषि च द्रष्टा एकः नन्वयोर्हिरण्यगर्भः देवे
न्द्रो दक्षिणः क्षिण्यन्तो नियन्ता द्रष्टा चान्यो देहस्वामी ॥

माह इन्ध इत्यादिना वैराजस्यात्मनाय यो
क्तः एव वेति पि द्रष्टुश्चात्तत्वस्य किमायातमित्याशंक्याह चक्षुषि चेति अध्यात्माधिदैवतयोरेकत्वाद्याधिदैविके
गुणश्चावश्यमाध्यात्मिके संभवतीत्यर्थः उक्तमेकत्वमाक्षिपति नन्विति हिरण्यगर्भः सत्यप्रपंचाभिमानी सूर्यमं
डलान्तर्गतः सत्यमनिष्टदेहो लिङ्गात्मा चक्षुर्गोलकानुगतेन्द्रियानुग्राहकः संसारिणोऽन्तर्विराडात्मापि स्थूलप्रपंचाभिमानीसू
र्यमण्डलात्मकः समष्टिदेहः चक्षुर्गोलकद्वयानुग्राहकः तयोर्यान्तरमेवेत्यत्र ज्ञस्तव्यष्टिदेहो दक्षिणे च चक्षुषि व्यवस्थितः द्रष्टा च
तेषां करणानां नियन्ता कार्यकरणस्वामी ताभ्यां समष्टिदेहाभ्यामन्योऽभ्युपगम्यते तदेवं समष्टिव्यष्टितेन व्यवस्थितजीव
भेदाद्युक्तमेकत्वमप्युक्तमित्यर्थः ॥

मां॰ भा॰
प्र॰ टी॰
१३

आचार्यैर्माण्डूक्योपनिषदं पठित्वा तद्व्याख्यानश्लोका वक्तव्या इत्यादिना कृतं तदेतदनूद्य भाष्यकारो व्याकरोति एत स्मिन्निति विश्वस्य विराजः प्रागुक्ताधिदैविकाभेदाद्वैधर्म्यमध्यात्माधिदैवाभेदं सर्वैदार्ढ्यनोक्तमित्यनुचयितुं दिशाह स्थूलस त्मकारणोपाधिभेदाज्जीवभेदमाशंक्य स्वरूपैक्योपि स्वतन्त्रोपाधिभेदमन्तरेण विशेषणमात्रभेदाद्वान्तरभेदोक्तिरित्या ह एक एवेति पदार्थानां सर्वमेवोक्तनानात्वं यश्लोकस्य वक्तव्यमवशिष्यते तदाह पर्यायेणेति यद्यात्मनस्त्रैतव्यमिव स्वाभाविकं स्थानत्रयेन तर्हि तेन द्वैतं व्यभिचरितमर्हति व्यभिचरति चात्मा न स्थानत्रयं क्रमाक्रमाभ्यां तस्य त्रिस्थानता दतस्तद्व्यतिरिक्तत्वमात्मनः सिद्धम् यः सुप्तः सोहं जागर्मि इत्यनुसंधानादेकत्वेनस्यावगतमेकत्वेन हि स्मरत्याद्य

अत्रैतस्मिन्यथोक्तेर्थे एते श्लोका भवन्ति बहिःप्रज्ञ इति पर्यायेण त्रिस्थानत्वात् सोहमिति स्मृत्यप्रति संधा

अत्रैते श्लोका भवन्ति बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥

नात्मस्थानत्रयव्यतिरिक्तत्वमेकत्वं शुद्धत्वमसंगत्वं चासिद्धमित्यभिप्रायः महामत्स्यादिदृष्टान्तश्रुतेः ॥

दार्ढ्यार्थमेकत्वमिष्यते धर्माधर्मरागद्वेषादिमलस्पर्शवस्थाधर्मतात्तदतिरेके शुद्धत्वमपि सिध्यति संगास्पर्शविषयत्वेनाव स्थाधर्मतांगीकारात्तदतिरेकिणस्तद्द्रष्टुरसंगतत्वमपि संगतमेवेत्यर्थः युक्तिसिद्धेर्थे श्रुतिमुदाहरति महामत्स्यादीति महान्नादेयेन स्रोतसा अप्रकम्प्यगतिरतिबलीयान् तिमिरुभे कूले नद्याः संचरन् क्रमसंचरणेनाभ्यामतिरिच्यते न च तस्य कूलद्वयगतदोषगुणवत्त्वेन चास्य क्वचिदपि सज्जते न च स्रोतो वा अपराणि वा न भूमिं परि यतत्वं क्वचिदपि प्रतिहन्य ते तथैवायमात्मा क्रमेण स्थानत्रये संचरन् न तत्कूलद्वयगुणाङ्गीकर्त्तेत्यर्थः ॥ ॥ १३

प्राज्ञस्याधिदैवके ऽन्तर्यामिणा ममताभेदं दर्शितं तदृशीनां विशेषणान्तरं दर्शयति एष हीति स्वरूपावस्थानस्यापि प्राधान्यमवधृत्य चैतन्य प्राज्ञस्याधिदैवकेनांतर्यामिणा समताभेदं तत्तद्धीनां विशेषणान्तरं दर्शयति एष हीति स्वरूपावस्थानस्यापि प्राधान्यमवधृत्य चैतन्य
प्राधान्यमन्यथा स्यात् प्राज्ञपपत्तेः नैयायिकादयस्तु ताटस्थ्यमीश्वरस्यावतिष्ठन्ते तदयुक्तं परमेश्वरस्यामेजस्यादिति न्यायविरोधादिति
ह नैतस्मादिति श्रुतिविरोधादपि न तस्य ताटस्थ्यमोस्थेयमित्याह प्राज्ञेति प्रकृतमज्ञातं परं ब्रह्म सदा ऽविप्राणेणाहितं तद्वंधन
वध्यते ऽस्मिन्पर्यवस्यतीति सुप्तत्वेनैहिजीवस्य परमात्मातिरेकेण पर्यवसानमस्तिमनस्तदुपहितं जीवचैतन्यम न प्राणेणाहस्या
धान्मिकार्थस्य परास्मिन्न्यायोगात्मनः शाहितस्य च जीवस्य तस्मिन्पर्यवसानाभिधानाद्धस्तु तो भेदो नास्तीति द्योतितमित्यर्थः प्राज्ञ
स्य विशेषणान्तरं साधयति अयमेवेति नन्ववधारणं नोपपद्यते व्यासपराशरप्रभृतीनामन्येषामपि सर्वज्ञत्वप्रसिद्धेरित्याशंक्य

एष हि स्वरूपावस्थः साधिदैविकस्य भेदजातस्य सर्वस्येशिता नैतस्माज्जात्यंतरभूतोऽन्येषामिव प्राणबंधनं हि सो
म्य मन इति श्रुतेः अयमेव हि सर्वस्य सर्वभेदावस्थाज्ञातेत्येष सर्वज्ञः एषोऽन्तर्यामी अन्तरनुप्रविश्य सर्वेषां भूतानां

एष सर्वेश्वरः एष सर्वज्ञ एषोऽन्तर्याम्येष यो
निः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥

नियंतायमेष एव अन्त एव यथोक्तं सभेदं जगतः त्वय्यतः त्वेष योनिः सर्वस्य यत एवं प्रभवश्चाप्ययश्च प्रभवाप्य
यौ हि भूतानामेष एव ॥

विशिनष्टि सर्वेति अन्तर्यामित्वं विशेषणान्तरं विशदयति अन्तरिति अन्यस्य कस्यचिदन्तरनुप्रवेशे नियमने च सामर्थ्या
भावादवधारणं युक्तं विशेषणत्रये ऽपि तत्कृतप्रकृतस्य प्राज्ञस्य सर्वजगत्कारणत्वं विशेषणान्तरमाह अन्त एवेति यथोक्त
स्य जागरितस्थानद्वयप्रविभक्तमित्यर्थः सभेदमध्यात्माधिदैवाधिभूतभेदसहितमिति यावत् निमित्तकारणत्वनियमे
ऽपि प्राचीनानि विशेषणानि निर्वहन्तीत्याशंक्य प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति न्यायात्रिमित्तोपादानयोर्जगतिन
भिन्नत्वमित्येवं नियमतः सिद्धमतो विशेषणान्तरमित्याह यत इति प्रभवत्यस्मादिति प्रभवः अप्येत्यस्मिन्नित्यप्ययः न च तो भूता

मा॰ भा॰
टी॰ प्र॰
१२

आनंदभुगिति विशेषणे दृष्टांतं व्याचष्टे यथेति तथा सुषुप्तोपीति शेषः दार्ष्टांतिकं विवृणोति अत्यंतेति इयं स्थितिरि
ति सुषुप्तिरुक्ता अनेनेति प्राज्ञोक्तिः सोपि सुषुप्तस्य तस्यामवस्थायां स्वरूपभूतानातिशयानंदाभिव्यक्तिरस्तीत्यत्र प्रमा
णमाह एषोस्येति प्राज्ञस्यैव चेतोमुखत्वं इति विशेषणं तदंतद्व्याचष्टे स्वप्नादीति स्वप्नजागरितं चेति प्रतिबोधशब्दितं
चेतस्तस्याभिद्वारभूतत्वं द्वारभावेनावस्थितत्वं न हि स्वप्नस्य जागरितस्य वा सुषुप्तिद्वारमंतरेण संभवोस्ति तयोस्तत्कार्य
त्वादतः सुषुप्ताभिमानी प्राज्ञः स्यात्तद्वयकारणत्वाच्चेतोमुखत्वमपदेशभागित्यर्थः अथवा प्राज्ञस्य सुषुप्ताभिमानि
नः स्वप्नजागरितं वा प्रतिक्रमाक्रमाभ्यां यदागमनं तस्मान्नि चैतन्यमेव द्वारं न हि तद्व्यतिरेकेण कापि चेष्टा सिध्यतीत्य

यथा लोके निरायासः स्थितः सुख्यानंदभुगुच्यते अत्यंतानायासरूपा हीयं स्थितिरनेनानुभूयत इत्यानंद
भुक् एषोस्य परम आनंद इति श्रुतेः स्वप्नादिप्रतिबोधचेतः प्रतिद्वारीभूतत्वाच्चेतोमुखः बोधलक्षणं वा चेतो द्वारं मुख

चेतोमुखः प्राज्ञस्तृतीयः पादः ॥

मस्य स्वप्नाद्यागमनं प्रतीति चेतोमुखः भूतभविष्यज्ज्ञातृत्वं सर्वविषयज्ञातृत्वमस्यैवेति प्राज्ञः सुषुप्तोपि हि भूतपूर्व
गत्या प्राज्ञ उच्यते अथवा प्रज्ञप्तिमात्रमस्यैवासाधारणं रूपमिति प्राज्ञः इतरयोर्विशिष्टमपि विज्ञानमस्तीति सोयं प्राज्ञ
स्तृतीयः पादः ॥

भिप्रेत्य पक्षांतरमाह बोधेत्यादिना भूते भविष्यति च विषये ज्ञातृत्वं तथा सर्व
स्मिन्नपि वर्तमाने विषये ज्ञातृत्वमस्यैवेति प्रकर्षेण जानातीति प्रज्ञः प्रज्ञ एव प्राज्ञः तदेव प्राज्ञपदं व्युत्पादयति भू
तेति सुषुप्तस्य समस्तविशेषविज्ञानोपरमात्कुतो ज्ञातृत्वमित्याशंक्याह सुषुप्तोपीति यद्यपि सुषुप्तस्तस्यामवस्थायां
समस्तविशेषविज्ञानविरहो भवति तथापि भूतनिष्पत्त्या जागरिते स्वप्ने च सर्वविषयज्ञातृत्वलक्षणगतिस्तया प्र
कर्षेण सर्वं सामस्त्येन जानातीति प्राज्ञशब्दवाच्यो भवतीत्यर्थः तर्हि प्राज्ञशब्दस्य मुख्यार्थत्वेनासिध्यतीत्याशंक्याह अथ
वेति असाधारणमिति विशेषणद्योतितमर्थं स्फुटयति इतरयोरिति आध्यात्मिकस्य तृतीयपादस्य व्याख्यामुपसंहर

इति विज्ञानमिति ॥

१२

पवेत्यस्यापेक्षितार्थं कथयति तदेतदिति अन्यथाग्रहणस्यान्यत्वं कामसंस्पर्शरहितत्वं च विशेषणाभ्यां विवक्षितं कथमस्य सहिती
यस्यैकीभूतत्वविशेषणमित्याशंक्याह स्थानद्वयेति जागरितस्वप्नेति स्थानद्वयं तेन प्रविविक्तं यद्द्वैतं स्थूलसूक्ष्मं च तत्सर्वं मनःस्पंदि
तमात्रमिति वस्तुते न तद्वद्यथा स्वकार्यरूपमात्मनो विभक्तं तथैव तस्य त्यागेनाव्याकृतात्मकारणमापन्नं स्वकीयसर्वविलासस
हितं कारणात्मकं भवति यथाह नैशेन तमसा ग्रस्तं तमसि नैव व्यवह्रियते तथेदमपि कार्यजातं कारणभावमापन्नं कारणमितिव्य
वह्रियते तस्योपावस्थायां तदुपाधितस्यैकीभूतविशेषभाग्भवतीत्यर्थः तथापि कारणोपहितस्य प्रज्ञानत्वेन विशेषण
मयुक्तं निरुपाधिकस्यैव तथाविशेषणसंभवादित्याशंक्याह अत एवेति सर्वस्य कार्यप्रपंचस्य समनस्कस्य सुषुप्ते कारणे

तदेतत्सुषुप्तं स्थानमस्येति सुषुप्तस्थानः स्थानद्वयप्रविभक्तं मनःस्पंदितं द्वैतं तज्जाते तथा स्वरूपापरित्यागेनाविवे
कापन्नं नैशं तमोग्रस्तमिवाह सप्रपंचमेकीभूतमित्युच्यते अत एव स्वप्नजाग्रन्मनःस्पंदनानि प्रज्ञानानि घनीभूतानी

तत्सुषुप्ते सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवाऽनन्दमयो ह्याऽनंदभुक्

वसेयमवस्थाऽविवेकरूपत्वात्प्रज्ञानघन उच्यते यथा रात्रौ नैशेन तमसाऽविभज्यमानं सर्वं घनमिव तद्वत्प्रज्ञानघन एव
एवशब्दाज्जात्यंतरं प्रज्ञानव्यतिरेकेणास्तीत्यर्थः मनसो विषयविषय्याकारस्पंदनायासदुःखाभावादानंदमय आनंदप्रा
यो नानंद एव अनात्मकत्वात् ॥

त्मनावस्थितत्वादेवेत्यर्थः सुषुप्तावस्थायामुक्तप्रज्ञानानामेकमूर्तित्वेन वास्वेष्वनर्थया
पूर्ववद्विभागयोग्यत्वादिति मत्तोक्तमिवेति सुषुप्तावस्थायाः कारणात्मकत्वाज्जाग्रत्स्वप्नप्रज्ञानानां तत्रैकीभावात्प्रज्ञानघनशब्दः
वाच्यते सूक्तमनुवदति सेयमिति उक्तमेवार्थं दृष्टांतेन बुद्धावाविर्भावयति यथेत्यादिना एवकारस्यान्ययोगव्यवच्छित्तिरर्थः किं
नन्ययोगव्यवच्छित्तिरित्याह एवशब्दादिति प्रज्ञानानंदविकारत्वाभावे कथमानंदमयत्वविशेषणमित्याशंक्य तद्रूपस्याभि
व्यक्तिप्रतिबंधकदुःखाभावात्प्राचुर्यार्थे मयटो वृत्तौ तां विशेषणोपपत्तिं दर्शयति मनस इति मयटः स्वरूपार्थत्वादानंदम
यत्वमानंदत्वमेव किं न स्यादित्याशंक्याह नेत्यादिना नहि सुषुप्ते निरुपाधिकानंदत्वे प्राज्ञस्याभ्युपगतिशंक्या तस्य कारणो
पहितत्वादन्यथामुक्तत्वात्पुनरुत्थानायोगात् तस्मादानंदप्राचुर्यमेवास्य स्वीकर्तव्यमित्यर्थः ॥

मां॰ भा॰
प्र॰ टी॰
११

ननु विश्वतैजसयोरविशिष्टं प्रविविक्तभुगिति विशेषणं प्रज्ञायाः भोज्यत्वस्य तुल्यत्वान्नैवं तस्याः भोज्यत्वाविशेषेऽपि तस्यामवान्तरभेदात्स्व विषयत्वाद्विश्वस्य भोज्यायाः प्रज्ञायाः स्थूलालक्ष्यते तेन तैजसप्रज्ञा विषयसंस्पर्शशून्या वासनामात्ररूपेति विविक्तो भोगः सिध्यतीत्याह विषयेति सप्तांगएकोनविंशतिमात्रत्वमित्येतदन्यादिसूच्यते पादद्वयमेवं व्याख्याय तृतीयं पादं व्याख्यास्यन् व्याख्यायमानश्रुतेरनेकचनेत्यादिविशेषणस्य तात्पर्यमाह दर्शनेति दर्शनस्य स्थूलविषयस्य वृत्तिविशेषस्येति जागरितं दर्शनं व्यक्तिरुच्यते स्थूलविषयादर्शनादन्यदर्शनमदर्शनं वासनामात्रेण स्वप्नवृत्तिरस्त्रीत्यदर्शनवृत्तिः स्वप्नस्तयोः सुषुप्तवदेव स्वापस्य तत्त्वाग्रहणस्य तुल्यत्वाद्यत्र सुप्त इत्युक्ते

विश्वस्य विषयत्वेन प्रज्ञायाः स्थूलाया भोज्यत्वं इह पुनः केवला वासनामात्रा प्रज्ञा भोज्येति प्रविविक्तो भोग इति समानमन्यत् द्वितीयः पादस्तैजसः दर्शनादर्शनवृत्त्योः स्वापस्य तुल्यत्वात्सुषुप्तिग्रहणार्थं यत्र सुप्त इत्यादि विशेष

प्रविविक्तभुक्तैजसो द्वितीयः पादः यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति

णं स्वप्नवाप्यपि स्थानेषु तत्त्वाप्रतिबोधलक्षणः स्वापोऽविशिष्ट इति पूर्वाभ्यां सुषुप्तं विभज्यते यत्र यस्मिन्स्थाने काले वा सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति न हि सुषुप्ते पूर्वयोरिवान्यथाग्रहणलक्षणं स्वप्नदर्शनं कामो वा कश्चन विद्यते ॥

तयोरपि प्रसक्तौ तद्व्यवच्छेदेन सुषुप्तस्यैव ग्रहणार्थं यत्र सुप्त इत्यादिवाक्ये न कंचनेत्यादिविशेषणं तद्विस्थानद्वयं व्यवच्छिद्य सुषुप्तमेव ग्राहयतीत्यर्थः न कंचन स्वप्नं पश्यतीत्यनेनैव विशेषणेन स्थानद्वयव्यवच्छेदसंभवाद्विशेषणान्तरमकिंचित्करमित्याह स्वप्नवेति तत्त्वाप्रतिबोधः स्वापस्तस्य स्थानत्रयेऽपि तुल्यत्वान्नाग्रत्स्वप्नाभ्यां विभज्य सुषुप्तं ज्ञापयितुं विशेषणमित्यर्थः एकस्यैव विशेषणस्य व्यवच्छेदकत्वसंभवादलं विशेषणाभ्यामित्यस्य कः समाधिरित्याशंक्य विशेषणयोर्विकल्पेन व्यवच्छेदकत्वान्नानर्थक्यमिति मत्वाह नहीति ॥ रामाय नमः ॥

यदुक्तं स्वप्नस्य जागरितजनितवासनाजन्यत्वं तत्र बृहदारण्यकश्रुतिं प्रमाणयति तथा चेति अस्य लोकस्येति जाग्र
तो लोकस्य सर्वावतो मात्रामपादायेति तस्य मात्रा ले
शेनोक्तिः तस्य विशेषणं सर्वावत इति सर्वसाधनसंपत्तिर्यस्मिन्नस्तीति सर्ववान् सर्ववानेव सर्वावान् तस्य मात्रा लेशः तेन मनः
शेषवासनातामपादाय अवच्छिद्य गृहीत्वा स्वपितिवासनाप्रधाने स्वप्नमनुभवतीत्यर्थः यत्र स्वप्नरूपेण परिणतं मनः
स्तालेरेण विषयो भवतीति तत्र श्रुत्यन्तरं दर्शयति तथेति परन्तु मनस्तदुपाधित्वात् सा यथा सर्वकरणत्वाद्देव
स्तालेरेण विषयो भवतीति तत्र श्रुत्यन्तरं दर्शयति तथेति परन्तु मनसस्तदुपाधित्वाद्वासाथागृहीतकरणत्वाद्देव
स्वप्नदृष्टानन्तर्धानो भवतीति स्वप्नप्रकृत्यात्र
नैयानतानात्मकत्वान्नना नैज्योतिरितिज्योतिः शास्त्रात्मनि एकीभवति स्वप्नदृष्टानन्तर्धानो भवतीति तथा च मनसो विषयत्वा
त्स्वप्नस्वप्रकाशोद्रष्टा महिमानमनसो विभूतिं जानन्नेव परिणामलक्षणमाला करोतीति तथा च मनसो विषयत्वा
न्नतत्रात्मग्राहकत्वेनाकेत्यर्थः ननु विषयस्य बाह्येन्द्रियजन्यप्रज्ञया तेजसस्य मनोजन्यप्रज्ञायाश्चान्तस्थत्वाद्वि

तथा चोक्तमस्य लोकस्य सर्वावतो मात्रामपादायेति तथा परे देवे मनस्येकीभवतीति प्रस्तुतत्वात्रैव
देवः स्वप्ने महिमानमनुभवतीत्याथर्वणे इन्द्रियापेक्षायां तस्य वाऽन्तः मनसस्तद्वासनारूपा च स्वप्नप्र

अन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः

तैजसस्य तु प्रज्ञस्तैजसो विषयशून्यायां प्रज्ञायां केवलप्रकाशस्वरूपायां विषयित्वेन भवतीति तैजसः॥

शेषादन्तःप्रज्ञत्वविशेषणेन व्यावर्तकमिति तत्राह इन्द्रियेति उपपादितं तावद्विश्वस्य बहिःप्रज्ञत्वं तैजसस्य
त्वन्तःप्रज्ञो विज्ञायते बाह्यानीन्द्रियाण्यपेक्ष्य मनसोऽन्तःस्थत्वात्तत्परिणाममनसा च स्वप्नप्रज्ञा यास्तद्वान् तेन अन्तः
उच्यते किं च मनःस्वभावभूतया जागरितवासनातद्रूपा स्वप्नप्रज्ञेति युक्तं तैजसस्यान्तःप्रज्ञत्वमित्यर्थः स्वप्ना
भिमानिनस्तैजसो विकारित्वाभावान्न कृतस्तैजसत्वमित्याशङ्क्याह विषयेति स्थूलो विषयो यस्या वासनामय्याः
प्रज्ञायाः न ज्ञायते तस्या विषयसंस्पर्शमन्तरेण प्रकाशमात्रतया स्थितायामाश्रयत्वेन भवतीति स्वप्नद्रष्टा तैजसो वि

द्वितीयंपादमवतार्यव्याचष्टे स्वप्नइत्यादिना स्थानेएर्ववत् द्रष्टृर्ममाभिमानस्यविषयभूतमितियावत् स्वप्नपदार्थं निरूपयितुंतत्कारणंनिरूपयति जाग्रदित्यादिना तस्याःस्वप्नाद्वैधर्म्यार्थंविशेषणमाह अनेकेति अनेकानिविविधानिकरणानिसाधनानियस्याः सातथेति यावत् वियद्वारकमपिवैधर्म्यंदर्शयति बहिरिति बाह्यस्पर्शाद्वेविषयस्याविद्याविवर्तत्वेनवस्तुतोऽभावात्तद्विषयत्वमपियथोक्तप्रज्ञायाःवास्तवं किंतुप्रातीतिकमित्यभिप्रेत्योक्तंमिवेति नचयथोक्ताप्रज्ञाप्रमाणसिद्धा तस्याअनवस्थानात्तेनसादिवैद्यासेति विवक्षितत्वाह अवभासमानेति द्वैततत्प्रतिभासयोर्वस्तुतोऽसत्वेहेतुंसूचयति मनःस्पंदनेति यथोक्ताप्रज्ञावास्तुत्रूपावामनोऽस्वसमानाका

स्वप्नःस्थानमस्यतैजसस्यस्वप्नस्थानोजाग्रत्प्रज्ञानेक
साधनाबहिर्विषयेवावभासमानामनःस्पंदनमात्रासतीत

स्वप्नस्थानो

थाभूतंसंस्कारंमनस्याधत्ते तन्मनःतथासंस्कृतंचित्रितइवप
टोवाह्यसाधनानपेक्षमविद्याकामकर्मभिःप्रेर्यमाणंजाग्रद्वदवभासते

रासत्यादयतीत्याह तथाभूतमिति जाग्रद्वासनावासितंमनोजागरितवदवभासते स्वप्नदृष्टिरित्येतद्व्योमनस्यएववासनावतःस्वप्नेपिविषयत्वादतिरिक्तविषयाभावादित्याह तथासंस्कृतमिति जाग्रद्वासनावासितंमनोजाग्रदितिवद्भातीत्यत्रदृष्टांतमाह चित्रितेति यथापटश्चित्रितश्चित्रवद्भाति तथामनोजागरितसंस्कृतं तद्वद्भातीतियुक्तमित्यर्थः स्वप्नस्यजागरितात्द्वैधर्म्यंसूचयति बाह्येति यथोक्तमनसोजागरितवदनेकधाप्रतिभानेकारणंतरमाह अविद्येति ॥ रामायनमः ॥

ननु वैराजो विश्वेनैकत्वमेव मूलग्रन्थे दृश्यते तत्कथमविशेषेणाध्यात्माधिदैवयोरेकत्वं विवक्षिताद्वैतपर्यवसाने भाष्यकृतोच्यते तत्राह विराजेति यस्माद्वैराजो विराजो विश्वेनैकत्वं प्रदर्शितं तत्र हिरण्यगर्भस्य तैजसेनान्तर्यामिणश्चाव्याकृतोपहितस्य प्राज्ञेन सहैकत्वस्योपलक्षणार्थमतो मूलग्रन्थेऽप्यविशेषेणाध्यात्माधिदैवयोरेकत्वं विवक्षितमित्यद्वैतपर्यवसानसिद्धिरित्यर्थः अध्यात्माधिदैवयोर्यदेकत्वमिहोच्यते तन्मधुब्राह्मणेऽपि दर्शितमित्याह उक्तं चेति अधिदैवमध्यात्मं चैकरूपं निर्देशं कृत्वा प्रतिपर्यायमयमेव स इत्यभेदवचनादेकत्वमत्र विवक्षितमित्यर्थः

विराजैकत्वमुपलक्षणार्थं हिरण्यगर्भाव्याकृतात्मनोः
उक्तं चैतन्मधुब्राह्मणे यश्चायमस्यां पृथिव्यां तेजोमयोऽमृ
तमयः पुरुषो यश्चायमध्यात्ममित्यादि सुषुप्ताव्याकृत्यो
स्त्वेकत्वं सिद्धमेव निर्विशेषत्वात् एवं च सति एतत्सिद्धं
भविष्यति सर्वद्वैतोपशमे चाद्वैतमिति ॥ राम ॥

ननु विश्वविराजोः स्थूलाभिमानित्वात्तैजसहिरण्यगर्भयोश्च सूक्ष्माभिमानित्वादेकत्वं युक्तं प्राज्ञाव्याकृतयोस्तु केन साधर्म्येणैकत्वं तत्राह सुषुप्तेति प्राज्ञो हि सर्वविशेषमुपसंहृत्य निर्विशेषः सुषुप्त एव वर्तते प्रलयदशायामव्याकृतं च निःशेषविशेषं सात्म्यमुपसंहृत्य निर्विशेषरूपं तिष्ठति तेनोक्तं साधर्म्यं पुरोधाय तयोरैक्यमविरुद्धमित्यर्थः अध्यात्माधिदैवयोरेकत्वं प्राग्युक्तन्यायेन प्रसिद्धे सत्युपसंहारप्रक्रियया सिद्धमद्वैतमिति फलितमाह एवं चेति तच्चाद्वैतं प्रतिबंधमात्रेण न स्फुरति किंतु वाक्यादेवाचार्योपदिष्टादिति विवक्तं चपाहः ॥ ~ ॥ रामायनमः

मो. भा.
प्र. टी.
६

अध्यात्माधिदैवयोरभेदाभ्युपगमद्वारेण प्राग्उक्तमपरिपाट्या तत्र ज्ञानानभ्युपगमे दोषमाह अन्यथेति सांख्यादिपक्षस्य
प्रामाण्यकत्वात् तथैव प्रतिदेहं परिच्छिन्नस्य प्रत्यगात्मनो दर्शनेन प्रामाणिकोऽर्थोऽभ्युपगतो भवति व्यवस्थानुपपत्त्या च प्रतिश
रीरमात्माभेदः सिद्ध्यत्याशंक्याह तथा चेति सांख्यादीनां द्वैतविषयदर्शनमिष्टं तेन तदीयदर्शनस्याद्वैतविषयस्य विशेषा
भावाद् द्वैतं तत्त्वमिति श्रुतिसिद्धो विशेषस्तत्त्वतेन सिद्ध्येदतः श्रुतिविरोधे भेदवादे प्रमस्येत व्यवस्थानौपाधिकभेदमधिकृ
त्य सुस्था भविष्यतीत्यर्थः ननु भेदवादेऽप्यद्वैतश्रुतिर्न विरुध्यते ध्यानार्थमनेन ब्रह्मेति तद्द्वैतः नत्वमित्युपदेशप्रसिद्धेरित्याशंक्या
ह श्रूयते चेति उपक्रमोपसंहारतः प्रत्यादिना सर्वासामुपनिषदां सर्वेषु देहेष्वात्मैक्यप्रतिपादनपरत्वमिष्टमतो न ध्यानार्थ
त्वमद्वैतश्रुतेरुच्छृंका वस्तुपरत्वलिंगाविरोधादित्यर्थः अध्यात्माधिदैवयोरेकत्वमुपपत्त्याद्वैतपर्यवसाने सिद्धे स

उपसंहृतस्यैवं स्यात् अन्यथा हि स्वदेहपरिच्छिन्न एव प्रत्यगात्मा सांख्यादिभिरिव दृष्टः स्यात् त
था च सत्यद्वैतमिति श्रुतेरुक्तो नो विशेषो न स्यात् सांख्यादिदर्शनेनाविशेषात् श्रूयते च सर्वोप
निषदां सर्वात्मैक्यप्रतिपादकत्वम् अतो युक्तमेवास्याध्यात्मिकस्य पिण्डात्मनोऽध्यलोकाद्यधिदै
न पिण्डात्मनाधिदैविकेनैकत्वमभिप्रेत्य समागाववचने महीं तेऽप्युपतिष्ठेदित्यादिलिंगदर्शनाच्च

त्याध्यात्मिकस्य महात्मनो विश्वस्य त्रैलोक्यात्मकेनाधिदैविकेन विराजा सहैकत्वं गृहीत्वा यत्तस्य समागाववमुक्तं त
द्विवृण्वन्नुपसंहरति अत इति अध्यात्माधिदैवयोरैक्ये हेतुमाह महीति दिवादित्यादिके वैश्वानरस्यावयवे वै
श्वानरबुद्ध्याध्यायतो जितात्मायात्पुनरावेदयन्नमुपगतस्य मही तेऽप्युपतिष्ठेत् यत्त्वामागमिष्यत् इति श्रेयो भवि
ष्यत् यत्त्वामित्यादिव्यस्तोपासननिंदासमस्तोपासनविधिरूपया ह्यनुपपत्ते नच ग्रुलोकादिके विपरीतबुद्ध्याऽट
दीनवतः स्वकीयमूर्धादिपरिपतनमुचितं यद्यध्यात्माधिदैवयोरेकत्वं न भवेत् तस्मात्तयोरेकत्वमत्र विवक्षितं
भवतीत्यर्थः ॥ ~ ॥

८

नन्वेहेतुमाह सर्वस्येति अध्यात्माधिदैविकेन सहितस्य प्रपंचसर्वस्यैव स्थूलस्य पंचीकृतपंचमहाभूततत्कार्यात्मकस्यानेना-
त्मना विराजा प्रथमपादत्वे तस्यैव सूक्ष्मस्यापंचीकृतपंचमहाभूततत्कार्यात्मनो हिरण्यगर्भात्मना द्वितीयपादत्वे तस्यैव का-
र्यरूपतां त्यक्त्वा कारणरूपतामापन्नस्याव्याकृतात्मना तृतीयपादत्वे तस्यैव तत्कार्यकारणरूपतां विहाय सर्वकल्पनाधि-
ष्ठानतयावस्थितस्य सत्यज्ञानानंतानंदात्मना चतुर्थपादत्वे तदेवमध्यात्माधिदैवयोरभेदमादायैकेन प्रकारेण चतुष्पादत्वस्य
वक्तुमिष्टत्वात्पूर्वपूर्वपादस्योत्तरोत्तरपादात्मना प्रविलापनात्तुरीयनिष्ठायां पर्यवसानं सिद्ध्यतीत्यर्थः यदेवं तुरीयपर्यवसाने
जिज्ञासोर्मुमुक्षोरिष्यते तदा तत्र ज्ञानप्रतिबंधकस्य प्रातिभासिकद्वैतस्योपरमः संपद्येत परिपूर्णं ब्रह्माहमस्मीति वाक्यार्थसाक्षा-
त्कारः सिद्ध्यतीति फलितमाह एवं चेति उक्तन्यायेन तत्तत्साक्षात्कारे संगृहीते सर्वेषु भूतेषु ब्रह्मादिस्थावरांतेषुऽऽत्मैको हि द्वि-
तीयो द्रष्टा स्यात् एको देवः सर्वभूतेषु गूढ इति तत्र तत्र ब्रह्मचैतन्यस्यैव प्रत्यक्त्वेनावस्थानाय परमात्मानि तानि च सर्वाणि

सर्वस्य प्रपंचस्याधिदैविकस्यानेनात्मना चतुष्पात्त्वस्य विवक्षितत्वात् एवं च सति सर्वप्रपंचोप-
शमे द्वैतासिद्धिः सर्वभूतस्थश्चात्मैको द्रष्टा स्यात्सर्वभूतानि चात्मनि यस्तु सर्वाणि भूतानीत्या-
दिश्रुत्यर्थः ॥

प्रातिभासिकानि तस्मिन्नेवात्मनि कल्पितानि दृष्टानि स्युस्तथा च पूर्णत्वमात्मनो भूतांतराणां च तदतिरेकेण च सत्ता-
स्फुरणविरहितत्वं सिद्ध्यति ततश्च सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छतीति
स्मृतिरनुगृहीता भवतीत्याह सर्वभूतस्थमिति नचेदमानर्थक्यवचनमप्रमाणमिति शंकनीयम् यद्वै किंचन मनुरवदत्तद्भेष-
जमिति श्रुतेरित्यभिप्रेत्य दर्शितस्मृतिमूलभूतां श्रुतिं सूचयति यस्त्विति यो हि पादत्रयं प्रागुक्तया प्रक्रियया प्रविलाप्य तुरीये
नित्यविज्ञप्तिमात्रे सदानंदैकताने परिपूर्णे प्रतिष्ठां प्रतिपद्यते स ब्रह्माहमस्मीत्यात्मानं जानानः सर्वेषां भूतानामधिष्ठानांत-
रमनुपलभमानस्तान्यात्मन्येव प्रातीतिकानि तानि प्रत्येति तेषु सर्वेषु चात्मस्फूर्तिमद्यमवगच्छति ततश्च न किंचिदपि गोपायितु-
मिच्छतीत्यर्थः श्रुत्यर्थस्य यथोक्तरीत्या तत्तत्साक्षात्कारे संगृहीते सति स्वीकृतः स्यादित्यर्थः ॥ एप ॥

मां॰ भा॰
प्र॰ टी॰
८

इदानीं वैश्वानरशब्दस्य प्रकृतविश्वविषयत्वं विशदयति विश्वेषामिति कर्मणि षष्ठी विश्वं नयतेनराश्चेति विश्वानरः
निपातनात्पूर्वपदस्य दीर्घता विश्वान्नरान्भोक्तॄनेनव्यवस्थितान्प्रत्यनेकधा धर्माधर्मकर्मानुसारेण सुखदुःखादि
प्रापणादयं कर्मफलदाता वैश्वानरशब्दितो भवतीत्यर्थः अथवा विश्वश्चासौ नरश्चेति विश्वानरः स एव वैश्वानरः स्वा
र्थे च तद्धितो गतसमवायस्वादित्याह विश्वेति कथं विश्वश्चासौ नरश्चेति विगृह्यते जाग्रतां नराणामनेकत्वान्नाद
त्म्यानुपपन्नेत्याशंक्याह सर्वेति सर्वपिण्डात्मा समष्टिरूपो विराडुच्यते तेनात्मना विश्वेषामनन्यत्वादयोक्तस

विश्वेषां नराणामनेकधा नयनाद्वैश्वानरः विश्वानर एव वैश्वानरः सर्वपिण्डात्मानन्यत्वात्स प्रथमः
पादः एतत्पूर्वकत्वादन्तरपदाधिगमस्य प्राथम्यमस्य कथमयमात्मा ब्रह्मेति प्रत्यगात्मनोऽस्य च

वैश्वानरः प्रथमः पादः ॥

चतुष्पात्त्वे प्रकृते त्रिलोकादीनां मूर्धाद्यङ्गत्वमिति नैष दोषः ॥ ॥

मात्मसिद्धिरित्यर्थः विश्वस्य तैजसाद्यन्यत्वे स्वस्यैव प्राथम्यं युक्तं कार्यस्य तत्पश्चाद्भावित्वमुचितमित्याशंक्याह
पूर्वत्वादिति प्रविलापनापेक्षया प्राथम्यं न सृष्ट्यपेक्षयेत्यर्थः अध्यात्माधिदैवयोर्भेदमादाय प्रागुक्ते समाधिमाहि
पति कथमिति ब्रह्मणि प्रकृते तस्य परोक्षत्वशंकिते तन्निरासार्थं ब्रह्मायमात्मेति प्रत्यगात्मा न प्रकृतः सोय
मात्मा चतुष्पादिति चतुष्पात्त्वे प्रकृते त्रयलोकादीनां मूर्धाद्यङ्गत्वमसिद्धार्थे युक्तं तदेवोक्तं प्रक्रमविरोधादि
त्यर्थः अध्यात्माधिदैवयोर्भेदाभावान्न प्रक्रमविरोधोऽस्तीति परिहरति नैष दोष इति ॥

पूर्वेण विशेषणेन विशेषणान्तरं समुच्चिनोति तथेति सप्ताङ्गत्वं च कृत्स्नवष्टम्भेन विश्वस्य विशदयति तस्येत्यादिना प्रकृतस्य
विहितस्य प्रसिद्धस्यैवात्मनस्त्रैलोक्यात्मकस्य वक्ष्यमाणरीत्या वैश्वानरशब्दितस्य सुतेजस्त्वगुणविशिष्टो द्युलोकः मूर्धैवेति
द्युलोकस्य शिरस्त्वमुपदिश्यते विश्वरूपो नानाविधः श्वेतपीतादिगुणात्मकः सूर्यश्चक्षुर्विवक्ष्यते पृथग्नानाविधं वर्त्म
संचरणमात्मा स्वभावो यस्येति पृथग्वर्त्मात्मा वायुः प्राणत्वेनोच्यते स च प्राणोऽस्येति संबन्धः बहुलो विस्तीर्णो गुणैर्वा नाकाशः संदेहो दे
हस्य मध्यमो भागः रयिरन्नं तद्धेतुरुदकं वस्तिरस्य मूत्रस्थानं पृथिव्येव प्रतिष्ठागुणा वैश्वानरस्य पादौ तद्युक्तं प्रथममा
गच्छेत्तद्धोमीयमित्यग्निहोत्रकल्पनाश्रुतानस्याः शेषत्वेनाहवनीयोऽग्निरस्य मुखत्वेनोक्त इति योजना उक्तसप्ताङ्गत्वमुपसं
हरति इत्येवमिति विशेषणान्तरं समुच्चिनोति तथेति बुद्ध्यर्थानीन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि कर्मार्थानीन्द्रिया

तथा सप्ताङ्गान्यस्य तस्यैतस्यैवात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो
बहुलो वस्तिरेव रयिः पृथिव्येव पादावग्निहोत्रकल्पनाशेषत्वेनाग्निर्मुखत्वेनाहवनीय उक्त इत्येवं सप्ताङ्गानि

सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुक् ॥

यस्य सः सप्ताङ्गः तथैकोनविंशतिमुखान्यस्य बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च दश वायवश्च प्राणादयः पंच
मनो बुद्धिरहंकारश्चित्तमिति मुखानीव मुखानि तान्युपलब्धिद्वाराणीत्यर्थः स एवं विशिष्टो वैश्वानरो यथो
क्तैर्द्वारैः शब्दादीन्स्थूलान्विषयान्भुङ्क्ते इति स्थूलभुक् ॥

णि वाक्पाणिपादपायूपस्थानि तान्येतानि द्विधा
नीन्द्रियाणि दश भवन्ति प्राणादयस्त्वादिशब्देनापानव्यानोदानसमाना गृह्यन्ते उपलब्धिद्वाराणीत्युपलब्धिपदं कर्मोपलक्ष
णार्थं द्वारत्वे करणत्वं तत्र बुद्धीन्द्रियाणां मनसो बुद्धेश्च प्रसिद्धमुपलब्धौ कारणत्वं कर्मेन्द्रियाणां वदनादौ कर्मणि करणत्वं प्राणा
दीनां पुनरुभयत्रापारम्पर्येण करणत्वं तेषु सत्स्वेव ज्ञानकर्मणोरुत्पत्तेरसत्स्व चानुत्पत्तेर्मनोबुद्ध्योश्च सर्वत्र साधारणकरण
त्वमहंकारस्यापि प्राणादिवदेव करणत्वं मतम् चित्तस्य चेतयाभासोदये करणत्वमुक्तमिति विवेक्तव्यं सर्वत्र विशेष
णविशिष्टस्य वैश्वानरस्य स्थूलभुगिति विशेषणान्तरं तद्विभजते स एवं विशिष्ट इति शब्दादिविषयाणां दिगादिदेवता
र्गृहीतैः श्रोत्रादिभिर्दृश्यमानत्वम् ॥

मां॰ भा॰
प्र॰ टी॰

ब्रह्मणः अस्तु परिष्टस्य परोक्षत्वं व्यावर्तयति तच्चेति यद्ब्रह्म प्रकृत्या सर्वात्मकमुक्तं तत्परोक्षमिति मन्तव्यं किंत्वयमात्मे-
तियोजना चतुष्पात्त्वेन विभक्तस्य प्रत्यगात्मनस्तुरीयत्वेनेत्यर्थः अभिनयो नाम विवक्षितार्थप्रतिपत्त्यर्थमसाधारणः पाणी रोप्या-
पारस्तेन हस्ताद्वेर्हृदयदेशमानीय कथयतीत्यर्थः सोयमित्यादिवाक्यान्तरमवतारयति व्याकरोतीति ओंकार इति सर्वाभिधान-
तया परोक्षरूपेण परत्वे प्रत्यग्रूपेण चापरत्वे तेन कार्यकारणरूपेण सर्वात्मना व्यवस्थितस्य ज्ञात्मप्रतिपत्तिसौकर्या-
र्थं चतुष्पात्त्वं कल्प्यते तत्र दृष्टान्तमाह कार्षापणवदिति देशविशेषे कार्षापणशब्दः षोडशपणानां संज्ञा तत्र यथा
अवहारप्राप्तुर्यापादकल्पना क्रियते तथेहापीत्यर्थः यथा गोश्चतुष्पाद्युच्यते न तथा चतुष्पात्त्वं दृष्टुं शक्यते निष्क-
लङ्कत्वाकोपादित्याह गौरिवेति विश्वादिषु तुर्यान्तेषु पादशब्दो यदि करणव्युत्पत्तिकस्तदा विश्वादिवत्तुर्यस्या-
पि कारणकोटिनिवेशे ज्ञेयासिद्धिः यदि तु पादशब्दः सर्वत्र कर्मव्युत्पत्तिकस्तदा साधनासिद्धिरित्याशङ्का विभज्यपा

तच्च ब्रह्म परोक्षाभिहितं प्रत्यक्त्वेन विशेषेण निर्दिशत्ययमात्मा ब्रह्मेति अयमिति चतुष्पात्त्वेन प्रविभज्य-
मानं प्रत्यगात्मतयाभिनयेन निर्दिशत्ययमात्मेति सोयमात्मा ओंकाराभिधेयः परापरत्वेन व्यवस्थितः

अयमात्मा ब्रह्म सोयमात्मा चतुष्पात् जागरितस्थानो बहिःप्रज्ञः

चतुष्पात् कार्षापणवत् नौ गौरिवेति त्रयाणां विश्वादीनां पूर्वपूर्वप्रविलापनेन तुरीयस्य प्रतिप-
त्तिरिति करणसाधनः पादशब्दस्तुरीयस्य पद्यते इति कर्मसाधनः पादशब्दः कथं चतुष्पात्त्वमित्याह
जागरितस्थानमस्येति जागरितस्थानः बहिःप्रज्ञः स्वात्मव्यतिरिक्ते विषये प्रज्ञा यस्य स बहिःप्रज्ञः बहि-
र्विषये च प्रज्ञा अविद्याकृतावभासत इत्यर्थः ॥ दशब्दप्रवृत्तिं प्रकटयति त्रयाणामित्यादिना करणसाधनः
करणव्युत्पत्तिकः कर्मसाधनः कर्मव्युत्पत्तिक इति यावदात्मनो निरवयवस्य पादद्वयमपि नोपपद्यते पादचतुष्टय-
न्तु दूरोत्सारितमिति शङ्कते कथमिति परमार्थतश्चतुष्पात्त्वाभावेपि काल्पनिकमुपायोपेयभूतं पादचतुष्टयमवि-
रुद्धमित्यभिप्रेत्याद्यपादं व्युत्पादयति जागरेत्यादिना स्थानमस्येत्यभिमानस्य विषयभूतमित्यर्थः प्रज्ञायास्तावदान्तरत्व-
प्रसिद्धेर्युक्तं बहिर्विशेषणमित्याशंकामाचष्टे बहिरिति चैतन्यलक्षणा प्रज्ञा स्वरूपभूता न बाह्ये विषये प्रतिभासते
तस्या विषयानपेक्षत्वाद्बाह्यस्य च विषयस्य वस्तुत्वाभावादित्याशङ्क्याह बहिर्विषये चेति न स्वरूपभूता प्रज्ञा वस्तुतो वा

अभिधानाभिधेययोरेकस्मिन्नेव सति कल्पितत्वेन तदेकरूपत्वस्योक्तत्वात् किमिति पुनः सर्वं ह्येतद्ब्रह्मेत्युच्यते तत्राह ता
त्वादस्य सर्वकमन्त्रवाक्यस्य सफलतात्पर्यमाह अभिधानेत्यादिना वाच्यस्य वाचकत्वोक्त्यैव तयोरेकत्वसिद्धेः व्यतिहार
निर्देशो हि अर्थ इत्याशंक्याह इतरथेति वाच्येन वाचकस्यैकात्म्ये उक्ते वाचकेनैव वाचकस्यैकात्म्यवचने सत्यनुपायोपेयभा
त्वमेकत्वं न मन्यामैकात्म्यमित्याशंक्याह तन्निहत्यर्थं व्यतिहारवचनमर्थवदित्यर्थः परस्पराभेदोपदेशादभिधाना

अभिधानाभिधेययोरेकत्वेऽप्यभिधानप्राधान्येन निर्देशः कृतः ओमित्येतदक्षरमिदं सर्वमित्यादावभिधानप्राधान्ये
न निर्दिष्टस्य पुनरभिधेयप्राधान्येन निर्देशोऽभिधानाभिधेययोरेकत्वप्रतिपत्त्यर्थः इतरथाऽभिधानतन्त्राऽभिधेय
प्रतिपत्तिरित्यभिधेयस्याभिधानत्वं गौणमित्याशंका स्यात् एकत्वप्रतिपत्तेश्च प्रयोजनमभिधानाभिधेय

सर्वं ह्येतद्ब्रह्म ॥

योरेकेनैव प्रयत्नेन युगपत्प्रविलापयंस्तद्विलक्षणं ब्रह्म प्रतिपद्येतेति तथा च वक्ष्यति पादा मात्रा मात्राश्च
पादा इति तदाह सर्वं ह्येतद्ब्रह्मेति सर्वं यदुक्तमोंकारमात्रमिति तदेतद्ब्रह्म ॥

भिधेययोरेकत्वप्रतिपत्तिरस्तु साऽपि विफला ब्रह्मप्रतिपत्त्यनुपयोगित्वादित्याशंक्याह एकत्वेति अभिधाना
भिधेययोरेकत्वप्रतिपत्तेश्चेदं प्रयोजनं यदेकेन प्रयत्नेन द्वयमपि प्रविलापयन्नुभयविलक्षणं ब्रह्म प्रतिपद्येतेति
निर्दिष्टानीति योजना अभिधानाभिधेययोर्व्यतिहारोपदेशे वाक्यशेषमनुकूलयति तथा चेति उक्ते वाचकस्य वा
च्याभिन्नत्वे वाक्यमवतार्य योजयति तदाहेति सर्वकार्यकारणं चेत्यर्थः ॥ राम ॥

मा॰ भा॰ प्र॰ टी॰ ६

अभिधानस्याभिधेयतयावगतमर्थजातमोंकार एवेत्यत्र हेतुमाह तस्येति तस्यापि पृथगभिधानभेदः स्यादिति
नेत्याह अभिधानस्येति वाच्ये वाचके च सर्वमोंकारमात्रमित्युपगमेऽपि परं ब्रह्म पृथगेव स्थास्यतीत्याशङ्क्याह परं चे
ति यद्यपि परं कारणं ब्रह्म तच्चेदवगम्यते तदा किंचिदभिधानेनेदमभिधेयमित्येवमात्मकोपायपूर्वकमेव तदधिग
माभिधेयं च साभिधानाद्व्यतिरिक्तं तत्तु नयोंकारमात्रमित्युक्तं नाहाच्ये ब्रह्मापि वाचकाभिन्नं तन्मात्रमेव भविष्यति
यत्तु कार्यकारणातीतं चिन्मात्रं वाच्यवाचकविभागशून्यं वर्तते तत्र नास्त्योंकारमात्रत्वमोंकारेण लक्षणया

तस्याभिधानाव्यतिरेकात् अभिधानस्य चोंकाराव्यतिरेकादोंकार एवेदं सर्वं परं च ब्रह्माभिधानाभिधेयो
पायपूर्वकमेव गम्यत इत्योंकार एव तस्येति तस्य परापरब्रह्मरूपस्याक्षरस्योमित्येतस्योपव्याख्यानं ब्रह्मप्रति

ओमित्येतदक्षरमिदꣳ सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्य
दिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तद
प्योंकार एव ॥

पत्त्युपायत्वाद्ब्रह्मसमीपतया विस्पष्टं प्रकथ नमुपव्याख्यानं प्रस्तुतं वेदितव्यमिति
वाक्यशेषः भूतं भवद्भविष्यदिति कालत्रयपरिच्छेद्यं यत्तदप्योंकार एवोक्तन्यायतः यच्चान्यत्त्रिकालातीतं कार्या
धिगम्यं कालापरिच्छेद्यमव्याकृतादि तदप्योंकार एव॥

तदवगमांगीकारादित्यर्थः तस्येत्यादिश्रुतिमवतार्य
व्याकरोति तस्येति भूतमित्यादिश्रुतिं गृहीत्वा व्याचष्टे कालेति वाच्यस्य वाचकाभेदात्तस्य चोंकारमात्रत्वादित्युक्तो न्यायः
कालत्रयातीतमोंकारातिरिक्तं जडं वस्तु नास्त्येव प्रमाणाभावादित्याशङ्क्याह कार्याधिगम्यमिति अव्याकृतं साभासम
ज्ञानमनिर्वाच्यं तत्र कालेन परिच्छिद्यते कालस्यापि कारणत्वात् कार्यस्य कारणात्पूर्वमुत्पत्त्यसंभवान्न प्रागभाविकारणप
रिच्छेदकत्वं संगच्छते सत्त्वमात्रपि देवदृश्यते तदपि न कालेन परिच्छेत्तुं शक्यते समसंवत्सरो भवत्वेहस्त्रुरातनः संवत्सर
श्रावसतिसमवामाकालात्ययं तिष्ठते तस्मिन्नपि सर्वमोंकारमात्रं वाच्यस्य वाचकाव्यतिरेकन्यायादित्यर्थः ॥ ६

शब्दातिरिक्तार्थाभावे शब्दस्यार्थवाचकत्वानुपपत्तेरेकत्वविषयविषयित्वायोगात्तु विकल्पके सन्मात्रे वस्तुनि वाच्यवाचकविभा
गश्च त्वं पर्यवस्यतीत्यभिप्रेत्य कार्यस्य वस्तुतोऽसत्वे प्रमाणमाह वाचारम्भणमिति कार्यस्य सर्वस्य वाङ्मिथ्यात्वेपि कथमोंका
रनिर्णयस्य ब्रह्मप्रतिपत्त्युपायत्वसिद्धिरित्याशंक्याह तदस्येति तदिदं विकारजातमस्य ब्रह्मणः संबंधि वाचा सामान्यरू
पया तंत्या प्रसारितरज्जुकल्पया सितं बद्धं व्याप्तमिति संबंधः शब्दसामान्येनार्थसामान्यस्य व्याप्तावपि कथमर्थविशेषस्य
शब्दविशेषव्याप्तिरित्याशंक्याह नामभिरिति शब्दविशेषैर्दामस्थानीयैर्विशेषरूपमपीदमर्थजातं व्याप्तं सर्वं वक्तव्यत्वाय
स्वतल्पत्वादित्यर्थः उक्तमर्थं समर्थयते सर्वं हीति इदं हि सर्वं सामान्यविशेषात्मकमर्थजातं सामान्यविशेषरूपेण

वाचारम्भणं विकारो नामधेयं तदस्येदं वाचा तन्त्या नामभिर्दामभिः
सर्वं सितं सर्वं हीदं नामनीत्यादिश्रुतिभ्यः अत आह ओमित्येतदक्ष
रमिदं सर्वमिति यदिदमर्थजातमभिधेयभूतम् ॥

० लक्षणया २

तुं

नाम्ना नीयते व्यवहारपथं प्राप्यते तेन नाम नीयत उच्यते तदेवं वागनुरक्तबुद्धिबोध्यत्वाद्वाङ्मात्रं सर्वं वाग्जातं च
सर्वमोंकारमात्रं विवृतत्वादोंकारमात्रं स चोंकार उपास्यतेनेनात्मधीहेतुरित्याद्यप्रकरणारंभः संभवतीत्यर्थः तद्यथा
शंकुनेति श्रुति संग्रहार्थमादिपदं प्रतिज्ञातप्रथमप्रकरणार्थसिद्धिरिति शेषः अर्थमुपपाद्य तस्मिन्नर्थे श्रुतिम
वतारयति अत आहेति श्रुतिं व्याचष्टे यदिदमिति तदिदं सर्वमोंकार एवेति संबंधः ॥ ॥

मा॰ भा॰ प्र॰ टी॰ ५

रज्ज्वादिविवेति यथार्थरज्जुः शुक्तिरित्यादिरधिष्ठानविशेषः सर्पो रजतमित्यादिविकल्पस्यास्पदोऽभ्युपगतस्तथात्माऽद्व
यत्वान्मिथ्यात्वहेत्वभावात्परमार्थसत्स्वभावो वक्ष्यमाणस्य प्राणादिविकल्पस्यास्पदोऽभ्युपगम्यते यथैवरज्ज्वादेः
तथैव प्राणादिरात्मविकल्पो यस्तद्विषयः सर्वो वाक्प्रपंचः यथोक्तोंकारमात्रात्मकस्तदास्पदो गम्यते नचजग
त्योंकारस्याननुगमः ओंकारेण सर्वा वाक् संतृण्णेति श्रुतेरतो युक्तमोंकारस्य सर्वास्पदत्वमित्यर्थः नन्वर्थजा
तस्यात्मास्पदत्वादोंकारास्पदत्वाच्च वाक्प्रपंचस्य प्राणस्यास्पदद्वयमिति नेत्याह सचेति आत्मवाचकत्वेपिना

155

रज्ज्वादिवत्सर्पादिविकल्पस्यास्पदोऽद्वय आत्मा परमार्थतः स
न्प्राणादिविकल्पास्पदो यथा तथा सर्वोपि वाक्प्रपंचः प्राणाद्या
त्मविकल्पविषय ओंकार एव सर्वात्मस्वरूपमेव तदभिधायकत्वा
त् ओंकारविकारशब्दाभिधेयश्च सर्वः प्राणाद्यात्मविकल्पोऽभि
धानव्यतिरेकेण नास्ति ॥

स्योंकारस्यात्ममात्रत्वं तद्वाचकस्य तन्मात्रत्वमिति व्याप्त्यभावात्प्राणादेरात्मविकल्पस्याभिधानव्यति
रेकदर्शनादित्याशंक्याह ओंकार इति तस्य विकारः सर्ववाग्विशेषः अकारो वै सर्वा वागिति श्रुतेः
दि॰ ओंकारस्य च तत्प्रधानत्वात्तेन प्राणाद्यात्मशब्देन वाच्यः प्राणादिरात्मविकल्पः सर्वः स्वाभिधानव्यतिरेकेणना
स्ति तदभिधाने प्राणादिशब्दविशेषात्मकमोंकारविकारभूतमोंकारातिरेकेण न संभवतीत्योंकारमा
त्रं सर्वमिति निश्चीयते आत्मनोपि तद्वाच्यस्य तन्मात्रत्वाभिधानादित्यर्थः ॥ ५

कथमिति नवयमनुमानादेवास्मादोंकारनिर्णयमात्मप्रतिपत्त्युपायमभ्युपगच्छामो येन तस्याप्यभावो दोषमा
वहेत् किं तर्हि श्रुतिप्रामाण्यान्निर्णयस्तद्धीहेतुरिति परिहरति उच्यत इति तत्र मन्त्रवर्णानाचिकेतसं प्रति ओमित्येत
दित्यनेन वाक्येन ब्रह्मत्वेन ओमित्येतदुपदिष्टं समाहितेनोंकारोच्चारणयत्नेन तत्संस्फुरति तदोंकारस्सामीप्यादेव
प्रणवाख्यं च ह्यन्यायेनोंकारशब्देन लक्ष्यते तेन लक्षणयोंकारनिर्णयो ब्रह्मधीहेतुरिति विवक्षितं श्रुतिमुदाहरति
ओमित्येतदिति प्रतिमायां विष्णुबुद्धिवदोंकारो ब्रह्मबुद्ध्योपास्यमानो ब्रह्मप्रतिपत्त्युपायो भवतीत्यभिप्रेत्य वाक्यां
तरं पठति एतदालम्बनमिति किं चायमोंकारो यदापरापरब्रह्मदृष्ट्योपास्यते तदा तज्ज्ञानोपायता भवतीति म
न्त्रवर्णः श्रुतिर्दर्शयति एतद्ध्येवेति किं च समाधिनिष्ठो यदा मिश्रवाचा यत्नमानमनुसंधत्ते तदा स्थूलमकारस्वरू

कथं पुनरोंकारनिर्णयश्चात्मतत्त्वप्रतिपत्त्युपायत्वं प्रतिपद्यत इति
उच्यते ओमित्येतत् एतदालम्बनं एतद्वै सत्यकाम परं चापरं च ब्रह्म
यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति ओमित्यात्मानं यु
ञ्जीत ओमिति ब्रह्म ओंकार एवेदं सर्वमित्यादिश्रुतिभ्यः ॥

पस्तत्त्वे तेन चकारेण मकारेण मकारे तमपि कार्यकारणातीते प्रत्यगात्मन्युपसंहरन् तन्निष्ठो भवतीत्यनेन प्रकारे
णोंकारस्य तत्प्रतिपत्त्युपायतेति विधान्तरेणाह ओमित्यात्मानमिति किं च यो यं स्थाणुः सगुमानिति वद्यदेतदो
मित्युच्यते तद्ब्रह्मेति बाधायां सामानाधिकरण्येन समाहितो ब्रह्म बोध्यते तथा च युक्तमोंकारस्य ब्रह्मत्वाभिधान
त्वमित्याह ओमिति ब्रह्मेति किं च सर्वास्पदत्वादोंकारस्य ब्रह्मरूपेण तथात्वादेकलक्षणत्वादस्यत्वासिद्धेरोंकारस्य प्रति
पत्तिर्ब्रह्मप्रतिपत्तिरेवेत्याह ओंकार एवेति ओमितीदं सर्वमित्यादि वाक्यान्तरसंग्रहार्थमादिपदं इत्यादिश्रुतिभ्यो ब्रह्म
प्रतिपत्त्युपायत्वमोंकारस्य प्रसिद्धमिति शेषः न तु स्थानुगतप्रतिभासे सन्मात्रे चिदात्मनि प्रमाणादिविकल्पस्य कल्पित
त्वादात्मनः सर्वास्पदत्वे न पुनरोंकारस्य तदस्य न तु गमादिति तत्राह ॥ ॥ ॥

द्वि

मा॰ भा॰ प्र॰ प्र॰ टी॰ ४

त्येकमसंकीर्णप्रमेयप्रतिपत्तिसौकर्यार्थं सूचयितव्यमित्याह तत्रतावदिति ॐकारप्रकरणस्याऽसंकीर्णप्रमेयं संगृह्णाति
ॐकारेति तन्निर्णयाय प्रकरणमारभ्यमित्युक्तम् तन्निर्णये प्रमाणाभावात्तस्य चानुपयोगित्वादात्मप्रतिपत्तिहेतुत्वार्थो
पयोगिनीत्याशंक्याहागमेत्यादि विशेषणद्वयं तदुपदेशप्रधानेन माण्डूक्योपनिषद्व्याख्यानरूपेण तत्प्रामाण्यादुक्तो निर्ण
यः सेत्स्यति न तु तद्युक्तिप्रधानं युक्तिलेशस्य सतोऽपि गुणत्वादप्रधानत्वान्न चायमोंकारनिर्णयो नोपयुज्यते यदात्मन
स्तत्वमनारोपितरूपं तत्प्रतिपत्त्युपायत्वात्तत्प्रतिपत्तेश्च मोक्षफलत्वादतश्चाद्यप्रकरणमोंकारनिर्णयावान्तरफल
द्वारेण तत्त्वज्ञानेन परमफले पर्यवस्यतीत्युपदेशवशादधिगन्तव्यमित्यर्थः वैतथ्यप्रकरणस्यावान्तरविषयविशेषं दर्श
यति यस्येति आरोपितनिषेधे सति अनारोपितप्रतिपत्तिः स्वाभाविकीत्यत्र दृष्टान्तमाह रज्ज्वामिवेति हेततोऽस्य प
त्वाद्यंतवत्वादियुक्तिवशादित्यर्थः अद्वैतप्रकरणस्यार्थविशेषमनुवदति तथाद्वैतस्यापीति तस्यापि द्वैतवद

श्रुतिभ्योऽस्यार्थस्य सिद्धिः तत्र तावत् ॐकारनिर्णयाय प्रथमं प्रकरणमागमप्रधानमात्मतत्त्वप्रतिपत्त्युपाय
भूतं यस्य द्वैतप्रपंचस्योपशमेऽद्वैतप्रतिपत्तिः रज्ज्वामिव सर्पादिविकल्पोपशमे रज्जुतत्त्वप्रतिपत्तिः तस्य द्वै
तस्य हेतुतो वैतथ्यप्रतिपादनाय द्वितीयं प्रकरणं तथाद्वैतस्यापि वैतथ्यप्रसंगप्राप्तौ युक्तितस्तथात्वद
र्शनाय प्रकरणं तृतीयं अद्वैतस्य तथात्वप्रतिपत्तिप्रतिपक्षभूतानि यानि वादान्तराणि अवैदिकानि तेषाम्
अन्योन्यविरोधित्वात् अतथार्थत्वेन तदुपपत्तिभिरेव निराकरणाय च चतुर्थं प्रकरणम् ॥ अवस्थानुपपत्त्या

मिथ्यात्वप्रसंगमाशंकते तस्योऽसत्त्वामौपाधिकभेदाद्यवस्थायाः स्वप्नवद्व्यभिचारादियुक्तिवशाद्द्वैतस्य परमा
र्थत्वं प्रतिपादयितुं तृतीयं प्रकरणमित्यर्थः अलातशान्तिप्रकरणस्यार्थविशेषं कथयति अद्वैतस्येति तस्य तथा
त्वमबाधितत्वेन वस्तुत्वं तत्प्रतिपत्तेः प्रतिपक्षभूतानामित्यत्र हेतुमाह अवैदिकानीति तेषां निराकार्यत्वे हेतुमाह अतथा
र्थत्वेनेति मिथ्यार्थत्वनिष्ठत्वेनेत्यर्थः तदुपपत्तिभिरेव निराकरणे हेतुमाह अन्योन्येति परस्परप्रतिषेधमुखेनाद्वैतमेव द्र
ढयितुमेतत्प्रकरणमित्यर्थः ॐकारनिर्णयद्वारेणात्मप्रतिपत्त्युपायभूतमाद्यप्रकरणमित्युक्तं तन्निर्णयस्य तद्धे
तुत्वायोगाज्ज्ञानवलभ्यो न ज्ञानमर्थान्तरज्ञानेऽभिमते रूपेणोपयुज्यते न चात्र शुभा स्यादिव्याभिरुपलभ्यते न चात्मका
र्यत्वमोंकारस्योक्तमाकाशादेरविशेषात्तस्य च सर्वात्मत्वेनात्मवत्तत्कार्यत्वस्याज्ञातादिति मन्वानः सन् प्रथमप्रकर

मांडूक्यभाष्यटीका ॥ ४

यथा देवदत्तस्य ज्वरादिना रोगेणाभिभूतस्य स्वस्थता स्वरूपादप्रच्युतिरूपा स्वरूपभूतैव प्रागपि सती रोगप्रतिबन्धादसतीव
स्थिता चिकित्साशास्त्रीयोपायप्रयोगवशात्प्रतिबन्धभूतरोगापगमे सत्यभिव्यज्यते न हि तत्रोपायवैयर्थ्यं प्रतिबन्धप्रध्वंसा
र्थत्वात् न चानित्यत्वं स्वस्थतायाः शंकेत तस्याः स्वरूपत्वादित्युक्तेऽर्थे दृष्टान्तमाह रोगार्तस्यैवेति यथोदितदृष्टान्तानुरोधा
दात्मनः स्वतः स्वरूपत्वान्निखिलदुःखसन्ततिरतिशयानन्दैकतानस्यापि स्वाविद्याप्रसूताहंकारादिद्वैतप्रपञ्चसंबन्धादात्म
निदुःखमात्माहं दुःखी सर्वं मया प्राप्तव्यमिति प्रतीयमानस्य परमकारुणिकाचार्योपदिष्टवाक्योत्थाद्वैतविद्यातो द्वै
तनिवृत्तौ प्रतिबन्धप्रध्वंसे स्वभावभूतपरमानन्दतातिरस्कृतसमस्तानर्थता च स्वास्थ्यनाम्नाभिव्यक्ता भवति सा च स्वस्थतापरिपू
र्णस्वस्वभावान्नातिरिच्यते तदिदं शास्त्रीयं प्रयोजनं तस्य च स्वरूपत्वेनासाध्यत्वान्नानित्यत्वं शंकितव्यं न च साधनवैय
र्थ्यं प्रदर्शितप्रतिबन्धनिवृत्तिफलत्वादिति दार्ष्टान्तिकमाह तथेति न द्वैतस्याहंकाराद्यात्मनो वस्तुत्वात् वस्तुनश्चैव

रोगार्तस्येव रोगनिवृत्तौ स्वस्थता तथा दुःखात्मकस्यात्मनो द्वैतप्रपञ्चोपशमे स्वस्थता अद्वैतभावः प्रयो
जनं द्वैतप्रपञ्चस्याविद्याकृतत्वाद्विद्यया तदुपशमः स्यादिति ब्रह्मविद्याप्रकाशनायास्यारम्भः क्रियते
यत्र हि द्वैतमिव भवति यत्र वान्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यद्विजानीयात् यत्र त्वस्य सर्वमात्मैवा
भूत्तत्केन कं पश्येत्केन कं विजानीयादित्यादि ॥

ध्यानप्रयुक्तत्वान्नित्यनैमित्तिककर्मायतनानां निवृत्तेर
ले विद्यार्थेन प्रकरणारंभेणेति तत्राह द्वैतेति आत्माविद्याकृतस्य द्वैतस्यात्मविद्याकारणनिवृत्त्या निवृत्तेरात्म
विद्याभिव्यक्त्यर्थं शास्त्रारम्भो युज्यते न च द्वैतस्याविद्याविद्यमानदेहत्वे प्रमाणमस्तीत्याशंकान्वयव्यतिरेकानुविधा
यिनीं श्रुतिमुदाहरति यत्र हीति स्वप्नजाग्रतोरविद्यावस्थायां प्रतिभाति द्वैतं स्वप्नप्रतिभानस्य चाभासत्वेनावि
द्यामयत्वमुच्यते आत्मैवाभूदिति विद्याविद्यावस्थायां कर्तृकरणादि सर्वमात्ममात्रं नातिरिक्तमस्तीत्युक्त्वा
विद्याद्वारा सर्वस्य द्वैतस्यात्ममात्रत्ववचनाद्विद्यानिमित्तकार्यकारणात्मकद्वैतनिवृत्तिरात्मैवावशिष्यते तथा च वि
द्यातो द्वैतनिवृत्तिर्निर्दिशन्त्यविद्यावत्त्वं व्यावर्त्यते आदिशब्दान्नेह नानास्ति किंचन अधिष्ठाननिष्ठात्यन्ताभावप्रतियोगित्वं द्वैत
स्याभिप्रेतं वाक्यं वाचारम्भणवाक्यं च गृहीतम् अस्यार्थस्येति द्वैतगताविद्याकृतत्वस्येत्यर्थः ॥ विषयप्रयोजनान्यथानु
पपत्त्यासमर्थनेन ग्रन्थारम्भे सिद्धे सति आदौ प्रकरणचतुष्टयस्य प्र ॥ ॥ ॥ ॥

मो॰ भा॰
प्र॰ प्र॰
२

निर्गुणवस्तुमात्रप्रतिपादकत्वात्तत्प्रतिपादनसंक्षेपस्य च कार्यान्तरत्वात्प्रकरणलक्षणस्य चात्र संपूर्णत्वादित्यर्थः प्रकरण
त्वेऽपि निर्विषयत्वादिप्रयुक्तमव्याख्येयत्वमाशंक्याह अत एवेति प्रकरणत्वादेव प्रकृतग्रन्थस्याऽद्वैतेन संबन्धादीनामवाच्यत्वे
ऽपि प्रकरणप्रवृत्त्यंगतया तानि नवश्यं वक्तव्यानीत्याशंक्य शास्त्रीयसंबन्धादीनां तदीयप्रकरणेष्वर्थात्प्राप्तत्वान्नास्ति वक्तव्य
त्वमर्थं पुनरुक्तमित्याह यान्येवेति श्रोतारो हि शास्त्रीयप्रकरणं प्रतिपद्यमानाः शास्त्रीयान्येव संबन्धादीन्यत्र वचनाभावेऽपि
बुध्यमानाः प्रवृत्तिं तस्मिन्नकुर्वतीत्यर्थः नहि प्रकरणकर्त्रैव देवतद्भाष्यकृतापि विषयादीनामवश्यवक्तव्यत्वाद्भाष्यकृतो
विषयाद्युपन्यासाद्यासोऽद्य शास्त्रादित्याशंक्याह तथापीति प्रकरणकर्त्रैव वक्तव्यान्यपि तद्भाष्यकृता तानि संक्षेपतो
वक्तव्यानीति व्याख्यातॄणां संमते ताभ्यामनुक्तत्वे तेषु नाष्यासाशंकावकाशादित्यर्थः भाष्यकृता प्रयोजनादीनां वक्त
व्यत्वसिद्धेः शास्त्रप्रकरणयोर्मोक्षलक्षणप्रयोजनवत्त्वं प्रतिजानीते तत्रेति प्रयोजनवच्छास्त्रमिति संबन्धः शास्त्रग्रहण

यद्यप्येवं तु वेदान्ते संबन्धाभिधेयप्रयोजनानि तानि न्यूनाद्भवितुमर्हन्ति तथापि प्रकरणव्याचि
ख्यासुना संक्षेपतो वक्तव्यानि तत्र प्रयोजनवत् साधनाभिव्यंजकत्वेन अभिधेयसंबद्धेन
च पारम्पर्येण विशिष्टसंबन्धाभिधेयप्रयोजनवद्भवति किं पुनस्तत्प्रयोजनमित्युच्यते ॥

प्रकरणोपलक्षणार्थं मोक्षलक्षणं फलं ब्रह्मज्ञानस्येष्यते न शास्त्रप्रकरणयोरित्याशंक्याह साधनेति सत्यं मोक्ष
स्य साधनं ब्रह्मात्मैकत्वज्ञानं तस्य जनकं शास्त्रादि तद्भावे ज्ञानव्यवधानेन मोक्षफलवद्भवति शास्त्रादीत्यर्थः तथा
पि ब्रह्मणा विषयेण संबन्धो वेदान्तानामेवेष्यते तत्कथमभिधेयसंबद्धं शास्त्रादीत्याशंक्य ब्रह्मविचारमन्तरेण तज्ज्ञान
जनकत्वायोगात्तज्ज्ञानजननद्वारा विषयसंबन्धसिद्धिरित्याह अभिधेयेति उक्तं ज्ञानव्यवहितप्रयोजनादि शास्त्रा
देरूपं संहरति पारंपर्येणेति तत्र संबन्धो ब्रह्मज्ञानेन शास्त्रादिनाजन्यमेवेत्ययोगव्यवच्छेदादुक्तः शास्त्रादिनैव जन्य
मित्यन्ययोगव्यवच्छेदात् विषयोऽपि दर्शितः यदुक्तं प्रयोजनवत्त्वं तदाक्षिपति किं पुनरिति साध्यत्वे स्वर्गवदनि
त्यत्वे नित्यत्वे साधनानधीनत्वात्तादृशेन शास्त्रादि प्रयोक्तव्यमित्यर्थः मोक्षस्यात्मस्वरूपत्वात्तन्नित्यत्वेनापि सा
धनानर्थक्यं स्वरूपभूतमोक्षप्रतिबन्धनिवर्तकत्वेनार्थवत्त्वादित्युत्तरमाह उच्यत इति ॥

२

केचित्तु प्रकरणचतुष्टयात्मनो ग्रन्थस्य वेदान्तैकदेशसंबद्धत्वज्ञापनार्थं निश्रेयं चैवाक्यप्रतिपाद्यं ब्रह्म प्रथमश्लोकेन सू-
चितं द्वितीयेन तु माण्डूक्यश्रुतिव्याख्यानरूपेणाद्यप्रकरणेन प्रणवमात्राणामात्मपादानां चैकीकरणेन प्रतिपाद्यं ब्र-
ह्म सूचितमिति मन्यन्ते न च द्वितीयश्लोके चतुर्थपादे इत्थं लक्षणाभावादसांगत्यमाशंकनीयं गाथालक्षणस्य तत्र
संपादनादिति द्रष्टव्यं अन्ये त्वाद्यश्लोकं मूलश्लोकान्तर्भूतमभ्युपगच्छन्तो द्वितीयश्लोकं भाष्यकारप्रणीतमभ्युपयन्ति त-
दसत् उत्तरश्लोके द्विवाद्येपि श्लोके भाष्यकृतो व्याख्यानप्रणयनप्रसंगात् ओमित्येतदक्षरमित्यादिभाष्यविरोधाच्च श्लो-
के उत्तरभाष्ये न श्लोके न शास्त्रप्रतिपाद्यपरदेवतातत्त्वानुस्मरणद्वारेण नमनक्रियाप्रकरणप्रारंभोपयोगित्वेन क्रियते प-
रदेवताभक्तिवद्गुरुदेवताभक्तेरपि विद्याप्राप्त्यन्तरंगत्वस्य शास्त्रीयस्य शिष्यशिक्षार्थं ज्ञापनार्थमवश्यात्र यातीतानित्य-
सिद्धवित्तानमन्तरेणाचार्याभ्यो लोपधिकत्वानप्राप्तिः आचार्यवान्पुरुषो वेदेत्यादिश्रुत्यवष्टम्भेन गुरुनमस्करणमारभ्यते द्विती-

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं वेदान्तार्थसारसंग्रहभूतमिदं प्रकरणचतुष्ट-
यमोमित्येतदक्षरमित्याद्यारभ्यते अत एव न पृथक्संबन्धाभिधेयप्रयोजनानि वक्तव्यानि

यश्लोकेनेति कल्पयेति यद्यपि मंगलाचरणं कृतं तन्निर्दिष्टमादौ व्याख्येयस्य प्रतीकं गृह्णाति ओमित्येतदिति ओ-
मित्येतदक्षरमित्यादिप्रकरणचतुष्टयविशिष्टमिदमारभ्यते व्याख्यायते अस्याभिहितस्य हेतुरूपं प्रतिजानीते किमिदं
शास्त्रत्वेन प्रकरणत्वेन वा व्याचिख्यासितं नाद्यः शास्त्रलक्षणाभावादस्यापि शास्त्रत्वादेकप्रयोजनोपनिबद्धमशेषार्थप्र-
तिपादकं हि शास्त्रमत्र च मोक्षलक्षणैकप्रयोजनवत्त्वेपि नाशेषार्थप्रतिपादकत्वं न द्वितीयः प्रकरणलक्षणाभावादि-
त्याशंक्याह वेदान्तेति शास्त्रवेदान्तशास्त्रार्थः तस्याधिकारिनिर्णयस्वरूपसदनपदार्थद्वयतत्त्वैक्याविरोधपरिहारसा-
धनफलाख्यस्तत्र सारो जीवपरैक्यं तस्य सम्यक्ग्रहः संग्रहः संशयविपर्यासादिप्रतिबन्धमुदासेन तदुपायोपदेशा-
यस्मिन्प्रकरणे तत्तथेति यावत् तथा च शास्त्रैकदेशसंबद्धं शास्त्रकार्यं तद्रथितमिदं प्रकरणं व्याख्यानमि-
ष्टम् ॥ राम ॥ ~ ॥

छा. भा.
प. २

ॐ नमो ब्रह्मणे ॥ ॐ नमस्त्रिपुरसुन्दर्यै ॥ ॐ श्रीगणेशाय नमः ॐ ओमित्येत
छान्दोग्योपनिषत्तस्याः संक्षे[...]सुभ्य ऋजुविवरणमल्पग्रन्थमिदमारभ्यते न
र्माधिगतं प्राणादिदेवताविज्ञा[...]सहितमर्चिरादिमार्गेण ब्रह्मलोकप्रतिपत्तिकारण
मार्गेण चेन्द्रलोकप्रतिपत्तिकारणम् स्वभावप्रवृत्तानां च मार्गद्वयपरिभ्रष्टानां कष्ट
भयोर्मार्गयोरन्यतरस्मिन्नपि मार्गे आत्यन्तिकी पुरुषार्थसिद्धिरित्यतः कर्मनिरपेक्ष[...]
संसारगतित्रयहेतूपमर्देन वक्तव्यमित्युपनिषदारभ्यते नचाद्वैतात्मविज्ञानादन्यत्रात्यन्तिका[...]
यसप्राप्तिः वक्ष्यति हि येन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवंति विपर्यये च स स्वराड्भवति[...]
तथा द्वैतविषयानृताभिसंधस्य बंधनं तस्करस्येव तप्तपरशुग्रहणे दाहः संसारदुःखावाप्तिश्चोक्ता अ
द्वैतात्मसत्याभिसंधस्यातस्करस्येव तप्तपरशुग्रहणे बंधदाहाभावः संसारदुःखनिवृत्तिर्मोक्षश्चेति अ
तएव न कर्मसहभावोऽद्वैतात्मदर्शनम् क्रियाकारकफलभेदोपमर्देन सदेकमेवाद्वितीयं आत्मैवेदं सर्व
मित्येवमादिवाक्यजनितस्य बाधकप्रत्ययानुपपत्तेः कर्मविधिबोधकप्रत्यय इति चेन्न कर्त्रादिकारका
भावविज्ञानवतस्तज्जनितकर्मफलरागद्वेषादिदोषवतश्च कर्मविधानात् अधिगतसकलवेदार्थस्य
कर्मविधानाद्द्वैतज्ञानवतोपि कर्मेति चेन्न कर्माधिकृतविषयस्य कर्त्रादिज्ञानस्य स्वाभाविकस्य
सदेकमेवाद्वितीयमात्मैवेदं सर्वमित्यनेनोपमर्दितत्वात् तस्मादविद्यादिदोषवत एव कर्माणि विधी
यन्ते नाद्वैतज्ञानवतः अत एव हि वक्ष्यति सर्व एते पुण्यलोका भवंति ब्रह्मसंस्थोऽमृतत्वमेतीति तत्रैतस्मि
न्नद्वैतविद्याप्रकरणेऽभ्युदयसाधनान्युपासनान्युच्यन्ते कैवल्यसन्निकृष्टफलानि चाद्वैतादीषद्विकृतब्र

सू॰टी॰
२५

ब्रह्मणः सप्रपंचनिष्प्रपंचोभयरूपत्वं परस्परविरोधेन वक्तुमशक्यमिति वाच्यं सतो निष्प्रपं
चस्य ब्रह्मणः पृथिव्याद्युपाधितएव सप्रपंचत्वोपपत्तेरिति चेन्न सतो विरुद्धयोर्द्वयोरुपाधितो
पि परमार्थतएकत्र समवधानानुपपत्तेः नहि स्वतो धवलस्य स्फटिकस्य जपाकुसुमोपाधिवशात्प्र
तीयमानो रक्तिमाभावः परमार्थतो दृश्यते न वा सूर्यतमसोः परमार्थमेकत्र घटकं काश्चि
दुपाधिवशात् तदुक्तं सूत्रकारेण न स्थानतोपि परस्योभयलिंगं सर्वत्र हि स्थानतोप्युपाधि
द्वारापि परस्य ब्रह्मणः उभयलिंगं निष्प्रपंचसप्रपंचोभयरूपत्वं न भवति उक्तयुक्तेः सर्व
त्र वेदांते अशब्दमस्पर्शमरूपमस्थूलमनण्वित्यत्र दृश्यमग्राह्यम् अदृश्येऽनात्म्ये
निरुक्ते दृश्यमव्यवहार्यं स वा एष महानज आत्मा अजरोऽमरो यतो वाचो निवर्तंते स ए
ष नेति नेत्यात्मा अथात आदेशो नेति नेति यत्र नान्यत्पश्यति यत्र त्वस्य सर्वमात्मैवा
भूदित्यादिषु सर्वत्र निष्प्रपंचब्रह्मण एव श्रूयमाणत्वात् इति सूत्रार्थः अपरमार्थतस्तु पर
स्परविरुद्धमपि रूपद्वयमेकत्र भवत्येव स्फटिकादौ दर्शनात् नन्वन्यतरमिथ्यात्वे सप्र
पंचश्रुत्यनुरोधेन निष्प्रपंचस्यैवाध्यारोपितत्वं किं न स्यादिति चेन्न तस्य प्रतिवेदांतमुपक्र
मादिभिः षड्विधलिंगैस्तात्पर्येणावगम्यमानत्वात् द्वे वाव ब्रह्मणो रूपे इति सप्रपंचत्वस्य प्र
पंचस्य नेति नेतीति निषेधात् सप्रपंचश्रुतेः निषेध्यसमर्पकत्वेन निषेधश्रुतिशेषत्वाव
गमाच्च ननु किमर्थं सप्रपंचत्वं ब्रह्मण उक्तं निषिध्यते प्रक्षालनाद्धि पंकस्य दूरादस्पर्श
नं वरमिति न्यायेन ब्रह्मणः प्रपंचसंबंधावचनस्यैव युक्तत्वादिति चेत् उच्यते नहि श्रुतेरभि २५

एवादिष्वस्थूलमनण्वह्रस्वमदीर्घमित्यादिवाक्येषु श्रुतत्वेऽसत्त्वः नाशरहिततया सर्वव्यापक
त्वेन वा श्रुतत्वेन नित्यसत्यसिद्धः प्रसिद्धः सर्वेषामपि तेषु प्रतीतत्वात् ज्ञाता नास्ति सर्वं सत
हृश्यत्वादिनान्यप्रतिषेधेनोपलभ्यः ज्ञातव्यः न तु विषयतया वेद्यः स्वविज्ञाते विज्ञातृ नास्पद
तोऽस्ति विज्ञातृ इति श्रुतेः तमीड इत्यर्थः २९ ननु प्रत्यक्षादिप्रमाणैः सिद्धैर्हैते उपलभ्यमानेक
थमितरप्रतिषेधेनोपलभ्यं ब्रह्मेत्याशंक्याह तावदिति यावच्छ्रद्धा आत्मनि कार्यकारणसंघात
यत्तच्छिद्रातः साक्षान्न वर्तते स यावदहमस्मीति ब्रह्मतया न दृष्टः नावलोकितः तावदेवय
देन दृश्यते जगदिदं सर्वं श्रोत्यासत्यमिवाभाति प्रबोधात्पूर्वं संप्रवृत्त तस्मिन्प्रत्यगभिन्ने ब्रह्म

तावत्सर्वं सत्यमिवाभाति यदेतद्यावत्तोऽस्मीत्यात्मतियज्ञो न हि दृष्टः दृष्टे तस्मिन्सर्वं
मसत्यं भवतीदं ते संसारध्वान्तविनाशं हरिमीडे ४०॥ ॥टः दृष्टे सति सर्वमिदं बाह्यं विष

दादिश्रोत्रं कर्तृत्वादि च असत्यं भवति पूर्वं सुप्ति असत्यमेव तत्त तदाऽसत्यमिति ज्ञातं भवति
बोधानन्तरं संभवदित्यर्थः यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतेः यत्र विद्याव
स्थायां अस्याधिकारिणः सर्वं जगदात्मैवाभूत् विषयाश्चात्ममात्रतया ज्ञातास्तदा केन
करणेन कं विषयं पश्येत् न किंचिदपि सर्वस्यात्ममात्रतया ज्ञातत्वात् ज्ञानज्ञेयानामभावादित्यर्थः प्र
त्यक्षादिप्रमाणानां व्यावहारिकविषयत्वेन तद्विषयप्रपंचस्य निषेधमुखेन तात्त्विकप्रमाणभू
तनयाश्रुत्या ब्रह्मोपलब्धुं शक्यत इति भावः ननु सत्यकामः सत्यसंकल्पः सर्वगंधः सर्वरस
इत्यादौ ब्रह्मणः सप्रपंचत्वस्यापि श्रुतिसिद्धत्वात् कथं निष्प्रपंचवाक्येन तन्निषेधः न च परमार्थो

बृहदारण्यके श्रूयते याज्ञवल्क्येनोपस्तकहोलादीनां पराजये गार्गी नाम ब्रह्मविदुषी काचिद्ब्रा
ह्मणी आगत्य ब्राह्मणोऽभ्यग्रं तं प्राप्य याज्ञवल्क्यं पप्रच्छ उत्तरदाने अवाच्यवचनेनाम निग्रहस्थान
न्तदर्शनेन च अप्रतिभानाम निग्रहस्थानमिति अथ याज्ञवल्क्यस्य पराजयं मन्वाना हे याज्ञव
ल्क्य सर्वमिदं जगद्भूतं भवद्भविष्यच्च यत्राव्याकृताकाशे वर्तते सोऽव्याकृताकाशः कुत्रोत
स इति याज्ञवल्क्यस्तु तस्याभिप्रायं ज्ञात्वा पक्षदेवदोषद्वयं परिहरन्नाह एतद्वै तदक्षरं गा
र्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमित्यादि ब्राह्मणा अ
भिवदन्तीत्यनेन स्वस्यावाच्यवचनदोषः परिहृतः स्थौल्यादिसकलधर्मरहिताक्षरकथनेना
प्रतिभा च परिहृता तत्ताया वदतीति सकलनिषेधमात्रादक्षरसिद्धिरिति तस्यास्तस्य शंकायाम

ओतं प्रोतं यत्र च सर्वं गगनान्तं योऽस्थूलानणुवादिभिः सिद्धोऽक्षरसंज्ञः ज्ञाताज्ञातान्यो नेत्यु
पलभ्यो न च वेद्यस्तं संसारध्वान्तविनाशं हरिमीडे ३९॥

कलनिषेधावधित्वेन तत्स्वम

भिप्रेत्य एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिना द्यावापृथिव्यौ नि
मेषादिकालश्च नद्यः समुद्रा देवाः पितरश्चाक्षरस्य प्रशासनेन वर्तन्त इति सकलमर्यादाविधारकत्वेनाक्ष
रस्यैव मनन्ताय याऽवाऽपतदक्षरं गार्ग्यविदित्वेत्यादिना च यदक्षरज्ञानात्संसारकार्पण्यं यज्ज्ञानाच्च तद्वि
निवृत्तिस्तदक्षरमिति का कृतस्तर्हि तत्राव श्रूयते इत्याशंकायां दृष्टाद्यविषयत्वेऽपि सर्वसाधकत्वे
न स्वयंभासमानत्वं दृष्टीतिष्ठत्यनेन निषेधयन् अदृष्टं द्रष्टृ नान्यतोऽस्ति द्रष्टृ इत्यादिना अक्षरसज्ञां
गार्गीं प्रति प्रसादयामासेति तदक्षरं आकाशः सिद्धं तत्स्तोति ओतमिति गगनान्तमव्याकृतमाका
शपर्यन्तं सर्वमिदं जगत् यत्र विश्वमोतं प्रोतं च तन्तुषु पटवत् कल्पितमित्यर्थः यश्चास्थूलान

अविदित्वास्मा
ल्लोकात्स कृपणः

क्रमेणेष्टव्यौ नञ्‌ शब्दौ पदद्वयनिषेधसमर्पकौ तयोरेव प्रकृतत्वात्‌ विशेष्यत्वेन ब्रह्मणस्तु
विशेषणत्वात्‌ प्रकृतत्वेपि न निषिध्यत्वेन संबंधः तथा च नञ्‌द्वयेनोक्तरूपद्वयनिषेधेन ब्रह्मोप
दिश्यते रूपद्वयनिषेधमात्रस्यैव प्रतीतिः तत्राह नह्येतस्मात्‌ निषेधरूपादुपदेशात्‌ अन्य उ
पदेशो नास्ति ब्रह्मणो निर्विशेषत्वेन विधिशब्दागोचरत्वादित्यर्थः ननु तर्हि ब्रह्म नास्तीति प्रा
प्तं तत्राह अन्यत्परमस्तीति निरवधिकनिषेधायोगात्‌ मूर्त्तामूर्त्तरूपद्वयनिषेधावधिभूतमन्य
द्रूपद्वयव्यतिरिक्तं ब्रह्मास्तीति गम्यत इत्यर्थः अथवा नेति नेति नेतीति वीप्सा तया च यद्यद्विषयत्वे
न प्राप्तं तत्तत्सर्वं नेति नेति नेतीति निषिध्यते शेषं पूर्ववत्‌ इत्थं विषयत्वेन प्राप्तं सर्वं निषिध्य निर्विशे
षत्रविषयः प्रत्यगभिन्नो यो विभुः मूर्त्तामूर्त्ते वा ब्रह्मणः प्रतिपादितत्वमिदानीं स्तौति समाधौ
समाधीयते चित्तमस्मिन्निति समाधिर्विभुः चेतन्यांशश्चेतन्यमेवांशः स्वांशः जडांशपरित्यागे
अवशिष्यमाणं चिन्मात्रमित्यर्थः तस्मिन्नात्मनि प्रत्यगभिन्ने विभौ आरोपिते ये मूर्त्तामूर्त्ते
पंचभूतात्मके ते नेति नेति नेतीति आपादान निषिध्यन्ते इति नेतीति वाक्यस्यार्थान्तरमाह अथेत्यादि
ना अथशब्दः पक्षान्तरे अथवेत्यर्थः नेतीति वीप्सा तया दृश्यं सर्वं विहाय दृश्यत्वेन प्राप्तं सर्वं
निषिध्येत्यर्थः एवमेतन्निषेधावधिभूतत्वेन सन्ते विद्यमाने ये विदुः चकारात्सर्वोक्तमित्यादि
वाक्येन विधिमुखेन च ये विदुरित्यर्थः तदुक्तं सूत्रकारेण प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्र
वीति च भूय इति प्रकृतं यदेतावत्त्वं रूपेयेयत्तास्ति रूपद्वयमित्यर्थः तदेव नेति नेतीति वाक्यं प्रति
षेधति न तु ब्रह्मेत्यर्थः हि यस्मात्ततः परं च भूयः पुनर्ब्रवीति अन्यत्परमस्तीति तस्माद्रूपद्वयस्यैव

षि

पदद्वयं

विषयस्य मिथ्यात्वात् तदेतन्नेति श्रुतेः अस्य च न दाचिद्रूपस्य तत्त्वाणां संभवतीति अजं जन्मरहितं अग्रे ॥
आसीदिति श्रुतेः सत्यमत्यन्तं सत्यमिति श्रुतेः सूक्ष्मं इन्द्रियायविषयं स एषोऽणिमेति श्रुतेः नि
त्यं नाशरहितं न जीवो म्रियत इति श्रुतेः विभुं सर्वव्यापकं सर्वमात्मेति श्रुतेः आद्यं जगतो निमित्तो
पादानकारणं तदेतद्ब्रह्मा यद्येति श्रुतेः एवंभूतं यं विलसां मन्त्रां मन्त्रे तसा सामोपनिषदि पिताऽद्दा
लकनामा ऋषिः आत्मजनाय श्वेतकेतुनाम्ने हे श्वेतकेतो तत्त्वमसीति उक्तरूपं ब्रह्म भ
वसीत्येवं आरभ्य षष्ठेन पुनः पुनराह उपदिष्टवान् तमीडे इत्यर्थः १२ ॥ बृहदारण्यके मूर्तामूर्त
ब्राह्मणे द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चेत्युपक्रम्य अनेतरं च न देतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्चेति

सत्तामात्रं केवलविज्ञानमजं सत् सूक्ष्मं नित्यं तत्त्वमसीत्यात्मसुताय साम्नामन्ते प्राह पिता यं
विभुमाद्यं तं समी॰ १२ मूर्तामूर्ते पूर्वमपोह्याथ समाधौ दृश्यं सर्वं नेति च नेति च नेतीति विहा
य चैतन्यांशे स्वात्मनि सन्तं च विदध्युः तं संसारध्वान्तविनाशं हरिमीडे १३ ॥

तदन्न अथामूर्तं वायुश्चान्तरिक्षं चेति अमूर्तपदं व्याख्याय ततः यथाक्रमं अनित्यपरिच्छिन्नं व्यापकं
प्रत्यक्षपरोक्षरूपेण तद्रूपद्वयं प्रदर्श्य ततः समष्टिव्यष्ट्यात्मकं स्थूलसूक्ष्मशरीरद्वयं च मूर्तामूर्तात्म
कं पंचभूतकार्यत्वेन प्रदर्श्य आरोपप्रपंचं अनेन तद्रूपद्वयमपोहितं अथात आदेशो नेति नेतीति न ह्येत
स्मादिति नेतीति अपवादवाक्यस्य चायमर्थः अथ ब्रह्मणो रूपद्वयनिरूपणानन्तरं अतः यतो
रूपद्वयमनिरूपयितव्यं तदस्थमेव रूपद्वयनिरूपणात् अतो हेतोः आदेशोऽपदेशः ब्रह्मणः क्रियत
इति शेषः कथं नेति नेतीति इति शाद्वीप्सयता दितसविधापितमूर्तामूर्तेतदुभयलिंगरूपपरोयथा

नामरूपकारणं ब्रह्म किमिति नोपलभ्यत इति शंकिते लवणमेतदुदकेऽवधायेत्यादिना उ
दकप्रक्षिप्तस्य लवणस्य दर्शनस्पर्शनाभ्यामनुपलंभेपि रसनात् लवणसद्भावनिश्चयवत्
वत्तत्रादृश्यमपि ब्रह्म कार्यलिंगादस्तीत्युक्ता तदेवोपदिष्टं ततः ब्रह्मसाक्षात्कारैकउपाय
इत्याशंकायां यथा सोम्य पुरुषं गांधारेभ्य इत्यादिना गांधारदेशाद्रणे चौरैर्नीतस्य बद्धच
क्षुषः पुरुषस्य नेत्रबन्धमोक्षकं गांधारोपदेशवदाचार्यकृतादुपदेशात् ब्रह्मसाक्षात्कारो विद्या
नितिनिश्चित्योक्तात्तदेवोपदिष्टं ततः सविज्ञानं केन प्रकारेण ब्रह्म संपद्यते इत्यपेक्षायां पुरुषं सो
म्योपतापिनमित्यादिना मनआदेर्लये सति ज्ञानदीपप्रकाशितं ब्रह्मैव प्रतिपद्यते नार्चिरादिक
मपेक्षतेऽविद्वांस्तु देहान्तरं गृह्णातीति उक्ता तदेवोपदिदेश ततस्त्वयं यदि म्रियमाणो मोक्ष्यमाण
स्तदा ब्रह्म संपद्यते तर्हि अविद्वानिव विद्वानपि किमिति नावर्तत इत्याशंकायां पुरुषं सोम्योत हस्त
गृहीतमानयंतीत्यादिना तप्तपरशुं गृह्णातो स्तेनास्तेनयोस्तप्तपरशुकरतलसंयोगाविशेषेपि स
त्यमवहितहस्ततलत्वादस्तेनो न दह्यते स्तेनस्तु दह्यत एव एवमंतकाले विद्वदविदुषोः समाना
यामपि सत्संपत्तौ मिथ्याब्रह्माभिसंधिः पुनर्देहं गृह्णाति न तु देहाद्यात्मबुद्धिरहितः पुनः शरीरमुपा
दत्त इति परिहारः एवं च तदेव तत्त्वमसीत्युपदिदेश स्वगतभेदरहितब्रह्मणो निरवयवे निर्धर्मके न
संभवतीति श्रुत्यापेक्षितः एवं छांदोग्यश्रुत्या भगवत्या सानुक्रोशक्रमेणैक एवाद्वितीयो
नवभिः पर्यायैः सन्मात्रः प्रत्यगभिन्नो विभुः प्रतिपादितस्तमिदानीं स्तौति सन्मात्रमस्मीति
प्रत्ययवेद्यं सदेवेति श्रुतेः केवलविज्ञानविषयनिर्मुक्तं विद्रूपं वाचारंभणमित्यादिश्रुत्या

ह॰टी॰
३२

राकरणायतस्यैव जीवरूपेण प्रवेशं चाभिधाय त्रिवृत्करणपूर्वकं नामरूपसृष्टिं चोक्ता ततो ब्र
ह्मणः स्वकार्याकाशादितो भेदव्याहतये यदग्ने रोहितं रूपमित्यादिना वियदादेः सर्वस्य नामतो मि
थ्यात्वमुक्तं ततो देहवाक्प्राणमनसामन्नादिकार्यत्वेनानात्मत्वमुक्तं सपशिमिमेतदात्म्यमिद
सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्यादिना श्वेतकेतुद्वारीकृत्य ममत्वग्राणां जीवानामात्मत्वेन सद्दर्शिती
यमिति सत्यत्वमुक्तात्मके परमार्थसत्यत्वे स्वतन्त्रदाशंकानिराकरणपूर्वकं नवकृत्वः पुनः पुनरुपदि
देश तथाहि प्रियं तो वाङ्मनसीत्यादिना सत्संपन्नानां वस्थामयेन रूपेण जीवः संपद्यते तद्व
स्थिते तत्त्वमसीति पितारुपदिष्टे सत्संपन्नाः प्रजास्तद्रूपात्मकत्वं किमिति न विदुरिति श्वेत
केतोराशंकायां यथा सोम्य मधु मधुकृतस्त्यादिना मधुकरमधुत्वेन संपादितनानाभाववत्सम
सदायवद्धिवेक्यमपाकातेन रूपस्यादोषाप्राप्तमपिव्याप्तत्वायतेऽतिनिरस्ततदेवतत्त्वमुपदिश्य
न तु स्वरूपादोकरणाभावादविज्ञातमस्थितात्स्वब्रह्मणावयमस्थिताऽइतिकस्मान्न ज्ञानीयुरि
त्याशंकायाम् इमाः सोम्य नद्यः इत्यादिना यथा जलधरैरभोषितसागराकृष्य विसृष्टानां नदीनां रसा
त्मत्वेन समुद्रादागमनेऽज्ञानं एवं ब्रह्मणोऽस्थितानां सत्त्वादीनां तद्धेलत्वेणात्मदात्मनावस्थायो
स्थितावयमिति न ज्ञानमिति परिहारेण पुनस्तदेवोपदिश्य तथा सत्संपन्नो जीवस्य कारणभावाप
त्तौ समुद्रवीच्यादिवन्नाशशंकायाम् अस्य सोम्य महतो वृक्षस्येत्यादिना यथा वृक्षस्य परस्यादिनाऽच्छे
देऽपि सत्तावितानात् सजीववत्तथा सत्संपन्ने देहेऽपि लोहितदर्शनान्न जीवनाश इति परिहारेण प्रागुक्तमेवा
र्थं स्थापितं पुनः कथं सूक्ष्मात्मब्रह्मणः स्थूलजगदुत्पत्तिरिति शंकां न्यग्रोधफलमत आहरेत्यादिव
ट धानान्तर्गतसूक्ष्मरूपाद्वटोत्पत्तिवज्जगदुत्पत्तिसंभवेन निराकृत्य पुनरस्मिन्नेवार्थे स्थापिते पुनर्जे

सेनकेत्वे:

प्रनरूपवाङ्मनसि
लीनासती

३२

तिश्लोकद्वयेन बुभुत्सितः पिपासितोऽहं वागस्मि श्रोत्रमस्मि पश्यामि मन्ये बुभुक्ष इत्यनुभवात्प्राणादी
निप्रत्येकमहं तत्समुदायो वाऽऽत्मेत्यवाप्ततत्सकलसाक्षित्वालोच्य प्राणादिभिन्नोऽस्मि: तत्साक्षी
त्तोंश एवास्मि इति ये विदुस्तमित्यर्थः २९ ननु प्राणादिष्वप्यहमित्यात्मत्वानुभवात्कथं चैतन्यस्या
त्मत्वमित्याशंक्याह अत्र धीशब्देन चित्तमुच्यते प्राणादिचित्तपर्यन्ताः नात्मानः दृश्यत्वात् भौति
कत्वात्सावयवत्वात्मेदं बुद्धिविषयत्वात् सुषुप्त्यादावात्मनि सत्यपि तेषामदर्शनात् उपचयाप
चयधर्मवत्त्वाद्घटादिवत् किन्तु योऽत्र ज्ञोंऽशोऽहंप्रत्ययादिषु मेऽरहितः प्राणादिसकलसाक्षी तेषु व्य
भिचरत्स्वप्यव्यभिचारी विद्वान्: स एवाहमस्मि वशमीत्यादिप्रतीतिस्वरूपः स्फटिक इति वदन्ति

नाहं प्राणो नैव शरीरं न मनोऽहं बुद्धिर्नाहं नाहमहंकारधियौ च योऽत्र ज्ञांशः सोऽस्म्यहमेवेति वि
दुर्ये ते समा: २९ ॥ त्यागमुपपद्यत इति ये विदुस्तमित्यर्थः २९ ॥ तथा च भगवती छान्दोग्यश्रु
तिरुद्दालकश्वेतकेतुसंवादे स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमवि
ज्ञातं विज्ञातमिति एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तदेव कथं नु भगवः स आदेशो भवतीत्याश
ङ्कायां यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिके
त्येव सत्यमित्यादिना दृष्टान्तेनोपपाद्य तन्नोदाहृतोऽतिकं प्रपंचयितुं सदेव सोम्येदमग्र आसीदेकमेवा
द्वितीयमिति सजातीयविजातीयस्वगतभेदशून्यं सद्वस्तूपक्रम्य तदैके आहुरित्यसद्वादमाशं
क्य कथमसतः सज्जायेतेति तं प्रतिषिध्य सद्रूपस्य ब्रह्मणो जडविजातीयभेदाभावमुपपादयितुं
तदैक्षत बहु स्यां प्रजायेयेत्यादिना वियदादेः सर्वस्य जडस्य तत एव सृष्टिमुक्त्वा सजातीयभेदनि

ह०टी० ३१

०=१

सईश्वरः प्रतरेवैतत्तस्मेत्रएवममः प्रभृतयोमयासृष्टालोका

नेत्यादिना ईक्षणपूर्वकं तत एव लोकसृष्टिमुक्त्वा ततः स ईक्षतेमे नु लोका इत्यादिना कार्यकारणदेव
तानां सृष्टिमुक्त्वा ततो वैराग्यार्थं तासां देवतानामशनायापिपासादिमत्त्वे सारणीवपतनेदर्श
यित्वा ततोऽशनायादिनिवृत्तये अन्नमेतेभ्यः सृजा इत्यादिना अन्नसृष्टिमुक्त्वा तदानु विचार्य प्रा
णस्यैव तदन्नं प्रति भोक्तृत्वे प्रदर्श्य सृष्टानां तेषां कार्यकारणदेवतानां मीक्षप्रवेशं विना स्वस्व
कार्ये असमर्थत्वेन मूर्धसीमाविदारणेन ईश्वरस्य तत्र प्रवेशमुक्त्वा पुनस्तत्र प्रविश्य तादात्म्या
भिमानेन संसरतो जीवरूपमापन्नस्य परमेश्वरस्यानेन श्रवणेन कृतपुण्यपुञ्जपरिपाकवशा
द्विविदिषायां सत्यां यदि वाचाभिव्याहृतमित्यादिना वागादीनामात्मत्वनिराकरणपूर्वकमथ के
प्राणो वाहं वा चक्षुर्वा पाणीनि मनो वा बुद्धिर्वाहं व्यस्तस्तथापि समस्तः इत्यालोच्य त हे

जीवस्य स्त्रिविदास्मीति विचार्य तं संसारध्वान्तविनाशं हरिमीडे ३५॥ इमित्यात्मविचारमुपक्रम्य
तस्य त्रयः आवसथास्त्रयः स्वप्ना इत्यवस्थात्रयस्य मिथ्यात्वमुक्त्वा स एतमेव पुरुषमित्यनेन वागा
दिभ्योऽवस्थात्रयाच्च विविक्तं तत्सकलसाक्षिणं चिन्मात्रमादाय ब्रह्म ततममपश्यदिति तस्य ब्रह्म
त्वबोधनं जीवस्योक्त्वा पुनश्च एतमेवार्थं पुरुषो वा अयमादितो गर्भो भवतीति वेदान्तपादनपू
र्वकं कोयमात्मेति वयमुपास्महे इति वाक्येन पूर्वप्रपञ्चद्वारा प्रविष्टयोर्जीवप्राणयोः क्रियाश
क्त्यात्मकयोर्मध्ये कतरः स आत्मेति विमृश्य येन वा पश्यतीत्यादिचेतनस्यैव तत्पदार्थत्वं नि
श्चित्य तत एव प्रज्ञानेत्यादिना सर्वात्मकत्वं तदर्थं ब्रह्मोपदिश्य मन्त्रप्रतिष्ठाप्रज्ञानं ब्रह्मेति तयोरे
कात्म्याप्रपञ्चयामास इत्यैतरेयकश्रुत्या विचार एवं केनेषितरदविस्ताराभ्यां प्रतिपादिते विस्रस्तो

०—८
अयमयमात्मेति
इपीति तस्य तत्त्वाव
यं सकलसाक्षि
स्वरूपं प्रत्यक्षः

सौगर्भः प्रवे
शात् पूर्वम्

तिष्ठोकहृदये नवभुक्तितः पिपासितोहं वाश्मिस्थूलोमि पश्यामि सन्येवुद्ध्य इत्यनुभवात्प्राणादी
नि प्रत्येकमहंतत्समुदायोवाउतवापतत्सकलसमादिइत्यालोच्य प्राणादिभिन्नोत्तसिः तस्मात्ती
नोंशएवास्मिइतियंविडस्तमित्यर्थः २९ ननुप्राणादिष्वप्यहमित्यात्मत्वानुभवात्कथं चैतन्यस्था
त्मत्वमित्याशंक्याह अत्रथीशब्देन चित्तमुच्यते प्राणादिचित्तपर्यंताः नात्मानः दृश्यत्वात् भौति
कत्वात्सावयवत्वात्समेदंबुद्धिविषयत्वात् स्वप्नसुषुप्त्यादावात्मनिसत्यपि तेषामदर्शनात् उपचयाप
चयधर्मवत्त्वाद्घटादिवत् किंतर्ह्यत्रज्ञोंशोहंप्राणादिधर्मरहितः प्राणादिसकलसाक्षी तेषुव्य
भिचरत्स्वस्यमव्यभिचारी विद्वांस्तैः स एवाहमास्मि वक्ष्मीत्यादिप्रतीतिस्वरूपः स्फटिकइतिवज्ञा

नाहंप्राणो नैव शरीरं न मनोहं बुद्धिर्नाहं नाहमहंकारः धियोच योत्रज्ञोंशः सोस्म्यहमेवेति वि
ज्ञेयं न संशयः २९ ॥

त्याप्युपपद्यत इतियंविडस्तमित्यर्थः २९ ॥ तथा च भगवतीछान्दोग्यश्रु
तिः उद्दालकः श्वेतकेतुं संवादमुखेन उत तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमवि
ज्ञातं विज्ञातमिति एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञायत देव कथं नु भगवः स आदेशो भवतीत्याशं
क्य एवं केयथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिके
त्येव सत्यमित्यादिना दृष्टान्तेनोपपाद्य तन्नोदाहृष्टान्तिकं प्रपंचयति सदेव सोम्येदमग्र आसीदेकमेवा
द्वितीयमिति सजातीयविजातीयस्वगतभेदशून्यं सद्वस्तुउपक्रम्य तद्धैक आहुरित्यसद्वादमाशं
क्य कथमसतः सज्जायेतेति तं प्रतिषिध्य सद्रूपस्य ब्रह्मणो जडविजातीयभेदाभावमुपपादयितुं
तदैक्षत बहुस्यां प्रजायेयेत्यादिना वियदादेः सर्वस्य जडस्य तत एव सृष्टिमुक्त्वा सजातीयभेदं ति

०=१

स ईश्वरः पुनरेवेदं तत्र मे तु एवमम्भः अभ्रं तद्योमया सृष्टा लोकाः

ह॰ टी॰
३१

इत्यादिना ईक्षणपूर्वकं तत एव लोकसृष्टिमुक्त्वा ततः स ईक्षतेमे न्वित्यादिना कार्यकारणदेव
तानां सृष्टिमुक्त्वा ततो वैराग्यार्थं तासां देवतानामशनायापिपासादिमत्त्वं संसारित्वं प्रदर्श
यित्वा ततोऽशनायादिनिवृत्तये अन्नमेतेभ्यः सृजा इत्यादिना अन्नसृष्टिमुक्त्वा तदानुविचार्य प्रा
णस्यैव तदन्नं प्रति भोक्तृत्वं प्रदर्श्य सृष्टानां तेषां कार्यकारणदेवतानामीश्वरप्रवेशं विना स्व
कार्ये असमर्थत्वेन मूर्धसीमां विदार्येणेश्वरस्य तत्र प्रवेशमुक्त्वा पुनस्तत्र प्रविष्टस्य तादात्म्या
भिमानेन संसरतो जीवरूपमापन्नस्य परमेश्वरस्यानेन तत्त्वेन ज्ञानकृतपुण्यपुञ्जपरिपाकवशा
द्विविदिषायां सत्यां यद्विवाचाभिव्याहरतमित्यादिना वागादीनामात्मत्वनिराकरणपूर्वकमथ को
प्राणो वाहं वा चक्षुश्रवणादीनि मनो वा बुद्धिर्वाहं व्यस्तं वा अथापि समस्तः इत्यालोच्य त हो
जीवस्य त्रिविहास्मीति विचार्यतं संसारध्वान्तविनाशं हरिमीडे ३५॥ इत्यात्मविचारमुपक्रम्य
तस्य त्रयः आवसथास्त्रयः स्वप्ना इत्यवस्थात्रयस्य मिथ्यात्वमुक्त्वा स एतमेव पुरुषमित्यनेन वागा
दिभ्योऽवस्थात्रयाच्च विविक्तं तत्सकलसाक्षिणं चिन्मात्रमादाय ब्रह्म ततममपश्यदिति तस्य ब्रह्म
त्वबोधनं जीवस्योक्त्वा पुनश्च एतमेवार्थं पुरुषो वा अयमादितो गर्भो भवतीति वैराग्योपपादनपूर्
वकं कोऽयमात्मेति वयमुपास्महे इति वाक्येन पूर्वप्रपञ्चद्वारा प्रविष्टयोर्जीवप्राणयोश्चित्क्रियाश
क्त्यात्मकयोर्मध्ये कतरः स आत्मेति विमृश्य येन वा पश्यतीत्यादिचेतनस्यैव तत्पदार्थत्वं नि
र्धार्य तत एष ब्रह्मेत्यादिना सर्वात्मकमत्पदार्थं ब्रह्मोपदिश्य प्रज्ञाप्रतिष्ठा प्रज्ञानं ब्रह्मेति तयोरे
कात्म्यमुक्त्वा प्रपञ्चयामास सूत्रप्रणेतेरयं कथात्याविचार एवं केनेहविस्ताराभ्यां प्रतिपादितं विसृष्टो

०=६
अयमयमात्मेति
इत्यासितेमहरनाव
यंसकलहरीति मृ
सद्गुणप्रमः

०=६
तानीगर्भभवे
पातः सर्वम्

३१

तदुक्तं भाष्यकारेण आकाशो परमे व्योम्नि गुहायामिति
तस्मानंदो न स्यादिति ०=

कोह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयातीति तैत्तिरी
यकश्रुतिः अस्या अयमर्थः यत यदि एष आकाश आसमंतात्काशते इत्याकाशः स्वेन स्व
यद्वा आकाशवदसंगत्वविभुत्वादिधर्मयोगादाकाशश्चिद्वान् आनंदः स्वस्वरूप आत्मा
न स्यात् तदा को हि पुरुषः अन्यात् अपानचेष्टां कुर्यात् प्राण्यात् प्राणव्यापारं कुर्यात् उप
लक्षणमेतत्सकलकार्यकारणव्यापारं कः कुर्यादित्यर्थः एतावच्चेतनप्रवृत्तेश्चेतना
धिष्ठाननिबंधनत्वदर्शनात् उः स्वसति प्राणवियोगादेहे वदृष्टेरिति भावः तदेवाह एष ह्ये
वाकाश एव हि यस्मादानंदयाति आनंदयाति अतः सर्वो जनः प्राणिति चापानिति यदि प्राणि
को वास्यान्यात्मा न स्यादयमेव हि देवानंदः प्राणिति चापानितीति चेति इत्यस्ति वेदवक्तु
पपद्माश्रुतिरेषा तं संसारक्षांतविनाशं हरिमीडे २४ ॥ नाकदाचित्स्वरूपानंदोभिव्य
क्तो न स्यात् अतिर्हि सहसंसारदुःखसोढापि जीवनप्रार्थं नान स्यात् तदाशयैव जीवनमा
शास्ते सर्वो जन इत्यनया श्रुत्यापि चेष्टाजीवनहेतुत्वेन चिद्रूपानंद आत्मा साध्यत इत्याह को
वाह्येति आत्मनिकार्यकारणसंघाते अयं चिद्रूपानंद आत्मा यदि न स्यात् नहि कोप्येव पु
रुषः अन्यात् प्राणनादिव्यापारं कुर्यात् जडप्रवृत्तेश्चेतनपूर्वकत्वाज्जीवनस्यानेदहे चकत्वाच्च
इत्यर्थः अत एव हि देवानंदः परमात्मा जीवभावापन्नः प्राणिति चापानिति चेतीति एवं देहत
त्वेन यस्यास्तित्वमुपपन्नमेष तैत्तिरीयकश्रुतिः वक्तीत्यर्थः २४ एतरेयकश्रुतिर्हि भग
वती आत्मा वा इदमेक एवाग्र आसीदित्यद्वितीयं ब्रह्मोपक्रम्य तस्याद्वितीयत्वसिद्धये सएत

स्वरूपानंदा पायेव

ह०टी
३०

स्वप्रकाशविज्ञानात्मकस्वस्वरूपेणैव भासयितारं केन करणेन विजानीयात् पुरुषः करणस्य म
नआदेः सर्वविषयत्वेन ज्ञातृत्वविषयत्वभावादित्यर्थः करणस्यापि स्वतो ज्ञातृत्वं नास्ति किंत्वे
तन्यबलेनैवेत्याह येनेत्यादिना इदं सर्वं जगत् यस्मात् चैतन्येन विजानाति पुरुषस्तं केन
विजानीयान्न केनापीत्यर्थः विज्ञातेर्बुद्धेर्विज्ञातारं वाह्यरेन विजानीयात् विज्ञानेन न विष
यीकुर्यात् इति श्रुतेः प्रति याज्ञवल्क्यवचनं एवं वाक्यं मैत्रेयी प्रति नित्यैवेति उपपत्तेवगम्यया
तद्येत्यादेस्त एतच्छ्रुत्यविरोधोर्थः एवं सक्रममेव द्रष्टव्यम् उपास्यत्वमपि श्रवणमननध्यानादिशास्त्रवि
प्रवाहव्यापित्वमेव न तु तत्प्रति विवेचनत्वविषयत्वमिति द्रष्टव्यम् १२ न केवलं सक्रमश्रवणे

कोऽयं देहे देव इतीत्थं सुविचार्य ज्ञाता श्रोता मन्ता द्रष्टा चैव हि देवः इत्यालोच्य ज्ञां
शइहास्मीति विदुर्यं तं संसारध्वान्तविनाशं हरिमीडे १२ ॥ वात्मनोज्ञातृत्वसिद्धिः

किं तु श्रुत्यनुकूलतर्केणापि ज्ञेयघटादिवदनात्मत्वेन ज्ञातृत्वायोगात् सिद्ध्यती
त्याह कोऽयमिति देहे कार्यकारणसंघातमध्ये कोऽयं देवः को वा ज्ञाता किं शरीरमन इन्द्रिया
णि अथ प्राणः यद्वा अन्तःकरणमिति इत्थमनेन प्रकारेण सुविचार्य सुष्ठु सम्यक् विचार्य दे
हादीनां वेद्यत्वेन घटादिवत् ज्ञातृत्वाभावे निश्चित्य पश्चात् परोक्षतया नित्यं भासमानः देवः स्वप्र
काशचिद्रूपत्वादेव ज्ञाता श्रोता मन्ता द्रष्टा चेत्यालोच्य आलोचनेन ज्ञानांश इह एषु देहादिषु मध्ये
ज्ञांशः ज्ञस्तत्त्वांशो अस्मीति यं विदुः स्वमित्यर्थः अदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञा
तेत्यादिश्रुत्या सर्वदर्शनादिविषयस्यैव द्रष्टृत्वाद्युपपादनादिति भावः १२ ॥ ॥

देवतेत्यादिश्रुतिभिः परस्परव्यतिहारेणोपास्यत्वेन प्रतिपादितं विलङ्घ्नोति योऽयं देहे
शरीरे चेष्टयिता चेष्टाहेतुः प्रवर्तते जडदेहचेष्टालिङ्गगम्यायतनं देहं तत्वेन चेतनो वर्तते अस्या
स्यतस्य चेष्टाहेतुत्वमुपपादयति अन्तःकरणस्थ इति अन्तःकरणोपाधिक इत्यर्थः अस्यावतः
करणोपहित एव सूर्यं चामीं तापयिता तपतः सूर्यस्य प्रयोजककर्तृत्वेनान्तर्यामी भवति
यश्च सूर्यं तापयिता सोऽहमेवास्मीति अनेन प्रकारेणात्मैकोपासनयायं परस्परव्यतिहारे
णात्मैकत्वचिंतनेन यमीशं विदुस्तमीडे इत्यर्थः २१ इयास्मिन्नभिधानेन वेद्यत्वाशंकाप्रामा
मपाकरोति विज्ञातेति ततः परमार्थस्वरूपस्य परमेश्वरस्य विज्ञातृत्वांशः विज्ञानस्य स्वरूपता

योऽयं देहे चेष्टयितान्तःकरणस्थः सूर्यं चामीं तापयिता सोऽस्म्यहमेव इत्यात्मैकोपासन
यायं विदुरीशं तं संसार ॥२१॥ विज्ञाता शोध्यस्य ततः शक्त्यापि इद्धो बुद्धिबुद्ध्यात्यत्र वहिर्बो
ध्यपदार्थान् नेवान्तःस्थं बुद्ध्यादिबोधयितारं तं संसारध्वान्तविनाशं हरिमीडे २२॥

नस्य अंशस्वांशः ब्रह्मणो निरवयवत्वात् शक्त्यापि इद्धो ब्रह्मणो विद्याशक्तिप्रतिबिंबितो जीवः
बहिरूपलक्षणमेनश्च बोध्यपदार्थान् बुद्धितद्धर्मान् घटपटादींश्चान् जगाति बुद्ध्यादिज्ञानातिबुद्धि
लक्ष्य अन्तःस्थस्वस्थान्तर्वर्तमानं बोधयितारं बाह्यपदार्थबोधस्वरूपाः बोद्धृत्व प्रदातारं चैतन्यस्य सर्व
धविनाशकयाः स्वस्याबोद्धृतानुपपत्तेः स्वयंप्रकाशचिद्रूपं न तु ज्ञातिज्ञानातीत मित्यर्थः अत्र
श्रुतिः विज्ञातारमरे केन विजानीयात् येनेदं सर्वं विजानाति तं केन विजानीयात् नहि विज्ञा
तेर्विज्ञातारं विजानीयादित्यादिः अस्य चायमर्थः अरे मैत्रेयि विज्ञातारं वाह्याभ्यंतरपदार्थानां

ह०टी०
२९

योऽस्तमयः पुरुषः अयमेव सः पृथिव्युपाधिकः पुरुषः अयं शरीराख्यमाह यो यः स्वात्मेति शा
त्मा स्थूलशरीरोपाधिकः अध्यात्माधिदैवतोपाधिभेदाद् द्वयोर्भेदः न स्वरूपतः इत्यर्थः इदमु
पाधिद्वयोपहितं चैतन्यमस्तमविनाशितत्वः इदं तु सजरामरणाभूतमतः परं तदुपाधिद्वयोप
हितं चैतन्यमेव सर्वं सकलजरान्तं तदतिरेकेण सर्वमसत्यमित्यर्थः एवं सर्वेषु पर्यायेषु द्रष्टव्यम् अ
परपर्याये तु स्वर्गे तदुपहितयोरेकत्वं ततः अशिवाद्युपहितयोरेकत्वं ततो वायुप्राणोपहितयो
रेकत्वं ततः सूर्यचक्षुरुपहितयोः एवं सर्वपर्यायेषु अध्यात्माधिदैवतोपहितद्वयोरात्मैकत्व
कथनपरत्वेन यन्मन्त्रवर्णात्मकं ब्रह्मप्रतिपादितं तद्विस्मृतमिदानीं स्मरामीति मधुब्राह्मणवाक्यैः यच्चा

द्वैतैकत्वं यस्य मधुब्राह्मणवाक्यैः कृत्वा शक्रोपासनमासाद्य विभूत्या योऽसौ सोऽहं सो
ऽस्म्यहमेवेति विदुर्यं तं संसारध्वान्तविनाशं हरिमीडे २॥

यमस्यामित्यादिभिः प्रतिप
यो यमध्यात्माधिदैवतेयत्तं द्वैतैकत्वमन्तके द्वन्द्वानां पृथिवीशरीराग्निवाय्वाद्युपहितानामद्वै
तं कथितं तत्कृत्वा गृहीत्वा तं ब्रह्मणा प्रयुक्तया विभूत्या ईश्वरभावं प्रतिपन्नाः शक्रोपासनेन शक्रे
ण इन्द्रेण स्वस्य उपासनमासाद्य प्राप्य यस्तत्त्वं ब्रह्मणो विद्यात् स एवायमस्तत्त्वं शक्रेन्द्र
र्थः इति श्रुतं तं देवं पश्यन् ब्राह्मणा ईश्वराभेदेन देवरूपास्यत्वं प्राप्ता इत्यर्थः योऽसौ सर्वात्मा
परमेश्वरः सोऽहं योऽहमस्मि बुद्ध्यादिसाक्षी सोऽहमस्मि परमेश्वर इति परस्परं ज्ञातिहारेण ये परमेश्व
रं विदुः तादात्म्येन भवंति तमीडे शक्रोपासनमासाद्य यं विदुरिति प्रयोगात् अस्य त्वमिदावस्थापित्वं प्रती
तिवद्द्रष्टव्यम् २॥ तद्यथाहं सोऽसौ योऽसौ सोऽहं एवाहमस्मि भगवो देवते अहं वै त्वमसि भगवो २९

स्य तत्त्वाचान्येषामाभासानामपि एवं सत्किं ज्ञानानि देहे वा आत्मनामात्मविदुः यः संसार
दशायां तस्य भ्रान्त्या सर्वदेहिनो आभासानां च संसार एव दृष्टं किं नश्येवचेति अतो ब्रह्मादिस्तंबांत
प्रत्यग्भूते सर्वाधिष्ठाने ब्रह्मात्मत्वेन ज्ञानात् ततः पृष्ठस्य स्वदेहे परदेहे वा न संसार इति भावः तत्र
ब्रह्मतत्त्वज्ञाननिवृत्तस्यापि संसारस्य कदाचित्पुनरुद्भवः स्यात् सुषुप्तिप्रलययोर्निवृत्तस्य प्रबोधेन पु
नरुद्भवदर्शनादित्याशंक्याह यस्मिन्नित्यादिना यस्मिन्ब्रह्मणि लीनाः उपाधिपरित्यागेन ए
कीभूता इह संसारे पुनर्जन्म न लभन्ते तेन ज्ञानेन निवृत्तमित्याह न स पुनरावर्तते नेतरे
न्यादिश्रुतेः सुषुप्त्यादौ संसारकारणाज्ञानानिवृत्तेरेव च तत्र ज्ञानेन तन्निवृत्तेस्तदा ज्ञानज्योति
कयोर्वैषम्यमिति भावः २९ बृहदारण्यके चतुर्थाध्याये मधुब्राह्मणे एवं श्रूयते इयं पृथिवी
सर्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः
पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव सः योऽयमात्मेदममृतमिदं ब्र
ह्मेदं सर्वं इमा आपः अयमग्निः अयं वायुः अयमादित्यः एवं बहवः पर्यायाः श्रूयन्ते तत्रायमथ
र्यीयस्यायमर्थः इयं महापृथिवी सर्वेषां भूतानां प्राणिनां मधु मधुवदुपभोग्यं यथा मातृका
णामेकं मधुपटलं तद्वत्तथा अस्यै पृथिव्यै अस्याः पृथिव्याः सर्वाणि भूतानि मधु अनेन पृथि
व्या भूतानां च परस्परमुपभोग्यत्वेन परस्परं कार्यकारणत्वमुक्तं ततस्तदुभयं मिथ्येत्यर्थः तदुभयोपादि
नं पृष्ठस्यैकत्वमाह यश्चायमित्यादिना यश्चायमस्यां पृथिव्यां तेजोमयश्चैतन्यप्रकाशरूपः अमृतमयः
उपाधिनाशेऽपि अविनाशी पुरुषः यश्चायमध्यात्मं शारीरः स्थूलशरीरोपाधिकस्तेजोम

हृ० २८

रिहितीयः ततसोऽज्ञानदोषहृद्यं किं तत्स्वयं ब्रह्मतज्ज्ञानं संसारनिवृत्तिवदन्येषामपि तज्ज्ञानकाले
तन्निवृत्तिप्रसंगः स्यादित्याशंक्य समाधिचेतन्यवत्स्वरूपान्तरचेतन्यस्यापि ब्रह्मत्वं जानातीति द्वितीय
पदमवलम्ब्याह अनेकशरीरस्थमनेकेषु शरीरेषु देवनरतिर्यगादिषु साक्षितया स्थितं देहमंत्र
चैतन्यमेकीकृत्य परमात्माभिन्नतया ज्ञात्वा ततः सर्वात्मभूतेयं परमात्मानं विज्ञाय देहेन्द्रिया
दिसाक्षिप्रत्यगभिन्नतया अपरोक्षीकृत्य इहास्मिन्नेव देहे आशु तत्कालमेव स एव सर्वात्मभूतः
परमात्मैव भवतीत्यर्थः अत्र श्रुतिः यस्त्वं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् सूक्ष्मात्सूक्ष्म
तरं नित्यं तत्त्वमेव त्वमेव तत् ब्रह्म वेद ब्रह्मैव भवति तथा यो देवानां प्रत्यबुध्यत स एव तदभव

एकीकृत्यानेकशरीरस्थमिमं तं ये विज्ञायेहैव स एवाशु भवंति यस्मिंल्लीना नेह पुन
र्जन्म लभंते तं संसारध्वांतविनाशं हरिमीडे २९ ॥ ऋषीणां मध्ये स एव तदभवदिति
अत्र हिमवत्यो श्रोतः प्रत्यगात्मानं मनुष्यब्रह्मादिसर्वपर्यंतं प्रत्यग्भूतं सकलजगदधिष्ठानं ब्र
ह्मवेदेवाध्यातेन च सर्वेषां प्रतीचां ब्रह्मतज्ज्ञाने स्वास्मिन्निव परेष्वपि संसारनिवृत्तिप्रसंगदोषः
किं ब्रह्मविद्दृष्ट्या तन्निवृत्तिरापाद्यते उत परदृष्ट्या नाद्यः परेषामात्मनो ब्रह्मत्वज्ञानाभावे
न तद्दृष्ट्या तेषु संसारनिवृत्तिः ब्रह्मविद्दृष्ट्या तन्निवृत्तिरिष्टैव यदा ब्रह्मवित्स्वदेहेन्द्रियादिसा
क्षिणमसंगं निर्विकारं संसारिब्रह्मत्वेन पश्यति तदा परदेहेन्द्रियादिसाक्षिणमपि तथैव पश्य
ति तदुक्तं ब्रह्मगीतायां स्वशरीरे यदा देहे समं निश्चिनुते दृढं अथ यो वा न जायेतेत्यमृतास्तु भ
वंतीति वहामन्त्रो महाविद्वान्नरस्यादिभेदतः एक एव सदा भाति चेतनः समवत्स्वयं अतः २८

अतोऽस्मादौपनिषदात्मज्ञानात्कर्मनैरपेक्ष्येण मोक्षः सिद्ध इति वादरायणाचार्यो मन्यते कुतः तरति
शोकमात्मविद् स ब्रह्म वेद ब्रह्मैव भवतीत्यादिः केवलविद्याया मोक्षहेतुत्वबोधकश्रुतिभ्यः

येथद्वपावोनेनवाक्यस्य च परिमाणं स्यादेन प्रदर्श्य ततस्तृतीयपादेन पुरुषार्थोऽतः श
ब्दादिति वादरायणः इति प्रथमाधिकरणेन ब्रह्मज्ञानस्य कर्मनिरपेक्षस्यैव मोक्षसाधन
त्वं प्रसाध्य तस्य च उत्पत्त्यावान्तरसाधनेसाश्रमसगुणत्वादिकं बहिरङ्गसाधनं यज्ञादिकं च
प्रदर्श्य ज्ञानसाधनमनुतिष्ठतश्चास्मिन्प्रतिबन्धे ऐहिकफलमिति च तस्मिन्नेव चैत्यन्तसा
धिकरणेनोक्त्वा तृतीयाध्यायं समापयामास ततश्चतुर्थे प्रथमपादेनावृत्तिरसकृदु
पदेशादित्यधिकरणेन ब्रह्मसाक्षात्कारपर्यन्तं श्रवणाद्यावृत्तिं कर्तव्यतया प्रदर्श्य
आत्मेति तूपगच्छन्ति ग्राहयन्ति चेत्यधिकरणेन वाक्यार्थं च जीवब्रह्माभेदं सम्यक् प्रदर्श्य
ततस्तु गुणानां कर्मणामनुक्तिमभिधाय द्वितीयपादेन पुनस्तस्यैव उत्क्रान्तिप्रकारमुप
वर्ण्य तदनन्तरं तृतीयेन उत्तरमार्गचिन्तापूर्वकं तस्यैव कार्यब्रह्मप्राप्तिं प्रदर्श्य निर्गुणब्रह्म
विदस्तु गत्युत्क्रान्ती प्रतिषिध्य ततश्चतुर्थेन निर्गुणविद्याफलं च ब्रह्मात्मनावस्थानरू
पं वर्ण्य सगुणविद्याफलं च ब्रह्मलोके ऐश्वर्यमुपपाद्य तेषां सगुणविदां ततोऽनावृ
त्तिः शब्दादिति ब्रह्मणोपदेशेन मुक्तिं प्रदर्श्य उपरराम अयं सर्वं वादरायणप्रणीतेन
तेन मीमांसायां पिपीलिकाया भेदवादिभिर्नाभ्युपेतं तदेतत्कन्दनाचेलपनकावि
त्तिरिति २८ ननु किमयमधिकारी स्वदेहेन्द्रियादिमात्रविचेतनस्यैव ब्रह्मतेजानीयात
उत सर्वशरीरादिसाक्षिणमपि आत्मेति पुरुषान्तरं चैतन्यपरमात्मेति जानाति उतक
स्मिन्नपि तेनाद्यः द्वैतप्रसङ्गात् न द्वितीयः ततस्तेनेनसमाधिकल्पितत्वप्रसङ्गात् य

उत्तमपुरुषः ऽहं ब्रह्मास्मीत्यादौ परमेश्वरस्यात्मत्वेनैव ग्र
हीतत्वात् ... ऽहमस्मीत्यादौ ह्यात्मत्वेनैव ज्ञातव्यमुक्तम्
पगच्छन्ति पश्यते आत्मेत्यादिना त्मत्वेनैव ग्राहयन्ति च

हं॰टी॰
२२

ण्युपपाद्य पश्चादीक्षतेर्नाशब्दमित्यधिकरणेनानुमानतः प्रधानकारणवादं दूरीकृत्य ब्रह्मण एव
सर्वेषां वेदान्तानां गतिसामान्यं च प्रतिज्ञाय तदेव गतिसामान्यमानन्दमयोऽभ्यासादित्यारभ्य प्र
थमद्वितीयतृतीयपादेष्वर्थान्तरशंकानिरसनपूर्वकमुपपाद्य चतुर्थपादे केचिदित्यधिक
रणैः प्रधानस्याशब्दत्वप्रपञ्चप्रमाणोपन्यासानन्तरं तच्च ब्रह्मप्रकृतित्वेन तत्तानोतिमिन्न
त्वेने च प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादित्यधिकरणेन व्यवस्थाप्य प्रथमाध्यायं समाप
यामास तदनन्तरं च द्वितीये प्रथमपादेन स्मृत्यनवकाशदोषप्रसङ्ग इति सांख्ययोगवैशेषिकादिस्मृतिविरोधपरिहा
रैस्तज्ज्ञापितसकलतर्कविरोधमद्वैतसमन्वयस्य सम्यक् परिजहार तदनु द्वितीयपादेन सां
ख्यवैशेषिकनैयायिकपाशुपतपाञ्चरात्रादिपक्षाणां वेदमूलत्वाभावेन तत्र दुष्टत्वाभासक
लितत्वं स्फुटं केचिदित्यधिकरणैः प्रदर्श्य तत्स्थैर्यं च प्रमाणयुक्तिशून्यतया प्रतिविधेय
ततः तृतीयपादेन भूतभोक्तृश्रुतीनां च तत्त्वेन लिङ्गदेहश्रुतीनां च परस्परविरोधं समपाकरो
चकार एवं द्वितीयाध्यायेनाद्वयसमन्वयविरोधे प्रतिक्षिप्ते तृतीयाध्याये प्रथमपादेन संसा
रिणः स्वर्गनरकगमनागतिनिरूपणपूर्वकं संसारदोषविवेचनेन वैराग्यमधिकारिविशेष
णीकृत्य तदनु द्वितीयपादेन वाक्यार्थज्ञानोपायेन ज्ञानाय त्वंपदार्थं विविच्य त्वंपदा
र्थं प्रदर्श्य तत्पदार्थमपि सकलद्वैतप्रपञ्चनिरासपूर्वकं विविच्य प्रदर्शयामास ततः तृती
यपादेन विद्याभेदाभेदाभ्यां गुणोपसंहारानुपसंहारौ प्रदर्शयन् विविधरूपाणां वाक्यानि २२

इत्यादीनि श्रवणावृत्तिः शब्दादनावृत्तिः शब्दादित्यंतानि ब्रह्मसूत्राणि तत्र श्रुति मूलकारिकायां
लोभसम्यग्विचार्य यत्नात्तर्केण उपलक्षणमेतत् प्रमाणेन चावापितेनैतत्तत्त्वं तत्त्वं तांतर विद्धि
तेजाणो देहाद्यहंकारपर्यंतानामनेनानात्मपिव्याद्यव्याहृतानां बाह्यानां च तत्तत्त्वेतयोनी
वेश्वरस्वरूपयोश्च विवेकं ये विंदति ते तद्रूपापत्तिनिराकरणेन शोधितपदार्थद्वयविद्धि रित्यर्थः
पुरुषाख्यः त्रिविधपरिच्छेदशून्यतया हृतानेन पुरुषरूपात्व्याप्यस्य परमात्माश्च ब्रह्म
श्रेत्रै वदेहेंद्रियसंघाते तत्त्वालो प्रत्यक्षेण लभ्यः विषयाणामेषणाकः तद्वेदनप्रकारमेवाह
योहमित्यादिना योऽहं देहेंद्रियादिसाक्षी सोऽसौ परमेश्वरो यश्च परमेश्वरः सोऽस्म्यहमेवेति यो वि
युक्ता लोऽश्वामेव चास्यत्र हि लभ्यः तत्त्वं तत्त्वं तत्त्वं तत्र विद्धिः पुरुषाख्यः योहं सोसौ
सोऽस्म्यहमेवेति विद्वद्यं ते संसारबंधं न विना शं हरिमीडे २८॥ ३: प्रत्यगात्मनो श्रोतिसि
द्धाब्रह्मत्वव्याहृत्तये ब्रह्मणश्चारोपितपरोक्षत्वनिवृत्तये च परस्परस्य तिहारेणयं विडः रित्य
र्थः तत्त्वमेवत्वमेव तदित्यादिश्रुतेः अयं भावः सूत्रकारोपि भगवान्बादरायणः अथातो ब्र
ह्मजिज्ञासेति त्रिविधपरिच्छेदशून्यप्रत्यगभिन्नब्रह्मणो मुमुक्षुपुरुषविचार्यत्वं प्रतिज्ञाय जिज्ञा
स्य ब्रह्मणः किंलक्षणं किंप्रमाणमित्याकांक्षायां जन्माद्यस्य यतः इति सूत्रेण लक्षणं शास्त्रयो
निमित्यादिनेन सूत्रेण प्रमाणं चोपन्यस्य शास्त्रस्य कार्यपरत्वेन कथं सिद्धब्रह्मपरत्वमित्याशं
कायां तत्तु समन्वयादिति सूत्रेण कार्यपरत्वनिरासपूर्वकं सिद्धब्रह्मपरत्वं बहुविधानेकन्या

ह॰टी॰
२९

शेषमसत्स्वरूपं स्वप्नाभमसत्यविषयं ॥ २१ ॥ एवं चैवं नित्यसुखबोधघनानावनेनेमाया
तदुपहितः प्रियत्वादिनाव भाति न च जीवः शिवादन्यो यो भुंक्ते कर्मणां फलं भेदाभावाच्चैव त
स्यानेककर्मफलमर्हति अतः सर्वजगत्साक्षी विश्वरूपः परमेश्वरः अद्वितीयो महानंदः क्रीडया भो
गमर्हति जीवरूपेणावस्थितो यः क्रीडति ॥ २२ ॥ न च जीवः सदाशंभुः सत्यमेव न संशयः सत्या
सत्यस्य साक्षित्वात्सदा सच्चिन्मात्रत्वेन तया प्रमाणसिद्धत्वाद्धेतोर्भेदाभावान्नवर्षम इत्यादौ सर्व
त्र शिवविष्णुगणेशसूर्य्यहेतो विष्णुः प्रत्यगभिन्नः प्रतिपादित इत्यभिप्रेत्याह यो विभुः परमा
त्मा प्रकृतिस्थः अविद्यातत्कार्येषु प्रतिबिंबिततया तेष्वनुगतो जीवभावमाप्य गतवान् पंचभिः प
रैः विषयद्वारभूतैरिंद्रियैः भोग्यपदार्थान् शब्दादीन् जगत्सु सदा भुंक्ते उपलभते यश्च ते
ष्वेते प्रत्येकं करणोपाध्यादिषु बहुधा अप्स्वनेकपात्रस्थितासु चंद्र इव बहुधा दृश्यते
तमीडे ईश्वरमर्थः तदुक्तं एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते
जलचंद्रवदिति उक्तोऽस्यार्थः ॥ २३ ॥ ननु सर्ववादिनामद्वैतमेव परमार्थमवलम्ब्य ते युक्तिभि स्त्वनुसारे
श्च बहुभिस्तदेवोपपादयंति तदेव सर्वैरनुभूयते च श्रुतिमापद्वैतानुगुण्येनैव योजयंति
भवानेक एव तदद्वैतं परमार्थं ज्ञात्वा नो वा कुप्रतिपन्नवान् तत्त्वस्यैव कथं विश्वासः स्यादि
त्याशंक्य न वादिवचनैकवेवस्तुनिर्णयप्रयोजकं किंतु प्रमाणयुक्तिबाहुल्यमेव तत्तु सर्वथा
नो मत्स्वेवत्वस्यैतत् एकस्यरूपविषये प्रतिवादिभिर्विनमर्दित प्रमाणयुक्तिबाहुल्यं चास्म
त्पक्ष एव तत्र च प्रमाणयुक्त्याभासबाहुल्यं तच्च सर्वज्ञभगवद्बादरायणप्रणीतब्रह्मसूत्र
उपर्यालोचनेनातिस्फुटं ज्ञातुं शक्यत इत्यभिप्रेत्याह व्यासवचांसि अथातो ब्रह्मजिज्ञासा २९

वकाशादोषस्य प्राबल्यमभिप्रेत्य स्वतः सिद्धसर्वज्ञश्रीभगवदीश्वरस्य तावपि स्वहृदि तमेव परमा
र्थं निरूपितमित्याह गीतासु स्पष्टं ब्रह्म परमात्मा मित्यादिषु श्रुतमतः तत्त्वं सर्वव्यापकं ब्रह्म स्व
रूपं विधिना तद्विद्धि प्रणिपातेन नम्रत्वेन दृष्ट्वा आचार्येभ्यो नानागुर्व्या भक्त्या महत्या भक्त्या श्र
यव्यतिरेकाभ्यामात्मानात्मविषयाभ्यां तत्पदार्थशोधनरूपाया भक्तिर्भजनं तेन यास्त्वहमित्यत्र
वेद्यानात्मांशप्रहाणेन त्यागेन चैतन्यमात्रं हृदिस्थं तु होमाति तेन स्थितमात्मत्वेनोपलभ्यत
योऽस्वदृश्यत्वयोरेकलक्षणत्वेन पकोधातो अत्रानुभूयमानप्रत्यगभिन्नेतास्मिन्तत्त्वे स्वहम
स्मीत्यभेददर्शनेन ये विदुः तमित्यर्थः ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते सर्वत्रगमचि
न्त्यं च कूटस्थमचलं ध्रुवं क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञा

दृष्ट्वा गीतास्वदृत्तत्त्वे विधिमाश्रिभक्त्या गुर्व्यालभ्यद्हृदिस्थे हृषीमात्रे ध्यानात्तस्मि
त्स्वयहमित्यत्र विदुर्ये ते संसाः २९ क्षेत्रज्ञं त्वं प्राप्य विभुः पंचमहाविर्योभोक्तेजस्व भोगप
दार्थाः प्रकृतिस्थः क्षेत्रे क्षेत्रे पिण्डवदेकोवकधारस्त्वं तेसंसारध्वान्तविनाशं हरिमीडे २८

त्वामृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते इत्यध्यायसमाप्तौ सर्वभूतेषु येनैकं भावम
व्ययमीक्षते अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकमित्यादौ सर्वत्र गीतासु ब्रह्मणोऽस्य
वाद्वितीयत्वप्रत्यगभिन्नत्वादिकं सम्यक्प्रतिपादितमिति भावः २९ स्वकृतविविक्तयोनिषु विश
न्ति विदेहत्वतयान्तरतमतः प्रकाश्यनलवत्स्वकृतानुकृति अथ वितथास्वनुभवितथं तत्त्वथा मस
नविरजं धियोऽन्वयं त्वामिविपश्यत्वपकारसम एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योति
रनंतत्मर्थ्यः नित्यः क्षरोऽजस्त्वं सुखो निरंजनः पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः तस्मादिदं जगद

शशविषाणज्ञानैः

ह॰ टी॰
२५

मोनास्तीतिकृतः उभयस्याप्यानंत्यादेव न च तस्य सर्वज्ञत्वव्याहतिः स्वरूपस्य तत्त्वायामसत्वात्
न च शशविषाणाज्ञानेन तस्यासर्वज्ञत्वमिति एवमपि सर्वं खल्विदं ब्रह्मेत्यत्र श्रुतौ श्रुतिविहिताश्चा
र्थैः कथंचित्सर्वाधिष्ठानत्वेन निरुक्तं यस्य पारमार्थिकं रूपं कथमित्याकांक्षायामाह तज्जलादि चेष्टते
त्वादिति तत्र श्रुतौ तज्जलानीति पदद्वयेन यत इदं जगज्जातं ततो जायते लीयते अनिति
च इत्येवमर्थकेन श्रुत्यन्तरेणाभेदमद्वैतं गुरुतल्पमिदं कार्यजातं तत्तत्तत्वात्तल्लयत्वात्तदनन्यत्वाच्चाभि
हेतो प्रपंचस्य न्नं ब्रह्मणोऽभेदेनालब्धसत्ताकं ततस्तदनन्तं तदधिष्ठानभूतं वस्तुतो निष्प्रपंचसच्चिदानंदाद्वयं ब्रह्मै
व पारमार्थिकमित्येवं निरुक्तं निरूपितं तत्त्वमसीत्यर्थः २५ ॥ नन्वेवं ब्रह्मणो निखिलजगदधिष्ठान
तया अद्वितीयत्वे प्रत्यगभिन्नत्वे च सर्वज्ञभगवत्कपिलादिस्मृत्यनवकाशप्रसंगः तासु हि स्मृ
तिषु प्रधानादेः कारणत्वं जीवपरयोर्जीवानां च परमार्थतो भेदो जगतः परमार्थत्वमित्येते
अर्थाः प्रतिपाद्यंते न च तासां स्मृतीनां निरवकाशत्वयुक्तमंगीकर्तुं सर्वज्ञकपिलादिप्रणीतत्वा
दित्याशंक्य विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति स्मृत्युक्तेः श्रुतिस्मृत्योः परस्परविरोधे स्मृतेः
प्रमाणमनपेक्षं अनंगीकार्यं असति हि विरोधे अनुमानं स्मृतिः प्रमाणमिति जैमिनिना प्रतिपा
दितत्वात् श्रुतिविरोधेन तासामप्रामाण्यस्पष्टत्वात् श्रुतेरपि स्मृतिविरोधं शंकमानानां स्मृत्य
नवविरोधोपन्यासेनैवाग्नेरदाप्स्यामीति मत्वा नः बहूनां स्मृतीनामिह किंचमनुरवदत्तद्भेषज
मित्यादिश्रुत्यवगतमाहात्म्यसर्वज्ञमन्वादिप्रणीतानां जीवपराभेदजगन्मिथ्यात्वप्रतिपा
दकानामुपनिषन्मूलत्वेन तुल्यबलवतीनां व्याकुलतरस्पष्टतरबहुलत्वकोटिहीनानाम

विविधासृष्टिः

न सोअंग वेद यदि वा न वेदेति अस्यचायमर्थः इहास्मिन्संसारमंडले कः पुमान् अद्धाति
शयेन वेद जानीयात् प्रवोचत् प्रब्रूयात् कुतो हेतोरियं विसृष्टिः सृज्यत इति सृष्टिः अनुभू
यमानमिदं सकलं जगत् आजाता आसमंतादुत्पन्ना कुतः कस्माद्धेतोः स्थितिमनुभवति तं को
वेदेत्यर्थः देवा महाप्रभावास्तज्जानंतीत्याशंक्याह अर्वागित्यादिना अस्य परमेश्वरस्य विसर्ज
नेन हेतुना अस्येति कर्त्तरि षष्ठी अनेन परमेश्वरेण विसृष्टत्वात् देवा ब्रह्मादयः अर्वाचीना अ
तो न तेषां सर्वं तत्परिज्ञाने सामर्थ्यमित्यर्थः अथैवं सति यत इदमाबभूव तं परमेश्वरं को
वेद न कोपीत्यर्थः इदमेव परमेश्वरस्य दुर्विज्ञानत्वं प्रपंचयति उत्तरो मंत्रः इयं विसृष्टिर्यतः

यस्या नेकोसात्मविभूतेः परमार्थे सर्वं खल्वित्यत्र निरुक्तं रूपातिविशिष्टिः तज्ज्ञादिवाद
ध्वितरंगाभ्रमभिन्नं तं संसारध्वांतविनाशं हरिमीडे २५ ॥ कारणादाबभूव यदि वा ।

अथवा यो दधे जगद्धारयति यदि वा प्रलयकाले न दधे न स्थापयति तं को वेद किं वक्तुं नार्हो यो
पि स्वमहिमानं परिच्छेत्तुं शक्नोति न वेति संशय इत्याह अस्य परिदृश्यमानस्य जगतो योऽध्यक्षः
अधिष्ठाय प्रवर्तयिता परमेश्वरः अविद्यातत्कार्येभ्यः परस्मिन्व्योम्नि स्वस्वरूपचिदाकाशप्रतिष्ठितः
सोऽपि स्वमहिमानं वेद जानाति यदि वा न वेद न जानाति अपरिच्छिन्नस्य प्रकाशस्य स्विदपरपरि
च्छेदाभावेनाविषयत्वेन च दुर्विज्ञानत्वात् सगुणस्वरूपस्य च गुणानामानंत्येन तथात्वात् ईश्वरेण
सर्वज्ञत्वप्रसिद्धेश्च श्रुतेः संशय ईश्वरस्य स्वस्वरूपे इयत्तापरिज्ञानमस्ति न वेति वयं तु निर्णयः ।

भ्योव्याहृत्तिः उपरतिर्विहितस्य कालेन लौकिकवैदिककर्मत्यागः तितिक्षा अप्रमादित्वक्रोधः स
माधानं समाध्यनुष्ठानमित्येतानि साधनानि अस्मिन्नेव जन्मनि दृष्टानि एतैः साधनैर्यतमा
नैर्दर्शनीयस्त्वं ऊर्वीभिः देवः स्वप्रकाशः यईशः परमेश्वरः इहास्मिन्नेव लोके अस्मिन्नेव देहे त्वाव
प्रत्यक्षेण साक्षात्कर्तुं शक्यः तैस्तैः साधनैर्विना जन्मशतैः शास्त्रशतैः पाण्डित्यशतैरपि यो
ऽविज्ञेयः ज्ञातुमशक्यः इत्यर्थः तथा च श्रुतिः नाविरतो दुश्चरितान्नाशान्तो नासमाहि
तः नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् इति नाविरतो दुश्चरितान्निषिद्धकृत्यात् अवि
रतो ऽनुपरतः पुरुषः अशान्तो विषयेभ्यो व्यावृत्तचित्तः असमाहितः समाध्यनुष्ठानरहितः अ
शान्तमानसः अस्यन्तनिमित्ते क्रोधादिकं कुर्वन् वापि शब्दात् स्थितप्रज्ञादिशास्त्रोक्तलक्षणरहितो
दृष्टन्ते प्रज्ञानेन प्रकृष्टमननभावनाद्यप्रतिबन्धत्वात् तेन येन मुक्तसाधनसहितेन रूपेण तत
यास्त्वनुभूयमानमपरिमितानन्दमात्मानं नाप्नुयात् संभावनायां लिङ् नादृशस्य पुंसः तत्प्रा
प्तिसंभावनापि नास्तीति श्रुतेरर्थः २५ य उक्तो वेदान्तैरीशो दृष्टेति तं स्फुटयति यस्यास्वा एवोक्तस्य यतर्हितस्य
परमेश्वरस्या तर्कातर्कागम मतएव २३ त्मविभूतेः स्वात्मानमेव साधनान्तरनिरपेक्षतया विभूतिर्विविधजगदाकारभवनं यस्यासत
यानादृशस्य परमार्थेन विकारित्वास्तव स्वरूपपरमेश्वरस्य च तर्कागम्यत्वे इमौ मन्त्रौ साक्षिणौ
को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेनाथ को
वेद यत आबभूव इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न यो अस्याध्यक्षः परमे व्योमन्

शास्त्रैरसंगचिद्रूपत्वादिरूपेण गुणैः शिवविष्ण्वादिरूपेणान्यैश्च शास्त्रैर्वैशेषिकाद्यभिमतैः
स्तानादिगुणकत्वेन प्रत्यगभिन्नत्वादिरूपेण च सा तत्तत्तन्त्रैः सत्त्वरूपमस्यास्तीति सत्वानू वा
स्वदेवः तस्य भक्तत्वेनाभिमताः सा नु ताभिस्तेषां तन्त्रैर्वैष्णवशास्त्रैरित्यर्थः तैर्वा स्वदेवादिरू
पत्वेन च कारादन्यैश्च ब्राह्मशैवादितन्त्रैः तेन तेन प्रकारेण प्रतिपाद्यमानत्वस्तत एकमेवय
मीशोऽस्तु प्रथमं शास्त्राचार्येभ्यो ज्ञात्वा अथानन्तरं ध्यानेनानश्वरतासिद्धाईश्वरोऽसीति सा
त्वादनुभूय केचन सर्वे महात्मानः ये विविशुः आत्मत्वं प्राप्तास्त्वमीडे २४ नन्वेवं सर्वैर्विकि
त्मिनि सद्गुर्वाचार्येभ्य ईशत्वाता चेतसि साक्षात्कृत्य तेन प्राप्तवन्तो नाशंका श्रद्धां विना भ

श्रद्धाभक्तिध्यानशमाद्यैर्यतमानैर्ज्ञातुं शक्यो देव इहैवाशु य ईशः दुर्विज्ञेयो जन्मशतेना
पि विना तैस्तं सर्वाधारं विनाशहरमीडे २५ ।। तान्स्वस्यैवात्मानं पश्यति यस्य देवप
राभक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः तत्त्वं तेन पश्यति
निष्कलं ध्यायमानः शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीत्यादिश्रु
तेः एतैः साधनैर्यतमानैरेव विमलात्मत्वेन ज्ञातुं शक्यो न तु तैर्विरहितैः शास्त्रमात्रपठितैः विद्वद्
काष्ठायमनः क्रियायोगिनामिति वचनादित्याह श्रद्धा गुरुशास्त्रवाक्ययोर्विश्वासः भक्तिः गुरौ वि
शौ च प्रेम ध्यानं गुरूपदिष्टार्थस्मरणं विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहसं
पादनं शमोऽन्तःकरणस्य विषयेभ्यो व्यावृत्तिः आदिशब्देन दमः बाह्येन्द्रियाणां स्वस्व विषये

ह·टी
२२

रिति परादीक्षवानिमित्तात् तेनतः कर्त्तात श्रुतेः एष ह्येव साधु कर्म कारयति इतीश्वर
स्य प्रयोजकत्वश्रवणादिति सूत्रार्थः यस्य परात्मनश्छिन्नत्वादि तेहतः चित्स्वरूपव्याप्तः क
र्त्ता भोक्तात्मेति प्रसिद्धो हि कारोत्र कार्यकारणसंघाते क्लेशानुव्याप्तो लोह इव दग्ध्या तमीडे इ
त्यर्थः २१ ननु जीवेश्वरयोः प्रेरकप्रवर्तकभावेन भेदाद्द्वैतवाक्यार्थासिद्धिरित्याशंक्य
तयोः कल्पितभेदे सत्यपि वास्तवाभेदसाहाय्येनाद्वैतवाक्यार्थोपपत्तिरित्यभिप्रेत्याह स
क्त्यन्तरप्रसिद्धो यः परमात्मा व्यापकः वस्तुतो जीवात्संभिन्न इत्यमनुभूयमानानेकप्रकारं प्र

स्रष्टा सर्वं सात्मतयैवेत्यमतर्क्यं व्याप्याथान्तः कृत्स्नमिदं सृष्टमशेषम् सच्च त्य
च्चाभूत्परमात्मा स य एकः सत्यसत्या २० २२ वेदान्तेष्वाध्यात्मिकशास्त्रेषु पुराणेः शा
स्त्रेष्वन्यैः स्तावननतेष्वयमीशे दृष्ट्वाथान्तः प्रतत्सिवस्याविविग्नुर्ये तं संसारध्वा· २२

तर्क्य तर्कासह सर्वमिदं जगत् सृष्ट्वाथ सृष्टमिदमशेषं परं तु निर्यामदि शरीरं कृत्स्नं सा
त्मतयैव व्याप्य तत्र प्रविश्य तादात्म्याध्यासेन स्वस्वरूपतया स्फुरीत्वेत्यर्थः तत्सृष्ट्वा तदेवानु
प्राविशत् स एष इह प्रविष्ट आनखाग्रेभ्य इति श्रुतेः सच्च त्यच्चाभवत् परोक्षप्रत्यक्षरूपोऽभूदिति
यावत् तं परमात्मानमीडे इति २२ एवं तावदद्वैतवाक्यार्थान्येन कृत्स्नाधुना शास्त्रैः सर्वै
रपि यथारुचि विरुद्धत्वक्रमार्गाभ्यां प्रतिपाद्यमानं विस्फुरेति वेदान्तैः सच्चिदानन्दाद्वयप्रत्य
गभिन्नत्वेन प्रतिपाद्यमानैः अध्यात्मिकशास्त्रैः आत्मानं जीवमधिकृत्य प्रवर्तमानैः सांख्यादि

२३

स्वतोऽः स्वदेहत्वकर्मानुष्ठानेन तद्योगासंभवात् कर्मणां च जडत्वेन तत्कालनाशेन जीवानां स्वस्वदुःखदाने च स्वतोऽधिष्ठातारं विनाप्यसमर्थत्वात् वेदान्तेष्वप्राणिकर्मानुरोधेन जगत्स्रष्टुः तत्तत्कर्मफलदातृत्वेश्वरस्य सिद्धिप्रकारस्य श्रवणमकृतवान्नत्वपरक्षतिविरोधे श्रुत्यन्तादेराभासत्वात्कर्मविरुद्धात्मप्रतिपादकवेदान्तानां तदेकात्मकस्तावकत्वादुप पत्तेश्चास्ति कार्यमेकत्वादिकं सकर्तृकं घटवदिति कार्यलिङ्गादितत्कानुग्रहीतश्रुतिसिद्धः कश्चित्परमेश्वर इत्यभिप्रेत्याह । क्षेत्रज्ञोऽयेन परमेश्वरेणाविष्टोऽङ्करमपि कर्मस्वावि

येनाविष्टो यस्य च शक्त्या यदधीनः क्षेत्रज्ञोऽयं कारयिता जन्तुषु कर्तुः कर्ता भो
क्तात्मात्र हि विज्ञातापि न्यूनस्तं संसारध्वान्तविनाशं हरिमीडे २९ ॥

करोति यद्वाविष्टवत् आवेशाद्विनिर्मुक्तो न शक्नोति कर्तुं सोऽस्ति कश्चित्परमेश्वरः अन्यत्र नादावीश्वरानीशश्रवणात् यस्य च शक्त्या मायया आविष्टो नानास्वरूपापि मूढोऽहं तत्ताने किंचिदज्ञोऽहमभिमन्यते सोऽस्ति शक्तिमान्कश्चिदिति गम्यते अत्र च श्रुतिः अनीशया शोचति मुह्यमान इति अनीशया आत्मा ज्ञानावरणेन ईश्वरभावाप्रतिपत्त्या मुह्यमानो देहादिष्वभिनिविशमानः शोचति तदुक्तं वैक्लव्येन विषीदतीत्यर्थः तदुक्तं भगवता दैवी ह्येषा गुणमयी मम माया दुरत्ययेति अत एव क्षेत्रज्ञोऽयं यदधीनः सर्वव्यापारेषु वर्तते अस्ति सर्वप्रेरकत्वं सर्वभूतेषु कर्तुः कारयितेति अभ्युपगन्तव्यं तदुक्तं सूत्रकारेण परात्तु तच्छ्रुते

ह॰टी॰
२२

नात्मत्वेन विहाय पंचकोशस्वरूपं तत्प्रस्तुतान विवेके विद्यारण्यगुरुभिः प्रदर्शितं तस्यापञ्चीकृ
तभूतोत्थो देहः स्थूलोन्नमयकः लिंगं तु राजसैः प्राणैः प्राणाः कर्मेन्द्रियैः सहेति सात्विकैर्धी
न्द्रियैः साकं विमर्शात्मा मनोमयः तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका कारणे सत्वमा
नंदमयो मोदादिवृत्तिभिः इति तत्र ज्ञानेंद्रियाणां संशयनिश्चयोभयहेतुत्वेन मनोमये विज्ञा
नमये च संबंधः दृशिस्थः कार्यकारणसंघातेन साक्षित्वेन यश्चैतन्यतद्रूपेण स्थितः सत्ता
त्मन्येव स्वस्वरूपमेव ब्रह्मानंदो ब्रह्मेति विज्ञानादित्यादिना इत्येवमादिलक्षणयानन्तश्चै
कं सर्वप्रतिष्ठाभूतं ब्रह्मेति निश्चित्य पित्रादिदृष्टाभ्यां यन्न रते तैत्तिरीयोपनिषदि ब्रह्मास्मीति यं
कोशानेनान्यं च रसादीनतिहाय ब्रह्मास्मीति स्वात्मनि निश्चित्य दृशिस्थः पित्रा
दिष्टो वेद भर्गो यं यन्न रते तं संसारध्वान्तविनाशं हरिमीडे २०॥

वेदत्वमित्यर्थः २०

ननु नास्ति जीवातिरिक्तः कश्चिदीश्वरो जगत्स्रष्टा प्राणिनां भयाभयहेतुः जगतो नित्य
त्वात्स्वतः स्वयोश्च पुण्यपापमूलत्वाद्वेदानां च कर्मशेषभूतकर्त्रादिस्तावकत्वेन प्र
त्यक्षादिविरुद्धाद्वितीयेश्वरे प्रमाणाभावादिति जैमिनीयानामेतमाशंक्य सर्वजगतः सा
वयववत्वादिना कार्यत्वेनानुमितस्याधिष्ठातारं परमेश्वरं विनाऽनुत्पत्त्युत्पत्तेः जीवानां चैता
दृशजगदुपादानेत्यानसामर्थ्ययोरसंभवात् चेतनत्वेन स्वतंत्र्याणां च तेषां पारवश्यं विना

ऽदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदत इति अस्यायमर्थः यदैव यस्मिन्नेव
काले एषः साधकः एतस्मिन्नित्यपरोक्ते अदृश्ये दृश्यप्रपंचरहितेन तादृग्लक्ष्य इत्यर्थः
अनात्म्ये स्थूलदेहरहिते अनिरुक्ते निरुक्तिलिंगं तद्रहिते अनिलयने निलीयंते प्रपंच
देहलिंगानि अस्मिन्निति निलयनं सत्तानेतद्रहिते तेपदलक्ष्य इत्यर्थः अभयगामिन्नेवस्म
णीति पदस्य तत्त्वार्थः तस्मिन्नभयं भयरहितं यथा भवत्येवं प्रतिष्ठां स्थितिं विंदते लभते
उक्तरूपं ब्रह्म स्वात्मतया जानातीत्यर्थः अथ सोऽभयं गतो भवति अथानंतरमेव उक्तवेद
नानंतरकाल एव स ब्रह्मवित् अभयं जननमरणप्रवाहनिमित्तभीतिराहित्यं गतः प्राप्तो
भवतीति शब्दमनवगाह्यं वाङ्मनसागोचरमित्यर्थः यतो वाच इति श्रुतेः निष्कलं निर
वयवमानंदं परप्रेमास्पदं अनंतं श्रोत्रियस्वरूपमत्र श्रुतिः स यश्चायं पुरुषे यश्चासा
वादित्ये स एक इति पुरुषे कार्यकारणसंघाते यमपरोक्ततया अनुभूयमानः यश्चिद्वातः
साक्षितया प्रवर्तते यश्चादित्ये अंतर्यामितया सोऽपरोक्ततेन भासमानो वर्तते स उभयत्र
वर्तमानः विद्वानः एक एव न भिन्न इत्यर्थः इत्येवमादौ आनंदवल्ल्यां प्रतिपादिते यं वि
स्वसमजं जन्मरहितं असौ वरुणो भगवान् भृगुनामकाय महर्षये पुत्राय प्राह उक्तवान्
यतो वे त्यादिना तमित्यर्थः ५९ कथं भृगुर्वेदेत्याकांक्षायां तद्वेदनप्रकारमाह को
शानिति रसादीन् अन्नरसविकाररूपान् स्थूलदेहान् पंचकोशान् अनिहाय अ

नहितत्त्वेन यदा देवेष इत्यादिना विद्वद्विहङ्गया भयहेतुत्वेन तदेव समं तद्धीचवा अनेनेतरं
च मैवमेनं दमेत्यादिना नंदसीमां सामासम्पसार्वभौमादिहिरण्यगर्भान्तानामानंदानामु
त्तरोत्तरशतगुणोत्कर्षप्रदर्शनपूर्वकं ब्रह्मविदशेषायनो वाचो निवर्तन्ते अप्राप्य मनसा स
ह आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति वाङ्मनसागोचरनिरतिशयब्रह्मानंदा
त्मना निरतिशयानर्थनिवृत्तिं च प्रतिपाद्य एतं ह वाव न तपति किमहं साधु नाकरव
मित्यादिना अनर्थनिवृत्तिप्रपंचमतिरतिशयानंदब्रह्मापरोक्षज्ञानसाधनाकोक्तायां

सत्यं ज्ञानेश्रुद्दमनंतं व्यतिरिक्तं शांतं रहितं निष्कलमानंदमनन्यं इत्याहादौ
यं वरुणोसौ भृगवे जनेसंसारध्वांतविनाशं हरिमीडे १९ ॥

भृगुर्वै वारुणिरित्यादिना भृगुवरुणसंवादमुपक्रम्य यतो वा इत्यादिना ब्रह्मणस्तटस्थल
क्षणकथनपूर्वकं प्रियाय पुत्राय वरुणेन पित्रा उपदिष्टं तपस्तत्वोपयुनः पुनः विचारमे
व ब्रह्मापरोक्षायमुख्यसाधनमुपदिश्य ब्रह्मविदन्नमयादिनाप्राणमनो विज्ञानानंदमयकोशानामने
न्तरीयोपनिषत्‌ इत्यनया मात्रवत्सर्वप्राणिहितैषिण्या प्रतिपादितेति विसंस्तोति होभ्यां
सत्यमवाध्यज्ञानेजडविरोधिशुद्धमलाः संस्पृष्टमनंतं त्रिविधपरिच्छेदशून्यं व्यतिरिक्तं
कोशपंचकभिन्नं नत्साक्षिणं शांतं निरस्तसर्वोपप्लवं अत्र श्रुतिः यदा ह्येवैष एतस्मि

नेति श्रुत्यास्य च उदाहरणेन आचचार सत्यमित्यादि सूत्रस्य ब्रह्मपदव्याख्याने यो वेद इ
त्यादिवित्पदव्याख्याने सोऽश्नुत इत्यादि आप्नोति परमिति पदद्वयव्याख्यानमिति विभा
गः अस्यायमर्थः सत्यं कालत्रयबाधाभावोपलक्षितं ज्ञानं स्वप्रकाशं अनंतमंतः परि
च्छेदः देशकालवस्तुकृतः तत्त्रिविधपरिच्छेदाभावोपलक्षितं ब्रह्मेति लक्ष्यनिर्देशः सत्यादि
पदत्रये लक्षणं गुहायां बुद्धौ यत्कारणत्वेन वर्तमाने परमे व्योम्नि अव्याकृताकाशे तत्र निहि
तं प्रतिबिंबितं तया अवस्थितं यद्वा तन्निहितं हृत्स्थत्वेन यो वेद स सर्वान्कामान्सार्वभौमादिहिर
ण्यगर्भांतान्सह साधु गणपदे वाश्नुते भुंक्ते केन प्रकारेण विपश्चिता सर्वज्ञेन ब्रह्मणा सर्वज्ञे
ब्रह्मरूपेण मनउपाधिपरिच्छिन्नरूपेण ब्रह्मणा सर्वज्ञब्रह्मरूपेणानोपाधिपरिच्छिन्नरूप
ण ब्रह्मानंदे सत्यानंदानामंतर्भावात्सार्वभौमादिहिरण्यगर्भांतभोगानां ब्रह्मवित्स्वरूप
भूतत्वाच्चैतन्यभासत्वाच्च ब्रह्मविदाप्नोति परं सर्वभोक्तृत्वमित्यर्थः अनेन तं ब्रह्मणः स्वव्या
ख्यानरूपयास्य चोदीरितानानंत्यसिद्धये आकाशादेर्ब्रह्मण एवोत्पत्तिं कथयामास ततः यो वे
देत्याद्युक्तेब्रह्मणः स्वरूपं प्रवक्तुं सर्वाण्येव भूतान्यन्नरसमय इत्यारभ्य देहादिपंचकोशात्मोपदे
शक्रमेण ब्रह्मपुच्छं प्रतिष्ठेति श्रुत्या विस्तरेण प्रतिपादयामास ततः ब्रह्मणो नामरूपात्मीनस्य प्र
पंचात्मविषयत्वेनास्य सर्गकार्यां सोऽकामयतेति कामयितृत्वेन सर्गकामीव स तपोऽतप्यतेति
आलोचकत्वेन मंत्रिवत् इदं सर्वमसृजतेति स्रष्टृत्वेन कुलालवत् तदेवानुप्राविशदिति प्र
वेष्टृत्वेन सर्पवच्च सत्यमभवदित्यादिना च कोऽन्यात्कः प्राण्यादित्यादिना सर्वप्राणिनां जीव

ण्यगर्भः विष्णुः सत्वोपाधिकः सत्वसाधनकः सकलजगत्पालकः परमेश्वरः रुद्रस्तमो-
पाधिकः तमःसाधनकः जगत्संहर्त्ता परमेश्वरः तस्य तमउपाधिकत्वेनैव नाशोपात् जीवत्वप्र-
बन्धस्फूर्तिस्मृतीतिहाससमाणविरुद्धत्वेन तद्ब्रह्मादिनः पाषाण्डिशिरोमणिना पत्ने सर्वे देवा हरा-
दयः इति वासिष्ठवचनात् इत्यादिष्टः सगुणत्वं भगवान्नीललोहितः सत्वाकृतिस्वभाववान्स-
सर्जान्तसमाः प्रजा इति श्रीभागवतवचनाश्च ऊर्ध्वविच्छुयमाणत्वेनमः संबंधस्य कार्याच्छेत्वे-
नाप्युपपत्तेः यत्त इति भगवतो विष्णोर्मूर्त्यन्तरं सत्तिभेदाद्बुद्धिवैचित्र्यात् सतिभेदा इतिपा

ब्रह्माविष्णुरुद्रऊर्ताशो रविचंद्राविंद्रो वायुर्यज्ञ इतीत्थं परिकल्प्य एकं स-
तंयेवबहुधाऽहुर्मतिभेदात्संसारध्वान्तविनाशं हरिमीडे ९ ॥

ठभिद्यंते इति भे-
दाः मत्याभेदाः भिन्नमतय इत्यर्थः ९ तैत्तरीयकोपनिषत् एवं ब्रह्म प्रतिपादयति प्र-
थमं ब्रह्मविदाप्नोति परमिति संहिताद्युपासनादिभिः एकाग्रचित्तमधिकारिणं प्रति ब्रह्म-
विद्यां सविषयां सफलां सूत्रयामास ब्रह्मेति विषयनिर्देशः विदित्यनेन विद्या निर्दिश्य-
ते परमाप्नोतीति विद्याफलं निर्दिश्यते इति विभागः तदनंतरं सूत्रस्यार्थं संक्षेपतः सत्यं ज्ञा-
नमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चि-

भिन्नः अनेकः परिच्छिन्नश्च भाति स्फाटिकवत् यथा स्फाटिकशिला रक्तकाचपार्थिवशाद्वि
चित्रानेका च भाति तथेत्यर्थः अयं छन्नः देहाद्यैरन्वीयमानश्च भवति तथा च श्रुतिः एकः
वहिर्भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचन्द्रवत् भूतः परमार्थः आ
त्मा भूते भूते देहे देहे एकधा स्वेन रूपेण बहुधा उपाध्यादितद्रूपेणेत्यर्थः सूत्रकारोऽपि अस
ततेश्चाव्यतिकर इत्यनेन सूत्रेणाऽसंततेः उपाधिपरिच्छेदात् अव्यतिकरः जीवानां सुखदुः
खाद्यसांकर्यमिति सममनेन सुखदुःखादिवैचित्र्यमुपपाद्य अदृष्टानियमादित्यादिसूत्रद्वये
ण सर्वगतत्वात्मत्वानेकात्मवादिमते सर्वेषु शरीरेष्वपि सर्वेषामात्मनां सन्निधानात्सर्वस
न्निधावुत्पद्यमानादृष्टस्य साधारण्यात्सुखदुःखादिसांकर्यमापादयामास ततश्चात्मैकत्वे
दोषाभावात्तस्मादद्वयानन्दरूपेण वेदान्तवेद्यतोपपद्यत इति भावः ९ इन्द्रं मित्रं वरुणम
ग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वान
माहुः तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्र
माः इत्यादयो मन्त्राः ब्रह्मण एव सकलदेवतात्मकतया अवस्थानमाहुः शुक्रं ज्योतिरमृतं
ब्रह्म वेदः अपशब्देन तदधिष्ठाना वरुणा उच्यते प्राणः वायुः कालः प्रजासंहर्ता यमः एते
मन्त्रैः सर्वदेवात्मकत्वेन सिद्धे विष्णुरेवेति ब्रह्मापञ्चीकृतभूतव्यतिरिक्तः सकलसृष्टादि

विद्वांस इति एवमन्यत्र कैवल्योपनिषदादावपि आत्मनोऽविद्ययावस्थावत्वे सत्तत्त्वद्रष्टृत्वं च श्रु
तेस्तादृशोऽस्मीति सिद्धं विस्मितिदानीं त्वीति जाग्रज्जागरिते वर्तमानो यः स्थूलपदार्थान्पंचीकृत
पंचभूतकार्यरूपान्भुक्तानुभूय स्वप्ने तत्स्वप्ने मायामिथ्यारथगजादिरूपान्वासनामयीं दृष्ट्वा
सुषुप्तौ सर्वनिद्राख्यरूपावाभिव्यंजककेवलाज्ञानमनुभूय स्वविद्यादशायामित्येवं प्रकार
मात्मानं तुरीयस्थाने समाध्यवस्थायां स्वरूपेण केवलं वीतमदाले स्वात्मानं दानुभवन्नित
सेतोऽषेणश्रास्तितामित्यर्थः ९ ननु अवस्थात्रयविशिष्टः सर्वः स्वीचात्मा प्रतिदेहं भिन्न ए
व प्रकाशते तस्यैकत्वे सर्व विद्वेतुः विवादिवैचित्र्यानुपपत्तेः देवदत्तस्य यज्ञदत्तः स्वायत्तस

पश्यन्नृत्योऽप्यनुवर्णको गुणभेदान्नानाकारान्स्फटिकवज्जातिविचित्रः भिन्नश्छ
न्नश्चायमजः कर्मफलैर्यस्तं संसारध्वान्तविनाशं हरिमीडे ११॥ ध्यानप्रसंगात्स्वकथम

द्वितीयानंदरूपेण वेदान्तवेद्यते त्याशंक्य तस्य सर्वदेहेषु वर्तत एकत्वेपि स्वविच्छेदकोपाधि
तोऽनिर्वचनीयभेदस्यांगीकारात् एकशरीरावच्छिन्नात्मनि पादे मे वेदना शिरसि मे सुखमि
त्यनुभवानुरोधेन तत्तदवयवावच्छेदेन सुखदुःखवैचित्र्यवत् एकस्मिन्नपि तत्तच्छरीरावच्छि
न्ने तदुपपत्तिः देहभेदेन जन्मान्तरीयसुखदुःखायतनत्वं स्यानवत् देवदत्तस्य यज्ञदत्तसुखायतन
त्वसंधानोपपत्तेश्चेत्याह यः सत्तः शुद्धः सर्वदुःखादिसंबंधशून्यः अक्षरः नाशरहितः व्यापको
वा अजः जनिरहितः एको द्वितीयोपि गुणभेदान्सत्त्वरजस्तमः परिणामभेदान्नानाकारान्सुर
नरतिर्यगाद्याकारभेदान्पश्यन् तत्तादात्म्याध्यासात्कर्मफलैः सुखदुःखैः विविचित्रः नानारूपः १९

विषयाप्रज्ञायस्यसतथाप्रविविक्तंसूक्ष्मंवासनामात्ररूपंविषयंभुंक्तेइतितथातैज
सः तैजसलिंगोभवः तदभिमानीत्यर्थः सद्वितीयः पादः सप्तः सुषुप्तोयत्रयस्यामव
स्थायांनकिंचनकामंकामयतेनकिंचनस्वप्नंपश्यति तत्सुषुप्तमिति सुषुप्तावस्था
निरूपितानकिंचनेत्युक्ताजाग्रदिनमपिस्वप्नमेवमन्वतेश्रुतिः सुषुप्तिस्थानः समानप
कीभूतः एकतांप्राप्तः बहुधाविभाजकचक्षुरादीनांतदालीनत्वात् अतः प्रज्ञानघनएप
वनविकीर्णप्रज्ञानत्वात् आनंदमयः आनंदप्रचुरः दुःखहेतुलिंगाभावोपरमादानंदस्वरूपआ
नंदमेवभुंक्तेइतितथानंदभोगसाधनमाह चेतोमुखइतिचेतः चित्प्रतिबिंबसहितान्त
जाग्रद्दृष्टस्थूलपदार्थानुभवमायांदृष्टास्वप्नेप्यपिसुषुप्तोमुखविनिद्रा मित्यात्मा
नंदीत्यसद्वाराश्चेतरीतंतेसंसारधांतविनाशोहृदिमीडे २९॥ नहन्तेरेवमुख्यमानंद
भोजनेहारंयस्यसतथाप्राज्ञः प्रकर्षेणांतर्बहिर्ज्ञानातीति तथापष्ठस्तृतीयः पादः अ
वस्थात्रयातीतस्तच्छुद्धचैतन्यमेवचतुर्थपादमाह अदृष्टमित्यादिना अदृष्टंपंचज्ञानेंद्रियाः
विषयमव्यवहार्यंहानादिव्यवहारागोचरमग्राह्यंकर्मेंद्रियाविषयमलक्षणं लक्षणालिं
गतद्रहितमनुमानाविषयमित्यर्थः अचिंत्यमंतःकरणागोचरंअव्यपदेश्यंशब्दाविषयं
तत्प्रवृत्तिनिमित्तजात्यादेरभावात् किंतएकात्मप्रत्ययसारं एकोद्वितीयआत्मास्वरूपभूतः
प्रत्ययः प्रकाशएवसारोबलंसत्ताऽवप्रमाणंयस्यसतथाप्रपंचोपशमंप्रपंचनिवृत्तिरूपंप्रा
णोपितामावस्याधिष्ठानाभिन्नत्वात् शिवमानंदरूपमद्वैतंद्वैतरहितंचतुर्थंपादंमन्यते

हृ॰टी॰
१८

माण्डूक्ये श्रूयते सोयमात्मा चतुष्पात् जागरितस्थानो बहिः प्रज्ञः सप्तांग एकोनविंशतिमुखः स्थू
लभुग्वैश्वानरः प्रथमः पादः स्वप्नस्थानोन्तः प्रज्ञः सप्तांग एकोनविंशतिमुखः प्रविविक्तभु
क्तैजसो द्वितीयः पादो यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं सु
षुप्तस्थान एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः
अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपंचोपशमं
शिवमद्वैतं चतुर्थं मन्यंते इति अयमर्थः सोयमोंकारप्रतिपाद्य आत्मा चतुष्पात् चत्वारः
पादा विश्वादिरूपा यस्य स तथा तत्र प्रथमं पादं दर्शयति जागरितेत्यादिना जागरिते
जागरावस्थाने विषयोपलब्धिस्थानं यस्य स तथा बहिर्देहाद्बहिर्विषयेषु प्रज्ञा यस्य
स तथा बहिर्देहाद्बहिर्विषयेषु प्रज्ञा यस्य स तथा द्यौर्मूर्धा चक्षुरादित्यः अग्निर्मुखं प्रा
णो वायुर्देहमध्यमाकाशो लिंगं समुद्रः पृथिवी पादाविति सप्तांगानि यस्य स तथा एको
नविंशतिमुखः प्राणपंचकं ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकमिंद्रियदशकमंतःकरण
चतुष्टयमित्येकोनविंशतिसंख्याकानि मुखानि विषयोपलब्धिद्वाराणि यस्य स तथा।
स्थूलभुक् स्थूलानि पंचीकृतभूतकार्याणि घटपटादीनि भुंक्ते उपलभते इति तथा
वैश्वानरः वैश्वानरग्रहणं व्यष्टिसमष्ट्यभिमानिनोरभेदविवक्षया विश्व इत्यर्थः अयं प्रथ
मः पादः स्वप्नस्थाने वासनामयभोगस्थानं यस्य स तथा अंतः देहांतः वासनामयप्रपंच

यथा च तक्षोभयथेत्यनेन सू

कार्यकरणान्वयव्यतिरेकानुविधानदर्शनात् सूत्रकारेणापि
त्रेण यथा लोके तक्षा वास्यादिकरणहस्तः कर्ता दुःखी भवति स एव विमुक्तवास्यादिकरणः
स्वस्थः सुखी भवति एवमविद्याप्रत्युपस्थापितकार्यकरणोपाधिक आत्मा स्वप्नजागरित
योः कर्ता दुःखी भवति स तच्छ्रमापनुत्तये स्वमात्मानं परं प्रविश्य विमुक्तकार्यकरणसंघा
तोऽकर्ता सुखी भवतीति कर्तृत्वस्यौपाधिकत्वोक्तेः औपाधिकस्य च सत्यत्वानुपपत्तेः अनु
भवस्य च तत्त्वश्रुतिविरोधेन भ्रान्तित्वात् कार्यकरणोपाधिकृतं भ्रान्तमेवात्मनः कर्तृत्वादि

यः पश्यञ्छृण्वंस्त्वग्विजानन् रसयन् संजिघ्रन् बिभ्रद्देहमिमं जीवतयेत्थं स्वात्मानं
ये विदुरीशं विषयज्ञं तं संसारध्वान्तविनाशं हरिमीडे १५॥ नतु पारमार्थिकमित्यभिप्रे
त्याह इमं देहं कार्यकारणसंघातं जीवतया प्रविश्य बिभ्रत् आत्मा इत्थं चक्षुरुपाधिना
पश्यन् भवति तथा श्रोत्रोपाधिना शृण्वन् स्याद्ग्राहकः तथा विजानन् त्वगुपाधिना तिष्ठेत्
तथा रसनेन रसयन् रसं गृह्णन् तथा घ्राणेन गन्धं जिघ्रन् भवति ननु स्वतः तथा च श्रुतिः आ
त्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति अस्यायमर्थः आत्मशब्देन बुद्धिरुच्यते बुद्ध्या
द्युपाधियुक्तमात्मानं कर्ता भोक्तेत्याहुः अथवा आत्मा जीव इन्द्रियमनोयुक्तः प्रथमार्थे द्वितीया
याश्छान्दसी इन्द्रियादियुक्तः संभोक्ता इति एवं विषयज्ञमात्मानं ये ईशमेव विदुः तेन वास्तव

ह॰टी॰
१०

अविद्यावस्थायां कर्त्रादिरूपत्वेन स्वतः सात्त्विकत्वस्य चिन्मात्रत्वेन प्रतिपादितत्वे विरुद्धं स्यादिति
सर्वत्र स्वस्वादिस्थावरान्तेषु कार्यकरणसंघातेषु प्रविष्टो वस्तुतः एक एव सन्नपि बहुधा प्र-
विभक्तः पश्यति दर्शनव्यापारं करोति जिघ्रति घ्राणेन गंधं गृह्णाति भुंक्ते भोजनं करोति
स्पृष्ट्वा त्वचा स्पर्शमनुसंचवेत्ति श्रोत्रेण शब्दं गृह्णाति शृणोति केवलमेतस्य यावदाश्र-
तेभा विचजानाति चकारोनुक्तसकलेन्द्रियव्यापारसमुच्चयार्थः इति एवं बहुव्यापारवत्त्वे-
नयमिममपरोक्षतयावबुध्यमाने अविद्यावस्थमाहुः अन्ये विवेकिनः वास्तवस्वरूपप्र-
तिपादकमन्त्रावाक्येषु कार्यकरणोपाधिषु स्वव्यापारेषु प्रवर्तमानेषु पश्यत्स्वकर्तृणि
कार्यकरणानि पश्यन्नात्मा यत्साक्षी केवलमात्मा परमार्थतो न किंचिदपि स्वयं करोती-
तिच्यमाहुः तमित्यर्थः तदुक्तं वासिष्ठरामायणे कुर्वन्नपीह जगतां महतामनंते देहे
न किंचन करोति कदाचनापि स्वात्मन्यनस्तमयसंविदि निर्विकल्पे त्यक्तोदयस्थिति-
रतिस्थित एक एवेति १४ तत्त्वैवमात्मनः कर्तृत्वादिरूपत्वतद्रहितत्वोभयप्रतिपादक-
श्रुतिस्मृतिषु सतीषु अन्यतरमिथ्यात्वं किमित्यंगीक्रियते स्वाभाविकत्वौपाधिकत्वाभ्या-
मुभयोरपि वास्तवत्वोपपत्तेः अन्यतरमिथ्यात्वे वा अकर्तृत्वादेरेव मिथ्यात्वं किं न स्यादि-
त्याशंकास्वतो विरुद्धद्वयस्योपाधितोप्येकत्रावस्थानासंभवात् स्फटिके औपाधिकरक्ति-
नो वास्तवत्वादर्शनात् कर्तृत्वादेर्वास्तवत्वे च सुषुप्त्यादावपि तत्प्रसंगात् कर्तृत्वादेरेव

१०

मध्यतः अधिष्ठाय फलधातेत्यर्थः जडप्रतियोगिकभेदं वारयति सर्वभूताधिवास इति सर्वे
षां पृथिव्यादीनां भूतानामधिवासः अधिष्ठानमित्यर्थः आरोपितस्याधिष्ठानाद्व्यतिरेकान्न
तन्निरूपितो भेद इत्यर्थः जीवेश्वररूपेणावस्थानात् प्राणेन्द्रियादिकर्तृत्वेन जगत्स्थूलनादिकं
च वारयति साक्षीति स्वसन्निधौ प्रवर्तमानकार्यकारणादेर्जगदाकारपरिणामिन्या अवि
द्याया अस्य साक्षी साक्षाद्द्रष्टेति ना साक्षित्वे हेतुमाह चेतेति चैतन्यरूप इत्यर्थः वस्तुतः साक्षि
त्वादिराहित्यमाह केवल इति सकलविशेषशून्य इत्यर्थः ज्ञानानन्दयोर्गुणत्वं केचिद्वद
न्ति तान्निवारयति निर्गुण इति विज्ञानमानन्दं ब्रह्मेति श्रुतेः ज्ञानानन्दौ स्वरूपमेवेत्यर्थः द्वा
सुपर्णौ सुपर्णाविव सुपर्णौ सयुजौ नित्यमवियुक्तौ सखायौ चिद्रूपोऽन्तःकरणोपहिता

सर्वत्रैकः पश्यति जिघ्रत्यथ भुङ्क्ते स्प्रष्टा श्रोता बुध्यति चेत्याहुरिमं यं साक्षी
चास्ते कर्तृषु पश्यन्निति चान्ये तं संसारध्वान्तविनाशं हरिमीडे २५ ॥

नुपहितौ समाने वृक्षे स्थिते तत्त्वज्ञानेन समूलमुच्छिद्यत इति वृक्षः कार्यकारणोपाधिः
तं परिषस्वजाते आश्रयेते यथा लौकिकौ सुपर्णौ परस्परं सखायौ एकमश्वत्थादिवृक्षमा
श्रयेते तद्वत् तयोर्मध्ये अन्य एकः पिप्पलं कर्मफलं स्वादु रसवदुपलक्षणमेतन्नानास्वादं स्व
रूपमित्यर्थः अत्ति कर्तृत्वादिरूपकार्यकारणाद्भुङ्क्ते अन्यः कार्यकरणादिविविक्तः अभि
चाकशीति कर्तृत्वभोक्तृत्वरूपकार्यकरणे केवलं पश्यतीत्यर्थः एवमेताभ्यामत्राभ्या

श्वे॰ टी॰
१९

सर्वात्मैकोस्मी तिवाक्यार्थज्ञाने

प्रविष्टत्वेन च सर्वात्मा सर्वरूपः अत एकोस्मीति यमद्वितीयं जनार्दनः त्वं तन्नानात्वदृष्टिर्वेदोऽस्थि
ते नित्यापरोक्षमित्यर्थः यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुतेः साक्षात्त्वं ह्यव्यवधानेन विना अपरो
क्षादपरोक्षमित्यर्थः अत्र च श्रुतिः सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि संपश्यन्ब्रह्म
परमं याति नान्येन हेतुना मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं मयि सर्वं लयं याति तद्ब्र
ह्माद्वयमस्म्यहमिति ह्युपनिषदाः १२ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्त
रात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च द्वा सुपर्णा सयुजा
सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशी
ति इत्येतौ मन्त्रौ आत्मनो विषयाकारत्वादिकं परमार्थतस्तद्राहित्यं च बोधयतः अनयोश्चै
वमर्थः पुराणप्रसिद्धं ब्रह्मविष्णुरुद्राणामभेदं वारयति एक इति देवः स्वप्रकाशचिद्रूपः
सन्नद्वैत्याकाङ्क्षायामाह सर्वभूतेष्विति ब्रह्मादिस्तम्बान्तेषु तर्हि किमिति नानुभूयत इत्य
त आह गूढ इति आवृतानेनाहं नवान्नसामान्यप्रज्ञे वत्त्वभूयत इत्यर्थः तस्य त्रिविधपरिच्छे
दराहित्यमाह सर्वव्यापीति देशकालौ जीवेश्वरौ जगदादित्येतत्सर्वं व्याप्यस्थानं शीलम
स्येति सर्वव्यापी तदेव प्रतिपादयन् मध्यमं चेतनगतं तियोगिभेदाभावमाह सर्वभूता
न्तरात्मेति चैतन्यमेकमेव सर्वेषु ब्रह्मादिस्थावरान्तेषु प्रविष्टं पातञ्जलीवात्मतया वर्तते
इत्यर्थः तदेव शुद्धसत्वमायाप्रतिबिम्बितं तया ईश्वरः सन्सर्वेषां कर्मणां पुण्यपापरूपाणा

अहंकारे...
सहित

१९

स्थितिलयप्रवेशसंयमनतत्त्वपदार्थफलप्रतिपादकैः समविधार्थवादैरनुगृहीतं सत् म
हावाक्यमवान्तरवाक्यसहितं यत्तत्त्वं प्रतिपादयति तदिदानीं स्तौति सर्वं वियदादिकं जग
देतदनुभूयमानं स्वात्मनि स्वस्मिन्युक्त्या जडस्य दृक्संबन्धमन्तरेण भानायोगात् दृग्दृश्य
योश्च संयोगादेरसंभवात् विषयविषयीभावस्य संयोगादिमूलसंबन्धपूर्वकत्वात् सर्वस्य वि
यदादिजडप्रपञ्चस्य भानान्यथानुपपत्त्या चित्यध्यस्तत्वमेव संबन्ध इत्यादियुक्त्या दृष्ट्वा सर्वं जग
त्स्वस्मिन्कल्पितत्वेन ज्ञात्वेत्यर्थः पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रमिति

सर्वं दृष्ट्वा स्वात्मनि युक्त्या जगदेतद्दृष्ट्वात्मानं चैवमजं सर्वजनेषु सर्वात्मैकोस्मी
ति विदुर्ये जनहृत्स्थं तं संसारध्वान्तविनाशं हरिमीडे १२॥

श्रुतेः पुरत्रये जाग्रदा
द्यवस्थात्रय इत्यर्थः अजं जन्मरहितमपरोक्षतयानुभूयमानमात्मानं च सर्वजनेषु जनि
मत्सु अन्तःकरणाद्युपाधिषु प्रतिबिम्बतया वर्तमानं दृष्ट्वा यो योनिमधितिष्ठत्येक इत्यादिमा
याभिः पुरुरूप ईयते अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव एकस्तथा स
र्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बभूवेत्यादिश्रुतेः योनिमायादिशब्दाभ्यामन्तःकरणाद्युपा
धिपरान्तः परमेश्वरः पुरुरूपः देवतिर्यगाद्यनेकरूपः ईयते लक्ष्यते प्रतिरूपः समानरू
पः इतरेतरस्य सर्वात्मा सर्वेषां वियदादीनामपि ह्यात्मा तेन स्वस्यैव सर्वशरीरेषु जीवतया

हं॰टी॰ २५

महावाक्येन प्रतीचः तादृग्ब्रह्मत्वं बोधयति तथाच्छान्दोग्यश्रुत्या च सदेव सोम्येदमग्र आ
सीदेकमेवाद्वितीयमित्यनेन तादृशं ब्रह्मोक्त्वा तत्त्वमसीत्यनेन महावचसा जीवब्रह्मणोर
भेदो बोध्यते एवं प्रतिवेदान्तं तत्तत्स्वरूपेण तत्र कथं ब्रह्मणो द्वितीयत्वं आकाशादेर्द्विती
यस्य विद्यमानत्वात् कथं प्रतीचो ब्रह्मत्वं तयोर्भेदस्यैवानुभवादित्याशंकायां स ऐक्षत लोका
न्नु सृजा इति स इमान् लोकानसृजत तस्माद्वा एतस्मादात्मनः आकाशः संभूतः तदैक्ष
त बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्याद्याः सृष्ट्यादिवादरूपाः श्रुतयः आकाशादेः
सर्वस्य जगतो ब्रह्मण एवोत्पत्तेः तस्मिन्नेवावस्थानात् पुनस्तत्रैव लयात् सृष्टिस्थिति
लयकस्य घटादेर्मृद्भेदवत्कारणब्रह्ममात्रतयावोत्तरवाक्योक्तं ब्रह्मणोऽद्वितीयत्वं सं
भावयामासुः तथा स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत तत्सृष्ट्वा तदेवानुप्रा
विशदनेन जीवेनात्मनानुप्रविश्येत्याद्याः श्रुतयो ब्रह्मण एव जीवरूपेण प्रवेशं ब्रुवत्यो
नान्तर्बहिः स्थित्वा अन्तर्गृहे प्रविष्टदेवदत्तवज्जीवब्रह्मणोरभेदं महावाक्यप्रतिपाद्यं सं
भावयामासुः तथा नियमनश्रुतिश्चात्मनो भेदनियम्यनियामकभावानुपपत्तेः तयोः
जीवब्रह्मणोरभेदमेव संभावयति तथा स एवैष पुरुषो ब्रह्म समयः यदग्नेः रोहितं रूप
मित्याद्याः तत्त्वपदार्थशोधनरूपाः श्रुतयः जीवेश्वरोभयगतविरुद्धधर्मनिरासद्वारा त
योरैक्यमेव संभावयन्ति तथा ब्रह्मविदाप्नोति परं स एतं संभवेदित्याद्या अभेदज्ञानस्य
निरतिशयफलप्रदर्शनेनाभेदस्याविवादितत्वं ज्ञापयन्त्यः तमेव संभावयन्ति इत्यस्यापि १९

अस्यार्थ अभेदं ॥

अंतर्यामी

देवता न वेद सोऽन्तर्यामी पृथिवी देवता हि स्वात्मानं न जानाति इयमहमस्मीति तस्मात्पृथि
वीदेवतान्तर्यामी सा किं शरीरंस्तः नेत्याह यस्य पृथिवी शरीरमिति यस्य पृथिव्येव शरीरं न
यस्य शरीरान्तरातिरिक्तं शरीरं नास्तीत्यर्थः एवं यः अन्तरो वर्त्तमानः पृथिवीं पृथिवीदेवतां य
मयति स्वव्यापारे प्रेरयति एषः अमृतः कूटस्थो नित्यः एषोऽन्तर्यामी हे उद्दालक ते आत्मेति ए
वं सर्वपर्यायेष्वर्थो द्रष्टव्यः एवं ब्रह्मवित्सभायां सर्वान्तर्यामित्वेन सिद्धे विश्लेषोति सर्वत्र
पृथिव्यादिषु उपादानतया स्थितेन तत्र वः पट इव सर्वं शरीरं यस्य सः सर्वशरीरी यस्य न सर्वः
किन्तु अधिष्ठानतया सर्वस्यान्तरः यश्च पृथिव्यादौ स्थितः सर्वं वेत्ति जानाति यं च सर्वः पृथि
व्यादिर्न वेद स वेत्ति वेद्यं न च तस्यास्ति वेत्तेत्यादिश्रुतेः वेदाहं समतीतानि वर्त्तमानानि चार्जुन
भविष्याणि च भूतानि मां तु वेद न कश्चनेति स्मृतेश्च यः यमयन् पृथिव्यादिं प्रेरयन् विहितप्रतिषि
द्धे प्रवर्त्तयन्निवर्त्तयंश्च इत्युक्तप्रकारेण सर्वत्रान्तर्यामितया वर्त्तते नमित्यर्थः तथा चोक्तं जा
नामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि
तथा करोमि ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि माययेति
स्मृतेश्च १२ सर्वैर्हि वेदान्तैर्ब्रह्मणोऽद्वितीयत्वं प्रत्यगात्मनस्तद्रूपत्वं च बोधयन्ति अत्रैव तैत्तरीयश्रु
तिस्तावदात्मा वा इदमेक एवाग्र आसीदित्यवान्तरवाक्येन ब्रह्माद्वितीयमुक्त्वा प्रत्यगात्मनो द्वि
तीयब्रह्मत्वं महावाक्येन बोधयति प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्मेति तैत्तरीयकश्रुतिश्च सत्यं ज्ञान
मनन्तं ब्रह्मेत्यवान्तरवाक्येनाद्वितीयं ब्रह्मोक्त्वा स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्यनेन

पृथिवीशरी

श्रीगुरो वेदा

प्रतिसिद्धहस्तादारण्यकेपंचमाध्यायेआख्यायिकाजनकोहवैदेहोबहुदक्षिणेनयज्ञमारभत तत्रच
नानादेशेभ्योब्राह्मणाब्रह्मविदोयज्ञदिदृक्षयाधनादिलिप्सयाचसमागतास्तस्मिन्संगताबभूवुः
तत्रचब्रह्मवित्त्वंगादर्शनेनजनकस्यजिज्ञासाबभूव सचतेषांब्रह्मविदांवरिष्ठपुरुषंज्ञातुमात्
मुपसंपद्य तत्त्वंतत्त्वतोज्ञास्यामीतिबुधानोगवांसहस्रंस्वर्णरत्नादिभिःसर्वतोलंकृतंब्रह्मवि
त्सभायामुपकल्प्यतानुवाच हेभगवन्तोब्राह्मणायोवोयुष्माकंब्रह्मिष्ठस्सएतत् गोसहस्रं
मयादत्तमितितेचभीतास्तूष्णींस्थिता अथयाज्ञवल्क्यःतूष्णींभूतांस्तानालक्ष्यस्वांतेवासि
नमुवाच एतागाअस्मद्गृहंनयेति सतथाचकार ततस्तेब्राह्मणाश्चक्रुधुःक्रुद्धेषुचतेषु

सर्वज्ञास्तेसर्वशरीरीनचसर्वःसर्ववेत्त्यैवेदृनयंवेत्तिहिसर्वः सोऽन्तर्यामितये
ई
त्यंयमयन्यस्तंसंसारध्वांतविनाशंहरिमीडे ॥१८॥

होताश्वलः आर्तभागोभुज्यु
र्लाह्यायनिरुषस्तःकहोलश्चेत्येतेब्रह्मविदोयाज्ञवल्क्येनसद्यःपराजिताःअथोद्दालके
नऋषिणान्तर्यामिणंपृष्टोयाज्ञवल्क्यःउद्दालकायान्तर्यामिणमुवाच [illegible] तेषां
यःपृथिव्यांतिष्ठन्पृथिव्याअन्तरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमन्तरोयमयति
एषतआत्मान्तर्याम्यमृतइति एवमेवयोऽप्सुतिष्ठन् योऽग्नौयोऽन्तरिक्षेयोदिवियआदित्येइत्या
द्यनेकपर्यायैःसर्वान्तर्यामीविस्तरेणनिरूपितःतस्यायमर्थःयःपृथिव्यांतिष्ठतिसोऽन्त-
र्यामीकिंचिद्घटपटादिनेत्याहपृथिव्याअन्तरःकिमियंवर्तमानापृथिवीदेवतानेत्याहयंपृथिवी १४

सत्कारात्मस्तनयातिवर्तते निवृत्तेतस्मिन् ज्ञानेनाज्ञाने नष्टे तत्सर्वं ब्रह्मैव भवतीत्याश
येनाह दृश्यं दृश्यागोचरं सविकल्पं घटनपटत्वाश्रमण्यादिविकल्पसहितं सर्वमेव
वाह्यमाभ्यंतरं च प्रपंचं हित्वा सत्यत्वेनानात्मत्वेन च भावनया निरस्य देहादेरनात्मत्वेन
ज्ञातो मिथ्यात्वं वा सत्यत्वेनत्यर्थः तदुक्तं भारतीतीर्थैः आत्मा देहादिभिन्नोयं मिथ्या चेदं
जगत्तयोः देहाद्यात्मत्वसत्यत्वधीविपर्ययभावनात्तत्वभावनया नश्येत्तस्मात् देहादिरि
क्तो आत्मानो भावयेत्तद्वन्मिथ्यात्वं जगतो निशामिति शिष्टं परिपूर्णं ह्येभादृशमात्रं स

हित्वा हित्वा दृश्यमशेषं सविकल्पं मत्वा शिष्टं भादृशमात्रं गगनाभं त्यक्त्वा
देहं ये प्रविशंत्यच्युतभक्तास्ते संसारध्वांतविनाशं हरिमीडे ११ ॥

प्रकाशचिन्मात्रं स्वक्षुत्वाऽसंगत्वविभुत्वादिभिर्गगनोपमं मत्वा आत्मत्वेन ज्ञात्वा तदुक्तं
विद्यारण्यगुरुभिः पंचकोशपरित्यागे साक्षिबोधावशेषतः स्वस्वरूपं स एव स्याच्छून्य
त्वं तस्य दुर्घटमिति ततः देहं त्यक्त्वा आत्मत्वेनानभिमत्य ये विष्णु प्रविशंति तत्र प्रवेश
स्तदात्मतयावस्थानमेव मत्प्रवेशस्यासंभवात् ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतेः
अच्युतभक्ताः अच्युते च्युतिरहिते अविनाशिनि ब्रह्मणि आत्मत्वेन या भक्तिः भाजनं तद्युक्ता
इत्यर्थः अथ योन्यां देवतामुपास्ते अन्योसावन्योहमस्मीति न स वेद यथा पशुरेवं स देवा
नामित्याद्यपशुत्वादिश्रुतेः ११ ॥ राम

ह॰टी॰
९२

तत्पदैश्यपद
लक्ष्यस्य
ब्रह्मस्य

ऽपि प्रत्ययव्यतिरिक्तस्य प्रत्ययाधीनप्रकाशस्य प्रत्ययविषयत्वनियमेनात्मनोऽनात्मत्वदोषता
दवस्थात्तत्साक्षी यः प्रत्ययविषयश्चाहंकारादिदेहान्तः सः सोऽनात्मेति किंच यद्यद्देयं तत्तत्त्व
विलक्षणं वेद्यमिति व्याप्तिदर्शनात् स्वप्रकाशश्चात्मेति निश्चीयते इत्यादि स्वात्मज्योतिर्ज्ञा
नमयानंदरश्मिस्वात्मज्योतिः स्वप्रकाशो ज्ञानमयो ज्ञानस्वरूपो यश्चानंदस्तस्य वाच्यपरमे
श्वरस्य तत्त्वेन संभावनाशमिन्नः भावे तेऽस्य हं पदलक्ष्येऽस्मीत्यात्मविदः अस्मीत्यात्मवेदनं
कुर्वतः यमीशमीशपदलक्ष्यं ब्रह्मविदः साक्षाद्ब्रह्म भवतीत्यर्थः त्वंपदलक्ष्यज्ञानं वि
ना तस्य ब्रह्मत्वपरिज्ञानासंभवादिति भावः तथा च श्रुतिः त्रिषु धामसु यद्भोग्यं भो
क्ता भोगश्च यद्भवेत् तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिव इति अत्र हि स्थूलभो
ग्यस्थूलप्रविविक्तानंदभोक्तृविश्वतैजसप्राज्ञेभ्य उपाधियुक्तेभ्यो विलक्षणः सर्व
प्रभासको यश्चिन्मात्रोऽहंपदलक्ष्यः स इत्यहंपदलक्ष्यं साक्षात्कृतमनद्यतनस्य सदाशिवशब्द
लक्ष्याद्वयानंदब्रह्मत्वं बोध्यते त्वंपदलक्ष्यार्थसाक्षात्कुर्वतस्तस्य ब्रह्मत्वसाक्षात्कारसंभ
वात् १० नन्वेवं देहादिविलक्षणमात्मानं तस्य ब्रह्मत्वं च जानतामपि केषांचिन्मुक्त्य
भावः पुनरपि देहादावात्मबुद्धिश्च दृश्यते अतो देहादिव्यतिरिक्तात्मज्ञानं निष्फलमि
त्याशंक्य तेषामप्रतिबंधात्मज्ञानाभावादेव मुक्त्यभावादिति न तज्ज्ञानस्य तत्साधन
त्वे प्रतिबंधश्चासत्यप्रपंचानात्मदेहादिषु सत्यत्वात्मत्वबुद्धिः एवं एवं वासनया प्राप्तः प्र
पंच देहादिषु असत्यत्वानात्मत्वभावनया आत्मनश्चिद्रूपत्वभावनया च दीर्घकालनैरन्तर्य ९२

श्रुतेश्च नब्रह्मणोनन्यपदेशादद्वितीयवस्तुतिरित्यभिप्रेत्याह यद्यद्विषयाख्यंविषयाणां
तिविशेषणाद्बहुरूपंवभातीति इति विषयः शब्दादिस्तद्विषयाख्यंवस्तुतत्त्वंवस्तुपरमार्थभूतंत्र
ह्मैवसतत्त्वंतस्मिन्विषयाख्यस्यसर्वस्यारोपितत्वादित्यर्थः तत्रहेतुमभिप्रायेणाह वेद्यमि
ति वेद्यंदृश्यंदृश्यत्वात् तस्मिन्नारोपितत्वेनविषयाख्यंवस्तुसतत्त्वमित्यर्थः अतस्तद्ब्र
ह्मैवनततोतिरिक्तमिति विदित्वाज्ञात्वातद्ब्रह्माहंचकारादभ्युपायेनाहंब्रह्मेतिच एवमु
क्तप्रकारेणयमजंपरमात्मानंहरिंसनकाद्याः सनकसनंदनसनत्कुमारसनातनप्रभृ

यद्यद्वेद्यंवस्तुसतत्त्वंविषयाख्यंतत्तद्ब्रह्मैवेति विदित्वातदहंच ध्यायन्त्येवंये
सनकाद्यामुनयोजं तंसंसारध्वांतविनाशंहरिमीडे ९॥ यद्यद्देह्यंतत्तदहंने
ति विहायस्वात्मज्योतिर्ज्ञानमयानंदमवाप्य तस्मिन्नस्मीत्यात्मविदोयेविदु
रीशंतंसंसारध्वांतविनाशंहरिमीडे ९॥

तयः मुनयः मननशीला ध्यायंतितंह
रिमीडे ९ नन्वहंप्रत्ययविषयआत्माप्रसिद्धः तस्यकथंत्यागोतीतत्वसंभावनेत्याशंक्याह
देहाद्यहंकारपर्यंतंनदेहमात्मानंभवामीतिविहायत्यक्त्वावेद्यस्यचदृश्यादिवद्नात्मत्वेन
ज्ञापनात् अहंकारादिचवेद्यत्वात् आत्मानभवतीतिहित्वेत्यर्थः अयंभावः आत्माअहंप्र
त्ययविषयइतिवदन् वादीप्रष्टव्यः किमात्मस्वरूपाहंप्रत्ययविषयउतआत्मनिष्ठाहंप्र
त्ययविषयः नाद्यः जडेनात्मभावनानुपपत्तेः नद्वितीयः स्वप्रकाशप्रत्ययविषयस्यघटा
दिवदात्मत्वयोगात् नचस्वप्रकाशप्रत्ययसाधारणतयैवविषयत्वमंतरेणात्माभासतइतिवा

करणाद्बुद्धौप्रतिबिंबितत्वात्तयास्वतएवस्फुरद्भासमानत्वं फलव्याप्यत्वंफलेनतज्जनितचिदाभासेन
भास्यत्वं तथाचनश्रुतिद्वयविरोधः तदुक्तंभारतीतीर्थैः स्वप्रकाशोपिसाक्ष्येवधीवृत्त्याव्या
प्यतेन्यवत् फलव्याप्यत्वमेवास्यशास्त्रकृद्भिर्निवारितं अप्रमेयमनाद्यंचेत्यत्रश्रुतेदमीरितम्
मनसैवेदमाप्तव्यमितिधीव्याप्यताश्रुतेति अतोत्रविषयस्यापिबोधः संभवतीतिभावः यो
यंविज्ञानमयः प्राणेषुहृद्यंतर्ज्योतिः पुरुषः इत्याद्यवांतरवाक्येनदेहादिव्यतिरिक्तत्वेन अ
त्रायंपुरुषः स्वयंज्योतिर्भवतीत्यादिना स्वयंज्योतिःशब्देन असंगोह्ययंपुरुषइत्यादिना
चासंगत्वेनयद्वैतन्नपश्यतीत्यादिनाचालुप्तचित्त्वेनप्रतिपाद्यमानत्वंपदार्थंत्वंपदार्थमुपलभ्
येविदुरितिसंबंधः तत्पदार्थमाह भावग्राह्यानंदमिति भावरूपेणग्राह्यस्यासावानंदश्चा
सौभावग्राह्यानंदस्तेषुवावास्यात्साधुयुवाध्यापकइत्यादिनासार्वभौममुपक्रम्य
मनुष्यगंधर्वादिस्थानेषूत्कर्षेणश्रूयमाणः आनंदःब्रह्मकाष्ठांप्राप्तः सोस्तिनिरतिश
यानंदः यतोवाचोनिवर्तंतेअप्राप्यमनसासह आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चने
ति वाङ्मनसागोचरब्रह्मत्वेनश्रूयमाणइत्येवंभावग्राह्यानंदमित्यर्थः अनन्यमद्वि
तीयंयस्मान्नसोनन्यः तमद्वितीयंनिरतिशयानंदंतत्पदार्थमित्यर्थः ८ ननुब्रह्मणोनन्य
त्वंकथमद्वितीयस्यान्यस्यघटादेरनुभवादित्याशंक्य सर्वस्याप्यद्वितीयस्यहेयत्वेनशुक्तिर
जतादिवत्तस्मिन्नारोपितत्वात् आरोपितस्यचपरमार्थभूताधिष्ठानमात्रत्वात् सर्वंखल्वि
दंब्रह्म आत्मैवेदंसर्वं ब्रह्मैवेदंसर्वं इदंसर्वंयदयमात्मा पुरुषएवेदंसर्वंविश्वमित्यादि

नापिवाचानान्यैर्देवैस्तपसाकर्मणावाइतिअन्यैर्वाक् चक्षुर्भ्यामितरेंद्रियैस्तपसाकृच्छ्र
चान्द्रायणादिनाकर्मणाअग्निहोत्रादिनाचनगृह्यतेज्ञातुंनशक्यते रूपजात्यादिरहितत्वा
दित्यर्थः नर्हिचक्षुरादिनाअग्रहणात् नास्त्येवेतिनवाच्यमित्याह ज्ञानप्रकाशात्मवि
बोधमितिस्वस्यप्रतीचः आत्मास्वरूपंतस्माद्धिकाशोभिव्यक्तिर्यस्यतस्मिन्नात्मनिश्रुतः
करणेविवोधोविशेषवोधोयस्यसतथोक्तः तर्हिवुद्धिग्राह्यमितिप्राप्तेनेत्याह ज्ञेयातीत
मितिज्ञेयंज्ञानविषयंवस्तुअतीत्यवर्तमानं नहिज्ञेयातीतंज्ञेयंभवति अन्यदेवतद्विदिता
त् अप्रमेयमनादिंचेत्यादिश्रुतेः विदिताद्वृद्धेनविषयादप्रमेयप्रमाणाः वुद्धिवृत्तेःविषयो
नभवतीत्यर्थः अत्रहेतुमाह ज्ञानमयमितिज्ञानस्वरूपमित्यर्थः सत्यंज्ञानमनंतंब्रह्मे
त्यादिश्रुतेः ननुतर्हिज्ञेयातीतस्यकथमतःकरणेविशेषवोधइत्याशंक्याह दृग्युपलभ्य
मिति दृष्टिवृद्धौभास्यातीतस्यापिसूर्यस्यादर्शनेस्फुटप्रतिविंबिततयाभानवत् ज्ञेयाती
तस्यापिविशुद्धवुद्धौस्फुटप्रतिविंविततयास्वतःस्फुरणंसंभवति तथाचश्रुतिः मनसैवे
दमाप्तव्यमेषोणुरात्माचेतसावेदितव्यः दृश्यतेत्वग्र्ययावुद्ध्यासूक्ष्मयाइत्यादिना नचैवंवा
केषुआत्मनोवुद्धिग्राह्यत्वेप्रतीयतःइतिवाच्यं अप्राप्यमनसासह नमतेः मंतारंमन्वीथाः नवि
ज्ञातेर्विज्ञातारंविजानीयाः यन्मनसानमनुतेयेनाहुर्मनोमतमित्यादिश्रुतिविरोधप्रसंगात्
कथंतर्हिश्रुतिद्वयस्यपरस्पराविरोधार्थंइतिचेच्छृणु मनसैवेदमाप्तव्यमित्यादेरात्मनोवृत्तिव्याप
त्वेविवक्षितम् अप्रमेयमित्यादिश्रुत्याफलव्याप्यत्वंनिषिध्यते आत्मनोवृत्तिव्याप्यत्वेनामनतः

श्रवणादिना आत्मानं भजमानैः पुरुषैः लभ्यं प्रापणीयं तं सर्वगं सर्वतः प्राप्य धीरा युक्तात्मा
न इति श्रुतेः श्रवणादिभिर्युक्तो नियत आत्मा चित्तं येषामित्यर्थः अजं जन्मरहितं महान्तं गुरु
त्वादिति श्रुतेः सूक्ष्ममिन्द्रियाग्राह्यं सूक्ष्मात्सूक्ष्मतरमिति श्रुतेः अतर्क्यं केवलं तर्कागम्यं कि
न्तु उपनिषद्गम्यं तं त्वौपनिषदं पुरुषमित्यादि श्रुतेः आत्मस्थमात्मनि कार्यकारणसंघा
ते जीवत्वेन प्रविश्य स्थितं तत्सृष्ट्वा तदेवानुप्राविशत् अनेन जीवेनात्मनानुप्रविश्येत्यादि श्रु
तेः एवंभूतं विसंधानात् ब्रह्मविदो भवंति यं च हृत्स्थं सर्वप्राणिनां हृदयेऽन्तर्यामि

यं ब्रह्माख्यं देवमनन्यं परिपूर्णं हृत्स्थं भक्तैः लभ्यमजं सूक्ष्ममतर्क्यं ध्या
त्वात्मस्थं ब्रह्मविदो यं विदुरीशं तं संसारध्वान्तविनाशं हरिमीडे ७ मात्राती
तं स्वात्मविकाशात्मविबोधं ज्ञेयातीतं ज्ञानमयं हृद्युपलभ्यं भावग्राह्यानंद
मनन्यं च विदुर्यं तं संसारध्वान्तविनाशं हरिमीडे ८ ॥

तयास्थितमीशं विदुस्तत्र च श्रुतिः
अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्येत्यादिना हृदयोपाधिनांगुष्ठमा
त्रः स्वतः पुरुषः पूर्णः मध्ये देहमध्ये आत्मनि हृदय इत्यर्थः ७ एवं तावद्ब्रह्मादिसाधनसंपन्नैरेवा
वगाह्यत्वं सत्त्वात् अधुना तत्त्वपदार्थविवेकसंपन्नैरेवावगाह्यत्वं विलक्षणोत्तमपक्रमते मीयंते
अर्था आभिरिति मात्राः श्रवणाद्यास्ताभ्योऽतीतं वक्त्राद्यग्राह्यमित्यर्थः अत्र श्रुतिः नचक्षुषा गृह्यते ११

पारं विहाय मनोमात्रव्यापारेणावतिष्ठेतेत्यर्थः तन्मनः ज्ञान आत्मनि देहेन्द्रियादिव्यापा
रसाक्षिणि चित्प्रकाशे आत्मनि नियच्छेत् मनआदिष्वात्मबुद्धिं विहाय तत्साक्षिचैतन्यप्रका
शे आत्मबुद्धिं कुर्यादित्यर्थः तदुक्तमाचार्यैः सत्यानन्दस्वरूपं धीसाक्षिणं ज्ञानविग्रहं चिन्तयात्मत
या नित्यं त्यक्त्वा देहादिगां धियमिति ज्ञानं मनआदिसाक्षिचैतन्यं च महति देशकालादिपरि
च्छेदशून्ये आत्मनि ब्रह्मणि नियच्छेत् निर्ध्याद्वैकीकुर्यादित्यर्थः ततो महान्तमात्मानं साक्षि
त्वब्रह्मत्वविकल्पत्यागपूर्वकं शान्ते सर्वव्यापाररहिते अन्यत्र धर्मादन्यत्राधर्मादित्यादिना
प्रोक्ते आत्मनि नियच्छेत् अहं ब्रह्मास्मीति निरुल्लेखं तत्कालं ततः प्रकाशमानपरमानन्दपरि
पूर्णब्रह्मात्मतयावतिष्ठेतेत्यर्थः तदुक्तं पराशरेण दर्शनादर्शने हित्वा स्वयं केवलरूपतः
यस्तिष्ठति स तु ब्रह्मन्ब्रह्म न ब्रह्मवित्स्वयमिति ६ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्म
णः तं परमात्मानं विज्ञाय विशेषेण ज्ञात्वा धीरः धीमान् विषयानाकृष्टचित्तो वा प्रज्ञां प्रत्यय
संततीकुर्यात् अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं व
हाम्यहं ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना इत्यादिस्मृतयोपि इममर्थं वदन्ति आह
देवं स्वप्रकाशं अयं पुरुषः स्वयंज्योतिरिति श्रुतेः अनन्तमनन्यमनन्यवस्तुशून्यं यस्मात्परं नाप
रमस्ति किंचिदिति श्रुतेः परिपूर्णं परितः सर्वेषु देशेषु कालेषु च वर्तमानं ब्रह्मैवेदममृतं पुर
स्तात्पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण अधश्चोर्ध्वं च प्रसृतमिति श्रुतेः स एवाधस्तादित्यादिश्रु
तेश्च अनन्तं त्रिविधपरिच्छेदशून्यतया ब्रह्मात्मकं ब्रह्मात्मत्वाभिध्यायस्पते भक्तैर्निरंतरं

ह॰टी॰
१॰

ज्ञानानियावान्यश्चास्मिन्नतइति ५ एकाग्रध्यानपरो विद्वान्दिनस्यैकेन क्रमेणैकेन च प्रकारेण
चेतं विद्वानित्याकांक्षयामाह प्राणान्वागादीन्द्रियाणि आयम्य उपसंहृत्य अनंतरं ओमिति जपंतस्य
वे चित्तं अंतःकरणं हृदि हृदयाकाशे ब्रह्मणि रुध्या निरुध्य ओमित्यात्मानं युंजीत ओमित्येवं ध्याय
थात्मानमिति श्रुतेः आत्मानं चित्तं युंजीत निरुध्यादित्यर्थः ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनु
स्मरन्नित्यादिस्मृतेश्च अथवा ओमित्यक्षमात्मानं ओंकारवाचे हृदि हृदयाकाशे चित्तं रुध्वा अन्यद्रूप
रसादिरसस्ताता मासामपि विषयस्मृतिं विषयदोषदर्शनेन हित्वा संकल्पप्रभवान्कामांस्त्य
क्त्वा सर्वानशेषतः मनसैवेंद्रियग्रामं विनियम्य समंततः शनैः शनैरुपरमेद्बुद्ध्या धृतिगृ
हीतया आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् यतो यतो निश्चरति मनश्चंचलमस्थिरं
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् इति स्मृतेः पुनः पश्चात्तद्ब्रह्मास्मीत्यभ्यास
मग्रे चित्तमपि ब्रह्मण्यात्मन्येव विलाप्य विलयं प्राप्य चित्ते लीने विलीने सति ध्यानव्याप
रोपरते सति अहं हि ब्रह्मास्मीति स्वप्रकाशचिद्रूपः परमात्मास्मीति एवं विद्वानित्यर्थः त
दुक्तं भारतीतीर्थैः निर्गुणोपासनं पक्वं समाधिः स्याच्छनैस्ततः यः समाधिर्निरोधाख्यः सो
नायासेन लभ्यते निरोधलाभे पुंसोंतरसंगं वस्तु प्रसिध्यते पुनः पुनर्वासितेस्मिन्वाक्याज्ज्ञा
यते तत्त्वधीरिति श्रुतेश्च यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ज्ञानमात्मनि महति
नियच्छेत्तद्यच्छेच्छांत आत्मनि इति अस्यायमर्थः प्राज्ञो विवेकी समस्तः पुरुषः वाग्वाचं
मनसि नियच्छेत् निगृह्णीयात् वाग्ग्रहणं सर्वेषामिंद्रियाणामुपलक्षणं प्रथमं वागादीन्द्रियव्या

१॰

पनेयामापणीयानभवति किंत्वन्येन सर्वज्ञेन गुरुणा प्रोक्ता प्रकर्षेणायुक्तिदृष्टांत।
पूर्वकमनुक्ताऽपदिष्टा सती सुज्ञानाय सम्यग्ब्रह्मविषया विद्यायै विद्यानिष्पत्तये भवतीति
काठकश्रुतेर्थः तद्विद्धि प्रणिपातेन परिप्रश्नेनेत्यादिस्मृतेश्च प्रथमतस्तावन्नास्माकल्पेना
संभावनानिवृत्त्यसंभवपत्ते साधनांतरमाप्याह वैराग्येणेत्यादिना वैराग्येण विषयदो
षविवेकेनोत्पन्नेन ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः इत्युक्तां परां काष्ठामापन्ने
न विषयवितृष्णपरहितकृतो निरंतरं योभ्यासः श्रवणनिष्पत्तिस्तेन यद्बलं मननेवाल्पतति
ष्ठामेदित्य वतत्येव व्याख्यानान्तराभ्यां हृदिमनो सहृदयामन्त्रसाधु ब्रह्मास्मीत्येकत्वेन याभ
क्तिर्भजनेनयापकाय्यानपराः प्रत्यगभिन्नब्रह्मैक्यविषयध्याननिष्ठास्तैतो ये विड्ढिस्य
र्थः नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष
आत्मा विवृणुते तनूं स्वां नायमात्मा बलहीनेन लभ्यस्तनस्तु तेपश्यते निष्कलं ध्यायमानः
तिमुंडकश्रुतेः प्रवचनमध्यापनं मेधा ग्रंथार्थधारणसामर्थ्यं श्रुतमात्मविषयं बहुधावि
चरितं तैः तेन न लभ्यः किंतु एष साधको यं परमात्मानमेव श्रवणादिभिर्निरंतरं प्रार्थयते
तेनायमात्मा लभ्यस्तस्यैवं प्रार्थयमानस्यैष आत्मा स्वात्मतनुं सच्चिदानंदात्मिकां विवृणु
ते प्रकाशयतीत्यर्थः बलहीनेन तद्विषयं मननमकुर्वाणेनेत्यर्थः निष्कलं निरवयवं परमा
त्मानं निरंतरं ध्यायमानः प्रत्ययसंतत्या विषयीकुर्वन्मुमुक्षुः ततएव ध्यानात्तं पश्यते अप्रतिबं
धेन साक्षात्करोतीत्यर्थः तदुक्तं भगवता अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते भन्नामासमभि

ह॰ टी॰ ५

नमात्रस्वरूपस्य कथं सर्वज्ञत्वमित्याशंक्याह ज्ञातृज्ञानेत्यादिना ज्ञातृज्ञानज्ञेयविहीनोपि ज्ञाता ज्ञानाश्रयः ज्ञानमविद्याया अंतःकरणस्य वा परिणामविशेषः ज्ञेयं वियदादिवस्तु तद्रहितोपि अविद्ययोपहितः सन् सदा ज्ञः ज्ञाता सर्वेन्द्रियैर्न च तस्यास्ति वेत्तेत्यादिश्रुतेरित्यर्थः तस्माज्जगतो मिथ्यात्वाद्ब्रह्मणो जगत्कारणत्वमवाभवं तटस्थं तदुपलक्षणेन न तु विशेषणमिति सिद्धं ४ एवं केवलतार्किकानवमाद्य श्रोत्रं जगत्कारणे विप्रलंभस्तुता ध्याने भक्त्यादिसाधनसंपन्नैर्गुरुशुश्रूषापरायणैर्वेदावगम्यं तत्वं स्तोतुमारभते यमीशं विदुः साक्षादनुभवंति तमिति संबंधः कीदृशाः अधिकारिणो विदुस्तत्राह आचार्येभ्य इति क

आचार्येभ्यो लब्धसुसूक्ष्माच्युततत्त्वा वैराग्येणाभ्यासबलाच्चैव दृढिम्ना भक्त्यै
काग्र्यध्यानपरा यं विदुरीशं तं संसारध्वांतविनाशं हरिमीडे ५ ॥

रतलामल

कवत्स्वस्य कृत्स्नीकृतब्रह्मतत्त्वेभ्यः सर्वकर्मसंन्यासेन समिदाद्युपहारपूर्वकं विधिवत्त्वैरुपसन्नेभ्यः शांतेभ्यः केवलं शिष्यकृपयैव तद्बोधने प्रवर्तमानेभ्यो गुरुभ्यः सकाशाल्लब्धं प्रथमज्ञातं सुसूक्ष्ममच्युतस्य च्युतिरहितस्य कूटस्थनित्यस्य श्रीविष्णोस्तत्त्वं यैस्ते लब्धसुसूक्ष्माच्युततत्त्वा आचार्यवान्पुरुषो वेद तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ इत्यादिश्रुतेः हे प्रेष्ठ नचिकेतः एषा ब्रह्मविषया बुद्धिस्तर्केण शुष्कतर्केण मूलप्रमाणरहितेन ता ५

न तु ब्रह्मनिरवयवत्वं परिणामनेऽतस्तावयवत्वं वा स्यादेकदेशपरिणामे कृत्स्नस्य ब्रह्मणः कार्याकारेण परिणामप्रसक्तिः न तत्र मुक्तेः प्राप्यब्रह्माभावप्रसं
गात् द्वितीये निष्कलं निष्क्रियमित्यादिनिरवयवत्वप्रतिपादकश्रुतिविरोध इत्यर्थः ॥ ~ ६

वापि तत्त्वाच्चेति भावः ब्रह्म परमार्थतो जगदाकारेण विपरिणमत इति भास्करमतमाशंक्याति
राकरोति अपि नैवं परमार्थमिति एवं वियदाद्याकारेणावस्थानेन परमार्थेन वास्तवमित्यर्थः
निष्कलं निष्क्रियमित्यादिश्रुत्या निरवयवब्रह्मणोंऽशतो जगद्रूपपरिणामे ब्रह्माभावप्रसं
गात् स्वनः प्रलयकाले सच्चिदानंदाकारेण परिणामे च ब्रह्मणो नित्यत्वप्रसंगात् समुद्रादेश्च
सावयवत्वेनांशतः फेनादिपरिणामेप्यवस्थितिसंभवाच्च न ब्रह्मणो जगदाकारेणावस्थानं
वास्तवं सूत्रकारोपि कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति परिणामं समदूषयत् स्पष्टोर्थः

यस्मादन्यन्नास्त्यपि नैवं परमार्थं दृश्यादन्यो निर्विषयज्ञानमयत्वात् ज्ञातृज्ञान
ज्ञेयविहीनोपि सदा ज्ञस्तं संसारध्वांतविनाशं हरिमीडे ४ ॥

शब्दादिभ्य इति विवर्तवादं चांगीचकार तदनन्यत्वं परमार्थतः प्रपंचस्य तद्व्यतिरेकेणाभा तदनन्यत्वमारंभण
वएव आरंभणशब्दादिभ्यः वाचारंभणं विकारो नामधेयमित्यादिश्रुतिभ्य इति तस्यार्थः
ततो जगतो मिथ्यात्वान्न जगत्कारणत्वं ब्रह्मणो वास्तवमिति भावः ननु सर्वैः परिदृश्यमा
नस्य जगतः कथं मिथ्यात्वं दृश्यत्वादेव शुक्तिरूप्यादिवज्जगतो मिथ्यात्वमिति चेत्तर्हि ब्रह्म
णोपि दृश्यत्वान्मिथ्यात्वापत्तिरित्याशंक्याह दृश्यादन्य इति दृश्याच्चैतन्यविषयादन्यो यो
विलक्षण इति शेषः अदृष्टो द्रष्टेत्यादिश्रुतेरित्यर्थः दृश्यादन्यत्वे हेतुमाह निर्विषयज्ञानमय
त्वादिति विषयानपेतविज्ञानस्वभावत्वादित्यर्थः विज्ञानघन इत्यादिश्रुतेः कूटस्थत्वा

ईश्वरस्य मायागुणसर्वोपयादनेसति २

दृ.टी. गुणवशादेव सर्वमुपपद्यत इति भावः नन्वेतर्हि प्रसिद्धमायावीव किमिति न दृश्यत इत्याश
ङ्क्याह यश्चाव्यक्त इति अतीन्द्रियग्राह्य इत्यर्थः अचिन्त्यमव्यक्तमित्यादिश्रुतेः अशब्दमस्प
र्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यदित्यादिश्रुत्याच रूपाद्यभावान्नेन्द्रियग्राह्यः कि
न्तु श्रुत्येकगम्य इति भावः नन्वेवं ब्रह्मण एव सकलजगदाकारत्वे भोक्तृभोग्यविकारे न स्यात्
सर्वस्यापि ब्रह्मकारणत्वाविशेषादित्याशंक्याह व्यस्तसमस्त इति व्यस्तो भोक्तृभोग्यरूपेण
विभक्तोयः समस्तः प्रपंचस्तद्रूप इत्यर्थः लोके यथा समुद्रादेरेकस्यैव फेनतरङ्गबुद्बुदरू
पेण विभक्तानेककार्यहेतुत्वं तद्वदेकस्यापि ब्रह्मणः विभक्तानेककार्यहेतुत्वं संभवति अ
त्र सत्त्वे भोक्तृत्वापत्तेरविभागश्चेत्स्याल्लोकवदिति अस्य चायमर्थः भोक्तृभोग्यत्वापत्तेर्भो
ग्यस्य च भोक्तृत्वापत्तेरविभागः विभागाभावः स्यादिति चेन्न लोकवत्समुद्रवत् विभागो
पपत्तेरिति ततश्च ब्रह्मैव सर्वकारणमिति भावः ब्रह्मण एव सत्यानृतभोग्यरूपेणावस्था
नमाह सदसद्य इति सत्सत्यमसदसत्यं सत्यं चानृतं च सत्यमभवदिति श्रुतेः एकं सत्य
पदं ब्रह्म परमपरं व्यावहारिकसत्यं वियदादि परमनृतं शुक्तिरजतादि च ननु कार्यस्य स्व
न्यूनपरिमाणद्रव्यारब्धं कार्यत्वाद्घटादिवदित्यनुमानात्सर्वस्य कार्यस्य स्वन्यूनपरिमाणद्रव्या
रब्धत्वनियमात्परंपरया परमाणव एव जगदुपादानं न तु ब्रह्म तस्य विभुत्वादित्याशंक्याह
यस्मात्सच्चिदानन्दरूपाद्भिन्नोऽन्यः परमाण्वादिर्नास्ति एकमेवाद्वितीयं यस्मात्परं नापरम
स्ति किंचिदित्यादिश्रुतेरित्यर्थः अनुमानस्य दीर्घविस्तृततन्तौ महत्त्वया रव्यञ्जो व्यभिचाराद्गम ८

श्वरः बादरायणेनापि न प्रयोजनवत्त्वादिति अनेन सूत्रेण प्रवृत्तेश्च लोके प्रयोजनवत्ता
दीश्वरस्य च तदभावात् न स स्रष्टेत्याशंक्य लोकवत्तु लीलाकैवल्यमित्यनेन लोके नरा
ज्यादिवदेवेश्वरस्यापि लीलया जगत्सर्जनादिरूपायाः कैवल्यप्रयोजनराहित्यस्योपपाद
नमिति तस्माद्यो तस्मादीश्वरः स्रष्टैवेति भावः ननु लोके कुलालादेः स्रष्टुः सशरीरस्य घटा
दिप्रयोजनपरिज्ञानिनः बाह्यमृदाद्युपसंहारपूर्वकमेव सर्जने प्रवृत्तिदर्शनाद्ब्रह्मणश्च
निर्विकल्पस्याशरीरस्यात एवासमर्थस्य सृष्टिप्रयोजनापरिज्ञानिनः सत्प्रतिरिक्तपदार्था
भावेन बाह्यसाधनरहितस्य कथं स्रष्टृत्वमित्याशंक्याह अनेन तु गुणा इति अनेनानाः असंख्या
तास्सर्वशक्तित्वसर्वज्ञत्वादयो गुणा धर्मा यस्य सः तत्र हेतुमाह गुणधामेति शुद्धसत्त्वस्वरू
पा माया गुणधाम गृहं रूपोपाधिर्यस्य स इत्यर्थः बाह्यसाधनाभावेपि क्षीरादेर्दध्यादिहेतुत्वद
र्शनाद्देवानां योगधनिनां च बाह्यसाधनं विना गुणानां योगमहिम्ना सर्गादिदर्शनादस्माकं
च शरीरं विनापि शरीराधिष्ठातृदर्शनात् परास्य शक्तिर्विविधैव श्रूयते मायां तु प्रकृतिं वि
द्यान्मायिनं तु महेश्वरमित्यादावीश्वरस्य सर्वसाधनपटीयस्याः मायाशक्तेः श्रवणात् स
र्वकारणोपसंहारदर्शनान्नेति चेन् क्षीरवद्धि देवादिवदपि लोके सर्वधर्मोपपत्तेश्चेति सूत्रैः
कुलालादेर्मृदाद्युपसंहारदर्शनादीश्वरस्य च बाह्यसाधनोपसंहाराभावान्न स्रष्टेत्याशंक्य बा
ह्यसाधनाभावेपि क्षीरस्य दधिरिव तथा लोके देवादिवच्च प्रपंचरचनोपपत्तेर्मायावशादेव सर्व
ज्ञः सर्वकर्तृत्वादिधर्माणामुपपत्तेश्च न कोपि दोष इति समाधानाच्चाशरीरस्यापि तस्य मायया

ह॰टी॰

रोधात् साक्षाच्चोभयाम्नानात् आत्मकृतेः परिणामात् पत्युरसामञ्जस्यात् इतीश्वरस्य प्रकृत्यधिष्ठानस्वरूपत्वे निमित्तमात्रेश्वरस्याभावे चाह सूत्राणामयमर्थः प्रकृतिरुपादानं च कारणमधिष्ठाता चेश्वर एव सति प्रतिज्ञादृष्टान्तयोरनुपरोधात् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् इति प्रकृतिविषयदृष्टान्तस्य चानुपरोधादुपपत्तेरिति साक्षात्स्वत एव ब्रह्मणः प्रज्ञायैव तस्योभयाम्नानात् प्रकृतित्वस्याधिष्ठातृत्वस्य चाम्नानादिति आत्मकृतेः तदात्मानं स्वयमकुरुतेति आत्मन एव कर्माकारेण कारणत्वश्रवणात् कथं कर्तृत्वेन पूर्वसिद्धस्य क्रियमाणत्वं तत्राह परिणामादिति पूर्वसिद्धस्यापि विकारात्मनात्मनः परिणामयितृत्वात् पत्युर्निमित्तमात्रभूतेश्वरस्यासमञ्जसत्वादनुपपत्तेरिति लोकदृष्टसामान्येनानुमितस्य लोकवद्देवरागद्वेषादिप्रसक्त्या ईश्वरत्वानुपपत्तिरिति तत्स्वतन्त्रेश्वराधिष्ठितं प्रधानमपि कारणमिति भावः ननु स्वप्रयोजनरहितेन सत्त्वेनादोषप्रवृत्तस्येश्वरस्याप्ततत्त्वे तत्कारित्वाविनाभावप्रसंगात्स्वप्रयोजनोद्देशेन च प्रवृत्तस्यानित्यत्वव्याहतेश्च नेश्वरो जगत्स्रष्टेत्याशंक्याह यस्मादानन्द इति निरतिशयासमानानवच्छिन्नपरमानन्दस्वरूपः आनन्दं ब्रह्म विज्ञानमानन्दं ब्रह्म एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीत्यादिश्रुतेरवाप्तकामस्येश्वरस्याप्तव्याभावात् स्वभावान्नित्यत्वमहानिरित्यर्थः लोके सार्वभौमादेः प्रेक्षाकारिणः प्रयोजनोद्देशं विनापि मृगयादौ प्रवृत्तस्यान्यत्वादर्शनात् प्राणिकर्मानुरोधेन जगत्सर्जनादौ प्रवृत्तेरीश्वरस्य स्वभाववत्त्वात्स्वभावे च पर्यनुयोगाभावाच्चोन्मत्ते

ग्रैत्रमारेण

उत्तरप्रश्नाभावात् =

७

कृत्याजगत्कारणस्यसतः ईक्षतेर्वोक्षितृत्वस्यश्रवणादशब्दंशब्दागम्यंअनुमानगम्यंप्रधानं
नकारणमितिप्रथमसूत्रार्थः अनुमीयतइत्यनुमानंप्रधानंकारणंनभवति तस्यानइत्वेन
रचनानुपपत्तेर्देहादिप्रपंचकर्तृत्वानुपपत्तेरितिद्वितीयसूत्रार्थः श्रुतिसिद्धसर्वज्ञस्यतुब्रह्म
णस्तत्संभवतीतिभावः यदुक्तंविलक्षणयोर्नकार्यकारणतेति तत्रऊर्णनाभेस्तंतोर्गोमया
द्वृश्चिकादेः जीवतोपुरुषात्केशलोमादेश्चदर्शनादित्यभिप्रायश्रुतिःसर्वइति सर्वंखल्विदंब्रह्म
इदंसर्वंयदयमात्माइत्यादिश्रुतेः घटः संघटः स्फुरतीतिसर्वस्यप्रपंचस्यसत्त्वेनस्फुरणेन
चब्रह्मसालक्षण्यानभवात् यथोर्णनाभिः सृजतेगृह्णतेचयथापृथिव्यामोषधयः संभ
वंति यथाजीवतः पुरुषात्केशलोमानितथाक्षरात्संभवतीहविश्वमित्यादिश्रुत्याविलक्ष
णकारणेदृष्टांतप्रदर्शनाच्चेतिभावः नचाचेतनस्यप्रधानस्यसत्त्वतः सृष्ट्यादिप्रवृत्त्यसंभवेपि
ईश्वराधिष्ठितस्यतस्यप्रवृत्त्याकारणत्वंभवतीतियोगानामीश्वरसांख्यानांवामतमाशंक्याह
सकलोयइति सकलः प्रकृतिरधिष्ठाताचसएवेत्यर्थः सोकामयतबहुस्यांप्रजायेयेतिस्वस्य
बहुभवनकामनादर्शनात्तदात्मानंस्वयमकुरुतेतिस्वात्मनः जगद्रूपेणकारणत्वश्रवणात्क
स्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवति आत्मनिखल्वरेदृष्टेइदंसर्वंविज्ञातंभवतीत्यादिश्रु
तेरेकविज्ञानेनसर्वविज्ञानप्रतिज्ञयाः प्रकृत्यधिष्ठात्रोर्भेदेप्रकृतिज्ञानेनाधिष्ठातृज्ञानासंभवेन
उपरोधप्रसंगात् श्रुतिसिद्धप्रकृत्यधिष्ठात्रूपस्येश्वरस्यतटस्थत्वमात्रेणस्वलोकदृष्टसामान्यप्रमा
धकेनानुमानेनसिद्ध्यसंभवाच्चसएवप्रकृत्यधिष्ठाताचसूत्रकारोपिप्रकृतिश्चप्रतिज्ञादृष्टांतानुप

ह॰टी॰
६

च ब्रह्मणो जगत्कारणत्वे न कोपि दोष इति २ ननु सत्वरजस्तमोदात्मकस्य वियदादिप्रपंचस्य जडस्य सत्वरजस्तमोहात्मकं सत्वरजस्तमोगुणात्मकं जडं प्रधानमेव कारणमनुमीयते चिन्मात्रस्य तु ब्रह्मणः तादृशजगत्कारणत्वानुपपत्तेः कार्यकारणयोर्वैलक्षण्यानुपपत्तेः अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयंतीं सरूपामिति श्रुतेः अजा जन्मरहिता लोहितशुक्लकृष्णा रजःसत्वतमोरूपा सरूपा समानरूपा बह्वीः प्रजाः प्रकर्षेण जायन्त इति प्रजा वियदादिप्रपंचस्तामित्यर्थः इत्याशंक्याह यः सर्वज्ञः अत्र श्रुतिः यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः

सर्वज्ञो यो यश्च हि सर्वः सकलो यो यश्चानंदोनंतगुणो यो गुणधामा यश्चाव्यक्तो व्यस्तसमस्तः सदसद्यस्तं संसारध्वांतविनाशं हरिमीडे ३ ॥

त्यादिसामान्यतं

सर्वं जानातीति सर्वज्ञः विशेषेण सर्वं वेत्तीति सर्ववित् यस्य ज्ञानमयं तपः नतज्ञो वा नासिव कृच्छ्रचांद्रायणादिरूपमिति श्रुतेरर्थः प्रधानस्य जडत्वेन विविधकर्मफलरूपविविधविन्यासदेहादिप्रपंचरचनानुपपत्तेः किंच सत्वादेर्बाह्यघटादिधर्मत्वासिद्धेरांतरस्यैव प्रतीतेः अचेतनस्य तो लोके प्रवृत्त्यदर्शनादजामित्यादिमंत्रस्य लोहितशुक्लकृष्णगुणवत्तेजोवन्नकारणपरमात्माधिष्ठानाव्याकृतविषयत्वात् प्रधाने जगत्कारणत्वादरायणेनापि ईक्षतेर्नाशब्दं रचनानुपपत्तेश्च नानुमानमित्यादिना प्रधानस्य जगत्कारणत्वं प्रत्यषेधि तदैक्षत बहु स्यां प्रजायेयेति

कांश्चिद्दुःखिनस्तिर्यगादीन्कांश्चिदुभयवतो मनुष्यांश्च सृजन्नीश्वरो विषमः स्यात् तथा प्रल-
यकाले अविशेषेण सर्वान्जीवानुपसंहरन् निर्घृणश्च स्यादित्याशंकां तत्तत्प्राण्यनुष्ठितकर्मा-
पेक्षत्वेनेश्वरस्य सृष्ट्यादौ प्रवृत्तेर्न वैषम्याद्यापत्तिरित्यभिप्रेत्याह येनविशुद्धसत्त्वेडःदेवर्षितिर्
क्षेत्रदारादिलाभादिजन्यासनपरिणामरूपानुकूलचित्तवृत्तिः दुःखे रोगादिजन्या [illegible] वि-
काररूपा प्रतिकूलचित्तवृत्तिः तदुभयविशिष्टसकलजगद्येन स्वप्रकाशचिद्रूपेण परमात्मना
विशुद्धप्रकाशितमित्यर्थः अत्र च श्रुतिः तस्य भासा सर्वमिदं विभातीति तस्य सूर्यादिविषयस्य
प्रस्थानभासा स्वरूपचैतन्येनेत्यर्थः अयं भावः एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोके-
भ्य उन्निनीषते एष एवासाधु कर्म कारयति तं यमयएभ्यो लोकेभ्यः निनीषते नरकतिर्यगादि
लोकेभ्य उन्निनीषते ऊर्ध्वं गंधर्वादिब्रह्मान्तानां पदं नेतुमिच्छतीति अथ तिर्यगादिस्थावरान्तं ने-
तुमिच्छतीति श्रुत्या हि तत्तत्प्राण्यनुष्ठितकर्मापेक्षया तत्तत्फलप्रदातृत्वं बोध्यते न च पुण्यपा-
पे च स्वेच्छया प्रवर्त्तयत ईश्वरस्य पुनश्च वैषम्याद्यापत्तिरिति वाच्यं पूर्वपूर्वकर्मापेक्षया तत्र त-
स्मिन्प्रवर्त्तयतस्तदापत्त्यभावात् संसारस्य चानादित्वात् सूत्रकारेण च तस्य वैषम्याद्यभावः सू-
चितः वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति न कर्माविभागादिति चेन्नानादित्वात् ई-
श्वरस्य वैषम्यनैर्घृण्ये न संभवतः सृष्ट्यादिप्राणिकर्मसापेक्षत्वात् तथा हि एष ह्येवेत्याद्या
श्रुतिर्दर्शयतीति प्रथमसूत्रार्थः ननु सृष्टेः पूर्वं कर्म नास्ति तदाविभागात्सर्वस्य ब्रह्ममा-
त्रत्वादिति चेन्न संसारस्यानादित्वात् तत्तत्प्रलयेऽपि स्थितिसंभवादिति द्वितीयसूत्रार्थः तथा

वैषम्यादि

त्रिपात्पादत्रयं अस्य ब्रह्मणः अमृतं मोक्षरूपं दिवि स्वप्रकाशात्मनि स्वरूपएव वर्तते नप्र
पंचसंबंधस्तत्रास्तीत्यर्थः ब्रह्मणः प्रपंचसंबंधरहितप्रदेशः श्रीबादरायणेनापि सूत्रि
तः विकारावर्त्ति च तथा हि स्थितिमाहेति विकाररूपेणावर्तमाने ब्रह्मणो भागत्रयम
स्ति तथा हि स्थितिमवस्थानं ब्रह्मण आह उक्ता श्रुतिरिति सूत्रार्थः तथा चोक्तप्रकार
ण ब्रह्मणो जगदाकारेणावस्थानेपि न तु कार्त्स्न्यस्य लाभावेशः केनापि भावः एवं जग
दुत्पत्तिं परमात्मन उक्त्वा तस्य जगतः स्थितिहेतुत्वमप्याह येनापिनद्धमिति पुनः पश्चा
द्येन परमात्मना एतज्जगत् इत्थं वर्णाश्रमादिभेदेनापिनद्धं संदृब्धं बद्धमित्यर्थः तथा च श्रु
तिः एष सेतुर्विधारण एषां लोकानामसंभेदायेति अस्याश्चायमर्थः एष सर्वाण एष महा
नजः अस्य एकस्य सर्ववशित्वेन सर्वेश्वरत्वेन च उक्तः प्रकृतः परमात्मा सेतुरिव सेतुः सेतुत्वसा
म्यमेवाह एषां लोकानां भूरादिभेदेन देवमनुष्यतिर्यगादिभेदेन वर्णाश्रमादिभेदेन च भि
न्नानां भूतानां प्राणिनां चासंभेदाय असांकर्याय विधारणः विधारयिता यथा लौकिकसेतुः
क्षेत्रसंपदां तत्रत्यजलानां चासांकर्याय विधारयिता तद्वदिति येन व्याप्तमिति येन चापि ह्या
नभूतेन सर्वं जगदाकाशेनेव व्याप्तमंतर्बहिः पूर्णमित्यर्थः तथा च श्रुतिः यच्च किंचिज्जगत्स
र्वं दृश्यते श्रूयतेपि वा अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः इति सर्वव्यापकत्वे हेतुः नारा
यण इति निरतिशयमहत्त्वात् अयनानि सर्वाणि जगंति नाराणि तेषामयनमधिष्ठानमित्यर्थः अस्तु
त्वपि ब्रह्मणो जगत्कारणत्वं न युज्यते वैषम्यनैर्घृण्यप्रसंगात् कांश्चित्सुखिनो देवादीन्

तिवृत्त्यभावोऽज्ञानमिति अज्ञाननिवृत्तिरूपात्मन्यपि सत्त्वोपपत्तेः भिन्नसत्ताकयोः भावाभाव
योर्विरोधाभावाच्च नित्यसिद्धायामप्यज्ञाननिवृत्तौ साध्यत्वभ्रान्त्या पुरुषप्रवृत्त्युपपत्तेश्च
प्रपंचोपशमं शिवमित्यादिश्रुत्यात तस्यात्माभेदसिद्धेश्च सर्वथाप्यज्ञाननिवृत्तिरूपप्रयोज
नसंभवेन स्तोत्रारंभो युज्यत इति भावः ईडे स्तौमीत्यर्थः २ ननु ब्रह्मणस्तस्मादन्यज्जगदारभ्य
ते उत ब्रह्मैव जगज्जायते नाद्यः द्वैतापत्तेः एकस्य निरवयवस्यारंभकत्वानुपपत्तेश्च द्वितीये
त्वे ब्रह्म सर्वात्मना जगदाकारं भवति एकदेशेन वा नाद्यः मुक्तानां प्राप्यस्य लाभावप्रसंगात्

यस्यैकांशादिदमशेषं जगदेतत्प्रादुर्भूतं येन पिनद्धं पुनरित्थं येन व्याप्तं येन
विबुद्धं सुखदुःखैस्तं संसारध्वांतविनाशं हरिमीडे २॥

निष्प्रपंचब्रह्मण एव
मुक्तप्राप्यत्वात् न द्वितीयः ब्रह्मणो निरवयवत्वात् सावयवत्वे चानित्यत्वप्रसंगात् निष्क
लमित्यादिश्रुतिविरोधाच्चेत्याशंकां निरवयवेऽपि मायारोपपक्षं त्वंशेवेनिष्टच्छुतः तच्छाब्ययोगं
ब्रूते श्रुतिः श्रोतहितैषिणीत्यादिन्यायेनोत्तरमाह यस्य परमात्मनः एकांशादेकदेशात्
त्वात् मायावच्छिन्नात् इदं दृश्यं भोक्तृभोग्याकारेण एतदनुभूयमानं जगत् प्रादुर्भूतं उत्पन्नमि
त्यर्थः ब्रह्मणो वस्तुतो निरवयवत्वेऽपि मायावच्छेदेनानिर्वचनीयांशत्वात् एकदेशादेवेदं
जगदुत्पन्नं तथा च श्रुतिः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति अस्याचायमर्थः
विश्वा भूतानि ब्रह्माण्यात्मकसकलमिदं जगदिति यावत् अस्य ब्रह्मणः पादः अंश इत्यर्थः

ह॰टी॰
४

अनिर्वचनीयाज्ञाननिवृत्तेरनिर्वचनीयत्वानुपपत्तेश्चानादित्वस्य निवृत्तिर्विघटो भवति ततश्च सर्व
थापि अनुपपत्तेर्नाज्ञानस्य निवृत्तिः संभवतीत्याशंक्य ननु तावदज्ञानस्य कल्पकाभावेनाकल्पित
तयाज्ञाननिवृत्त्यसंभवः दीपादिवत्तस्य स्वपरनिर्वाहकत्वात्तस्य स्वप्रकाशात्मनिवर्त्यत्वेनासंभ
वेन कल्पितत्वस्यैव वक्तुमुचितत्वात् अनन्तेनादिमत्सूर्दाइमे सत्यां कामाअनृतापिधानानसदा
सीन्नो सदासीदित्यादिश्रुतेश्च नाप्यनादिभावत्वेन तस्य निवृत्त्यनुपपत्तिः अनादिभावस्यानिवृत्ति
रिति सामान्यव्याप्तेः ज्ञानेनाज्ञाननाश इत्यनुभवसिद्धविशेषव्याप्तिविरोधेन तत्र निषेधकमात्मदि
ति भूयश्चान्ते विश्वमायानिवृत्तिः तिचाप्यते सत्त्वमृत्वात्ममच्यते ते ब्रह्मलोके तु परान्तकाले प
रामृतात्परिमुच्यन्ति सर्वे इत्यादिश्रुत्या ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः मामेव ये प्रपद्यं
ते मायामेतां तरन्ति ते अहमज्ञानजं तमो नाशयामि तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते यो
गी मायाममेयाय तस्मै ज्ञानात्मने नमः इत्यादिस्मृत्या च अज्ञानव्यतिरिक्तस्य लेशसंकोचस्यैवो
चितत्वात् तस्यास्माभिः भावत्वानंगीकारात् अभावविलक्षणत्वमात्रेण भावत्वव्यपदेशाश्रय
भिप्रेत्याज्ञाननिवृत्तिः सद्रूपात्माभिन्ना चेत्याह संसारध्वान्तविनाशं हरिमिति संसारस्य कर्तृता
दिरूपस्य कारणं यत् ध्वान्तमज्ञानं तस्य विनाशं निवृत्तिरूपं हरिं हृत्वा तद्रूपं सत् अज्ञानविरोधिचै
तन्यमित्यर्थः नचात्माभिन्नाया अज्ञाननिवृत्तेर्ज्ञानसाध्यत्वानुपपत्तिः यस्मिन्निवृत्तेर्ज्ञानसाध्य
त्वानुपपत्तिः यस्मिन्सति यस्याग्रिमक्षणसंबंधः असति यस्मिन्यस्याभावः तत्तत्साध्यमिति
साध्यलक्षणस्य ज्ञाने सति अज्ञाननिवृत्तिरूपात्मनः अग्रिमक्षणसंबंधः ज्ञानाभावे अज्ञान

अज्ञानेन
विचार्य
अभिमिता य
तेनादिका रणं

अज्ञानस्य
आच्छादितो
ते विसु
तेनादिकारणे ज्वरादिकार्यस्याभावः २
४

तेनादिकारणे ज्वरादिरूपकार्यस्य सोत्पत्तेरुत्तरक्षणेन सह संबंधः, अविद्यमाने २

पेण संविदनित्यत्वाध्यारोपे च दर्शनात् स्वप्रकाशस्य च स्वयमेव स्वस्मिं प्रमाणत्वेन तन्निष्ठावि
द्यायाः प्रमाणदोषस्य सत्वाच्च तत्त्वकर्तृत्वाध्यस्तत्वेनानात्मत्वादात्मनश्च कर्तृत्वादिसाक्षित्वेन ब्रह्म
त्वेनाबाधाभावात् ब्रह्मात्मैक्यं विषयः संभवतीति एवं कर्तृत्वादेरनर्थस्यात्मन्यारोपितस्य सम्
लस्य निवृत्तिः प्रयोजनमपि संभवतीत्याह यस्मिन्नहमिति यस्मिन्सदानंदचित्प्रकाशे परिपू
र्णे विश्वोऽहमेवेति शांत्यादिसहितनिरंतरानुष्ठितश्रवणमनननिदिध्यासनैः सम्यग्ज्ञातात्मतत्त
त्त्वे स्मृतिचक्रं समूलं नश्यति लीयते तं हरिं ईडे इति संबंधः अत्रोभयत्र श्रुतिः यत्र हि द्वैतमिव भव
ति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यादि ननु अहंकारादिप्रपंचम
(अज्ञानस्य) ज्ञानस्य निवृत्तिः न संभवति तस्यानध्यस्तत्वात् स्वेनैव स्वस्याध्यासे आत्माश्रयात् अज्ञानांतरांगी
कारे चानवस्थाद्यापत्तेः लोके अनध्यस्तस्य घटादेर्ज्ञानान्निवृत्त्यदर्शनात् किं च भावरूपाज्ञानस्यानादि
त्वेन निवृत्तिर्न संभवति अनादिभावस्यात्मवन्नित्यत्वनियमात् परमाणुनिष्ठश्यामतायाश्चानादि
त्वस्योभयवादिमते संप्रतिपत्तेः किं च किमज्ञाननिवृत्तिः सती उतासती उत सदसती सदसद्विल
क्षणा वा आद्ये आत्मनो भिन्ना उताभिन्ना भिन्नाभिन्ना वा भिन्नाभिन्नविलक्षणा वा नाद्यः द्वैतापत्तेः
न द्वितीयः आत्मनोऽनादित्वेनाविद्यानिवृत्तेस्तज्ज्ञानसाध्यत्वानुपपत्तेः नापि तृतीयः विरोधात् अत ए
व न चतुर्थोऽपि भिन्नाभिन्नत्वव्यतिरेकेण प्रकारांतराभावात् न च प्रथम द्वितीयः असत्वे शशशृंगवत्
त्प्रायास्तस्याः साध्यत्वानुपपत्तेः पुरुषार्थत्वाभावप्रसंगश्च नापि तृतीयः विरोधात् उक्तपक्षद्वयदू
षणापत्तेश्च न च चतुर्थोऽपि सदसद्विलक्षणत्वेऽनिर्वचनीयत्वेन तस्या अज्ञानावस्थानप्रसंगात्

= १ प्रागेतो दोन उपर
नास्ति निवृत्तिः समा
हितः अत्राज्ञानोऽर
नात्रास्यात्मैवात्मा
नेव पतन् इति श्रुतेः

यदा दोषभिचा
रकारणाद्यानादि
निष्ठाभावेपि व्य
भिचारवारणा
य भावेति
अनंगीकारात्

२ = अज्ञाननिवृत्तेः

यथाविष
यत्वेन =

= अज्ञाते विश्वो
ऽहमिति चक्रं भ्रम
ति इत्यत्र श्रुतेन
स्मिं लीयते तस्मि
त्रैव ९

१ = ननु परमाणुनि
ष्ठश्यामतायाश्च
नादिभावत्वेपि
नित्यत्वं दृष्टमेत
आह परमाण्विति

योऽन्यत्रात्मदेवेदं इत्यात्मनः पृथगेव ब्रह्मज्ञानं परजातिः परादात्परा कुर्यात्
न विमलं कुर्यादात्मरूपं मामनात्मतया यश्यति इति ह्युक्तं भवति

इह   साम   रित्नमाव्रजनीमर्थः ०।२   येन्नर्भः

ह्री ३

अयमभिसंधिः आत्मा वा इदमेक एवाग्र आसीत् सदेव सोम्येदमग्र आसीत् सत्यं ज्ञानमनंतं
ब्रह्म कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति अन्यत्र धर्मादन्यत्राधर्मात् ब्रह्म ते ब्रुवा
णि यत्साक्षादपरोक्षाद्ब्रह्म योऽशनायापिपासे शोकं मोहं जरामृत्युमत्येति ब्रह्म तं परादा
द्योऽन्यत्रात्मनो ब्रह्म वेद अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भ
यं भवति तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्रह्म तदेतद्ब्रह्मापूर्वमनंतरमबाह्यमित्या
द्याः श्रुतयो हि उपक्रमोपसंहारादिभिर्लिंगैस्तत्परास्तत्प्रत्यगात्मानमशनायाद्यतीतं अ
पेतब्रह्मत्वेन्द्रादिकं सच्चिदानंदात्मकं निर्विशेषब्रह्मभेदनिंदापूर्वकं बोधयंति न च ताः प्र
त्यक्षादिभिर्बाधितुं शक्याः तावद्विधलिंगोपेततया नमस्त्वेन प्रबलत्वात् किं तत एव प्रत्यक्षादि
तात्त्विकांशानुपजीवकत्वात् शुक्तिज्ञानवत् आज्ञाविज्ञातस्य प्रमेयबोधने प्रत्यक्षाद्यनुपजीव्य
स्वप्रकाशचैतन्यविषयत्वात् अनुमानापेक्षया प्रत्यक्षवत् अव्यवहितवस्तुविषयत्वाच्च प्रत्यक्षा
दिकं बाधितात्तात्त्विकांशात् अप्रमा व्याव्यावहारिकांशव्यवस्थापयेति ततश्च तादृशे आत्मनि कर्तृ
त्वादिप्रपंचस्य परमार्थतोऽसंभवेन मोक्षस्त एव न च स्वप्रकाशस्याज्ञानविषयत्वाभावेनाधिष्ठानत्वा
योगाद्ध्यस्तत्वानुपपत्तिः लोके च रममहं न जानामीति अज्ञानविशेषणतया भासमानस्यैव तद्विष
यत्वदर्शनात् स्वरूपचैतन्यस्य मामहं न जानामीत्यज्ञानसाधकतया सिद्धस्य तदविरोधित्वाद्वृत्या
रूढस्यैव तस्य तद्विरोधित्वात् आत्मन्यारोपितांशभेदसत्त्वात् सादृश्यादेरात्मनि ब्रह्मण एवाध्यारो

अस्से भेदं

व्यावहारिकं
तत्त्वमस्याने
तत्त्वबाध्यत्वेन
तिद्व्यस्याने
कबाध्यत्वम्
अज्ञाने

१। उपक्रमोपसंहा
रौ अभ्यासोऽपूर्व
ता फलमर्थवा
दोपपत्ती च लिंग
तात्पर्यनिर्णये

ब्रह्माभिन्ने

तदस्य

अज्ञानस्य

३

आत्मनः=१   अज्ञानस्यै १

आत्माभिन्ने ब्रह्मणि अध्यारोपबलाय यथाऽहरोतित्यः तथा
संविदपि स्वैव मध्यारोपाच्च सादृश्यादेर्दर्शनादित्यर्थः १

लक्षणप्रमा णयोरभावेपि | कर्तृत्वादि

सवाएषमहानजआत्मेत्यजन्यत्वप्रतिपादकश्रुतिविरोधश्च न तस्य जन्यत्वमिति सर्वजन्योपादान निमित्तत्वलक्षणमुपपन्नमिति नन्वेवमपि स्तोत्रारम्भो न युज्यते तस्य विषयप्रयोजनयोरभावात् तथा हि प्रत्यगभिन्नं ब्रह्मैव विषय इति भवतोभिमानः स चानुपपन्नः कर्तृत्वभोक्तृत्वप्रमातृत्वेन प्रतीयमानस्य प्रतीचः तद्रहितब्रह्मणोरभेदानुपपत्तेः ननु प्रतीच्यध्यस्ताहंकार एव कर्तृत्वादिनानुभूयते न तु प्रत्यगात्मेति चेत् न तद्धि न तावत् सति तद्गतभूयो धर्मित्वं साक्षिरूपत्वे अध्यासकारणाभावेन कर्त्रध्यासस्यानुपपत्तेः किं जडे वस्तुनि कर्त्रध्यासः उत स्वप्रकाशे नाद्यः कर्तुरभानप्रसंगात् भवन्मतेपि जडस्य सर्वस्याध्यस्तत्वेन अधिष्ठानत्वानुपपत्तेश्च न द्वितीयः स्वप्रकाशकस्य वस्तुनः अज्ञानविषयत्वाभावेनाधिष्ठानत्वायोगात् लोके अज्ञातस्यैव शुक्तिकादेरधिष्ठानत्वदर्शनात् अज्ञस्य च सोपात्वाङ्गीकाराच्च नहि प्रकाशमानस्याप्यज्ञानविषयत्वं संभवति प्रकाशाप्रकाशयोर्विरोधात् साक्षिरूपादेर्विषयदोषस्य स्वप्रकाशविषयप्रमितेरसंभवेन तत्करणप्रमाणदोषस्य चाभावाच्च तस्मान्न कर्त्रध्यास इति तस्यैवात्मत्वात् तस्य बहुदोषवतो निर्दुष्टब्रह्मणाभेदायोगात् न विषयः संभवति प्रयोजनमपि न संभवति आत्मनि प्रतीयमानकर्तृत्वादेरनर्थस्य निवृत्तिर्हि प्रयोजनमिति वक्तव्यं तस्योक्तप्रकारेणानध्यस्तस्य ज्ञानान्निवृत्त्ययोगात् इत्याशंक्य तदुभयं प्रतिपादयन्स्तुतिमारभते यस्मिन्निति यस्मिन्नज्ञाते विश्वोधिष्ठाने पतत् अनुभूयमाने संसृतिचक्रे संसरत्यनया जीव इति संसृतिरहंकारादिप्रपंचः स एव चक्रं भ्रमति प्रत्यहमाविर्भावतिरोभावाभ्यां च पुनः पुनरावर्तते इत्थं कर्तृत्वादिप्रकारेण अथवा संसृतिचक्रे अहंकारादिप्रपंचजाते कर्मजीवो भ्रमति भ्रान्त्या[illegible]तीत्यर्थः

अध्यासस्यानो | त्वमिति | कर्त्रध्यासः

स्तोत्रस्य | आत्मनः | तस्मादध्यासकारणाभावात्

हृ॰ टी॰ २

कादेरेकैकोपादानत्वस्यैवदर्शनात् ततः कथमप्रसिद्धं लक्षणमुच्यते प्रसिद्धस्यैव लोके लक्षणत्वदर्शी
नात् इति चेदुच्यते पृथिव्यप्तेजोवायवो विप्रतिपन्नाः उत्पत्तिमन्तः पृथिवीत्वादेः प्रदेशोत्पन्नघटचेष्टको
तोत्पन्नज्वालाग्निवत्पन्नाग्निव्यजनपवनवदिति कार्यत्वमनुमायाकाशस्यापि भूतत्वहेतुना कार्यत्वानु
मानान्तरे पृथिव्यादीनि सउपादानानि तदुपरक्ततया प्रतीयमानत्वाद्यन्नियमेन यदुपरक्ततया प्रतीय
ते तदुपादानं यथा घटादि मृदाद्युपादानमिति लाघवात्सर्वस्य जगतः एकस्वत्वप्रकृतिकत्वस्य ततएवाभि
न्ननिमित्तोपादानकत्वस्यापि सिद्धिः संभवति परमतेच घटेश्वरसंयोगादीनां जीवात्मसंयोगानां चाभिन्न
निमित्तोपादानत्वदर्शनात् ततश्चानुमानसिद्धमभिन्ननिमित्तोपादानत्वमनूद्य तस्य ब्रह्मत्वबोधनेऽस्म
त्यासंभवति एवंचश्रुते लक्षणपरत्वाभावेनानुमानसिद्धमभिन्ननिमित्तोपादानत्वमनूद्य तस्य ब्रह्म
त्वबोधनमात्रेण नवाक्यभेदप्रसङ्गः तस्यच ब्रह्मणः स्वरूपमानन्दाद्ध्येव खल्विमानि भूतानि जायन्ते
इति वाक्येन निर्णीयते प्रमाणं च विशेषणस्य योनित्वात् तत्तु समन्वयादित्युक्तन्यायेन सर्वे वेदान्ताः
ततश्च लक्षणप्रमाणयोः सत्त्वेन विशेषः स्तोत्रकरणप्रतिज्ञासंघटन इति न किंचिदवद्यदोषादिति
भावः ननु यद्यत्कारणं तत्तदन्यतो जन्यमिति व्याप्तेराकाशादौ दर्शनादाकाशादिकारणस्यापि विशेषजे
न्यत्वानुमानेन सर्वज्ञस्योपादाननिमित्तत्वलक्षणे तस्मिन्ननुपपन्ने स्यादित्याशंक्य असंभवस्तु सतोनुपपत्ते
रितिन्यायेन तस्याजन्यत्वमाह अनादिमिति आदिः कारणं न विद्यते यस्य सोनादिरजन्य इत्यर्थः अयंभा
वः किं ब्रह्मणोजन्यकारणं जन्यचेतनम् नाद्यः जन्यस्याकाशादेर्ब्रह्मकार्यत्वात् नापि द्वितीयः तस्य कारणत्वा
नुपपत्तेः चेतनान्तराभावाच्च सत्त्वेवा तस्यापि कारणान्वेषणे नान्यजन्यत्वानुमानेन चेतनानामनवस्थाप्रसंगात् क
स्यचिदजन्यत्वे वा तत्रैव कारणत्वहेतोर्व्यभिचारात् जन्यत्वरूपसाध्याभावादितिभावः तस्य ब्रह्मत्वाङ्गीकारात्

सत्त्वरूपं
अभिन्ननिमि त्तोपादानस्य
विशेषजन्य आकाशादि पतिकारण त्वादिति
चेतनान्तरण वि

लाघवादेव
ब्रह्मत्वबोध नेऽसति
तत्तु समन्वयात् ...
एव

निरूपमद्वितीयानि १ अष्टाधिकार्यनुग्रहार्थं श्रीशंकरभाष्यकरणानंतरम् ४

स्वकेश्चिदन्यथान्यथायोजितानि पुरुषार्थपर्यवसायीनि न बभूवुः अथ भगवान्परमेश्वरः सर्वज्ञः शं
करः करुणया लोकानुग्रहार्थं स्वांशेन श्रीसर्वज्ञभगवत्पादशंकराचार्यरूपेण ब्रह्माद्यंशैः शिष्यभूतैः स
हावतीर्य ब्रह्मसूत्रव्याख्यानरूपश्रीमच्छारीरकभाष्यकरणेन सकृच्छ्रवणमात्रेणाविद्यानिमिरनिरस्करण विद्याम्
दीयसो मन्दाधिकारिणः पुरुषधौरेयाञ्छिष्टाननन्तज्याह अथेदानीं ब्रह्मसूत्रमीमांसासमर्थानां मा
नेनायासेन च हरिनिब्रह्मतत्त्वं साक्षात्चिकीर्षितो मन्दाधिकारिणोऽनुग्रहीतकामः श्रीभगवान्भाष्यका
रः तेषां ब्रह्मतत्त्वं करतलबिल्वफलीकारयितुं जपमात्रेण सकलपुरुषार्थसाधकं सर्ववेदान्तसार
भूतं श्रवणमनननिदिध्यासनात्मकं हरिस्तोत्रमारिप्सुश्चिकीर्षितं प्रतिजानीते स्तोष्ये इति विश्वम्भा

ॐ स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं यस्मिन्नेतत्संसृतिचक्रं भ्रमतीत्थम् यस्मिन्दृष्टे (कृतेसति)
नश्यति तत्संसृतिचक्रं तं संसारध्वान्तविनाशं हरिमीडे २॥

ऽत्र श्लोकेऽयमर्थः स्तोष्ये आरोपितसकलाधिष्ठानतया सर्वात्मकत्वेन अनन्तकल्याणगुणतया प्रनशीलं त्रिविधपरिच्छेदशू
भेदरहितः २ [illegible] वस्तुतो निर्विशेषचिन्मात्रस्वरूपतया च कीर्तयिष्ये इति प्रतिज्ञातं न तु ल [illegible]
क्षणप्रमाणाभ्यां वस्तुसिद्धेः कीर्तनीयस्य विष्णोः किं लक्षणं किं प्रमाणमित्याशंक्य जगत्कारणत्वे
यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीत्यादिश्रुत्युक्तलक्षणमाह
जगदादिमिति जगतो वियदादिसर्वप्रपंचस्यादिं कारणं सकलजगदुपादानत्वे सति तत्कर्तृत्वमिति जगत् २
एवं त्रसूत्र लक्षणविव क्षणाश्च विवक्षितम् तेन सांख्याभिमतप्रधानपरमाण्वादौ तटस्थेश्वरे च नातिव्याप्तिः ननु इदमभिन्ननिमित्तोपाद
नत्वं क्वाप्यप्रसिद्धं घटादिषु सर्वत्र उपादाननिमित्तयोर्भेदस्यैव दर्शनात् सर्वोपादानत्वमप्यप्रसिद्धं मत्वि

हृ॰ टी॰ १

ॐ श्रीगणेशाय नमः ॐ नमो ब्रह्मणे स्वप्रकाशचिदानंदात्मने सर्वविश्वरूपाय नमः श्रीगुरुं प्रणम्य ॥
ॐ नित्यं निजानंदमद्वितीयं शुद्धं विभुं सत्यमतिं मतिस्वतंत्रं स्वात्मनि रक्ताखिलरूपमीशं प्रत्यंच
मात्मानमहं भजामि १ शंकरं शंकराचार्यं केशवं बादरायणं सूत्रभाष्यकृतौ वंदे भगवंतौ पुनः पु
नः सत्यज्ञानानंदात्मकमद्वितीयं ब्रह्मैव शुद्धसत्वप्रधानमायोपाधिकं सदीश्वरभावं मलिनसत्व
प्रधानाविद्योपाधिकं सज्जीवभावं च जगाम जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भव
तीति तापनीये श्रवणात् तत्र मायाप्रतिबिंब ईश्वरः तां मायां वशीकृत्य सर्वज्ञः सर्वशक्तिश्च जी
वानां सर्वेषामभ्युदयार्थमपवर्गार्थं च संकल्पमात्रेणैव लीलया जगतः सर्गस्थितिविलयानाचरति
तत्र च ये जीवाः साक्षाद्रूपं कृतिस्म स्वकमायातिलंघनेन स्वात्मानं भजंते तेषामनुग्रहाय योपासनार्थं
शंखचक्रगदाशूलमृगपरशुधरं नीलोत्पलदलकालमेघश्रेणीचंद्रस्फटिकसमानवर्णं आनंदघनं
सर्वांगसुंदरं मूर्तिद्वयं शुद्धसत्वमयं बहुलीलास्पदं विष्णुशंकराख्यं सपदेवेश्वरो जग्राह तच्च मूर्तिद्व
यं वैकुंठकैलासादिषु भक्तानां हृदये च नित्यं संनिहितं वर्तते तत्र च भगवान् विष्णुः फलत्यागपूर्वकं मूर्तिद्वयमपि
निरंतरानुष्ठितवेदानुवचनयज्ञदानतपोभिः विमलीकृतस्वांतानां नित्यानित्यवस्तुविवेकेन तृणीकृत
ब्रह्मलोकादिभोगानां शमदमादिमतां मुमुक्षूणां बहुविधस्वनिष्ठासंभृतवेदार्थविचारासमर्था
नां गुरुषु वरणं मोक्षसाधनीभूतब्रह्मात्मतत्वबोधनाय स्वांशेन श्रीभगवद्बादरायणरूपेणावतीर्य
बहुविधयुक्तिन्यायोपेतैश्चाध्यायचतुष्टयात्मकैर्ब्रह्मसूत्रैः सकलवेदांतवाक्यानि संग्रथ्य या मा संतानि च
सूत्राणि स्वनिगंभीरार्थतया दुरवगमाभिप्रायाणि संति इदानीं कलौ दुष्टचित्तैर्भेदवादिभिरभेदवादिभि

इदानीं स्तुतिकर्त्ता फलाभिधानपूर्वकं स्तौति यो विष्णुरिमं भक्तं पायात् तदा तं तमीड इति
संबंधः कथंभूतं स्वात्मनि संतं विष्णुरस्मीत्यभेदेन वर्तमानं भक्तं स एव स्वबोधो भक्तः चतुर्वि
धा भजन्ते मां जनाः सुकृतिनोऽर्जुन इत्युपक्रम्य ज्ञानी त्वात्मैव मे मतमित्युक्तत्वात् तत्रादि
नीचैः सुकृतिनः सत्याख्याघ्राणमूढाहमयादिदेवान् भजंति ये माथवनित्ये कालेन पूर्णः स
दानेन मया हि विष्णुरिति भेददर्शिनो जानंति तदा तेनाभिप्रायेण विष्णोः स्तुतिं महति
स्तत्राह स्वात्मानं स्वरूपतः करणात्मनि स्वस्वरूपभूते सर्वमिदं त्यक्तुं हृत्वा गिरं स
ज्ञानी रसमभूत एषा हि सर्वगानां रसः इति श्रुतेः देहाद्यनात्मत्यागेन परिशिष्टचिदानंदरूपमि
पायाद्भक्तं स्वात्मनि संतं पूर्णं यो भक्त्या स्तौतीत्यर्थः रसं विष्णुरिमं माम् इत्यात्मा
नं स्वात्मनि संतं तमसे देक संसार ४३ इत्थं स्तोत्रं भक्तजनेशं भवभीतिध्वान्तार्का
भं भगवत्पादीयमिदं यः विष्णोर्लोकं पठति शृणोति व्रजति ज्ञानेन ज्ञेयस्वात्म
नि चाप्नोति मनुष्यः ४४ ॥ इति शुभम्
त्यर्थः इमं मां सदा भक्त्या स्तौति प्रत्यगभिन्नं वे
न स्तौतीत्यभिप्रायेण विष्णुः पायादिति संबंधः तमीडे ४३ इदानीं स्तोत्रपाठकानां स्तो
त्रार्थमजानतां पाठमात्रादेव विष्णुलोकप्राप्त्याक्रममुक्तिमेतत्स्तोत्रार्थं जानतामिहैव पू
र्णपरमानंदचित्प्रकाशविष्णुरूपेणावस्थानरूपमुक्तिं च फलं दर्शयन् स्तोत्रमुपसं
हरति इत्थमिति यो नरः इत्थमुक्तप्रकारेण इदं स्तोत्रं भक्तानामिहाधिकारः इत्याह भक्त
जनेशं विष्णोर्भक्तिमद्भिर्जनैरीड्यमिति यावत् भवभीतिध्वान्तार्काभं संसारदुःखतमःसूर्य ३२

युगतिविच्छेदः प्राणायाम इत्यर्थः स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां
प्रत्याहारः इन्द्रियाणां शब्दस्पर्शादिस्वस्वविषयैरसंप्रयोगेन हृच्चित्तस्वरूपानुकार इव यत्तस्मि
न्नवस्थानं स प्रत्याहार इत्यर्थः देशबन्धश्चित्तस्य धारणा देशे आधारादौ आत्मनि वा चित्तस्था
पनं धारणेत्यर्थः तत्र प्रत्ययैकतानता ध्यानम् तत्रात्मादौ प्रत्ययस्यैकतानत्वं ध्यानमित्यर्थः
तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ध्यानमेव ध्यातृध्यानविहाय ध्येयमात्रगोच
रं सत्समाधिरित्युच्यते तदा ध्यानस्वरूपशून्यमिव भवति ध्यानविषयप्रत्ययाभावादित्यर्थः
एतस्माद्ध्यायस्व पदार्थं साताकारस्तस्मिन्नेव साधनं दृष्टान्तमाह लोहस्यते हेमयथाग्नौ

यं विज्ञानज्योतिषमाद्यं सविभान्तं हृदये केदृश्यो कसमीक्ष्यं तं हरिदासे भक्त्या
साध्येहैव विशन्त्यात्मनि सन्तं न संसारध्वान्तविनाशं हरिमीडे ४२ ॥

इति श्रेयोभिश्रितं स्ववर्णं श्रेयोऽपताप्यो विहाय स्ववर्णं यथा स्पृष्टं त्यजति न हरिरित्यर्थः ४३ इदा
नीं भक्तेः फलाभिधानपूर्वकं स्तौति यमिति हरिदासे हृदये तदिदा भवति हृदि हृदये हृत आभाय
या भवति तथा सविभान्तं प्रत्यक्षेण स्वप्रकाशमानं विज्ञानज्योतिषं विज्ञानप्रकाशरूपं
ननु तदिदं ज्योतिः ज्योतिषां ज्योतिरिति श्रुतेः आद्यं सर्वकारणं हृदि सम्यकेन्दृश्यो कसमीक्ष
न्दृश्यमयं कोऽसि उपलब्धिस्थानानि यस्य तं तदुपास्यमानः परमेश्वरः प्रसन्नो भवति इदं
स्पष्टतराश्रवणादिभिरष्टाङ्गयोगेरुपासनादिभिश्च या भक्तिर्भजनं तया सन्तं वर्तमानं इहैव जी
वन्नेव देहे हविशन्ति तत्र दात्मानो भवन्तीत्यर्थः स्वयं प्रवेशस्यासंभवात्तमीडे ४२ ॥

आत्मानं दध्यासतामविशेषोपरिशिष्टं च तं विष्णोर्ये विदुरिति संबंधः कदध्यासात्मा का
तयामाह योगेति योगाष्टांगैरुज्ज्वलितज्ञानमयाग्नौ योगः प्रत्यक्स्वरूपेण वैकांतत्वात्मोपाय
नभूतेनाष्टांगैर्निर्गुणविषयैर्यमनियमादिभिरष्टभिरंगैर्निर्गुणयोगाष्टांगानि चात्मनियो
गश्रेष्ठयोगविशेषरूक्तानि देहात्मोर्विरक्तिर्यम इह नियमः स्वात्मनत्वानुरक्तिः बाह्योदा
सीन्यमेवासनमः स्वनियतिस्वतरार्थोऽस्मापीत प्रत्याहारः स्वबुद्धे विषयविमुखता धा
रणा स्वात्मनिष्ठा ध्यानं ब्रह्माहमस्मीति ज्ञानमस्तमसमोहात्मकसंवित्समाधिरितीतैः
काष्ठस्थानीयैरुज्ज्वलितो ज्ञानमयोऽग्निस्तत्र ग्रंथवापरिपक्वविनस्यपतोज्ज्वलिनासूत्रिता

रागासक्तं लोहयुतेऽहमयथाग्नौ योगाष्टांगैरुज्ज्वलितज्ञानमयाग्नौ दग्ध्वात्मा
नं तत्परिशिष्टं च विदुर्यं तं संसारध्वांतविनाशं हरिमीडे ४२ ॥

नियमसिद्धान्येव यमनियमादीनि योगाष्टांगानि तैरुज्ज्वलितः प्रकाशितो यो ज्ञानमयो
ग्निस्तस्मिन्नित्यर्थः तानि च सत्यज्ञानीमानि अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः
शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः स्वाध्यायः प्रणवजपः ईश्वरप्रणिधा
नमीश्वरभजनं भक्तिः स्थिरसुखमासनं यादृशेन देहस्थापनेन यस्य पुरुषस्यावयवकृ
णानुसारेण सति ललाटे संविदेह चलनं न तदिन्द्रियनिष्ठं च संपद्यते तदेव तस्य पद्मस्वस्ति
कासनादिसमं सुखमासनमित्यर्थः तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः
श्वासे रेचके सति दशविंशति त्रिंशदादिक्रमेण प्रणवजपैः प्रतिपत्तेः प्रतिमासं स्वाभाविकवा

प्रायं एकमेवाद्वितीयं ब्रह्मेत्युक्ते सति आकाशादौ द्वितीये सति कथमद्वितीयत्वं ब्रह्म
णः इत्याशंकाजायते अतस्तन्निहत्यर्थं ब्रह्मण एवोपादानात् वियदादिसर्वप्रपंचोत्प
त्तिकथनेन कार्यस्योपादानादनन्यत्वानवस्थानेन ब्रह्मण एवावस्थानमेकानेतरेनेह
नानास्ति किंचनेत्यादिवाक्यैः सप्रपंचमेकमप्रपंचेति सिद्धमेकमेवाद्वितीयं ब्रह्मेत्येत
स्मिन् स्थिते भवति अन्यथा ब्रह्मणः स्याद्विवाक्यैः सप्रपंचमेकमप्रथमतएव नेह नानास्ति
इतिनिषेधश्च हि निषिध्यमानवस्तुप्राप्त्यपेक्षत्ववत् अन्यत्र प्रपंचस्य सत्त्वप्रकाशकस्याद्वितिश्रुति
मेन्यते सप्रपंचब्रह्मोपासनेन तदवाचयेत्युपासीतेत्यादिविदारोपितप्रपंचविषयत्वेनाप्यु
पपद्यते नैवं निष्प्रपंचब्रह्मण एवारोपितत्वेनोपासनविषयत्वं किं न स्यादिति वाच्यं तस्या
नुपास्यत्वात् तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इत्युपास्यत्वनिषेधात् निष्प्रपंच
वाक्येषूपासनाविधानाश्रवणादारोपितरूपेणोपासनोपपन्नेः प्रतिवेदांतं तात्प
र्येण प्रपंचनिषेधानुपपत्तेश्च निष्प्रपंचस्यैव परमार्थत्वं सत्कारणापूर्वकम् अरूपवदेव हि
तत् प्रधानत्वादिति अरूपवदेव हि ब्रह्म परमार्थतो भवितुमर्हतीति सर्वेषां श्रुतीनामप्रक्र
मादिभिः तत्प्रधानत्वात् निःप्रपंचब्रह्मपरत्वस्य वदर्शनादिति सूत्रार्थः तस्मात्परमार्थ
तो निष्प्रपंचमेव ब्रह्मेति अलं संग्रहव्याख्यानेन विस्तरेण ५०॥ नन्वेवं सहस्र
पाः प्रतीत्यादिनेति नवरागादिदोषविनिर्मुक्त आत्मा नोपलभ्यते तत्कथं परमा
त्मास्मीति साक्षात्कार्यो द्वित्याशंक्याह रागेति रागमस्तकं रागादिकलुषीकृतम्

निष्प्रपंच

नेश्रेष्ठो भवति ॥ ॥ स होवाच मुख्यः प्राणः किं मेऽन्नं भविष्यतीति मुख्यः प्राणो प्रष्टारमिव कल्पयित्वा वागादीनि
प्रति वक्ष्यमाणं कल्पयन्ती श्रुतिराह यदिदं लोकेऽन्नजातं प्रसिद्धमाश्वभ्यः श्वभिः सह आशकुनिभ्यः शकुनिभिः सह
सर्वप्राणिनां यदन्नं तवान्नमिति होचुः वागादयः इति होचुर्वागादय इति प्राणस्य सर्वमन्नं प्राणोऽत्ता सर्वस्या
न्नस्येति प्रतिपत्तये कल्पिताख्यायिकारूपाद्व्यावृत्त्य स्वेन श्रुतिरूपेणाह तद्वा एतद्यत्किंचिल्लोके प्रा
णिभिरन्नमद्यते तस्य प्राणस्यानः अन्नं प्राणेनैवाद्यत इत्यर्थः सर्वप्रकारचेष्टाव्याप्तिगुणप्रदर्शनार्थमन
इति प्राणस्य प्रत्यक्षं नाम प्राद्युपसर्गपूर्वत्वे हि विशेषगतिरेव स्यात् तथा च सर्वान्नानामत्तुर्नाम प्रत्यक्षमितो
देयस्य त्वेनाम सर्वान्नानामनः साक्षादभिधाने न ह वै एवंविदि यथोक्तप्राणविदि प्राणोऽहमस्मि सर्वभूतस्थः
सर्वान्नानामत्तेति तस्मिन्नेवंविदि ह वै किंचिदपि प्राणिभिरद्यमानमनन्नमनाद्यं न भवति सर्वमेवंविद्यन्नं भव
तीत्यर्थः प्राणभूतत्वाद्विदुषः प्राणाद्वा एष उदेति प्राणेऽस्तमेतीत्युपक्रम्य एवंविदो ह वा उदेति सूर्य एवंविद्य
स्तमेतीति श्रुत्यन्तरात् स होवाच पुनः प्राणः पूर्ववदेव कल्पना किं मे वासो भविष्यतीति आप इति होचुर्वागा
दयः यस्मात्प्राणस्य वास आपस्तस्माद्वा एतदशिष्यन्तो भोक्ष्यमाणा भुक्तवन्तश्च ब्राह्मणा विद्वांस एतत्कुर्वन्ति
किमद्भिर्वासःस्थानीयाभिः पुरस्ताद्भोजनात्पूर्वं परिदधति उपरिष्टाच्च भोजनादूर्ध्वं च परिदधति परिधानं च कुर्वन्ति लम्भु
कः प्राणस्य लम्भुको लम्भनशीलो वाससो ह भवति वाससो लम्भुक एव भवतीत्यर्थः अनग्नो ह भवति वाससा लम्भकत्वे
नार्थसिद्धत्वादनग्नतेति अनग्नो ह भवतीति दर्शनमात्रमिह विधीयते अद्भिः परिदधतीति न चाचमनमपूर्वं यत
लौकिकैः प्राणिभिरद्यमानमन्नं प्राणस्येति दर्शनमात्रं तद्वत् किमन्नं किं मे वास इत्यादि प्रश्नप्रतिवचनयोस्तुल्य
त्वाद्यद्याचमनमपूर्वं तादर्थ्येन क्रियते तदा कृम्याद्यन्नमपि प्राणस्यान्नत्वेन विहितं स्यात् तुल्ययोर्विज्ञान

छां॰ भा॰
५१

र्थयोः प्रश्नप्रतिवचनयोः प्रकरणस्य विज्ञानार्थत्वाद्दर्थेन प्राप्तो यस्यायेन प्रकृतः कस्यचित्तद्यत्न प्रोक्तमाचम
नेप्रायश्चित्तार्थं प्राणस्यानग्नतार्थं न भवतीत्यवगम्यते ननु तथा वयमाचमनं न भक्ष्यार्थं ब्रूमः किं तर्हि प्रायत्यार्थं
चमनसाधनभूता आपः प्राणस्य वास इति दर्शनं चोद्यत इति ब्रूमः तत्राचमनस्याभक्ष्यार्थं प्रसंगादोषवाद
नानुपपन्ना वासोर्थ एवाचमने तद्दर्शनं स्यादिति चेन्न वासोज्ञानार्थं वा केवलवासोर्थ्या सर्वाचमनविधानेनत्रा
नग्नतार्थत्वदृष्टिविधाने च वाक्यभेदः आचमनस्य तदर्थत्वेऽन्यार्थत्वे चेति प्रमाणाभावात् ॥ ॥ तद्धैतत्स
त्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवाच यद्यप्येनच्छुष्काय स्थाणवे ब्रूयाज्जायेरन्नेवास्मिञ्छाखाः प्ररो
हेयुः पलाशानीति ॥ ॥ तदेतत्प्राणदर्शनं स्तूयते कथं तद्धैतत्प्राणदर्शनं सत्यकामो जाबालो गोश्रुतये
नाम्ने वैयाघ्रपद्याय व्याघ्रपदोऽपत्यं वैयाघ्रपद्यः तस्मै गोश्रुतये उक्त्वोवाचान्यदपि वक्ष्यमाणं वचः किं
तदुवाचेत्याह यद्यपि शुष्काय स्थाणवे एतद्दर्शनं ब्रूयात्प्राणवित् जायेरन्नुत्पद्येरन्नेवास्मिन्स्थाणौ शाखाः
प्ररोहेयुश्च पलाशानि पत्राणि किमु जीवते पुरुषाय ब्रूयादिति ॥ ॥ अथ यदि महज्जिगमिषेदमावास्या
यां दीक्षित्वा पौर्णमास्यां रात्रौ सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा म
न्थे संपातमवनयेद्वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत्प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य
हुत्वा मन्थे संपातमवनयेत्संपदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेदायतनाय स्वाहेत्यग्नावाज्यस्य
हुत्वा मन्थे संपातमवनयेदथ प्रतिसृप्याञ्जलौ मन्थमादाय जपत्यमो नामास्यमा हि ते सर्वमिदं स हि ज्येष्ठः
श्रेष्ठो राजाधिपतिः स मा ज्यैष्ठ्यं श्रैष्ठ्यं राज्यमाधिपत्यं गमयत्वहमेवेदं सर्वमसानीति ॥ ॥ यथोक्तप्राणदर्शी
न विद इदं कर्मारभ्यते अथानन्तरं यदि महज्जिगमिषेन्महत्त्वं प्राप्तुं यदि कामयेत

स्यर्थः नस्येदेकर्मविधीयते मद्वेदिमितिश्रीहयनमते श्रीमनेतार्थप्रामेधनम तवः कर्मातुष्टानेनस्वदेव
यानेपितृयानेपेष्यानेप्रतिपन्स्यत इत्येतन्नयोजनन्मरीहृत्स्यमहत्त्वमेष्याहिकर्म नविषयभोगप्रकामस्य
नस्यायेकासादिविधिहत्वेन अमावस्यायांहीदित्वादीहितवत्त्वभूमिष्य सनादिनियमेकृतानपोइपसत्यव
चेनबीजचर्यमित्येवमादिर्यमवान्मनेत्यर्थः नचनदैहकमेवकर्मजानंसर्वमनुपादेयेनहिकारणानमकेका।
मेणःउपवसतीतिश्रूयतेनरात् पयोमात्रभक्षणंचश्रूडिकारणंउपउपाधत्ते पौर्णमास्यारात्रौकर्मारम्भतेसर्वो
धपस्यग्रामस्यापणनामोपकर्षेनायावकस्यात्स्यनुपारायनहितेषीहृत्यामस्येवपिष्टदधिमन्तेनौदेवकेस
कारेचमसाकारेवापात्रेश्रुत्वेनग्रहीत्यौपमध्याग्नेः स्थापयित्वानेष्वायश्रीहायवाहेन्यग्रावावसथ्यप्रा
न्स्यवापस्योर्नेहृत्वाक्त्रवलग्रस्तकेमपानमवनयेन सखवमधःपातयेत् समानमन्यत् वसिष्टायप्रतिष्टा
येमेपदेज्ञायतनायस्वाहेतिमन्त्रेकंनवेवसंपानमवनयेत् हुत्वायश्रतिमुख्याग्रेरीवरपमन्स्मानजलोमेष्य।
मादायजपतीमंमंत्रम अमोनामास्मात्दिनेमइतिप्राणस्यनाम अन्नेनहिप्राणाः प्राणतिदहहत्यतोमं
यइवंप्राणसात्रत्वान्माणेवनस्ययने अमोनामासीतिऊंनोयनोमासहृयस्याज्ञेनवप्राणभूतस्यसर्वस्य
लेजगदिदमतोमानामासीत्यर्थः सहिप्राणभूतोमनेर्जोज्ञायः श्रेष्टाश्रान्तपवचराजादीमिमानापिपतिष्ठा
यिष्टायपालयित्वासर्वस्यममासमानपरिमित्यर्थः प्राणोज्ञेयष्टादिउणमुखामानमनोगमयत्न अहमेवेदंसर्वंज
गदसानिभवानिप्राणवत् इतिप्राणात्मनपरिसमाप्यर्थः ॥ ॥ अथाविलेनयवोप्रकुप्तावमति नस्विनत्वे
णोमहद्दत्त्वाचमति वयंदेवस्यभोजनमित्याचामति श्रेष्ठसर्वथानमिमाचामतिनवभर्गस्यधीमहीतिसर्वं
पिवतिनिर्णिज्यकंमंचसर्वावपश्चाद्गेः संविशनिचर्मणिवास्थंडिलेवावाचंयमोप्रमादहःसयदीतियप

छां. भा.
५८

प्रेतस्य मन्थकर्मेति विद्यात् तदेष श्लोकः यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्व
प्ननिदर्शने तस्मिन्स्वप्ननिदर्शने ॥ २ ॥ अथानेनैवंविदा यावत्समाप्त्या पच्छः पादशः । आचामति भक्ष
यति मन्त्रस्यैकैकेन पादेनैकैकं ग्रासं भक्षयति तद्भोजनं सवितुः सर्वस्य प्रसवितुः प्राणमादित्यं चैकीकृत्योच्य
ते आदित्यस्य वृणीमहे प्रार्थयेमहि मन्त्ररूपेण येनान्नेन सावित्रेण भोजनेनोपभुक्तेन वयं सवितृस्वरूपमा
पन्ना भवेमेत्यभिप्रायः देवस्य सवितुरिति पूर्वेण सम्बन्धः श्रेष्ठं प्रशस्यतमं सर्वान्नेभ्यः सर्वधातमं सर्वस्य जग
तो धारयितृतमं अतिशयेन विधातृतममिति वा सर्वथा भोजनविशेषणं तुरं त्वरं शीघ्रं तूर्णमित्येतद्भगस्य दे
वस्य सवितुः स्वरूपमिति शेषः धीमहि चिन्तयेमहि विशिष्टभोजनेन संस्कृताः शुद्धात्मानः सन्त इत्यभिप्रायः
अथवा भर्गः श्रियः कारणं महत्त्वं यागं वा कर्मसंस्कृतं तेन वयं तं धीमहि चिन्तयेमहीति सर्वं च समस्तं पिबति
निर्णिज्य प्रक्षाल्य कंसं कंसाकारं चमसं चमसाकारं वौडुम्बरं पात्रं पीत्वा चमसं पश्चादग्नेः प्राक्शिराः संविशति च
र्मणि वाजिने स्थण्डिले केवलायां वा भूमौ वाचंयमो वाग्यतः सन्नित्यर्थः अप्रमादी न प्रमत्तः सन्नेनाभिभूयते स्त्र्यादि
दुःस्वप्नदर्शनेन यथा न स्यात्तथा संयतचित्तः सन्नित्यर्थः स एवंभूतो यदि स्त्रियं पश्येत्स्वप्नेषु तदा विद्यात्समृ
द्धं ममेदं कर्मेति तदेतस्मिन्नर्थे एष श्लोकः मन्त्रोऽपि भवति यदा कर्मसु काम्येषु कामार्थेषु स्त्रियं स्वप्नेषु स्वप्नद
र्शनेषु स्वप्नकाले वा पश्यति समृद्धिं तत्र जानीयात् कर्मणां फलनिष्पत्तिर्भविष्यतीति जानीयादित्यर्थः
तस्मिन्स्त्र्यादिप्रशस्तस्वप्नदर्शने सतीत्यभिप्रायः द्विरुक्तिः कर्मपरिसमाप्त्यर्था ॥ २ ॥ श्वेतकेतुर्हारुणेयः प
ञ्चालानां समितिमेयाय तं ह प्रवाहणो जैवलिरुवाच कुमारानु त्वाशिषत्पितेत्यनु हि भगव इति वेत्थ यदितोऽधि
प्रजाः प्रयन्तीति न भगव इति वेत्थ यथा पुनरावर्तन्ता३ इति न भगव इति वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्या

वर्तेनाइतिनभगवइतिवेस्ययथासौलोकेनसंपूर्येताइतिनभगवइतिवेस्ययथापंचम्यावाङ्नावापः पु
रुषवचसोभवेतिइतिनैवभगवइति ॥ अत्रादिसंबधपर्येताः संसारगतयोवक्तव्यावेगपदेनात्रंतत्त्वा
मिस्यतत्रा(ख्या)यिकारभ्यते ॥ स्पनकेननोमनः इत्यतिस्यार्थः पुरुणस्यापत्यमारुणिः तस्यापत्यमारुणेयः
पंचालानांजनपदानांसमितिंसभामेयायजगाम तस्यागतवंतंदृष्ट्वाइणनामतोजीवलस्यापत्यंजैवलि
स्तिरवाचोक्तवान् हेकुमारानत्वानामसिपिषदनुशिष्टोसितातास्तपितासिक्षयर्थः इत्युक्तः सप्राह पु
नरयनुशिष्टोभगवइतिस्तचयन्नाहजेहोवाच यद्यनुशिष्टोसिवेस्थयदितास्मालोकात्प्रयंत्यः प्रजाःप्रय
तियह्न्कंतितेनकिंजानीषइत्यर्थोनभगवइत्याहेतरः नज्ञानेहंतयन्स्फुकसि एवंतहिवेस्थजानीषेयथा(पुन)
नक्रमेणपुनरावर्तनमइतिनभगवइतिप्रत्याह वेस्थयथामार्गयोःसहप्रयाणयोर्देवयानस्पपितृयाणस्य
चव्यावर्तनमितरेतरवियोगस्थानंसहगच्छतामित्यर्थः नभगवइति वेस्थयथासौलोकःपितृसंबंधी
येनप्राप्यपुनरावर्तनेबहुभिः प्रयद्भिरपियेनकारणेनन संपूर्येताइति नभगवइतिप्रत्याह वेस्थयेनक्रमे
णपंचम्यांपंचसंख्याकायामाहुतौहुतायांसाहुतिनिवृत्ताआहुतिसाधनाश्चापः पुरुषवचसःपुरुषइत्येव
वचोभिधानंयासांहूयमानानांक्रमेणषष्ठ्यामाहुतौभूतानांतानाःपुरुषशब्दवाच्याभवंति पुरुषाख्यांलभंतइति
इत्युक्तोनैवभगवइत्याहनैवाहमत्रकिंचनजानामीत्यर्थः ॥ ॥ अथानुकिमनुशिष्टोवचोब्राह्मणोमानिन
विद्याकथंसोनुशिष्टोब्रवीतेतिसद्द्वायस्तःपितुरर्धमेयायतंहोवाचानुशिष्टवावकिलसाभगवानब्रवी
इत्युक्तासिषभितिपंचमाराजन्यबंधुःप्रश्नानप्राक्षीत्तेषांनैकंचनाशकंविवक्तुमितितंसहोवाच यथामा
तेनदेतानवदोयथाहमेषांनैकंचनवेद यद्यहमिमानवेदिष्यंकथंतेनावक्ष्यमितिसहगौतमोराज्ञोर्धं।

छां॰भा॰
५५

मेयाय ॥ ॥ अथैवमनीसकिमनुकृतस्मानेमंत्रोपदेशात्सीत्पवचेभ्या उक्तवान् सियोहीमानिमयाहमन्य
थेज्ञानानि च विद्यास्त्र विजानीयात्कथं स विद्वत्स्वनोपदेशात्सीनि ब्रवीनेत्यवं सक्ष्येन केनः राज्ञा य स न्नाग्रायासि
नः समित्तरहंडेस्थानमेयाय गतवान् नं च पितरमुवाच अनेनोपदेशात्तु पाय नमकृत्तैव मामो किल भग
वान्समावर्तनकाले ब्रवीदुक्तवान् अनुत्वापोपदेशमनपोप्रष्ठवामिमिति यतः पंच पंच संख्याका अप्रश्नाः ता
वन्तं भ्रानन्यावेयवाते ति राजन्यबंधुः स्वयं दृष्टे न इत्यर्थः अप्राहीनमुक्तवान् तेषां प्रश्नानां नैकं चनैकं
मपिनाशकं नशकं कवानहं विवक्तं विशेषेणार्थनानिर्णीनमित्यर्थः सहोवाच पितामयथा मां त्वं तनद
मपि नाशकं ज्ञानं तथा मां जानीहि त्वदीयाज्ञाने
गनमात्र एवेनाप्रश्नानवादः उक्तवानीति तेषां नैकं चनाशकं विविक्तमिति तथा मां जानीहि त्वदीयाज्ञाने
नलिंगेन समस्तं हि विषयमज्ञानं जानीहीत्यर्थः कथं यथाहमेषां प्रश्नानामेकं चनैकमपि न वेद न जाने यथा
त्वमेषां न जानीषे तथा ममाप्यज्ञानमित्यर्थः अतो मयान्यथाभावो न कर्तव्यः ऊनपन्नदेवं यद्यहमि
मान्प्रश्नानवेदिष्यं विदितवानस्मि कथं ते न तुभ्यं प्रियाय पुत्राय समावर्तनकाले नावक्ष्यं नोक्तवानस्मीत्य।
कास गौतमो गोत्रतो राज्ञो जैवलेरर्धं स्थानमेयायागतवान् ॥ तस्मै ह प्राप्ताया र्हां च कार स ह प्रातः
स भाग उदेयाय तं होवाच मानुषस्य भगवन् गौतम वित्तस्य वरं वृणीथा इति स होवाच तवैव राजन्मानुषं
वित्तं यामेव कुमारस्यान्ते वाचमभाषथास्तामेव मे ब्रूहीति स ह कृच्छ्री बभूव तं ह चिरं वसेत्याज्ञापयांच
कार तं होवाच यथा मा त्वं गौतमावदो यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति तस्मादु सर्वेषु
लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच ३ ॥ तस्मै ह गौतमाय प्राप्ताया र्हां महर्हां च कारकृ
तवान् स च गौतमः कृतातिथ्य उषित्वा परेद्युः प्रातः काले सभागे सभायां नेराज्ञि उदेयाय भजने भागः

मुक्तामेवासहभागेन वा वर्तमानः सभागः पूज्यमानोऽन्यैः स ह गौतम उदेयाय राजानमुद्गतवान् तं होवाच गौतम
वेणानामानुष्यस्य भगवन् गौतम मनुष्यसंबंधिनो वित्तस्य ग्रामादेर्वरं वरणीयं कामं वृणीथाः प्रार्थयेथाः स
होवाच गौतमस्तवैव तिष्ठतु राजन्मानुषं वित्तं यामेव कुमारस्य मम पुत्रस्यान्ते समीपे वाचं पंचप्रश्नलक्षणामा
भाषथा उक्तवानसि तामेव वाचं मे मह्यं ब्रूहि कथयेत्युक्तो गौतमेन राजा स ह कृच्छ्री दुःखी बभूव कथं न्विदमिति
स ह कृच्छ्रीभूतो प्रत्याख्येयो ब्राह्मणो नान्यायेन विद्या वक्तव्येति मन्वानस्तं गौतमं चिरं दीर्घकालं वसेत्येवमाज्ञा
पयांचकार आज्ञप्तवान् यत्पूर्वं प्रत्याख्यातवान् राजा विद्यां यच्च पश्चाच्चिरं वासमाज्ञप्तवान् तन्निमित्तं ब्राह्मणं क्ष
मयति हेतुवचनोक्त्या तं होवाच राजा सर्वविद्यो ब्राह्मणोऽपि सन् यथा येन प्रकारेण मा मां हे गौतम मावदस्त्व
तामेव विद्यालक्षणां वाचं मे ब्रूहीति तथाहं करिष्य इत्यर्थः न ह्यस्ति वक्तव्यमस्मानाते नैव तानीदि यथा येन
प्रकारेणेयं विद्या प्राक् त्वत्तः न ब्राह्मणान्न गच्छति न गतवती न च ब्राह्मणा अनया विद्ययानुशिष्टवन्तस्तथ
तत्प्रसिद्धं लोके यतस्तस्मादु पुरा पूर्वं सर्वेषु लोकेषु क्षत्रस्यैव क्षत्रजातेरेवानया विद्यया प्रशासनं प्रशास्तृत्वं
शिष्याणामभूद्बभूव क्षत्रियपरंपरयैवेयं विद्यैतावन्तं कालमागता तथाप्यहमेतां तुभ्यं वक्ष्यामि त्वत्संप्रदा
नादूर्ध्वं ब्राह्मणान्गमिष्यति अतो मया यदुक्तं तत्क्षन्तुमर्हसीत्युक्त्वा तस्मै होवाच विद्यां राजा । तत्र पंचम्यामा
हुतावापः पुरुषवचसो भवन्तीत्ययं प्रश्नः प्राथम्येनापाक्रियते तदपाकरणमनु इतरेषामपाकरणमनुकूलं भवेदिति अग्निहोत्रा
हुत्योः कार्यारंभो यः स उक्तो वाजसनेयके तं प्रति प्रश्नाः उत्क्रान्तिराहुत्योर्गतिः प्रतिष्ठा तृप्तिः पुनरावृत्तिर्लोकं प्र
त्युत्थायीति तेषां चापाकरणेन तत्रैव ते वा एते आहुती हुते उत्क्रामतस्ते अन्तरिक्षमाविशतस्ते अन्तरिक्षमेवाहव
नीयं कुर्वाते वायुं समिधं मरीचीरेव शुक्रामाहुतिं ते अन्तरिक्षं तर्पयतस्ते तत उत्क्रामत इत्याद्येवमेवमेव।

छां॰ भा॰
५९

स्त्रियमाविशत्।

रिवेतः पर्यवनेलेन नश्यावर्तेरमासाविशत्पर्यर्पितानुरूपमाविशन्तस्तनःस्त्रियमाविशन्तस्ततः कार्यारंभमग्नि
लोकप्रत्युत्पाद्यीभवतीति तत्राग्निहोत्राहुत्योः कार्यारंभमात्रमेव प्रकाशं भवतीत्युक्तमिहतु तत्कार्यारंभस्य रः
होत्राहुत्योर्विपरिणामलक्षणां पंचधा प्रविभज्याग्नित्वेनोपासनमुच्यते उत्तरमार्गप्रतिपत्तिसाधनं विधित्सन्नाह
असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिदित्यादि रश्मयो धूमोऽहरर्चिश्चंद्रमा अंगारा नक्षत्राणि विस्फुलिंगाः स
ग्नेः तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवति ॥ ५ ॥ इह साय प्रातरग्निहोत्राहुती हुते प
यवाग्निसाधने श्रद्धा उक्तस्य आहवनीयाग्निः समिद्धूमार्चिरंगारविस्फुलिंगभावित कर्त्रादिकारकभाविते
च तास्त्रिलोकं प्रविशतो अमुं लोकं प्रविशतोः समस्तमश्नुवाते अयिनादौ उच्यते वा वा सा वा अग्न्यादिभाव
नाहुत्योः सा पितृत्वेव निर्दिश्यते असौ वाव लोको अग्निर्हे गौतम यथाग्निहोत्राधिकरणमाहवनीयः इह
तस्याग्नेर्धुलोकाख्यस्यादित्य एव समित् तेन हीद्धोऽसौ लोको दीप्यते अतः सम्बन्धिनात्समित्त्वादादित्यो रश्मयो धू
मस्तदुत्थानात् समिधो हि धूम उत्तिष्ठति अर्चिरहः प्रकाशसामान्यादादित्यकार्यत्वाच्च चंद्रमा अंगाराः अह्नः
प्रशमेऽभिव्यक्तेरर्चिषो हि प्रशमेऽङ्गारा अभिव्यज्यन्ते नक्षत्राणि विस्फुलिंगाश्चंद्रमसोऽवयवा इव विकीर्णत्व
सामान्यात् तस्मिन्नेतस्मिन्यथोक्तलक्षणे देवा यजमानस्य प्राणा अग्न्यादिरूपा अधिदैवतं श्रद्धामग्निहोत्रा
हुतिपरिणामावस्थारूपाः सूक्ष्मा आपः श्रद्धाभाविताः श्रद्धा उच्यन्ते पंचम्यामाहुतावापः पुरुषवचसो भव
न्तीत्यपां होम्यतया प्रश्ने श्रुतत्वात् श्रद्धा वा आपः श्रद्धामेवारभ्य प्रणीय प्रचरन्तीति च विज्ञायते तां श्रद्धामप्सु
आहुतिं जुह्वति तस्या आहुतेः सोमो राजा संभवति यथा ऋग्वेदादिपुष्परसा ऋगादिमधुकरोपनीता तेऽयमादि
त्ये यशआदिकार्यं रोहितादिरूपलक्षणमारभन्त इत्युक्तं तथेमा अग्निहोत्राहुतिसमवायिन्यः सूक्ष्मा श्रद्धा॥

शरूथाप्याप्यायेषु लोकमनुप्रविश्य चान्द्रं कार्यमारभन्ते फलरूपमग्निहोत्राहुत्योर्यजमानस्तत्कर्तारश्चाहुतिम
याश्चाहुतिभावनाभाविता आहुतिरूपेण कर्मणाकृष्टाः श्रद्धासमवायिनो द्युलोकमनुप्रविश्य सोमभूता।
भवंति तद्यथेहिते अग्निहोत्राहुती नम्। अत्र त्वाहुतिपरिणामस्यैव पञ्चाग्निसंबंधक्रमेण प्राधान्येन विवक्ष्यते।
उपासनार्थेन यजमानानां गतिस्तान्वविशेषा धूमादिक्रमेणात्र वक्ष्यति विशेषाच्चात्र सा विद्याकृतानाम्।
पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो विद्युदर्चिरशनिरंगारा ह्रादनयो विस्फुलिंगास्तस्मिन्ने
तस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति तस्या आहुतेर्वर्षं संभवति ५। द्वितीयहोमपर्यायमाह पर्जन्य एव गौत
माग्निः पर्जन्यो नाम वृष्ट्युपकरणाभिमानी देवताविशेषस्तस्य वायुरेव समिद्वायुना हि पर्जन्योग्निः समिध्यते
पुरोवातादिप्राबल्ये हि वृष्टिदर्शनात् धूमप्रभवत्वाद्धूमवच्च लक्ष्यमाणत्वादभ्रं धूमो विद्युदर्चिः प्रकाशसामान्यादशनिरं
गाराः काठिन्याद्विद्युत्संबंधाद्वा ह्रादनयो विस्फुलिंगा ह्रादनयो गर्जितशब्दा मेघानां प्रविकीर्णत्वसामान्यात्
तस्मिन्नेतस्मिन्नग्नौ देवाः पूर्ववत् सोमं राजानं जुह्वति तस्या आहुतेर्वर्षं संभवति श्रद्धाख्या आपः सोमाकार।
परिणता द्वितीये पर्याये पर्जन्याग्निं प्राप्य वृष्टित्वेन परिणमन्ते ॥५॥ पृथिवी वाव गौतमाग्निस्तस्या वायुरेव स।
सिन्नाणो धूमो निहारा विंशत्यंगाराः श्रोत्रं विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्
संभवति ६ ॥ पृथिवी वाव गौतमाग्निरित्यादि पूर्ववत् तस्याः पृथिव्याः संवत्सर एव समित् संव।
त्सरेण हि कालेन संसिद्धा पृथिवी व्रीह्यादिनिष्पत्तये भवति आकाशो धूमः पृथिव्या इवोत्थित आकाशो दृश्यप
तेयथाग्नेर्धूमः रात्रिरर्चिः पृथिव्या अप्रकाशात्मिकाया अनुरूपा रात्रिस्तमोरूपत्वादग्नेरिवानुरूपमर्चिर्दिशो
ङ्गारा उपशान्तत्वसामान्यात् अवान्तरदिशो विस्फुलिंगाः क्षुद्रत्वसामान्यात् तस्मिन्नित्यादि समानं तस्या अन्नं

का. भा.
५२

व्रीहियवादिकं भवति ॥ ६ ॥ पुरुषो वाव गौतमाग्निस्तस्य वागेव समित् वाचा हि मुखेन समिध्यते पुरुषो
न तु कः प्राणो धूमः धूमवदेव मुखान्निर्गमनात् जिह्वार्चिः लोहितत्वात् चक्षुरङ्गाराः भासाश्रयत्वात् श्रोत्रं
विस्फुलिङ्गा विप्रकीर्णत्वात् समानमन्यत् अन्नं जुह्वति व्रीह्यादिसंस्कृतं तस्या आहुते रेतः संभवति ७ । यो
षा वाव गौतमाग्निस्तस्या आहुते रेतः संभवति ? उपस्थ एव समिच्च उपमन्त्रयते स धूमो योनिरर्चिर्यदन्तः का
रोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः संभवति ८ उपस्थ
एव समित्तेन हि सा पुत्राद्युत्पादनाय समिध्यते नहि सा पुत्राद्युत्पादनाय समिधाने यदुपमन्त्रयते स धूमः स्त्रीस
म्भवादुपमन्त्रणस्य योनिरर्चिर्लोहितत्वात् यदन्तः करोति तेऽङ्गाराः अग्निसंबन्धात् अभिनन्दाः सुखलवा वि
स्फुलिङ्गाः क्षुद्रत्वात् तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः संभवति ८ एवं श्रद्धासोमव
र्षान्नरेतोहवनपर्यायक्रमेण पञ्चमाग्नौ गर्भीभूतास्ता नत्वापः आहुतिसमवायित्वात् प्राधान्यविवक्षा आपः पं
चम्यामाहुतौ पुरुषवचसो भवन्तीति नत्वाप एव केवलाः सोमादिकार्यमारम्भेन नचापो विवक्षिताः सन्ती
ति त्रिवृत्कृतत्वेऽपि विशेषसंज्ञालाभो दृष्टः पृथिवी यदिमा आपो यदग्निरित्यं तस्मादवाड्स्यतिमिश्रः न
स्मात्समर्दितान्येव भूतान्याहुत्यो महत्त्वात्रैते देहस्य बहुद्रवं च शरीरं यद्यपि पार्थिवं तत्र पञ्चम्यामा
हुतावापः पुरुषवचसो भवन्तीति स उल्बावृतो गर्भो दश वा मासानन्तः शयित्वा यावद्वाथ जायते स जातो ।
यावदायुषं जीवति तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यत एवेतो यतः संभूतो भवति ॥ ९ ॥ इति त्वेवं तु पं
चम्यामाहुतावापः पुरुषवचसो भवन्तीति व्याख्यात एकः प्रश्नः यत्तु लोकादिपञ्चाहुतयो राहुत्याः
पृथिवीपुरुषं स्त्रियं क्रमेण विषयो लोके प्रत्यक्षो भवतीति वाजसनेयक उक्तं तन्मासंगीतमिहोच्यते

इह च प्रश्ने प्रथम उक्तेन मेवं वेस्य परिनोधि प्रजाः प्रयेनीति नस्य चायमपक्रमः सगर्भोपोपंचमः परिणाम
विशेषवशादृतिकर्मसमवायिनीनां शुक्र पाहूवाख्यानान्नस्सहूतउलेनजरायुणाहूतो वीहिनोदशवानवदा
मासानेनदत्तः ऊर्ध्वो पाणिनायावयावतां कालेन नस्नेनातिरिक्तेन वायानेनरंजायते उल्लाहनदत्यादि वेरा
रपहेनोरि दमच्चाने वाह्येरिमानः ऊर्ध्वो तु वपुरीषवानपि नस्वकादिपूर्णे नदत्तलि मस्य गर्भे स्मालाशुविप
दाहनस्पर्शोहिनरेतसाशुचिवीजसमानरशिनपीनरसात्रप्रवेशेनविवर्धमानस्यनिरुद्धप्राणिबलवीर्यने
नःप्रशाचेष्टस्यापायनेनतो योनिद्वारेण पीड्यमानस्य कष्टेन गनिस्मृति नेत्स्यनि गाहूयतिमहूवेमपपप्रसंदा।
पावामासानीति दीर्घकाले शनैः शायितेति सप्वंजातो यावदायुषं पुनः पुनर्म्रियते वद्दमनागमनायक।
मेऊर्ध्वं नूऊलालच्छवहानिर्यं गभ्रमणाय यावत् कर्मणोपात्रमायुस्तावज्जीवतितमेनं रीणायुषंप्रेतमृतं
दिष्टकर्मणानिर्दिष्टं पालनेप्रति यदि चेज्जीवनादिक कर्माणि विज्ञाने वाधिष्ठानः तदैनं मृतमिना सांद्रमा
दगुरेशपंचेन्द्रिज्ञाहरंति पुत्रावान्यकर्मणो यतनमवेनशागतो ग्रः स्कोणात् श्रद्धायाहूति कर्मणा यन सुप
चयोगिभ्यः प्रमङ्गतउत्पन्नो भवति नस्माप्रवाग्येष्टरं निस्वामेवयोनिर्माणमापादयन्तीत्यर्थः ॥ ८ ॥ नचर
मोविडर्थे चेमरणेश्रद्धानपरस्तुपाःस्नेने विषमभिसम्भवन्ति विधाहराहूय्या हर्षमाणपत्नमाहूर्यमाण
पहाद्यार्षभट्टकृतेनिमासासान्नाम्भ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्र
कृष्णमानवः स पुनान्ब्रह्म गमयति एष देवयानः पन्थाति वेस्यपरिनोधि प्रजाः प्रयनीत्यर्य प्रश्नः प्रस्तुपा।
स्मितोपकारं मतयात्रत्रलोके परशुमिनानामपि कृतानां गृहमेधिनाम धेययद्रूष्यमेवंरप्यलोकपंचा
ग्निदर्शनेन शुलोकाद्याग्निभ्यो वयं क्रमेण नानाग्निरूपाः पंचाग्न्यात्मानः इत्येवं विद्वज्जनीपुः कथमवगम्य

ब्र. भा.
५८

नेदं सर्वविद्वत्त्वमिति गृहस्थस्यैवोच्यते नान्यस्येति गृहस्थानां येऽत्र निर्दिष्टाः विदः केवलेषु दृश्यते दर्शनात्पराणां भूम्यादिनावेदं
शक्नुतीति वक्ष्यते येषां वारण्यपलहितावे वानप्रस्थाः परिव्राजकाश्च श्रद्धाज्ञानपरस्तपसि ते तेषां च सर्वविद्भिः
महर्षिरादिनागमनेवक्ष्यति परिशेषाद्गृहस्था जातु तिसंबंधाच्च गृहस्थस्यैव गृहे नेदं सर्वविद्वत्त्वमिति नत्वत्र
स्ववाशिष्ठ्यपरिगृहीता ग्रामस्कृत्वारण्यम्भ्यां चानुपलहितं विधत्ते कथं परिशेष्यसिद्धिः नैष दोषः श्रुत्या
स्मृतिप्रमाणेनूर्ध्वरेतसां नैष्ठिकब्रह्मचारिणामनवरणार्यस्माः पंथाः प्रसिद्धास्तेनरण्यवासिभिः सह
गमिष्यति उपकुर्वाणास्तु स्वाध्यायग्रहणार्थो इतिनविशेषनिर्देशाः ॥ ननूर्ध्वरेतस्त्वं चेदेतन्मार्गप्रति
पत्तिकारणं श्रुतिस्मृतिप्रमाणादिष्यते इत्थं विस्मयमनर्थकं मार्गे न गृहस्थानामूर्ध्वरेतस्त्वात् येऽत्र गृहस्थाश्र
निर्दिष्टाः तेषां स्वभावतोर्ध्वगतिस्ततो भूम्यादिपंथाः प्रसिद्धास्तेषां येऽत्र सर्वविदः सगुणवाग्रह्मविदः प्रथा
यत्रैव वासिनां वक्ष्यतीति यदि च नाविशेषमेवेति लिंगात्तत्त्वेनरण्यतर्कः ननूर्ध्वरेतसां गृहस्थाः नो चेत्समानस्था
श्रमित्वं ऊर्ध्वरेतसामेवारण्येन पथा गमनेन गृहस्थानमितिन प्रकमग्निहोत्रादिवैदिककर्मबाहुल्यस्य
तिनैष दोषः अनृतादि ग्राम्यमिश्रसंयोगानि मिश्रोदितं धर्मरागद्वेषानतथाधर्माधर्माद्विसानुग्रहनिमित्तो हिंसा
नृतमायाब्रह्मचर्यादिवबहुसुहितकरणमपरिहार्यम् तेषां श्रुतौ स्मृतौ सम्यक्त्वानारण्येन पथा गमनम् हिं
सानृतमायाब्रह्मचर्यादिपरिहाराच्च श्रद्धात्मानो होने शुद्धमिश्रगरागद्वेषादिपरिहाराच्च विरजमलेषां शु
कृतत्वं पंथाः तेषां च पौराणिकाः यत्र जामौ खिरमस्यां तत्रैव प्राणानभिज्ञिरे यत्र जामौ खिवेथ्या श्रुतं विदि
भेजिरे इत्याहुः इत्थं विदां गृहस्थानमरण्यवासिनां समानेमार्गे तैरुक्तत्वकल्पनेच सति श्रुरण्यवासिनां विद्या
नर्थक्यं मार्गे तथा च श्रुतिविरोधः न तत्त्वदर्शनाय इति नाविद्या समलमर्थान्तर इति सपनमविदितेन च उनक्तीति।

ग्रविरुद्धम् न भूतसंप्लवस्थानत्वामृतत्वेन विवदितत्वात् तैत्त्वेवाक्ये पौराणिकैः आभूतसंप्लवं स्थानममृतत्वं
हि भाष्यत इति यच्चात्यन्तिकममृतत्वं तदपेक्षया न तत्र दक्षिणायनादि संभवः प्रतिबन्धकमविदितान न त्वन्तकमीमांसाः अ।
नयदूत्तेनान विरोधः न च पुनरावर्तन्ते इति इमं मानवमावर्तं नावर्तन्त इत्यादिश्रुतिविरोध इति चेन्न इमं मान
वमिति विशेषणात् तेषामिह न पुनरावृत्तिरस्तीति च यदि ह्येककल्पे तेनैव नावर्तेरन्निमं मानवमिति इति च विशे
षणमनर्थकं स्यात् इममिति ह्याकृतिमात्रमुच्यत इति चेन्न अनाकृतिविशेषे नैवानित्यानां ह्यन्यथैक्यस्य प्रतीतत्वात्
नि कल्पनानिनिरर्थकात् इममिति चेति च विशेषणार्थवत्ता या न स्वाभाविकी कल्पनीया न च सदेकमेवाद्वितीयमि।
ति वं प्रमयय वनान्न धेन्यनाद्यार्चिरादिमार्गेण गमनं ब्रह्मैव सन् ब्रह्माप्येति न तस्मात्तस्य प्राणा उत्क्रा।
मन्त्यत्रैव समवनीयन्त इत्यादिश्रुतिशतेभ्यः ॥ ननु तस्माज्जीवादुच्चिक्रमिषोः प्राणा नोत्क्रामन्ति सहैव गच्छ।
न्तीत्यर्थः कस्मान्न इति चेन्न अत्रैव समवनीयन्त इति विशेषणानर्थक्यात् सर्वे प्राणा नोत्क्रामन्तीति च प्राणेभ्यो
मनसः प्राधान्यात्तस्य उत्क्रामतीति अनश्यैकैवेषा यदापि मोक्षस्य संसारगतिनैव सहत्प्राणान्प्राणानां जीवेन स
हागमनमाशङ्का तत्स्वान्तरात्क्रामतीत्युच्यते न तदाप्यत्रैव समवनीयन्त इति विशेषणमनर्थकं स्यात् न च प्रा
णैर्विप्रयुक्तस्य गतिरुपपद्यते जीवत्वं सर्वगतत्वान्निरवयवत्वात् प्राणसंबन्धमात्रमेव ह्यग्निविस्फुलिङ्गवज्जीव
त्वभेदकारणमिव तस्माद्धि योगो जीवत्वं गतिर्वा न प्राणाकल्प्यत इति न्याय्य श्रुतयः श्रुत्यनुमानम् न च सतां पर वयवः
स्फुलिङ्गा जीवात्मनः सर्वं पंक्तिरीत्यैव ऊर्ध्वं न गच्छतीति शङ्काकल्प्यते इति न तस्मात्तयोर्धर्माध्यात्रामृतत्वमेतीति सगु
णब्रह्मोपासकस्य प्राणैः सह नाड्या गमनं तदपेक्षमेव चामृतत्वं न साक्षात्मोक्षः इति निगम्यते तदपरा निनापूर्त
दासमर्दीयस्य हृत्स्वामुक्तानेषामेव च ब्रह्मलोक इति विशेषणात् अनः पञ्चाग्निविदो गृहस्थस्यापि च मेरणेवानप्रस्था।

का. भा. ४५

परिव्राजकाश्च सह नैष्ठिकब्रह्मचारिभिः श्रद्धानपरस्त्वेवमाद्युपासते श्रद्धया नाल्पतपस्विनस्त्वयमर्थः उपासत
प्राकृतास्त्वयमर्थः ॥ इष्टापूर्ते दत्तमित्युपासत इति यत्कृत्यं तद्योच्यते तस्य ब्रह्मविद्वि एवगर्भा ये मुपासते ते।
सर्वे विषमविषमाभिमानिनीं देवतामभिसंभवन्ति प्रतिपद्यन्ते समानमन्यत् चतुर्थगतिव्याख्यानेन एषदे।
वयानः पंथा व्याख्यातः सत्यलोकावसानो नाडाहृदिः यदेतत्पितरं मातरं चेति मे तत्त्ववर्णिते ॥ ॥ अथ
य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान्षड्
दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमे
ष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते यथेत
माकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षन्ति त इह व्रीही।
ह्रियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते ॥ ॥ अथैतस्यार्थान्तरप्रस्तावनार्थः य इमे गृहस्था ग्रामे ग्रा
म इति गृहस्थानामसाधारणो विशेषणमरण्यवासिभ्यो निवृत्त्यर्थं च यथा वानप्रस्थपरिव्राजकानामर
ण्यविशेषणं गृहस्थेभ्यो व्यावृत्त्यर्थं तद्वत् इष्टं अग्निहोत्रादिकं कर्म पूर्तं वापीकूपतडागारामादि
करणं दत्तं बहिर्वेदि यथाशक्त्यर्हेभ्यो द्रव्यसंविभागो दत्तमित्येवंविधं परिचरणं त्राणमुपासते इति शब्दस्य।
प्रकारे ह यो नान्यत्र इह धूमाभिमानिनीं देवतामभिमुखेन संभवन्ति प्रतिपद्यन्ते तत्र यान्ति वहिना धूमाद्रा
त्रिं रात्रिदेवतां रात्रेरपरपक्षदेवतामेव कृष्णपक्षाभिमानिनीमपरपक्षाद्यान्षण्मासान्दक्षिणां दक्षिणादि
शमेति सविता तान्मासान्दक्षिणायनषण्मासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थः संघचारिण्यो हि षण्मा
सदेवता इति मासानिति बहुवचनप्रयोगः तान्नैते कर्मिणः प्राप्नुतः संवत्सराभिमानिनीं देवतामभिप्रा

वेति कुतः पुनः संवत्सरप्रसंगोयनः प्रतिषिध्यते श्रुतिप्रसंगात् संवत्सरस्यैकस्यावयवभूते दक्षिणोत्तराय
णे तत्रार्चिरादिमार्गप्रवृत्तानामुदगयनमासेभ्योवयविनः संवत्सरस्य प्राप्तिप्रसक्तानत्विहापि तदवयवभूता
नां दक्षिणायनमासानां प्राप्तिस्तु तानदवयविनः संवत्सरस्यापि सर्ववत्साभिप्रायेणेत्यतस्तन्याभिः प्रतिषिध्य
ते नैते संवत्सरमभिप्राप्नुवन्तीति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो यस्तैः प्राप्यते
चन्द्रमाः य एष दृश्यतेन्तरिक्षे सोमो राजा ब्राह्मणानां तदन्नं देवानां चन्द्रमसमन्नं देवा इन्द्रादयो भक्षयन्ति अ
तस्ते धूमादिना गता चन्द्रभूताः कर्मिणो देवैर्भक्ष्यन्ते ननु अनर्थाय इष्टादिकारिणां यच्चन्द्रभूता देवैर्भक्ष्यन्ते नैष
दोषः अन्नमित्युपकरणमात्रत्वस्य विवक्षितत्वात् नहि ते कवलोत्क्षेपेण देवैर्भक्ष्यन्ते किं तर्हि उपकरणमा
त्रं देवानां भवन्ति ते स्त्रीपशुभृत्यादिवत् दृष्टश्चान्नशब्द उपकरणेषु स्त्रियोन्नं पशवोन्नं विशोन्नं राज्ञामित्या
दि न च तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेपि उपभोगो नास्ति तस्मात्कर्मिणो देवानामुपभोग्या अपि सन्तः सु
खिनो देवैः क्रीडन्ति शरीरं च तेषां सुखोपभोगयोग्यं चन्द्रमण्डल आप्यमारभ्यते तदुक्तं पुरस्तात् श्रद्धाशब्दा
आपो द्युलोकाग्नौ हुताः सोमो राजा संभवतीति ता आपः कर्मसमवायिन्य इतरैश्च भूतैरनुगता द्युलोकं
प्राप्य चन्द्रत्वमापन्नाः शरीराद्यारम्भिका इष्टाद्युपासकानां भवन्ति अन्त्यायां च शरीराहुतावग्नौ हुतायामग्निना
दह्यमाने शरीरे तदुत्था आपो धूमेन सहोर्ध्वं यजमानमावेष्ट्य चन्द्रमण्डलं प्राप्य कुशमृत्तिकास्थानीया बाह्यश
रीरारम्भिका भवन्ति तदारब्धेन च शरीरेणेष्टादिफलमुपभुञ्जाना आसते यावत्तदुपभोगनिमित्तस्य कर्म
णः क्षयः संपन्ने निपतन्ते निःसंपाताः कर्मणः क्षयः यावत्संपातं यावत्कर्मणः क्षय इत्यर्थः तावच्चन्द्रमण्डले उ
षित्वाथानन्तरमेतमेव वक्ष्यमाणमध्वानं मार्गं पुनर्निवर्तन्ते पुनर्निवर्तन्त इति प्रयोगात्पूर्वमप्यसकृच्च

द्रमंडले गतानि कृत्स्नान्यत्र विनिभाष्यते तस्मादिह लोके ह्यादिकर्मोपदिष्टं चेद्गङ्कीति ननु ये चावर्तन्ते ह्या
णामात्रमपि न चस्यात् न संभवेत् स्थितिनिमित्तकर्मत्वयान्ते इह त्वयादिवत् प्रदीपवत्॥ न च क्रियेन कर्मणा च
मंडलमात्रफलस्य सर्वस्य त्वेयतस्मादेवोह इति किंवा सावशेषा इति किं ततो यदि सर्वस्य वह्नयः कर्मणः च
द्रमंडलस्य स्यैव मात्रः स्याभाति निष्ठतेनावत्रैवमात्रः स्यात्क्रियेति ततः प्रागतस्य इह शारीरोपभोगादिन
संभवति ततः शेषेणान्यादिस्मृतिविरोधश्च स्यात्॥ न तिष्ठत्तदत्रव्यतिरेकेणापि मनुष्यलोके शरीरो
पभोगनिमित्तानि कर्माण्यनेकानि भवंति न च तेषां चेदं मंडल उपभोगः श्रोतादीनामितानि यदि मित्र
वेदमंडलमात्रफलान्येवेतीनानोन्यविरोधः शेषशब्दश्च सर्वेषां कर्मणां समस्तान्यादविरुद्धानप्रवचनमेव
मात्रः स्यादिति दोषाभावः विरुद्धानेकयोन्युपभोगफलानां च कर्मणामेकैकस्य जन्मनारंभकत्वसंभवात् न
चैकस्मिन् जन्मनि सर्वकर्मणां क्षय उपपद्यते अश्वमेधादीनां चैकैकस्य कर्मणोऽनेकजन्मारंभकत्वस्मरणात् स्याव
राद्विसामानो वाऽनन्तस्य फलानामक्षयहेतोः कर्मणामारंभकत्वासंभवात् गर्भभूतानां च समस्तानां कर्म
संभवस्य नानुपपत्तिः समस्तानामेकस्मिन् जन्मनि सर्वेषां कर्मणामुपभोगः यत्त्वेकेष्विष्यते सर्वकर्मोपक्षया।
पमर्देन प्राणीय कर्मणा जन्मारंभकत्वं न च कानि विरुद्धकर्मोऽपनारंभकत्वेनेव तिष्ठति कानि चित् जन्मान्तर
मारंभत इति नोपपद्यते मरणस्य सर्वैककर्माभिव्यंजकत्वात् स्वगोचराभिव्यंजकत्वात् स्वगोचराभिव्यंजकप्र
दीपवत् इति तन्न सर्वस्य सर्वात्मकत्वाभ्युपगमात् न हि सर्वस्य सर्वात्मकत्वे देशकालनिमित्तावरुद्धत्वात्
सर्वात्मनोपमर्दः कस्यचित् कृचिदभिव्यक्तिर्वा सर्वात्मनोपपद्यते तथा कर्मणामपि मात्रयाणां च भवेत् यथा
च सर्वात्मभूतमनुष्यमनुष्यमर्कटादिजन्माभिसंस्कृतानां विरुद्धानेकवासनानाम्मर्कटजन्मप्रापकेन कर्मणा मर्कट।

जन्म प्रारभमाणेन नचोपभुज्यते नद्याकर्मान्तरजन्मप्राप्तिनिमित्तानि नोपभुज्यन्त इत्युक्तम् यदा हि सर्वाः
स्वं जन्मारम्भ एवासन्नाउपभुज्येरन् मर्कटजन्मनिमित्तेन कर्मणा मर्कटजन्मान्यारब्धे मर्कटस्य जातमा।
त्रस्य मातुः शाखायाः शाखान्तरगमने मातुरुदरसंलग्नत्वादिकौशलं न प्राप्नोतीह जन्मन्यनभ्यस्तत्वात् न
चातीतानन्तरजन्मनि मर्कटत्वमेवासीत्तस्येति शक्यं वक्तुं न विद्याकर्मणोः समत्वाद्भवेत सर्वप्रत्ययेनिश्च
ते न साह्यासनावत्त्वाशेषकर्मोपमर्द इति शेषकर्मसंभवः यत एवं ततः शेषेण युक्ताः कर्मणः संसा
उपपद्यन्त इति न कश्चिद्विरोधः कोऽसावध्यायप्रतिनिवर्तन इत्युच्यते यथेतं यथागतं निवर्तन्ते न तु मासे
भ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमिति गमनक्रमेणैकेन न तथा निवृत्तिः किं तर्हि आका
शप्राप्तिमात्रया कथं यथेतमित्युच्यते नैष दोषः आकाशप्राप्तेस्तुल्यत्वात् पृथिवीप्राप्तेश्च न चात्र यथै
तमेवेति नियमः अनेकविधमपि निवर्तन्ते पुनर्निवर्तन्त इति तु नियमः अत उपलक्षणार्थमेतत् यथैतमि
ति अनेकशोऽनिकमाकाशान्तापवस्त्रनि पद्यते यास्तेषां चन्द्रमण्डले शरीरारम्भिका आपस्ता नेषां तदुपभोग
निमित्तानां कर्मणां क्षये विलीयन्ते घृतसंस्थानमिवाग्निसंयोगेन ता विलीना अन्तरिक्षस्था आकाशभूता
इव सूक्ष्मा भवन्ति ता अन्तरिक्षाद्वायुर्भवन्ति वायुप्रतिष्ठा वायुभूता इतश्चामुतश्चोह्यमानास्ताभिः सह क्षी
णकर्मा वायुभूतो भवति वायुर्भूत्वा ताभिः सहैव धूमो भवति धूमो भूत्वाभ्रमब्भरणमात्ररूपो भवति ।
अभ्रं भूत्वा जलसेचनसमर्थो मेघो भवति मेघो भूत्वा निम्नेषु वर्षति धाराद्रूपेण शेषकर्मा पततीत्यर्थः
त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इत्येवंप्रकारा जायन्ते क्षीणकर्मणामनेकत्वाद्बहुवचन
निर्देशः मेघादिषु पूर्वेष्वेकरूपत्वादेकवचननिर्देशः ॥ ॥ अतो वै दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिं

छां॰भा॰
६९

सिंचतितइत्थएव भवति ॥ ॥ यस्माद्गिरितटतुंगनदीसमुद्राण्यमहद्देशाद्धि सन्निवेशास्सहस्राण्यवर्षे
धाराभिः पतितानामतस्तस्माद्देवैर्वेल्लतुङ्गनिष्पतनं तुङ्गनिष्क्रमणं तुर्निस्सरणं यतो गिरितटादुदक
वेतोमाह्यमानानैदीप्राप्नुवंति ततः समुद्रेत तोमकरादिभिर्भक्ष्यंते तेष्यन्येन नन्ने वच सहस्र करणस्य
मद्देविसीनाः समुद्रेभोभिर्जलधैरगाह्यसः पुनर्वर्षधाराभिर्महद्देशोपिलानटेवागम्यपतितानास्मि छेति
कदाचिद्याघ्रमृगसादिपीतानामत्तिनास्त्रान्येस्तष्यैरित्येवं प्रकाराः परिवर्तेन कदाचिदभ्यत्सुष्ठा
वेष्टुजातानास्त्रैवम्शुष्येन भक्ष्यापिस्थावेष्टुजातानारेनस्मिदेहसंबंधाडुलभएव बद्धलात् स्थावरे
ष्वस्मिन्नतोडुर्निष्क्रमणात् अथवानोस्माद्व्रीहियवादिभावाडुर्निष्पतरं डुर्निर्गमनं तडुर्निष्पतनं
तरं इतिनकारएकोलभोद्रष्टव्यः व्रीहियवादिभावाडुर्निष्पतरः तस्माडुर्निष्पततनरं डेतस्मिदेहसं
तस्मिन्देहसंबंधाडुर्निष्पापतरं इत्यर्थः ॥ यस्मादूर्ध्वरेतोभिर्बालैः वृद्धैर्ह्नैः स्थविरैर्वाभुक्तानामेनरालेवि
पीयतेनकतादन्नदानाम् कदाचित्काकतालीयन्यायेनतः सिक्तिभक्ष्यंते यदा नदारेतस्मिभावंगतानां
कर्मणां हि लाभः कथं योषाह्यत्रमाडुपायिभिः सिक्तिरेतःसिक् यच्चरेतःसिंचन्त्यनुकालेयोषितसु
इत्यएवनदाकृतिर्भवति नदवयवाकृतिम्भूयस्स्वभूयस्तुस्वन्ने रेतोरूपेण योषितिगर्भाशयेनः प्रवि
ष्टानुशायीरेतोरेतःसिगाकृतिभावितत्वात् सर्वेभ्योगेभ्यस्तेजःसंभूतमितिश्रुत्यंतरात् अतोरेतःसि
गाकृतिरेवभवतीत्यर्थः तथाहि पुरुषान्मुरुषोजायते गोर्गवाकृतिरेव नत्वन्यजात्याकृतिः तस्मायुक्तम
इत्यएवभवतीति ॥ येत्वेतेतुपायिमनुष्ठानेडलमनारुद्धैवपापकर्मभिर्योगैर्व्रीहियवादिभावमापं
पद्यंते पुनर्मनुष्यादिभावं गतास्तेषांमनुपायिनाभिवतुनिष्प्रपनबाधं कस्मात् कर्मणा हि ते व्रीहियवा

हिदेहउपात्तस्तितदुपभोगनिमित्तस्येबीजादिदेहनाशे यथाकर्मान्तिनेदेहान्तरंनवंनवंजलूकाव।
संक्रमते सविज्ञानोभवति सविज्ञानस्यैवान्वक्रामतीतिष्क्रनंतरात् यद्युपसंहृतकरणाःस्तेनोदेहं
नरंगकंनितथापिस्वप्नवदेहान्तरप्राप्तिनिमित्तकर्मोद्भावितवासनाज्ञानेन सविज्ञाना एवदेहान्तरंगके
निष्क्रान्तिप्रमाणात् यथाविंशादिनाम्रमादिनाचगमने स्वप्नदृष्टान्तविज्ञानेनलब्धवृत्तिकर्मनिमित्त।
मत्वाद्दमनस्य तेनथा, तृणादिनां बीजादिभावेजातानांनाम सविज्ञानानामेवैतःस्थितोपिविदेहसंबंधउप
पद्यते तबीजादित्वनवरुद्धनपेषणादेवसविज्ञानानांस्थितिरस्ति ननुचंद्रमंडलादपवर्गे हतोदेहान्त
रागमनसम्यक्भूतानलूकावत्सविज्ञानेनैवयुक्तानथासतिशोधनरकानुभवरसास्वादिकारिणांचंद्र।
मंडलारोहमप्राप्तोयावद्ब्राह्मणादिजन्म तथास्यनयोयेवसाउपाध्यनेविहितस्यात् श्रुतेस्तत्रापा
एणप्राप्तेवैदिकानांकर्मणामनर्थानुबंधित्वात् नहृतारोहणपतनवद्विशेषसद्भावात् देहाद्देहान्तरप्र।
तिपत्तेः कर्मणालब्धवृत्तिवाक्यमाणाद्भाविनेनविज्ञानेन सविज्ञानत्वंयुक्तम् ॥ वृत्ताग्रमारोहतस्त्व।
तत्फलजिहृत्तानथाविंशादिनागक्रतांसविज्ञानत्वंभवेत् धूमादिनाचंद्रमंडलमारूढस्तेनानतथाचंद्र।
मंडलादवरूढस्तनाहसाग्रादिवपततोमवेनननत्व यथाचनरकद्वारादिभिर्हतानांनदीषिचानेवेदनानिमि
मेरुमूर्ध्नितप्रतिबद्धकरणानास्वदेहेनैवदेशान्तरेधानेनीयमानानांविज्ञानशून्यतादृष्टा तथाचंद्रम
डलान्मनुष्यादिदेहान्तरप्रत्यवरूढस्तनाभोगनिमित्तकर्मक्षयान्मृदिनादेहान्तरप्रतिबद्धकारणानां।
श्रुतस्थलपरिणतदेहबीजभूताभिरद्भिर्मेघेकुंनाइवाकाशादिक्रमेणसमवहरणकर्मनिमित्तनातिस्थावर
देहेःसंश्लिष्टेनप्रतिबद्धकरणेनयोमदृष्टेनविज्ञानाएव तथालवणेकांडनपेषणसंस्कारभक्षणरसादिप

छा. भा.

गिणमेव तस्य काले सुमूर्छितवदेव देहान्तरारंभकस्य कर्मणो लब्धवृत्तित्वाद्देहबीजभूताप्संबन्धापरित्या
गेनैव सर्वोस्यावरोहस्तृणजलूकावच्चेतनावत्त्वेन विरुध्यते अन्तराले त्वविज्ञानेन मूर्छितवदेवास्य दोष
न च वैदिकानां कर्मणां हिंसायुक्तत्वेनाधर्महेतुत्वं शक्यमनुमातुम् हिंसायाः शास्त्रचोदितत्वात् अहिं
सन्सर्वभूतान्यन्यत्र तीर्थेभ्य इति श्रुतेः शास्त्रचोदितायां हिंसायां नाधर्महेतुत्वमभ्युपगम्यते अभ्युपगतेप्य
धर्महेतुत्वे मन्त्रे विषादिभक्षणवन्नेदमन्योपपन्नं नेदः एककार्यारंभकत्वोपपत्तेर्वैदिकानां कर्मणां मन्त्रेण
व विषभक्षणमस्येति ॥ ॥ तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयो
निं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयो
निं वा सूकरयोनिं वा चण्डालयोनिं वा ॥ ॥ तदिति तेष्वनुशयिनो य इह लोके रमणीयं शोभनं चरणं शी
लं येषां ते रमणीयचरणाः रमणीयचरणेनोपलक्षितः शोभनोऽनुशयः पुण्यं कर्म विशिष्टं येषां ते रमणीय
चरणा उच्यन्ते क्रौर्यानृतमायावर्जितानां हि शक्य उपलक्षयितुं शुभानुशयसद्भावः तेनानुशयेन पुण्येन
कर्मणा चन्द्रमण्डले भुक्तशेषेणाभ्याशो ह क्षिप्रमेव यदिति क्रियाविशेषणं ते रमणीयां क्रौर्यादिवर्जितां
योनिमापद्येरन् प्राप्नुयुः ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा स्वकर्मानुसारेण अथ पुनर्ये तद्वि
परीताः कपूयचरणोपलक्षिताः कर्माणोऽशुभानुशया अभ्याशो ह यत्ते कपूयां कर्मयोनिमापद्येरन् यथा
कपूयामेव धर्मसंबन्धवर्जितां जुगुप्सितां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा स्व
कर्मानुसारेणैव ॥ ॥ अथैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भव
न्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते तस्माज्जुगुप्सेत येन रमणीयचरणा हि।

ज्ञानयलेस्वकर्मस्याश्चेष्टादिकारिणो धूमादिना गकंस्यागकंति पुनः पुनर्वर्धं दीर्घं नवत् विद्यां वेत्तामृत्युल
तोर्विंशादिनागकंति यदा तनविद्यामविनानापीष्टादिकर्मसेवते तदा येनयोः पथोर्यथा कथारविं धूमादिलक्ष
णयोनेकतरेणाप्यनरेण पथापियन्ति तानीमानि भूतानि क्षुद्राणि दंशमशककीटादीनि असकृदावर्तीनि भ
वेत्यत उभयमार्गपरिभ्रष्टानि असकृदावर्तनं चाभिविपन्नेवत्यर्थः तेषां च जननमरणलक्षणरूपकरणमिदमुच्यते
जायस्व म्रियस्वेति ईश्वरनिमित्तावेष्ठ उच्यते जननमरणलक्षणेन कालयापनं भवति न तत्क्रियास्वभोगेषु
वा कालोऽस्तीत्यर्थः एतन्तृतीयं स्थानं यत्तृतीयं स्वर्गमो पथानावपेक्ष्य स्थानं संसरन्तो येन दक्षिणमार्गगाम्य
पितृमार्गकंति श्रुतेषि क्रतानांतानकर्मिणां गमनमेव दक्षिणपथं तेनासौ लोको न संपूर्यते ॥ पंचम
स्तु प्रश्नः पंचाग्निविद्यया व्याख्यातः प्रथमो दक्षिणमार्गाभ्यासेन पाकृतो दक्षिणत्वयोः पथोर्व्यावर्तनापि मृ
तानामपुनरावृत्तेः समानत्वमावर्तनेन आर्चिरादिना यन्ति धूमादिना पुनरावर्तन्ते दक्षिणायने षण्मासान्मा
सुवेनः संयुक्तपुनर्व्यावर्तन्ते श्रुतेषु वत्सरमन्यमासेभ्यः पितृलोकोपमिति व्याख्यातपुनरावृत्तिरपि लोकानुस
यानाव .... संसारगतिं तस्मात्तु पश्येत यस्माज्जन्ममरणजनितवेदनानुभवकृतनतलाणः तत्इदं तनवर्धाने
चघोरेष्टकृतरेप्रवेशिनाः सागरइवागाधमप्लवनिरालम्बमारणप्रतितस्माद्धवति धीसंसारगतिं जुगुप्सेत बीभत्सेत
घृणीभवेत्माभूदेवंविधसंसारमहोदधौपातइति ॥ ॥ तदेषश्लोकः स्तेनो हिरण्यस्य सुरां पिबंश्च गुरोस्तल्पमा
वसन् ब्रह्महा चैते पतन्ति चत्वारः पञ्चमश्चाचरंस्तैरिति ॥ ॥ तदेतस्मिन्नर्थे एष श्लोकः पंचाग्निविद्यास्तुतये स्तेनो हि
रण्यस्य ब्राह्मणस्वर्णस्य हर्ता सुरापिबन् ब्राह्मणः सन् गुरोश्च तल्पं दारानावसन् ब्रह्महा ब्राह्मणस्य हन्ता चेत्येते
पतन्ति चत्वारः पञ्चमश्च पतति तैः सहाचरन्निति ॥ अथ ह य एतानेवं पञ्चाग्नीन्वेद न सह तैरप्याचरन्पाप्मना लिप्यते शुद्धः

पूतः पुण्यलोको भवति य एवं वेद य एवं वेद ॥ १० ॥ इति पंचमस्यार्धः प्रपाठकः ॥ अथ पुनर्यो यथोक्तान्पञ्चाग्नीन्वेद
स तैरप्याचरन्महापातकिभिः सह न पाप्मना लिप्यते शुद्ध एव तेन पञ्चाग्निदर्शनेन पूतो यस्मात्पुनः पावितः पुण्यलो-
कः प्रजापत्यादिर्यस्य सोऽयं पुण्यलोको भवति य एवं वेद यथोक्तं समस्तं पञ्चभिः प्रश्नैः पृष्टमर्थं जानन्वेद द्विरुक्तिः प्र-
को भवति य एवं वेद यथोक्तं समस्तं पञ्चभिः प्रश्नैर्निर्णयप्रदर्शनार्था ॥ ॥ इतोऽनेन पथा गच्छतामन्नभाव उक्तः स देवा-
नामन्नं तं देवा भक्षयन्तीति तद्द्वयं न लक्षणं च केवलं संसारगतिरुक्ता तद्भयेदोषपरिजिहीर्षया वैश्वानरस्या-
त्मभावप्रतिपत्त्यर्थं मन्त्रेराग्रे आरभ्यते अन्नमन्नमिति प्रियमित्यादिलिङ्गात् आख्यायिका तु सुखावबो-
धार्था विद्यासंप्रदानन्यायप्रदर्शनार्था चेति ॥ ॥ प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भा-
ल्लवेयो जनः शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमांसां चक्रुः को न आ-
त्मा किं ब्रह्मेति ते ह संपादयाञ्चक्रुरुद्दालको वै भगवन्तोऽयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्या-
गच्छामेति तं हाभ्याजग्मुः स ह संपादयाञ्चकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियास्तेभ्यो न सर्वमिव।
प्रतिपत्स्ये हन्ताहमन्यमभ्यनुशासानीति तान्होवाचाश्वपतिर्वै भगवन्तोऽयं कैकेयः संप्रतीममात्मानं वैश्वा-
नरमध्येति तं हन्ताभ्यागच्छामेति तं हाभ्याजग्मुः तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि कारयाञ्चकार स ह प्रातः संजि-
हान उवाच न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी कुतः यक्ष्यमाणो वै भ-
गवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति ते होचुर्येन हैवा-
र्थेन पुरुषश्चरेत्तं हैव वदेदात्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति तान्होवाच प्रातर्वः प्रतिवक्ता-
स्मीति ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे तान्हानुपनीयैवैतदुवाच औपमन्यव कं त्वमात्मानमुपा।

स्स इति दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमुपास्से तस्मात्तव सुतं प्रसुत
मासुतं कुले दृश्यते अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमे
वमात्मानं वैश्वानरमुपास्ते मूर्द्धा त्वेष आत्मन इति होवाच मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति ॥ १२ ॥
प्राचीनशाल इति नामतः उपमन्योरपत्यमौपमन्यवः सत्ययज्ञो नामतः पुलुषस्यापत्यं पौलुषिः इन्द्रद्यु
म्नो नामतः भल्लवेरपत्यं भाल्लविः तस्यापत्यं भाल्लवेयः जन इति नामतः शार्कराक्षस्यापत्यं शार्कराक्ष्यः बुडि
लो नामतः अश्वतराश्वस्यापत्यमाश्वतराश्विः पञ्चापि ते ह एते महाशाला महागृहस्था विस्तीर्णाभिः शालाभिः सं
युक्ताः संपन्ना इत्यर्थः महाश्रोत्रियाः श्रुताध्ययनवृत्तसंपन्ना इत्यर्थः ते एवंभूताः सन्तः समेत्य संभूय क्वचिन्मी
मांसां विचारणां चक्रुः कृतवन्त इत्यर्थः कथं को नोऽस्माकमात्मा किं ब्रह्मेति आत्मब्रह्मशब्दयोरितरेतरविशेष
णविशेष्यत्वं ब्रह्मेत्यध्यात्मपरिच्छिन्नमात्मानं निवर्तयति आत्मेति चात्मव्यतिरिक्तस्यादित्यादिब्रह्मण उपास्य
त्वं निवर्तयत्यभेदेन आत्मैव ब्रह्म ब्रह्मैवात्मेत्येवं सर्वात्मा वैश्वानरो ब्रह्म स आत्मेत्येतत्सिद्धं भवति मूर्धा ते व्य
पतिष्यत् श्रेयो भविष्यदित्यादिलिङ्गात् ते ह मीमांसमाना अपि निश्चयमलभमानाः संपादयांचक्रुः संपादितव
न्तः आत्मन उपदेष्टारं उद्दालको वै प्रसिद्धो नामतः भगवान् पूजावानरुणस्यापत्यमारुणिः संप्रति
इममात्मानं वैश्वानरमस्मदभिप्रेतमध्येति स्मरति तं हन्त इदानीमभ्यागच्छामेत्येवं निश्चित्य ते हाभ्याज
ग्मुः तं भगवन्तः सन्तोऽरुणिरुद्दालको महत्तां महानुभावां ब्रह्मसंपादयांचकार कथं प्रक्ष्यन्ति मां वैश्वानरमिमे महा
शाला महाश्रोत्रिया लेभ्योऽहं न सर्वमिव प्रतिपत्स्ये वक्तुं नाऽहमेतान् हन्ताहमिदानीमन्यमहमेषामभ्युपमा
नि वक्ष्याम्युपदेष्टारं इत्येवं संपादयन्तान् होवाच अश्वपतिर्वै नामतो भगवन्तोऽयं केकयस्यापत्यं कैकेयः संप्र

छा.भा. ८४

त्रिषम्पातीमसमात्मानं वैश्वानरमध्येनोत्पादितम् तेभ्यो राजा प्राप्तेभ्यः पृथक्पृथगर्हाणि पृथगर्हणानि पुरो-
हितैर्भृत्यैश्च कारयांचकार कारितवान् स ह अन्येद्यू राजा प्रातः संजिहान उवाच विनयेनोपगम्येदं धनं मत्त उ-
पादध्वमिति तैः प्रत्याख्यातो मयि दोषं पश्यन्ति नूनं येनैते न गृह्णन्ति धनमित्ति मत्वान आत्मनः सद्वृत्ततां प्र-
तिपिपादयिषुराह न मे जनपदे स्तेनः परस्वहर्ता विद्यते न कदर्यो दाता सति विभवे न मद्यपो द्विजोत्तमः सन्
नानाहिताग्निः शतगुर्नाविद्वान् अधिकारानुरूपं न स्वैरी परदारेषु गन्ता अत एव स्वैरिणी कुतः दुष्टचारिणी
न संभवतीत्यर्थः नैवं न वयं धनेनार्थिन इत्युक्ता आहाल्पमेतैर्धनं न प्रतिगृह्णन्तीति यक्ष्यमाणो वै कति-
पयाहोभिर्वै भगवन्तोऽहमस्मि तदर्थं कॢप्तं धनं मया यावदेकैकस्मै यथोक्तमृत्विजे धनं दास्यामि तावत्प्र-
त्येकं भगवद्भ्यो दास्यामि वसन्तु भगवन्तः पश्यन्तु च मम यागमित्युक्तास्ते होचुः येन ह वा अर्थेन प्रयोजनेन
पुरुषं प्रतिचरेत् गच्छेत् तं हैवार्थं वदेदिदं च प्रयोजनमागमनस्यास्माकं त्वयाप्युक्ताम् वयं च वैश्वानरज्ञाना-
र्थिनः आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि सम्यग् जानासि अतस्तमेव नोऽस्मभ्यं ब्रूहीति उक्तस्तान् हो-
वाच प्रातर्वः प्रतिवक्तास्मि प्रतिवाक्यं दातास्मीत्युक्तास्ते राज्ञोऽभिप्रायज्ञाः समित्पाणयः समि-
द्भारहस्ता अपरेद्युः पूर्वाह्णे राजानं प्रतिचक्रमिरे गतवन्तः यत एवं महाशाला महाश्रोत्रियाः सन्तो महा-
शालत्वाद्यभिमानं हित्वा समिद्भारपाणयो जातितो हीनं राजानं विद्यार्थिनो विनयेनोपजग्मुः तथान्ये
विद्योपादित्सुभिर्भवितव्यं तेभ्यश्चादाद्विद्यामनुपनीयैवोपनयनमकृत्वैव तान् यथायोग्येभ्यो विद्याम-
दात् तथान्येनापि विद्यादातव्येत्याचारार्थः एतद्वैश्वानरज्ञानमवाचेति वक्ष्यमाणेन संबन्धः सा
कथमवाचेत्याह औपमन्यव कं त्वमात्मानं वैश्वानरमुपास्स इति पप्रच्छ न न्यायमाचार्यः शिष्यं पृच्छ

तिरैष दोषः यद्येतन्नेनमोपसीदनत्तस्य ध्वंस्यामीति न्यायदर्शनात् अन्यत्राप्याचार्यस्य प्रतिभावतोऽपि
शिष्यप्रतिभासादन्यार्थः प्रश्नो हि अजानन्निव वैश्वैष न दाभूत् उत्पन्नदृशादिति दिवमेव द्युलोकमेव वैश्वा।
नरमुपासे इह भगवो राजन्निति होवाच एष वै सुतेजाः शोभनं तेजो यस्य सोऽयं सुतेजा इति प्रसिद्धो वैश्वानर।
आत्मावयव आत्मनोऽवयवभूतत्वात् यं त्वमात्मानमात्मैकदेशत्वेनोपास्से तस्मात्सुतेजसो वैश्वानरस्योपासना।
त्तव सुतमभिषुतं कर्म प्रसुतं प्रकर्षेण च सुतमासुतं चाहर्गणादिषु तव कुले दृश्यते अतीव कर्मिण।
स्त्वत्कुलीना इत्यर्थः अत्स्यन्नं दीप्ताग्निः सन् पश्यसि पुत्रपौत्रादि प्रियमिष्टं अन्योऽप्यन्नमत्ति पश्यति च प्रियं भव।
त्यस्यापि सुतमासुतं प्रसुतादि कर्मिणे ब्रह्मवर्चसं कुले यः कश्चिदेतं यथोक्तमेवं वैश्वानरमुपास्ते मूर्धा त्व
वैश्वानरस्यैष न समस्तो वैश्वानरः अतः समस्तबुद्ध्या वैश्वानरस्योपासनान्मूर्धा ते विपरीतग्राहिणो व्यप।
तिष्यत् पतितमभविष्यत् यद्यदि मां नागमिष्यो नागतोऽभविष्यः साधु कार्यं कृतं यन्मामागतोऽसीत्यभिप्रायः १२
अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इति आदित्यमेव भगवो राजन्निति होवा
चैष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव बहु विश्वरूपं कुले दृश्यते प्रवृत्तोऽश्वतरी।
रथो दासीनिष्कोऽत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वा
नरमुपास्ते चक्षुष्ट्वेतदात्मन इति होवाचान्धोऽभविष्यो यन्मां नागमिष्य इति ॥ १२ ॥ हे प्राचीनयोग्य कं त्वमा
त्मानमुपास्स इति आदित्यमेव भगवो राजन्निति होवाच शुक्लनीलादिरूपत्वात् विश्वरूपत्वमादित्यस्य
सर्वरूपत्वाद्वा सर्वाणि हि रूपाणि त्वाष्ट्राणि यतो वा विश्वरूप आदित्यस्तदुपासनात्तव बहु विश्वरूपमिह
मत्रार्थमुपकरणं दृश्यते कुले किं च प्रवृत्तोऽश्वतरीभ्यां युक्तो रथोऽश्वतरीरथो दासीभिर्युक्तो निष्को

छा. भा.
४४

होऽदासीनि चक्षुः अत्स्यन्नमित्यादि समानम् यद्वै वैश्वानरस्य चक्षुः सवितानस्य सम त्वद्दृष्टो पाश्वनाद्ध्यो भवि
ष्यद्वेत्त्वद्दृष्टो नो भविष्यद्यदि मां नागमिष्य इत्यादि पूर्ववत् ॥ १३ ॥ अथ होवाचेन्द्रद्युम्नं भाल्लवेयं वैयाघ्रप
द्य कं त्वमात्मानमुपास्स इति वायुमेव भगवो राजन्निति होवाचैष वै पृथग्वर्त्मात्मा वैश्वानरो यं त्वमात्मा
नमुपास्से तस्मात्त्वां पृथग्बलय आयन्ति पृथग्रथश्रेणयोऽनुयन्त्यत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं
भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते प्राणस्त्वेष आत्मन इति होवाच प्राणस्त उ
दक्रमिष्यद्यन्मां नागमिष्य इति ॥ १४ ॥ अथ होवाचेत्यादि नागमिष्य इत्यन्तं समानं पृथग्वर्त्मात्मा
वायुः तस्मात्पृथग्वर्त्मात्मनो वैश्वानरस्योपासनात्पृथक् नानादिक्कोऽत्र बलयो वस्त्रान्नादिलक्षणा
बलय आयन्त्यागत्य निःपृथक् रथश्रेणयो रथपङ्क्तयोऽपि त्वामनुयन्ति अत्स्यन्नमित्यादि समानम् प्राणा
स्त्वेष आत्मन इति होवाच प्राणस्त उदक्रमिष्यदुत्क्रान्तो भविष्यद्यन्मां नागमिष्य इति ॥ १४ ॥
अथ होवाच जनं शार्कराक्ष्यं शार्कराक्ष्य कं त्वमात्मानमुपास्स इत्याकाशमेव भगवो राजन्निति होवाचैष
वै बहुल आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं बहुलोऽसि प्रजया च धनेन चात्स्यन्नं पश्यसि प्रि
यमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते संदेहस्त्वेष आत्मन इ
ति होवाच संदेहस्ते व्यशीर्यद्यन्मां नागमिष्य इति ॥ १५ ॥ अथो वाच जनमित्यादि समानम् एष वै बहुल
आत्मा वैश्वानरो बहुलत्वमाकाशस्य सर्वगतत्वात् बहुलगुणोपासनाच्च त्वं बहुलोऽसि प्रजया च पुत्रपौत्रा
दिलक्षणया धनेन च हिरण्यादिना संदेहस्त्वेष संदेहो मध्यमं शरीरं वैश्वानरस्यादिदेहस्य बहुत्वात् ।
मांसरुधिरास्थ्यादिभिश्च बहुलं शरीरं तत्र संदेहस्ते व्यशीर्यच्छीर्यत शीर्णमभविष्यद्यन्मां नागमि

ष्यदिति ॥ १५ ॥ अथ होवाच बुडिलमाश्वतराश्विं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इति जलमेव भगवो राज
न्निति होवाच एष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं रयिमान् पुष्टिमानस्यत्स्यन्नं पश्यसि प्रियमत्त्यन्नं
पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते बस्तिस्त्वेष आत्मन इति होवाच ब
स्तिस्ते व्यभेत्स्यद्यन्मां नागमिष्य इति ॥ १६ ॥ अथ होवाच बुडिलमाश्वतराश्विमित्यादि समानम् एष वै र
यिरात्मा वैश्वानरो धनं रयोऽस्यार्थं ततो धनमिति तस्माद्रयिमान् धनवांस्त्वं पुष्टिमांश्चासि पुष्टेश्चान्ननि
मित्तत्वात् बस्तिस्त्वेष आत्मनो वैश्वानरस्य बस्तिर्मूत्रसंग्रहस्थानं बस्तिस्ते व्यभेत्स्यत् भिन्नोऽभविष्यत् यन्मां
नागमिष्य इति ॥ १६ ॥ अथ होवाचोद्दालकमारुणिं गौतम कं त्वमात्मानमुपास्स इति पृथिवीमेव भगवो
राजन्निति होवाचैषा वै प्रतिष्ठात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्चा
त्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते पादौ
त्वेतावात्मन इति होवाच पादौ ते व्यम्लास्येतां यन्मां नागमिष्य इति ॥ १७ ॥ अथ होवाचोद्दालकमित्यादि सम
नम् एषा वै प्रतिष्ठा पादौ वैश्वानरस्य पादौ ते व्यम्लास्येतां विम्लानावभविष्येतां त्वयि यन्मां नागमिष्य
इति ॥ १७ ॥ तान्होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्र
मभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु भूतेषु सर्वेषु लोकेषु सर्वेष्वात्मस्वन्नमत्तीति तस्य ह वा एतस्या
त्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्ये
व पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः ॥ १८ ॥ तान्होवाच
वैश्वानरदर्शनवतो होवाच एते यूयं वै खल्विमनर्थकं पृथगिवैकमात्मानं पृथक् सन्तो ... वैश्वानरं विद्वां

का. भा.
३३

सोन्नमत्स परिच्छिन्नात्मबुद्ध्येत्येतत् हस्तिदर्शनमिव जात्यंधाः यस्त्वेतमेवं यथोक्तावयवैर्मूर्धादिभिर्वि
शिष्टमेकं प्रदेशमात्रं प्रदेशैर्मूर्धादिभिः पृथिवीपादान्तैरध्यात्मं मीयत इति प्रादेशमात्रो द्युलोकादिपृथि
व्यंत प्रदेशपरिमाणो वा प्रदेशमात्रः प्रकर्षेण मुखत्वेनादिश्यंत इति प्रदेशा द्युलोकादय एव वास्य विमाणं
प्रदेशमात्रः प्रावोत्तरेण मूर्धादिभिश्चिबुकप्रतिष्ठित इति प्रदेशमात्रं केचित्कल्पयन्ति इह तु न तथाभिप्रेतः तस्य
इत्वा एवमस्यात्मनस्त्वात्मोपसंहारात् प्रत्यगात्मतयाभिविमीयतेऽहमिति विज्ञायतेऽनेनेत्यभिविमानः तम
वात्मानं वैश्वानरं विश्वान्नरान्नयति पुण्यपापानुरूपां गतिमिति सर्वात्मैव वैश्वानरः विश्वो नर एव वा सर्वात्मक
त्वात् विश्वैर्वा नरैः प्रत्यगात्मतया प्रविभज्य मीयत इति वैश्वानरः तमेवमुपास्ते यः सोऽदत्त्यन्नं स
र्वेषु लोकेषु द्युलोकादिषु सर्वेषु भूतेषु चराचरेषु सर्वेष्वात्मसु देहेन्द्रियमनोबुद्ध्यादिषु तेष्वात्मकल्पना
व्यपदेशः प्राणिनामन्नमत्ति वैश्वानरवित् सर्वात्मा सन् अन्नमत्ति न यथान्यः पिण्डमात्राभिमानः सन्नित्यर्थः
कस्मात् यस्मादेतस्य ह वै प्रकृतस्यैतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा।
त्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावित्याद्यर्थमेतद्वचनम् एवमुपास्त इति अथेदानीं
वैश्वानरविदो भोजनेऽग्निहोत्रं संपिपादयिषन्नाह एतस्य वैश्वानरस्य भोक्तुः उर एव वेदिराकारसाम्यात् लो
मानि बर्हिर्वेद्यामिवोरसि लोमान्यास्तीर्णानि दृश्यन्ते हृदयं गार्हपत्यो हृदयाद्धि मनः प्रणीतमिवानन्तरी भ
वति अतो मनोऽन्वाहार्यपचनोऽग्निर्मनः आस्यमाहवनीय इवाहवनीयः हूयतेऽन्नमस्मिन्निति ॥ १८ ॥ तद्यद्भक्तं
प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहेति प्राणस्तृप्यति प्राणे तृ
प्यति चक्षुस्तृप्यतीत्यादि यत्किंचिद्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्ये

नतेजसा ब्रह्मवर्चसेनेति ॥ १९ ॥ तत्रैवं सति यद्भक्तं भोजनकाले आगच्छेद्भोजनार्थं तत् होमार्थं होमीयं तेन
तद्धोतव्यमग्निहोत्रसंपन्मात्रस्य विवक्षितत्वात् नाग्निहोत्राङ्गेतिकर्तव्यताप्राप्तिरिह स भोजनकाले प्रथमामा
हुतिं जुहुयात् कथं जुहुयादित्याह प्राणाय स्वाहेति अनेन मन्त्रेणाहुतिशब्दादवदानप्रमाणं मन्त्रप्रदिष्टमि
त्यर्थः तेन प्राणस्तृप्यति प्राणे तृप्यति चक्षुस्तृप्यति चक्षुरादित्यो द्यौश्चेत्यादि तृप्यति यच्चान्यत् द्यौश्चादि
त्यश्च स्वामित्वेनाधितिष्ठतः तच्च तृप्यति तस्यानु तृप्तिमनु स्वयं भुञ्जानस्तृप्यति एवं प्रत्यक्षं किं च प्रजादिभि
श्च तेजः शरीरस्था दीप्तिरुज्ज्वलत्वं प्रागल्भ्यं वा ब्रह्मवर्चसं वृत्तस्वाध्यायनिमित्तं तेजः ॥ १९ ॥ अथ यां द्वितीयां
जुहुयात्तां व्यानाय स्वाहेति व्यानस्तृप्यति व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चन्द्रमास्तृप्यति दिशस्तृप्य
न्ति दिक्षु तृप्यन्तीषु यत्किंच दिशश्च चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्ये
न तेजसा ब्रह्मवर्चसेनेति ॥ २० ॥ अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यत्यपाने त
प्यति वाक् तृप्यति वाचि तृप्यन्त्यां यत्किंच पृथिवी चाग्निश्चाधितिष्ठति तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया प
शुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति । २१ ॥ अथ यां चतुर्थीं जुहुयात्तां समानाय स्वाहेति समानस्तृप्यति ।
समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्जन्यस्तृप्यति पर्जन्ये तृप्यति विद्युत्तृप्यति विद्युति तृप्यन्त्यां
यत्किंच विद्युच्च पर्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मव
र्चसेनेति ॥ २२ । अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति उदाने तृप्यति वायुस्तृप्य
ति वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किंच वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं
तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति २३ ॥ अथ द्वितीयां तृतीयां चतुर्थीं पञ्चमीमिति सम

छा. भा. ८२

मानमन्वत् ११ ॥ अथ य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात् अथ य
एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति तद्यथेषीकातू
लमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति तस्मादु हैवंविद्य
द्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतं स्यादिति तदेष श्लोकः यथेह क्षुधिता बाला
मातरं पर्युपासत एवं सर्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति ॥ २४ ॥ इति पञ्चमः
प्रपाठकः ॥ ५ ॥ स यः कश्चिदिदं वैश्वानरदर्शनं यथोक्तमविद्वान्सन्नग्निहोत्रं प्रसिद्धं जुहोति यथाङ्गारानाः
हुतियोग्यानपोह्यानाहुतिस्थाने भस्मनि जुहुयात् तादृक्तत्स्यात् तदग्निहोत्रहवनं स्यात् वैश्वानरविदो
ग्निहोत्रमपेक्ष्येति प्रसिद्धाग्निहोत्रनिन्दया वैश्वानरविदोऽग्निहोत्रं स्तूयते अथ श्रुतिविहितमप्यग्निहोत्रं क
थमथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य यथोक्तवैश्वानरविज्ञानवतः सर्वेषु लोकेष्वित्याद्युक्तार्थं हु
तमन्नमत्तीत्यनयोरेकार्थत्वात् किं च तद्यथेषीकायास्तूलमग्नौ प्रोतं प्रक्षिप्तं प्रदूयेत प्रदह्येत क्षिप्र
मेवं हास्य विदुषः सर्वभूतानामत्तुः सर्वान्नानामत्तुः सर्वे निरवशिष्टाः पाप्मानो धर्माधर्माख्या अनेकज
न्मसंचिता इह प्राक्ज्ञानोत्पत्तेर्ज्ञानसहभाविनश्च प्रदूयन्ते देहारम्भकं तु वर्तमानशरीरारम्भकपापवर्जं लक्ष्ये
प्रतिमुक्तेषुवत्प्रवृत्तफलत्वात्तस्य तदाह य एतदेवं विद्वानग्निहोत्रं जुहोति किं च यद्यपि चण्डालायानर्हा
योच्छिष्टं प्रयच्छेद्दद्यात् प्रतिषिद्धमुच्छिष्टदानं यद्यपि कुर्यात् आत्मनि हैवास्य चण्डालदेहस्थे वैश्वानरे त
द्धुतं स्यात् नाधर्मनिमित्तमिति विद्यामेव स्तौति तदेतस्मिन्नर्थे एष श्लोको मन्त्रोऽप्येष भवति यथेह लोके
क्षुधिता बुभुक्षिता बाला मातरं पर्युपासते कदा नो माताऽन्नं प्रयच्छतीति एवं सर्वाणि भूतान्यन्नादानि ।

एवंविदोऽग्निहोत्रं भोजनमुपासते कदा नु मे भोक्ष्यत इति जगत्सर्वं विद्वद्भोजनेन तृप्तं भवतीत्यर्थः द्विरुक्ति-
रध्यायपरिसमाप्त्यर्था ॥ इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीशं-
करभगवतः कृतौ छांदोग्योपनिषद्विवरणे पंचमः प्रपाठकः ॥ ५ ॥ ॐ श्रीगणेशाय नमः ॐ श्वेतकेतु-
र्हारुणेय आस तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबंधुरिव भव-
तीति स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय तं ह पि-
तोवाच श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भ-
वत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति यथा सोम्यैकेन मृत्पिंडेन सर्वं मृ-
न्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं
विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं लोहमित्येव सत्यं यथा सोम्यैकेन नखनिकृंतनेन सर्वं कार्ष्णाय-
सं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं कृष्णायसमित्येव सत्यमेवं सोम्य स आदेशो भवतीति न वै नू-
नं भगवंतस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन्कथं मे नावक्ष्यन्निति भगवांस्त्वेव मे तद्ब्रवीत्विति तथा सोम्येति होवा-
च ॥ १ ॥ श्वेतकेतुर्ह वा आरुणेय आसेत्यस्याध्यायस्य संबंधः सर्वं खल्विदं ब्रह्म तज्जलानिति श्रुतं कथं तस्माज्जगदिदं
जायते तस्मिन्नेव च लीयते अनिति च तेनैवेत्येतद्वक्तव्यम् अनंतरं चैकस्मिन्भुक्ते विदुषि सर्वं जगत्तृप्तं भव-
तीत्युक्तं तदेकत्वे सत्यात्मनः सर्वभूतस्थस्योपपद्यते नात्मभेदे कथं च तदेकत्वमिति तदर्थोऽयं षष्ठोऽध्याय आ-
रभ्यते पितापुत्राख्यायिका विद्यायाः सारिष्ठत्वप्रदर्शनार्था श्वेतकेतुरिति नामतः ह इत्यैतिह्यार्थः आरुणेय आ-
रुणस्य पौत्र आस बभूव तं पुत्रं ह आरुणिः पिता योग्यं विद्याभाजनं मन्वानस्तस्योपनयनकालात्ययं च पश्यन्

छा.भा.
८८

वाच हे श्वेतकेतो योग्यमनुरूपं ते ह कुलस्य नो गत्वा वस ब्रह्मचर्यं न चैतद्युक्तं यदस्मत्कुलीनो हे सोम्याननूच्या-
नधीत्य ब्रह्मबन्धुरिव भवतीति ब्राह्मणान् बन्धून्व्यपदिशति न स्वयं ब्राह्मणवृत्त इति तस्मात् प्रवासनीमीय।
ते पित्रैवं स्वयं गुणवान्सन् पुत्रेणापनेष्यति स पित्रोक्तः श्वेतकेतुर्द्वादशवर्षः सन्नुपेत्याचार्यं यावच्च-
तुर्विंशतिवर्षो बभूव तावत्सर्वान्वेदानधीत्य तदर्थं च बुद्ध्वा महामना महद्गंभीरं मनो यस्य सोऽयम्।
हामना अनूचानमानी आत्मानमनूचानं मन्यत इत्येवंशीलो यः सोऽनूचानमानी स्तब्धोऽप्रणतस्वभावः
एयाय गृहं तमेवंभूतं ह आत्मनोऽननुरूपशीलं स्तब्धं मानिनं पुत्रं दृष्ट्वा पितोवाच सद्भावतारं विवक्षुः
यः श्वेतकेतो यन्नु इदं महामना अनूचानमानी स्तब्धोऽसि किं तेन प्राप्यः याम उपाध्यायादुतापि तमादे-
शमपृच्छः स्मादेशः केवलशास्त्राचार्योपदेशगम्यमित्येतत् येन वा परं ब्रह्मादिश्यते स आदेशः तमप्राक्षः
पृष्टवानस्याचार्यं तमादेशं विशिनष्टि येनादेशेन श्रुतेनाश्रुतमप्यन्यच्छ्रुतं भवति अमतं मतमतर्कि-
तमपि तर्कितं भवति अविज्ञातमनिश्चितं निश्चितं भवतीति सर्वानपि वेदानधीत्य सर्वं चान्यद्वेद्यमधि-
गम्याप्यकृतार्थ एव भवति यावदात्मतत्त्वं न जानातीत्याख्यायिकातोऽवगम्यते तदेतदद्भुतं श्रुत्वाह क-
थं न्वेतत्प्रसिद्धमन्यविज्ञानेनान्यद्विज्ञातं भवतीत्येवं मन्वानः पृच्छति कथं नु केन प्रकारेण हे भगवः
स आदेशो भवतीति शृणु हे सोम्य यथैकेन मृत्पिण्डेन रुचकाद्यादिकारणभूतेन विज्ञातेन सर्वं मन्म-
यं विकारजातं मृन्मयं विज्ञातं स्यात् ॥ ननु कथं मृत्पिण्डे कारणे विज्ञाते कार्यमन्यद्विज्ञातं स्यात् नैष दोषः
कारणेनानन्यत्वात्कार्यस्य यन्मन्यसे अन्यस्मिन्ज्ञातेऽन्यन्न ज्ञायत इति सत्यमेवं स्यात् यद्यन्यत्कारणात्का-
र्यं स्यात् न त्वेवमन्यत्कारणात्कार्यम् कथं तर्हीदं लोके इदं कारणमयमस्य विकार इति शृणु वाचारम्भणं

वागालंबनमित्येतत् कोसौ विकारः नामधेयं नामैव नामधेयं स्वार्थे धेयप्रत्ययः वागालंबनमात्रं नामैव
केवलं न विकारो नाम वस्त्वस्ति परमार्थतः मृत्तिकेत्येव मृत्तिकैव तु सत्यं वस्त्वस्ति यथा सोम्यैकेन लोहम
णिना सुवर्णपिंडेन सर्वं मन्यहि कारजातं कटकमुकुटकेयूरादि विज्ञातं स्यात् वाचारंभणमित्यादि स
मानम् यथा सोम्यैकेन नखनिकृंतनेनोपलक्षितेन कृष्णायसपिंडेनेत्यर्थः सर्वं कार्ष्णायसं कृष्णाय
सो विकारजातं विज्ञातं स्यात् समानमन्यत् ॥ अनेकदृष्टांतोपादानं दार्ष्टांतिकानेकभेदानुगमार्थं दृ
ढप्रतीत्यर्थं च एवं सोम्य स आदेशो यो मयोक्तो भवतीत्युक्तवति पितर्याह इतरः नैव नूनं भगवंतः पूज्यावं
तो गुरवो मम ये ते एतद्यदुक्तवंतो भवद्भिः वस्तु नावेदिषुः नैव विज्ञातवंतः नूनं यद्यदि ह्यवेदिष्यन् विदितवंत एतद्व
स्तु कथं मे गुणवते भक्तायानुगताय नावक्ष्यन् नोक्तवंतः तेनाहं मन्ये न विदितवंत इति श्रूयमाणोपि गुरु
व्याभावमवदत्तु न गुरुकुलेऽभ्युपति श्रवणाभयात् अतो भगवांस्त्वमेव मे तद्वस्तु येन सर्वज्ञत्वं ज्ञातेन मे स्या
त् तद्ब्रवीतु कथयत्वित्युक्तः पिता उवाच तथास्तु सोम्येति ॥ १ ॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं
तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत कुतस्तु खलु सोम्यैवं स्यादिति हो
वाच कथमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् तदैक्षत बहु स्यां प्रजायेये
ति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदते वा पुरु
षस्तेजस एव तदध्यापो जायन्ते ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त तस्माद्यत्र क्व च
वर्षति तदेव भूयिष्ठमन्नं भवति अद्भ्य एव तदध्यन्नाद्यं जायते ॥ २ ॥ सदेव सदिति अस्तितामात्रं वस्तु सूक्ष्मं
निर्विशेषं सर्वगतमेकं निरंजनं निरंशं निरवयवं विज्ञानं यदवगम्यते सर्ववेदांतेभ्यः एवशब्दो ह्यवधारणार्थः

छा॰भा॰
५५

किंतदवधार्यत इत्याह इदंजगन्नामरूपक्रियावत् विकृतमुपलभ्यते यत्तत्सदेवासीदित्यासीच्छब्देन
संबध्यते कदासदेवेदमासीदित्युच्यते अग्रेजगतःप्रागुत्पत्तेः किंनेदानीमिदंसत् येनाग्रआसीदिति
विशेष्यते न कथंतर्हिविशेषणम् इदानीमपीदंसदेव किंतुनामरूपविशेषणवदिदंशब्दबुद्धिविष
यंचेतीदंचभवति प्रागुत्पत्तेस्त्वग्रेकेवलसच्छब्दबुद्धिमात्रगम्यमेवेतिसदेवेदमग्रआसीदित्यवधार्यते
नहिप्रागुत्पत्तेर्नामवद्रूपवद्वेदमितिग्रहीतुंशक्यंवस्तुसुषुप्तकालइवयथासुषुप्तादुत्थितःसत्त्वमा
त्रमवगच्छति सुषुप्तेसन्मात्रमेवकेवलंवस्त्वितितथाप्रागुत्पत्तेरित्यभिप्रायः यथेदमुच्यतेलोकेपूर्वा
ह्णेघटादिसिसृक्षुणाकुलालेनमृत्पिण्डंप्रसारितमुपलभ्यग्रामान्तरंगत्वाप्रत्यागतोपराह्णेतत्रैवघ
टशरावाद्यनेकभेदभिन्नंकार्यमुपलभ्यमृदेवेदंघटशरावादिकेवलंपूर्वाह्णआसीदितितथेहाप्युच्य
ते सदेवेदमग्रआसीदिति एकमेवेतिस्वकार्यपतितमन्यन्नास्तीति एकमेवेत्युच्यते अद्वितीयमि
तिमृद्व्यतिरेकेणमृदोयथान्यद्घटाद्याकारेणपरिणमयितृकुलालादिनिमित्तकारणंदृष्टं तथा
सद्व्यतिरेकेणसतःसहकारिकारणंद्वितीयंवस्त्वन्तरंप्राप्तंप्रतिषिध्यतेऽद्वितीयमितिनास्यद्वितीयं
वस्त्वन्तरंविद्यतइत्यद्वितीयं ननुवैशेषिकमतेपिसत्सामानाधिकरण्यंसर्वस्योपपद्यते द्रव्यगुणादि
षुसच्छब्दबुद्ध्यनुवृत्तेःसद्द्रव्यंसद्गुणःसत्कर्मेत्यादिदर्शनात् सत्यमेवंस्यादिदानींप्रागुत्पत्तेस्तुनैवेदंका
र्यंसदेवासीदित्यभ्युपगम्यते वैशेषिकैःप्रागुत्पत्तेःकार्यस्यासत्त्वाभ्युपगमात् नचैकमेवसदद्वितीयंप्रा
गुत्पत्तेरिच्छन्ति तस्माद्वैशेषिकपरिकल्पितात्सतोन्यत्कारणमिदंसदुच्यते
मृदादिदृष्टान्तेभ्यः तत्तत्रहैतस्मिन्प्रागुत्पत्तेर्वस्तुनिरूपणे एके वै नास्तिकाआहुर्वस्तुनिरूपयन्तःअ

सत् सद्भावमात्रं प्रागुत्पत्तेरिदं जगत् एकमेवाग्रे द्वितीयमासीदिति सद्भावमात्रं प्रागुत्पत्तेरिदं ज
गत् एकमेवाग्रेऽद्वितीयमासीदिति सद्भावमात्रं हि प्रागुत्पत्तेः सर्वविकल्परहितं निबोद्धाः ननु सत्त्वमिदं।
हि वस्तु तत्र सिद्धं नियत्यास्त्वासदिति गृह्यमाणं यथाभूतं विपरीतं तत्त्वं भवतीति नैयायिकाः ननु।
सद्भावमात्रं चेत् प्राक् उत्पत्तेः सिद्धं तत्र नास्तिकैः कथं प्राक् उत्पत्तेरिदमासीदसदेकमेव चेति कालसं
बंधः सत्त्वासंबंधो द्वितीयत्वं चाव्यवैतः बाधेन युक्तं तेषां भावाभावमात्रं सम्प्रत्याकृतः असत्त्वमा।
त्राभ्युपगमो व्यवस्था एव अभ्युपगतो न तु नाभ्युपगमानुपपत्तेः इदानीं सम्भूयगतो नाभ्युपगम्यते न प्राक् उ।
त्पत्तेरिति चेन्न प्रागुत्पत्तेः सद्भावस्य प्रमाणाभावात् प्रागुत्पत्तेः सदेव निर्विकल्पनानुपपत्तेः ननु कथं
वस्तु कृतेः शास्त्रार्थे तत् सदेकमेवाद्वितीयमिति पदार्थवाक्यार्थोपपत्तिः नतदुपपत्तो चेदेवाक्रमप्रमा
णाप्रसत्त्येनेति चेत् नैष दोषः सद्ग्रहणं निष्ठितं परमार्थकस्य सदित्यर्थेनाविकल्पितः सदाहु तिवाचकः
एकमेवाद्वितीयमित्येतौ च सकृदन्य समानाधिकरणेन न तु एतदसदासीदिति च तत्रैतेन सदाकोपयुक्तः
सदाकामेवावलम्ब्य सदाकाराथैर्विषयो भवति सदेकमेवाद्वितीयमासीदित्येवं वस्तुतः ननः सदाका
यो निवर्तयति अस्याभूद् इवाभासं न तु तदाभवविषयानिवर्तयतीत्यत ननु पुनः सद्।
भावमेव विधित्सतः पुरुषस्य विपरीतग्रहणं निहृत्य परमिदमसदेवेत्यादिना कैश्चित्युज्यते द्वयोरि
वादि विपरीतग्रहणं ततो निवर्तयितुं शक्यते इत्यर्थं वाद मतादिवाक्यस्य आनंतर्य प्रामाण्यं च सिद्धं।
मिथ्या दोषः तस्मादसतः सर्वाभाव रूपात्सत् हि विद्यमानं जायत प्रभावस्यादर्शः तदेतद्विपरीतग्रहणं।
महावैनाशिकपक्षे दर्शयितुं प्रतिषेधति कुतस्तु खलु प्रमाणात् एवं स्यादिति सोम्यैवं स्यात् असतः सज्जायेत।

छा. भा.
प्र.

नैवोत्पत्तिप्रभवेन न तत्स्थिरस्वभावाद्भावे संभवतीत्यर्थः यदपि बीजोपमर्देऽङ्कुरो जायमानो दृष्टोऽभावादे
वेति तदप्यभ्युपगमविरुद्धं तेषां कथं ये तावद्बीजावयवा बीजसंस्थानविशिष्टास्तेऽङ्कुरेऽप्यनुवर्तन्त एव
न तेषामुपमर्दोऽङ्कुरजन्मनि यत्पुनर्बीजाकारसंस्थानं तद्बीजावयवव्यतिरेकेणावस्तुभूतं वैनाशिकै
रभ्युपगम्यते यदङ्कुरजन्मन्युपमृद्यते अथ तदस्त्यवयवव्यतिरिक्तं वस्तुभूतं तथा च सत्यभ्युपगमवि
रोधः अथ संवृत्याभ्युपगतं बीजसंस्थानरूपमुपमृद्यत इति चेत् केयं संवृतिर्नाम किमसावभावः उत
भाव इति यद्यभावः दृष्टान्ताभावः अथ भावः तथापि नाभावादङ्कुरोत्पत्तिः बीजावयवेभ्यो ह्यङ्कुरोत्पत्तिः
अवयवा अप्युपमृद्यन्त इति चेन्न तदवयवेषु तुल्यत्वात् यथा वैनाशिकानां बीजसंस्थानरूपोऽवयवी
नास्ति तथावयवा अपीति तेषामप्युपमर्दानुपपत्तिः बीजावयवानामपि सूक्ष्मावयवास्तदवय
वानामप्यन्ये सूक्ष्मतरावयवा इत्येवं प्रसङ्गस्यानिवृत्तेः सर्वत्रोपमर्दानुपपत्तिः सद्बुद्ध्यनुवृत्तेः सत्त्वानि
वृत्तिश्चेति सद्वादिनां सत एव सदुत्पत्तिः न त्वसद्वादिनां दृष्टान्तोऽस्ति असतः सदुत्पत्तेः मृत्पिण्डाद्घटोत्पत्ति
र्दृश्यते सद्वादिनां तद्भावे भावात् तदभावे चाभावात् यद्यभावादेव घट उत्पद्येत घटार्थिना मृत्पिण्डो
नोपादीयेत अभावपक्षे च यस्मात्कस्माच्चिद्घटादेः प्रसज्येत न त्वेतदस्ति अतो नासतः सदुत्पत्तिः यदप्या
हुः मृद्बुद्धिर्घटबुद्धेर्निमित्तमिति मृद्बुद्धिर्घटबुद्धेः कारणमुच्यते न तु परमार्थेनैव मृद्घटो वास्तीति
तदापि मृद्बुद्धिर्विद्यमाना अविद्यमानाया एव घटबुद्धेः कारणमिति नासतः सदुत्पत्तिः मृद्घटबुद्ध्योर्नि
मित्तनैमित्तिकतायामप्यनेनैव प्रमाणेन न कारणकार्यत्वमिति चेन्न बुद्धीनां नैरन्तर्येण गम्यमानत्वे वैनाशिका २०
नां बहिर्दृष्टेनाभावात् अतः कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथं केन प्रकारेण असतः सज्जायेत

ति प्रसक्तः सदित्यनेन न कश्चिदपि दृष्टेन प्रकारोऽस्तीत्यर्थः एवमसदादिपक्षमन्यथोपपादयन्ति सदेव सोम्ये
दमग्र आसीदिति स्वपक्षः सिद्धः ननु महदादीनामपि सत्त्वः सदुत्पत्त्यनन्तरमिति नेवं दृष्टेनास्ति घटादेरित्यस्मात्
प्रीनात् सत्यमेव न सत्तः सदन्तरमुत्पद्यते किं तर्हि सदेव संस्थानान्तरेणावतिष्ठते यथा सर्पः कुण्डलीभव
ति यथा च मृच्चूर्णपिण्डघटकपालादिप्रकारैः अवतिष्ठत इति संक्षेपः यद्येवं सदेव सर्वं प्रकारान्तरेणैक।
मेवागृह्यते इति कथमारम्भणमित्युच्यते ननु न क्रमेण तथा सदेवं सर्वथा गृह्यते सदिति वाच्यमिदानीमिदं ज्ञानमिति
न सन्नेवेदं घटपटादिबुद्धिविषयतयावस्थानात् यथा मृदेव पिण्डघटादिबुद्धिविषयतयेनावतिष्ठते तद्वत्
न च यथा मृदेव पिण्डघटाद्यपि न तत्सद्रूपं बुद्धिविषयत्वात्कार्यस्य सत्तान्यत्व सत्तैव कार्यजाते
यथा स्वाङ्गैः नो पिण्डघटादीनामितरेतरव्यभिचारेऽपि मृत्त्वाव्यभिचाराद्यच्च पिण्डघटः पिण्डे व्यभिचरति पिण्डश्च
घटे तथापि पिण्डघटौ मृत्त्वं न व्यभिचरतः तस्मान्मृन्मात्रं पिण्डघटौ व्यभिचरितत्वस्य गोरसादिवत् तस्मान्मृ
न्मात्रे पिण्डघटौ व्यभिपिण्डघटौ मृत्त्वेदादि संस्थानमात्रं घटादयः एवं संस्थानमात्रमिदं सर्वमिति श्रुतेः
तेः सदेवेति वाचारम्भणमात्रत्वाद्विकारसंस्थानस्य ननु निरवयवं सच्छ्रितकलेनिविष्ट यत्ते निरवयवत्वान्न
सवा सावयवत्वाद्यनेकत्वादिश्रुतिभ्यः निरवयवस्य कथं विकारसंस्थानमुपपद्यते नैष दोषः रज्ज्वाद्यवय
वेभ्यः सर्पादिसंस्थानवत् बुद्धिपरिकल्पितेभ्यः सावयवेभ्यो विकारसंस्थानोपपत्तेः वाचारम्भणं विकारो
नामधेयं मृत्तिकेत्येव सत्यमेवं सदेव सत्यमिति श्रुतेरेकमेवाद्वितीयं परमार्थत इदं बुद्धिकालेऽपि ॥ ननु न
ऐतदात्म्यं दृष्टान्तवत् श्रुतश्च न प्रधाने साव्यपरिकल्पितं जगत्कारणं प्रधानस्याचेतनत्वाभ्युपगा
मात् इदं तु सच्चेतनं मोचितत्वात् तदैक्षत बहु स्यां प्रजायेयेति प्रकर्षेणान्वेषय

का. भा.
१२

यथा मृद्घटाद्याकारेण यथा वा रज्ज्वादिः सर्पाद्याकारेण बुद्धिपरिकल्पितेन न असदेव तर्हि सर्वं यद्दृश्यते तन्न।
रिव सर्पाद्याकारेण न सत एव द्वैतभेदेनान्यथा गृह्यमाणत्वात् नासदेकस्याविदितनिश्चयः यथा सतोऽन्य
द्वैतवतोऽपरिकल्प्यते न तस्यैव प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वं सत्त्वं ब्रुवते तार्किकाः ननु तथास्माभिः कदाचित्क्वापि
दृष्टं सतोऽन्यदभिधानमभिधेयं वा वस्तु परिकल्प्यते सदेव तु सर्वमभिधानमभिधीयते च यदन्यबुद्ध्या
यथा रज्जुरेव च सर्पबुद्ध्या सर्प इत्यभिधीयते चैव यदन्यबुद्ध्या यथा वा पिण्डघटादि मृदोऽन्यबुद्ध्या पिण्डघटादि
शब्देनाभिधीयते लोके रज्ज्वविवेकदर्शिनां तु सर्पाभिधानबुद्धी निवर्तेते यथा च मृद्विवेकदर्शिनां घटा।
दिशब्दबुद्धी तद्वत्सद्विवेकदर्शिनामन्यविकारशब्दबुद्धी निवर्तेते यतो वाचो निवर्तन्ते अप्राप्य मनसा।
सह अनिरुक्ते ऽनिलयने इत्यादिश्रुतिभ्यः एवमौलिकत्वात्तेजोऽसृजत तत्तेजः सृष्टवान् ननु तस्माद्वा एतस्मा
दात्मन आकाशः संभूत इति श्रुत्यन्तरे आकाशाद्वायुरित्यनन्तरं तृतीयं तेजः श्रुतं इह कथं प्रथममेव तस्मा
देव तेजः सृज्यते तत एव चाकाशादिनिविरुद्धं नैष दोषः आकाशवायुसर्गानन्तरं तत्तेजोऽसृजतेति क
ल्पनोपपत्तेः अथवा विवक्षितं इह सच्छिकमः सत्कार्यमिदं सर्वं सतः सदेकमेवाद्वितीयमित्येतद्विव
क्षितम् मृदादिदृष्टान्तात् अथवा त्रिवृत्करणस्य विवक्षितत्वात्तेजोऽबन्नानामेव सृष्टिमाचष्टे तत्तेज इति श्रुति
दृष्टे लोकदृष्टत्वात् प्रकाशकं रोहितं चेति तत्तत्र तेजोरूपसंस्थितं सदैक्षत बहु स्यां प्र
जायेयेति पूर्ववत् तदपोऽसृजत तत्तेज आपो द्रवाः स्निग्धाः स्यन्दिन्यः शुक्लाश्चेति प्रसिद्धा लोके यस्मात्तेजसः।
कार्यभूता आपः तस्माद्यत्र क्वचन देशे काले वा शोचति संतप्यते स्विद्यति प्रस्विद्यते पुरुषस्तेजस एव तत्तदा
पोऽधिजायन्ते ता आप ऐक्षन्त पूर्ववदेवाबाकारसंस्थितं सदैक्षत ता आपः बह्व्यः प्रभूताः स्याम भवेम प्रजा।

येमहस्यत्र्येमहतीति तासु च महत्तेन शरीरवीसर्पणापार्थिवंसत्रे यस्मादेषकार्यमत्रेनसाद्यत्रकाचवर्ष
निर्देवेनतेनैवभूयिष्ठेयमनमत्रभवति एतेनाल्पत्वपवनर्दग्धायमधिनायनेनायत्रमत्तत्रेनेतिपृथिव्युक्ता
सर्वमिहनरूपेनवचनदाद्यचेतिविशेषणाद्वीद्रियवायुअने अत्रेवतुरस्थिरं धारणाहूस चरूपतः प्रसिद्धं
नतुतेजःप्रभृतिभिर्दाहणेनगम्यवेदिहंसादिप्रतिषेधाभावावासादिकार्यानुपलम्भाच्च नचकथंनतेजपर।
नेमादिनैषदोषः ईश्वरानुकारणपरिणामवत्वात्तेजःप्रभृतीनाम्‌ सतत्त्वविहितनियतक्रमविशिष्टकार्यो
त्पादकत्वाच्च तेजःप्रभृतीनां तत्त्वैर्हितम्‌ अनेभूतं ननु मनोऽप्युपचरितमेवैहिकं नप्रदीपाणामके।
वल्पमहाणाम्पत्वात्रपाकानुपचरितं कल्पयितुं तेजःप्रभृतीनां तु प्रयोयते ईदृशाभावरतिपरक्रमपच।
रितं कल्पयितुं ॥ ननु मनसोऽपि महत्कारणत्वादचेतनत्वं नत्वणास्यमनसा तु मनः प्रधानस्यैवाचेतनसमन।
श्वतनार्थवाक्नियतकालक्रमविशिष्टकार्योत्पादकत्वाच्च तत्त्वेऽतः इति शक्यमनसा न मुख्यचरितम्।
वेदनं इह च लोके चेतनेनैव तत्त्वुपचारः यथा कस्यचिदपि विषनीति नहृत्स्नेनापि स्यात्‌ ननु त संस्थाने
वितनेऽपि ज्ञातृत्वोपदेशात्‌ आत्मोपदेशोऽप्युपचरितः इति चेद्यथा ममात्मा भद्रसेन इति सर्वार्थकारिण्यनात्म
नि आत्मोपचारः न तु तत्र महत्त्वेऽपि सत्वाभिसंबन्धस्य तस्मात्तदेवचिदात्मनि मात्रोपदेशात्‌ सोऽप्युपचा।
र इति चेत्‌ प्रधानात्माभिसंबन्धस्योत्तमात्मीयत्वेनेदृनिमात्रोपदेशोऽप्युपचरितएव यथा लोके ग्रामं गो
ते प्रस्थितः ग्रामवान्‌ ग्राममभिनिर्दिश्यात्मोपदेश्यान्तु न येन विज्ञातेन नाविज्ञातं भवतीत्युपक्रमात्‌
तस्मिन्नेकस्मिन्विज्ञाते सर्वं विज्ञातं भवतीति तदनन्यत्वात्‌ सर्वस्याहितीयवचनाच्च न चान्यज्ञातत्वमर्थापत्तेः
क्रमाच्चाविनं अत्रैव मर्थलिंगतोहि येन मोक्षोपदेशोऽप्युपचरितः सर्वस्य च प्रधानकार्यं सोपचरितत्वं।

कस्य नाधोदृष्याश्रमः परिकल्पितः स्यात् पुरुषार्थसाधनविज्ञानस्यैव केवलैर्बाधिगन्तव्यत्वात् स्याद्धे
दृश्यमाणत्वात्तु नः प्रमाणार्थपरिग्रहात्तोऽस्तु तन्नावकाशोऽस्ति जगतः इति सिद्धं ॥ २ ॥ तेषां खल्वेषां भूता-
नां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेनैव जी-
वेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्ति-
स्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा तु
खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥ ३ ॥ तेषां जीवाविष्टानां खल्वे-
षां पक्ष्यादीनां भूतानामेषामिति प्रत्यक्षनिर्देशात् तत्तेजःप्रभृतीनां तेषां त्रिवृत्करणस्य वक्ष्यमाणत्वा-
त् असति त्रिवृत्करणे प्रत्यक्षनिर्देशानुपपत्तेः देवताशब्दप्रयोगाच्च तेजःप्रभृतिषु तिस्रो देवता इति
तस्मात्तेषां खल्वेषां भूतानां पक्षिपशुस्थावरादीनां त्रीण्येव नातिरिक्तानि बीजानि कारणानि भवन्ति का-
नि तानि इत्युच्यते अण्डजमण्डाज्जातमण्डजं पक्ष्यादि पक्षिसर्पादिभ्यो हि पक्षिसर्पादयो जायमानाः।
दृश्यन्ते तेन पक्षी पक्षिणां बीजं सर्पः सर्पाणां तथान्यदप्यण्डाज्जातं तज्जातीयानां बीजमित्यर्थः ननु च।
जातमण्डजमुच्यते नैते इमे व बीजमिति कथमण्डजं बीजमित्युच्यते सत्यमेवं स्यात् यदि त्वदिका-
न्तवाश्रुतिः स्यात् स्वेनत्वात् नियन्तृत्वाद् अण्डजाद्येव बीजं नाण्डादीनि इत्यण्डे वा अण्डजाद्यभावे तज्जातीय-
सन्तत्यभावः नाण्डाद्यभावे तेनाण्डजबीजादीनामेव बीजानामण्डजादीनां तथा जीवाज्जातं जीवजं जरायुजमि-
त्येतत् पुरुषपश्वादि उद्भिज्जमुद्भिनत्तीत्युद्भित् स्थावरं ततो जातमुद्भिज्जं धाना वोद्भिद् ततो जातमित्युद्भि-
ज्जं स्थावरबीजं स्थावराणां बीजमित्यर्थः स्वेदजसंशोकजयोरण्डजोद्भिज्जयोरेव यथासम्भवमन्तर्भावः

एवं स्वधारणोत्रीण्येव बीजानीत्युपपन्नं भवति सेयं प्रकृता सदाख्या तेजोबन्नयोनिर्देवतोक्तैक्षतेति
नवती यथापूर्वं बहु स्यामिति तदेव बहुभवनं प्रयोजनं नाद्यापि निर्वृत्तमित्यतः पुनरीक्षां बहुभवनमेव
हुभवनमेव प्रयोजनमुररीकृत्य कथं हन्तेदानीमिमा यथोक्तास्तेजआद्यास्तिस्रो देवता अनेन जीवेने
ति स्वबुद्धिस्थं पूर्वसृष्ट्यनुभूतप्राणधारणमात्मानं स्मरंस्याहानेन जीवेनात्मनेति प्राणधारकत्वात्मने
तिवचनात्स्वात्मनाव्यतिरिक्तेन चैतन्यस्वरूपतयाविशिष्टेनेत्येतद्दर्शयत्यनुप्रविश्य तेजोबन्नभूतमात्रासंसर्गेण
लब्धविशेषविज्ञाना सती नामरूपे च नामरूपे व्याकरवाणि स्पष्टमाकरवाणि असौ नामायमिदंरूप इति व्याक
रवाणीत्यर्थः ननु न युक्तमिदं असंसारिण्याः सर्वज्ञाया देवताया बुद्धिपूर्वकमनेकशतसहस्रानर्थाश्रयं देहमनु
प्रविश्य स्वातंत्र्ये सति सत्यमेवं न युक्तं स्याद्यदि स्वेनैवाविकृतेन रूपेणानुप्रविशेयं दुःखमनुभवेयमिति सं
कल्पितवती न त्वेवं कथं तर्हि अनेन जीवेनात्मनानुप्रविश्येति वचनात् जीवो हि नाम देवताया आभासमात्रं
बुद्ध्यादिभूतमात्रासंसर्गजनितः आदर्श इव प्रविष्टः पुरुषप्रतिबिम्बो जलादिष्विव च सूर्यादीनां अचिन्त्यानंत
शक्तिमत्या देवताया बुद्ध्यादिसंबन्धश्चैतन्याभासो देवतास्वरूपविवेकाग्रहणनिमित्तः सुखी दुःखी मूढ इत्या
द्यनेकविकल्पप्रत्ययहेतुश्छायामात्रेण जीवरूपेणानुप्रविष्टत्वाद्देवता न दैहिकैः स्वतः सुखदुःखादिभिः
संबध्यते यथा पुरुषादित्यादय आदर्शोदकादिषु छायामात्रेणानुप्रविष्टा आदर्शोदकादिदोषैर्न संबध्यन्ते
तद्वद्देवतापि सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा सर्वभूतान्तरात्मा न लि
प्यते लोकदुःखेन बाह्यः आकाशवत्सर्वगतश्च नित्य इति काठके ध्यायतीव लेलायतीवेति वाजसनेयके
ननु छायामात्रश्चेज्जीवो मृषैव प्राप्तः तथा परलोकेहलोकादि च तस्य नैष दोषः सदात्मना स्वभावायस।

छा. भा.
४५
७३

नासत्यत्वाभ्युपगमात् सर्वं च नामरूपादि सदात्मनैव सत्यभावोपपत्तेश्चैव न त्वं तस्याभ्युपेतोऽपि नादृष्याद्इति वचनात् सत्यं
विकारजातं स्वतस्त्वनृतमेव वाचारम्भणं विकारो नामधेयमित्युक्तत्वात् तथा जीवोऽपि यतात्वरूपबलिरिति हि
न्यायः प्रसिद्धः अतः सदात्मना सर्वव्यवहाराणां सर्वविकाराणां च सत्यत्वं सतोऽन्यत्वे चानृतत्वमिति न कश्चिद्दो-
षः तार्किकैरिवेहानुषज्यते यथा तैरिष्यमाणाः पदार्थाः परस्परविरुद्धास्तेन वादाः स्वबुद्धिविकल्पमात्रा अतत्त्वनिष्ठा इति शक्यं वक्तु-
मेवं तिस्रो देवता अनुप्रविश्य तासामेव बीजभूतेभ्यो व्याकृतेन नामरूपे व्याकरवाणीति ईक्षित्वा तासां च तिसृ-
णां देवतानामेकैकां त्रिवृतं त्रिवृतं करवाण्येकैकस्यास्त्रिवृत्करणे एकैकस्याः प्राधान्यं द्वयोर्द्वयोर्गुणीभावो न्यथा
हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यान्न तु तिसृणां पृथक् पृथक् त्रिवृत्करणं स्यादिति एवं हि तेजोऽबन्नानां पृथङ्ना-
मप्रत्ययलाभः स्यात् तेज इदमिमा आपोऽन्नमिदमिति सति च पृथङ्नामप्रत्ययलाभे देवतानां सम्यग्व्यवहार-
प्रसिद्धिः प्रयोजनं स्यात् एवमीक्षित्वा सेयं देवता इमास्तिस्रो देवता अनेनैव यथोक्तेनैव जीवेन सत्ये विश्वदन्तः
प्रविश्य वैराजं पिण्डं प्रथमं देवादीनां च पिण्डाननुप्रविश्य यथासंकल्पमेव नामरूपे व्याकरोदसौ नामायमिदं
रूपमिति तासां च देवतानां गुणप्रधानभावेन त्रिवृतं त्रिवृतमेकैकामकरोत् कृतवती देवता तिष्ठन्तु तावद्देव-
तादिपिण्डानां नामरूपाभ्यां व्याकृतानां तेजोऽबन्नमयत्वेन त्रिधात्वं यथा तु बहिरिमाः पिण्डेभ्यस्तिस्रो देवतास्त्रिवृ-
देकैका भवति तन्मे मम निगदतो विजानीहि विस्पष्टमवधारयोदाहरणतः यत्तद्देवतानां त्रिवृत्करणमुक्तं
तस्यैवोदाहरणमुच्यते उदाहरणं नामैकदेशप्रसिद्ध्या अशेषप्रसिद्ध्यर्थमुदाह्रियत इति ३ ॥ तदेतदाह ॥
यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नाम-
धेयं त्रीणि रूपाणीत्येव सत्यं यदादित्यस्य रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्या- ७३

स्यादित्यलं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यं यच्चंद्रमसो रोहितं रूपं तेजसस्तद्रूपं यच्छु
क्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चंद्राच्चंद्रत्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यं यद्विद्यु
तो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारंभणं विकारो नाम
धेयं त्रीणि रूपाणीत्येव सत्यमेतद्ध स्म वै तद्विद्वांस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रु
तममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदांचक्रुः यदु रोहितमिवाभूदिति तेजसस्तद्रूपमिति तद्विदांचक्रुर्यदु शु
क्लमिवाभूदित्यपां रूपमिति तद्विदांचक्रुर्यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदांचक्रुर्यद्वविज्ञातमिवाभूदि
त्येतासामेव देवतानां समास इति तद्विदांचक्रुर्यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भव
तीति तन्मे विजानीहीति ४ यदग्नेस्त्रिवृत्कृतस्य रूपं रोहितं प्रसिद्धं लोके तदत्रिवृत्कृतस्य तेजसो रूपमिति विद्धि त
था यच्छुक्लं रूपमग्नेरेव तदपामत्रिवृत्कृतानां यत्कृष्णं तस्यैवाग्ने रूपं तदन्नस्य पृथिव्या अत्रिवृत्कृताया इति विद्धि
तत्रैवं सति रूपत्रयव्यतिरेकेणाग्निरिति यन्मन्यसे त्वं तस्याग्नेरग्नित्वमिदानीमपागादपगतं प्राग्रूपत्रयविवे
कविज्ञानात् याग्निबुद्धिरासीत्तेऽसाग्निबुद्धिरपगता अग्निशब्दश्चेत्यर्थः यथा दृश्यमानरक्तोपधानसंयुक्तः स्फटिको
गृह्यमाणः पद्मरागोऽयमिति शब्दबुद्ध्योः प्रयोजको भवति प्रागुपधानस्फटिकयोर्विवेकविज्ञानात् तद्विवेकवि
ज्ञाने त्वपद्मरागशब्दबुद्धी निवर्तेते तद्विवेकविज्ञातुः तद्वत् ननु किमत्र बुद्धिशब्दकल्पनाक्रियते प्राक् रूपत्रयवि
वेककरणादग्निरेवासीत्तदग्नेरग्नित्वादिनादि रूपविवेककरणादग्निरेवासीत्तदग्नेरग्नित्वं पागादिति युक्तम् य
थातन्त्वपकर्षेण पटाभावो नैवं बुद्धिशब्दमात्रमेवाग्निर्यत आह वाचारंभणमग्निर्नाम विकारो नामधेयं नाममा
त्रमित्यर्थः अग्निबुद्धिरपि शब्दवेवेति तद्धि तत्र सत्यं त्रीणि रूपाणीत्येव सत्यम् नाणुमात्रमपि रूपत्रयव्यतिरेकेण

सत्यमस्तीत्यवधारणार्थः तथा यदादित्यस्य यच्चन्द्रमसो यद्विद्युत इत्यादि समानम् ॥ ननु यथा तु खलु सोम्येमा
स्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीत्युक्तानेन सप्रवचतुर्भिरुदाहरणैरग्न्यादिभिर्विशिष्टैकोदाहर
णेदर्शितं तेनाधुना यावदुदाहरणे दर्शितं त्रिवृत्करणं नैष दोषः अथ न विषयाण्युदाहरणान्येवमेव द्रष्टव्यानीति
मन्यते श्रुतिः तेजस उदाहरणमुपलक्षणार्थं रूपवत्त्वात्स्पृष्टयोर्न चपञ्चस्व गन्धरसा उदाहरणे त्रयाणामसंभ
वात् नहि गन्धरसौ तेजसि स्तः शब्दस्पर्शयोरुदाहरणे विभागेन दर्शयितुमशक्यत्वात् यदि सर्वं जगत्त्रिवृत्कृ
तमित्यग्न्यादिवत्त्रीणि रूपाणीत्येव सत्यमग्नेरग्नित्ववदपागाज्जगतो जगत्त्वं तथान्नस्याप्यप्शुङ्गत्वादाप इत्येव
सत्यं वाचारम्भणमात्रमन्नं तथापामपि तेजःशुङ्गत्वाद्वाचारम्भणत्वं तेज इत्येव सत्यं तेजसोऽपि सच्छुङ्गत्वाद्वाचार
म्भणत्वं सदित्येव सत्यमित्येषोऽर्थो विवक्षितः वाय्वन्तरिक्षे त्वत्रिवृत्कृते तेजःप्रभृतिष्वनन्तर्भूतत्वादवशिष्येते एवं।
गन्धरसशब्दस्पर्शाश्चावशिष्टा इति कथं सता विज्ञातेन सर्वमन्यदविज्ञातं भवेत्तद्विज्ञाने वा प्रकारान्तरं वाच्यम् नैष
दोषः रूपवद्द्रव्ये सर्वस्य दर्शनात् कथं तेजसि तावद्रूपवति शब्दस्पर्शयोरप्युपलम्भात् वाय्वन्तरिक्षयोः शब्दस्प
र्शगुणवतोः सद्भावोऽनुमीयते तथाबन्नयो रूपवतो रसगन्धान्तर्भाव इति रूपवतां त्रयाणां तेजोबन्नानां त्रिवृत्क
रणप्रदर्शनेन सर्वं तदन्तर्भूतं सविकारत्वात् त्रीण्येव रूपाणि विज्ञातं मन्यते श्रुतिः नहि मूर्तं रूपवद्द्रव्यं प्रत्या
ख्याय वाय्वाकाशयोस्तद्गुणयोर्गन्धरसयोर्वा ग्रहणमस्ति अथवा रूपवतामपि त्रिवृत्करणप्रदर्शनार्थमेवम
न्यते श्रुतिः यथा तु त्रिवृत्कृते त्रीणि रूपाण्येव सत्यं तथा पञ्चीकरणेऽपि समानो न्याय इत्यतः सर्वस्य सद्विकारत्वा
त्सता विज्ञातेन सर्वमिदं विज्ञातं स्यात् सदेकमेवाद्वितीयं सत्यमिति सिद्धमेव भवति तदेकस्मिन्सत्यप्रकाशे वि।
ज्ञाते सर्वमिदं विज्ञातं भवतीति वस्तुक्रमेणन् विद्वांसो विदितवन्तः पूर्वेऽतिक्रान्ता महाशाला महाश्रोत्रिया आहुः

सर्वैः किल किं ज्ञातवन्त इत्याह न नोऽस्माकं कुल इदानीं यथोक्तविज्ञानवतां कश्चनाश्रुतममतमवि
ज्ञातमुदाहरिष्यतीति सर्वं विज्ञातमेवास्मत्कुलीनानां सद्विज्ञानवत्त्वादित्यभिप्रायः ॥ ते पुनः कथं सर्वं विज्ञात
वन्त इत्याह एभ्यस्त्रिभ्यो रोहितादिरूपेभ्यो दृष्टेभ्यो विज्ञातेभ्यः सर्वमप्यन्यच्छिष्टमेवेति विदाञ्चक्रुर्विज्ञात
वन्तो यस्मात्तस्मात्सर्वज्ञा एव सद्विज्ञानात्ते आसन्नित्यर्थः। अथवैभ्यो विदाञ्चक्रुरित्यग्न्यादिभ्यो दृष्टेभ्यो विज्ञाते
भ्यः सर्वमन्यद्विदाञ्चक्रुरित्येतत् कथं यदन्यद्रूपेण संदिह्यमाने मे चक्रकपोतादिरूपं रहितमिव दृश्यमानम
भूत्तेषां ब्रह्मविदां तत्तेजसो रूपमिति विदाञ्चक्रुस्तथा यच्छुक्लमिवाभूद्दृश्यमानं तदपां रूपं यत्कृष्णमिव दृश्य
मानं तदन्नस्येति विदाञ्चक्रुरेवमत्यन्तदुर्लक्ष्यं यत्तु वस्त्वविज्ञातमिवाविशेषतो गृह्यमाणमभूत् तदप्ये
तासामेव तिसृणां देवतानामेव समासः समुदाय इति विदाञ्चक्रुरेवं तावद्बाह्यं वस्त्वग्न्यादिवद्विज्ञातं तथेदानीं
यथा नु खलु हे सोम्य इमास्तिस्रो यथोक्ता देवताः पुरुषं शिरःपाण्यादिलक्षणं कार्यकारणसंघातं प्राप्य पुरुषेण
उपयुज्यमानास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहि निगदत इत्युक्त्वाह ४ अन्नमशितं त्रेधा विधीयते तस्य
यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः आपः पीतास्त्रेधा विधीयन्ते तासां यः
स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः तेजोऽशितं त्रेधा विधीयते तस्य यः स्थवि
ष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् अन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोम
यी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ५ ॥ अन्नमशितं त्रेधा विधीयते जाठ
रेणाग्निना पच्यमानं त्रेधा विभज्यते कथं तस्यान्नस्य त्रेधा विधीयमानस्य यः स्थविष्ठः स्थूलतमो धातुः स्थूलतमं
वस्तु विभक्तस्य तत्पुरीषं भवति यो मध्यमो धातुर्मध्यमस्तद्रसादिक्रमेण परिणम्य मांसं भवति योऽणिष्ठो।

छा॰भा॰
५५

एतेनाशितान्नः सन्नूर्ध्वं हृदयं प्राप्य सूक्ष्मासु हिताख्यासु नाडीष्वनुप्रविश्य वागादिकरणसंघातस्य स्थितिमुत्पादय
न्मनो भवति मनोरूपेण विपरिणमन्मनस उपचयं करोति ततश्चान्नोपचितत्वान्मनसो भौतिकत्वमेव न वैशे
षिकतन्त्रोक्तलक्षणं नित्यं निरवयवं चेति गृह्यते यदपि मनोऽस्य दैवं चक्षुरिति वक्ष्यति तदपि न नित्यत्वापेक्षया।
किं तर्हि सूक्ष्मव्यवहितविप्रकृष्टादिसर्वेन्द्रियविषयव्यापकत्वापेक्षया यच्चान्येन्द्रियापेक्षया नित्यत्वं तद
प्यापेक्षिकमेवेति वक्ष्यामः सदेकमेवाद्वितीयमिति श्रुतेः तथापस्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मू
त्रं भवति यो मध्यमस्तल्लोहितं भवति योऽणिष्ठः स प्राणो भवति वक्ष्यति हि आपोमयः प्राणो न पिबतो विच्छे।
त्स्यत इति यथा तेजोऽशितं तैलघृतादि भक्षितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स
मज्जा योऽणिष्ठः सा वाक् तैलघृतादिभक्षणाद्धि वाग्विशदा भाषणसमर्था भवतीति प्रसिद्धं लो
के यत एवमन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वाक् ननु केवलान्नभक्षा आखुप्रभृतयो वाग्मिनः
प्राणवन्तश्च तथा अब्मात्रभक्षाः समुद्रमीनमकरप्रभृतयो मनस्विनो वाग्मिनश्च तथा स्नेहपानामपि प्राण
वत्त्वं मनस्वित्वं चानुमेयं यदि सन्ति तत्र कथमन्नमयं हि सोम्य मन इत्याद्युच्यते नैष दोषः सर्वस्य त्रिवृत्कृ
तत्वात्सर्वत्र सर्वोपपत्तेः न ह्यत्रिवृत्कृतमन्नमश्नाति कश्चिदापो वात्रिवृत्कृताः पीयन्ते तेजो वात्रिवृत्कृतमश्ना
ति कश्चिदित्यन्नादाना आखुप्रभृतयो वाग्मिनः प्राणवन्तश्चेत्याद्यविरुद्धमित्येवं प्रत्यायितः श्वेतकेतुराह भूय
एव पुनरेव मा भगवानन्नमयं हि सोम्य मन इत्यादि विज्ञापयत्विति दृष्टान्तेनावगमयतु नाद्यापि ममास्मिन्नर्थे
सम्यङ्निश्चयो जातो यस्मात्तेजोऽबन्नमयत्वेनाविशिष्टे देहे एकस्मिन्नुपयुज्यमानान्यन्नाप्तेजांसि तान्याणिष्ठ
धातुरूपेण मनःप्राणवाच उपचिन्वन्तीति स्वजात्यनतिक्रमेणेति दुर्विज्ञेयमित्यभिप्रायः अतो भूय एवेत्याह

तमेवमन्नकं वेत तथा तत्सोम्येति होवाच पिता स्मृत्वा एतद्दृष्टान्तं यथैव तु प्रथयन्तेयन्तत्करि ॥ ४ ॥ दध्नः सोम्य
मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्पिर्भवत्येवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः
समुदीषति तन्मनो भवति अपां सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति तेजसः सो
म्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति अन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोम
यी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ५ ॥ दध्नः सोम्य मथ्यमानस्य योऽणि
माणुभावः स ऊर्ध्वः समुदीषति संभूयोर्ध्वं नवनीतभावेन गच्छति तत्सर्पिर्भवति यथायं दृष्टान्त एवमेव खलु
सोम्यान्नस्यौदनादेरश्यमानस्य भुज्यमानस्यौदर्येणाग्निना वायुसहितेन खजेनेव मथ्यमानस्य योऽणिमा तत्स ऊ
र्ध्वः समुदीषति तन्मनो भवति मनोऽवयवैः सह संभूयोपचिनोत्यन्तं तथापां सोम्य पीयमानानां योऽणिमा स ऊ
र्ध्वः समुदीषति स प्राणो भवतीत्येवमेव खलु सोम्य तेजसोऽश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भ
वति अन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वागिति युक्तमेव मयोक्तमित्यभिप्रायः अतोऽस्त्वं तेजसो
ऽस्त्वेतत्सर्वं मनस्त्वन्नमयमित्यत्र नैकान्ते नमम्ननिश्चयो जातस्तत्भूय एव मा भगवान्मनसोऽन्नमयत्वं दृष्टा
न्तेन विज्ञापयत्विति तथा सोम्येति होवाच पिता ॥ ६ ॥ षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माशीः का
ममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यत इति स ह पञ्चदशाहानि नाशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृ
चः सोम्य यजूंषि सामानीति न वै मा प्रतिभान्ति भो इति तं होवाच यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्योत
मात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहु दहेदेवं सोम्य षोडशानां कलानामेका कलातिशिष्टा स्यात्तयैतर्हि वेदा
न्नानुभवस्यशानाथ मे विज्ञास्यसीति स हाशाथ हैनमुपससाद तं ह यत्किंच पप्रच्छ सर्वं ह प्रतिपेदे तं होवाच

छा.भा.
१५

यथा सोम्य महतोऽभ्याहितस्यैकमंगारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्रज्वालयेत्तेन ततोऽपि ब
हु दहेदेवं सोम्य ते षोडशानां कलानामेका कलातिशिष्टाभूत्सान्नेनोपसमाहिता प्रज्वालीत्तयैतर्हि वेदान
नुभवस्यन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ६
अन्नस्य भुक्तस्य योऽणिष्ठो धातुः स मनसि शक्तिमधात्सान्नेनोपचिता शक्तिः षोडशधा प्रविभज्य पुरुषस्य काल
त्वेन निर्दिदिक्षिता तया मनस्यन्नोपचितया शक्त्या षोडशधा प्रविभक्तया संयुक्तत्वात् कार्यकरणसंघात
लक्षणो जीवो विशिष्टः पुरुषः षोडशकल उच्यते यस्यां सत्यां द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञाता सर्वक्रिया
समर्थः पुरुषो भवति हीयमानायां च यस्यां सामर्थ्यहानिः वक्ष्यति चाथान्नस्यायी द्रष्टेत्यादि सर्वस्य कार्यकर
णस्य सामर्थ्यं मनःकृतमेव मानसेन हि बलेन संपन्ना बलिनो दृश्यन्ते लोके ध्यानाहाराश्च केचिदन्नस्य स
र्वात्मकत्वादतोऽन्नकृतं मानसं वीर्यं षोडशकला यस्य पुरुषस्य सोऽयं षोडशकलः एतच्चेत्प्रत्यक्षीकर्तुमि
च्छसि पंचदशसंख्याकान्यहानि माशीरशनं माकार्षीः काममिच्छातोऽपः पिब यस्मान्नापिबतोऽपः प्राणो वि
च्छेत्स्यते विच्छेदमापत्स्यते यस्मादापोमयो विकारः प्राण इत्यवोचाम न हि कार्यं स्वकारणोपष्टंभमन्तरेण
चिरं स्थातुमुत्सहेत स हैवं श्रुत्वा मनसोऽन्नमयत्वं प्रत्यक्षीकर्तुमिच्छन्पंचदशाहानि नाशदशनेन
कृतवान् अथ षोडशेऽहनि हैनमुपससादोपगतवानुपगम्योवाच किं ब्रवीमि भो इति इतर आह ऋचः
सोम्य यजूंषि सामान्यधीष्वेत्येवमुक्तः पित्राह नैव मा भान्ति ऋगादीनि प्रतिभान्ति न प्रतिभान्ति मम मनसि भो।
इत्यर्थः इमा भवावृत्तित्येवमुक्तवन्तं पिताह शृणु तत्र कारणं येन ते ऋगादीनि न प्रतिभान्तीति तं होवा
च यथा लोके हे सोम्य महतो महत्परिमाणस्याभ्याहितस्योपचितस्येंधनैरग्नेरेकोंऽगारः खद्योतमात्रः खद्यो

नपरिमाणः शान्तस्य पूर्वसमिद्धस्यावशिष्टः स्यात्तेनाङ्गारेण ततोऽपि तत्परिमाणादीषदपि न बहु दहेदिति

एवं सोम्य ते तव अन्नोपचितानां कलानां षोडशानामेका कला अवशिष्टा स्या

त्तया त्वमेतर्हीदानीं वेदान्नानुभवसि न प्रतिपद्यसे श्रुत्वा च अथ मम भोजनानन्तरं वि

ज्ञास्यसि अशान भुङ्क्ष्व अथ मे विज्ञास्यसि स ह अश भुक्तवान् अथानन्तरं हैनं पितरं शुश्रूषुरुपससाद तं होपागतं पुत्रं

यत्किंचिद्ग्रन्थरूपं ग्रन्थं पप्रच्छ ग्रन्थरूपमर्थं जानन्वा पिता स श्वेतकेतुः सर्वं ह तत्प्रतिपेदे ग्रन्थतोऽर्थतश्च

तं होवाच पुनः पिता यथा सोम्य महतोऽभ्याहितस्येत्यादि समानम् एकमङ्गारं शान्तस्याग्नेः खद्योत

मात्रं परिशिष्टं तं तृणैश्चूर्णैर्वा उपसमाधाय प्राज्वलयेद्वर्धयेत्तेनेद्धेनाङ्गारेण ततोऽपि पूर्वपरिमाणाद्बहु दहेत्

एवं सोम्य ते षोडशानामन्नकलानां सामर्थ्यरूपाणामेका कलातिशिष्टाभूदतिशिष्टासीत् पञ्चदशाहा

न्यभुक्तवतः एकैकेनाह्नैकैका कला क्षीणा तस्याः अतिशिष्टा कला अन्नेनोपसमाहिता

पोषिता उपसमाहिता प्राज्वालीद्दीप्तवर्धिता प्रज्वालिता वर्धितेत्यर्थः प्राज्वालीदिति वा पाठान्तरं तया

तेनोपसमाहितया स्वयं प्रज्वलितया वर्धितया तयैतर्हीदानीं वेदाननुभवस्युपलभसे एवं व्याहृ

त्यान्वयव्यतिरेकाभ्यामन्नमयत्वं मनसः सिद्धिमुपसंहरति अन्नमयं हि सोम्य मन इत्यादि यथैतन्मनसो

ऽन्नमयत्वं सिद्धं तथापोमयः प्राणस्तेजोमयी वागित्येतदपि सिद्धमेवेत्यभिप्रायः तदेतद्धास्य पितुरु

क्तं मनआदीनामन्नादिमयत्वं विजज्ञौ विज्ञातवान् श्वेतकेतुः द्विरभ्यासः त्रिवृत्करणप्रकरणसमाप्त्यर्थः य

स्मिन्मनसि जीवेनात्मनानुप्रविष्टा परा देवता परमेश्वरीवरपुरुषः प्रतिष्ठितस्तज्जलादिभिर्वर्धन्तामान्नायो

दयः प्रतिष्ठितं तन्मनोऽन्नमयं तेजोऽस्य साभ्यावाक्प्राणाभ्यां सहितमध्यात्मतन्मयोऽयमत्यजीवो मन

छा.भा.
३४

नदर्शनश्रवणादिव्यवहारापकल्पने नउपश्मेचसंदेवतारूपमेवप्रतिपद्यते नउक्तंश्रात्मनं रे ध्यारत्री
वेलायनीवस्थीः स्वप्नोभूत्वेमंलोकामतिक्रामति सर्वोऽयमात्माब्रह्म विज्ञानमयोमनोमयइ॰॥
दिस्वप्नेनप्राभीरमित्यादि प्राणेत्रैवप्राणोभवतीत्यादिच ॥ १ ॥ उद्दालकोहारुणिःश्वेतकेतुंपुत्रमु
वाचस्वप्नांतंमेविजानीहीति यत्रैतत्पुरुषःस्वपितिनामसतासोम्यतदासंपन्नोभवतिस्वमपीतोभवतितस्मादे
नंस्वपितीत्याचक्षते स्वंह्यपीतोभवति सयथाशकुनिःसूत्रेणप्रबद्धोदिशंदिशंपतित्वान्यत्रायतनमल
ब्ध्वाबंधनमेवोपश्रयतेएवमेवखलुसोम्यतन्मनोदिशंदिशंपतित्वान्यत्रायतनमलब्ध्वाप्राणमेवोपश्र
यतेप्राणबंधनंहिसोम्यमनइति अशनापिपासेमेसोम्यविजानीहीतियत्रैतत्पुरुषोऽशिशिषतिना।
मापएवतदशितंनयंतेतद्यथागोनायोऽश्वनायःपुरुषनायइत्येवंतदपआचक्षतेऽशनायेतितत्रैतच्छुं
गमुत्पतितंसोम्यविजानीहि नेदममूलंभविष्यतीतितस्यक्वमूलंस्यादन्यत्रान्नादेवमेवसोम्यान्नेनशु
गेनापोमूलमन्विच्छाद्भिःसोम्यशुंगेनतेजोमूलमन्विच्छतेजसासोम्यशुंगेनसन्मूलमन्विच्छसन्मूलाः
सोम्येमाःसर्वाःप्रजाःसदायतनाःसत्प्रतिष्ठाः अथयत्रैतत्पुरुषःपिपासतिनामतेजएवतत्पीतं
नयतेतद्यथागोनायोऽश्वनायःपुरुषनायइत्येवंतत्तेजआचष्टे उदन्येतितत्रैतदेवशुंगमुत्पतितंसो
म्यविजानीहिनेदममूलंभविष्यतीतितस्यक्वमूलंस्यादन्यत्राद्भ्योऽद्भिःसोम्यशुंगेनतेजोमूलमन्विच्छ।
तेजसासोम्यशुंगेनसन्मूलमन्विच्छसन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायतनाःसत्प्रतिष्ठाः यथानुखलुसोम्येमा
स्तिस्रोदेवताःपुरुषंप्राप्यत्रिवृत्त्रिवृदेकैकाभवति तदुक्तंपुरस्तादेवभवत्यस्यसोम्यप्रयतोवाङ्मनसिसं
पद्यते मनःप्राणेप्राणस्तेजसितेजःपरस्यांदेवतायांसयएषोऽणिमैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मा

त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ७ ॥ तस्यास्य मनसः स
त्सम्पन्नस्याख्यां गतस्य मन उपरमद्वारेणेन्द्रियविषयेभ्यो निवृत्तस्य यस्यां देवतायां स्वरूपभूतायां यदव
स्थानं तत्पुत्रायाचिख्यासुरुद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं स्वप्नमध्यं स्वप्न
इति दर्शनं तस्य मध्यं स्वप्नान्तं सुषुप्तमित्येतत् अथवा स्वप्नान्तं स्वप्नसतत्त्वमित्यर्थः तत्रा
प्यर्थात्सुषुप्तमेव भवति स्वमपीतो भवतीति वचनात् न हि स्वप्ने स्वमपीतिं जीवस्येच्छन्ति ब्रह्मविदः
तत्र ह्यादर्शापनये पुरुषप्रतिबिम्बादर्शगतो यथा स्वमेव पुरुषमपीतो भवति एवं मनआद्युपरमे चैतन्यप्र
तिबिम्बरूपेण जीवेनात्मना मनसि प्रविष्टा नामरूपव्याकरणाय परा देवता सा स्वमेवात्मानं प्रतिपद्यते जी
वरूपतां मनआख्यां हित्वा अतः सुषुप्तमेव स्वप्नान्तशब्दवाच्यमित्यवगम्यते यत्र तु स्वप्नः स्वप्नान्पश्यति तत्स्वाप्नद
र्शनं सुखदुःखसंयुक्तमिति पुण्यापुण्यकार्यं पुण्यापुण्ययोर्हि सुखदुःखारम्भकत्वं प्रसिद्धं पुण्यापुण्ययोश्चावि
द्याकामवशेनैव सुखदुःखदर्शनकार्यारम्भकत्वमुपपद्यते नान्यथेत्यविद्याकामकर्मभिः संबद्धत्वा।
भिः सदुःख एव स्वप्न इति न स्वमपीतो भवतीत्यनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्शोकान्हृ
दयस्य भवति न ह्यत्र तदस्ति एष परमानन्द इत्यादिश्रुतिभ्यः सुषुप्त एव स्वं देवतारूपं जीवत्वविनिर्मु
क्तं दर्शयिष्यामीत्याह स्वप्नान्तं मे मम निगदतो हे सोम्य विजानीहि विस्पष्टमवधारयेत्यर्थः कदा स्वप्नान्तो
भवतीत्युच्यते यत्र यस्मिन्काले एतन्नाम भवति पुरुषस्य स्वपन इति प्रसिद्धं हि लोके स्वपितीति गौणं चेदं नाम
त्याह यदा स्वपितीत्युच्यते पुरुषस्तदा तस्मिन्काले सता सच्छब्दवाच्यया प्रकृतया देवतया सम्पन्नो भवति
संगत एकीभूतो भवति मनसि प्रविष्टं मनआदिसंसर्गकृतं जीवरूपं परित्यज्य स्वरूपं यत्परमार्थसत्यं प।

पीतोपि रागेतो भवत्यतस्तस्मात्क्षपितोऽनेन माचरतं लौकिकाः स्वमात्मानं हि रसात्पीतो भवति गुणेन नामप्रसि
द्धेनापि स्वात्मप्राप्तिर्गम्यत इत्यभिप्रायः कथं पुनर्लौकिकानां प्रसिद्धा स्वात्मसंपत्तिर्नाप्रक्रमनिमित्तोद्भवता।
तथा पश्यत्याकृत्वोर्गारीतैर्गुणैर्गुणनिमित्तस्तावद्दुःखादनेकापायानुभवात्क्रान्तो भवति ततस्थायत्वानाक
रणानामनेकव्यापारनिमित्तस्थानानां स्वव्यापारेभ्य उपरमो भवति श्रुतेषु श्राम्यत्येव वाक् श्राम्यति चक्षु
रित्येवमादेः तथा च गृहीता वाक् गृहीतं चक्षुः गृहीतं श्रोत्रं गृहीतं मन इत्येवमादीनि करणानि प्राणग्रस्ता
नि प्राणप्रकाश्यानि देहतूलायेयाज्जागर्ति तदा जीवः प्राप्य तत्र येषु देवतारूपमात्मानं प्रतिपद्यते नान्यत्र।
स्वरूपावस्थानाक्रमापनोदः स्यादिति युक्ताप्रसिद्धिर्लौकिकानां स्वरूपीतो भवति इति दृष्टान्तेनेह लोके ज्वरादि
रोगग्रस्तानां न हि निर्मोकेऽस्त्यान्त्यानेऽविश्रमणान्न हर्दिष्टापि स्यादिति युक्तं तद्यथाश्वेनाश्वस्य पर्णो वा विपरी
तस्थानेइत्यादिश्रुतेश्च तत्रायं दृष्टान्तो यथोक्तेऽर्थे स यथा लोके शकुनिः पतित्वा शकुनिघातकस्य हस्तगतेन सू
त्रेण प्रबद्धः पाशितं दिशं दिशं बन्धनमोक्षार्थी सन् दिशं पतित्वान्यत्र बन्धनादायतनमाश्रयं विश्रमणायाल
ब्ध्वा प्राप्य बन्धनमेवोपाश्रयते एवमेव यथायं दृष्टान्तः खलु हे सोम्य तन्मनस्तत्त्वरूपं तेषोडशकलमन्नाप
चितेन मनसोपनिबध्यते तेन तस्य विरूपस्य स्वरूपलक्षितो जीवस्तन्मन इति निर्दिश्यते स च बद्धोऽन्नवत्त्वमनना न्याप्र
पाधिजीवो विद्याकामकर्मोपादिष्टदिशो हि स्वकं दुःखं खलु तत्तज्जाग्रत्स्वप्नयोः पतित्वा गत्वा उभयेस्मिंर्थः अन्य
त्र सदात्मनश्चायतने विश्रमणस्थानमलब्ध्वा प्राणमेव प्राणेन सर्वकार्यकरणाश्रयेणोपलक्षितां प्राण
इत्युक्तेः सदाख्यां परां देवतां श्रयति प्राणाश्रया परमात्मा प्राणशरीरो भारूप इत्यादिश्रुतेः अतस्तदेवतां प्राणाख्यामुपा
श्रयते प्राणो बन्धनं यस्मात्प्रतिमनसः प्राणबन्धनं यस्मात् हे सोम्य मनः प्राणोपलक्षितां देवतां श्रयेत इति ना।

उपलक्षितो जीवः एवं सत्यपि तन्नाम प्रसिद्धिर्ब्रह्मणो यज्जीवस्य संसारस्तद्ब्रह्मगतो न लेनस्तु ब्रह्मस्तद्धर्मो यिन्नाह्म
ग्रादिकार्यकारणपरम्परया पितृगतो नम्लं स्यादित्यर्थः यथा सुखदुःखाज्ञानादिपर्यायेऽपि जीवत्विकाशात्मसंलोपेन प्र
न सिक्तापिपासादेः स्वरूपानात्मीयता सर्वः एतत्त्वं विजानीहि इत्येतस्य यज्ज्ञेयस्मिन्काले पुनस्त्राम।
पुरुषोऽभवति किं तदा पिपासावानिन्द्रियस्यान्तर्भिक्षुनीतिनदा तस्य पुरुषस्य किं निमित्तं नाम भवतीत्याह यत्र पु
रुषेण पीतमन्नं कदाचिदपि पीताप्याधानयन्ने द्वौकृत्य रसादिभावेन विपरिणामयन्ते न तदा भुक्तमन्नं जीर्यत्य।
थभवत्तस्य नामाशिशिषतीति गौणं नीरोग्यत्वं पित्तविकृतिः सर्वोऽन्नं तस्मात् नाशयति नेन तृत्वादशना
याऽइति नाम प्रसिद्धं इत्येतस्मिन्नर्थे यथा गोनायो गोनयतीति गोनाय उच्यते गोपालस्तथा श्वनायो इन्य
नीत्यस्य पासोषनाय उच्यते पुरुषनायः पुरुषं नयतीति ज्ञानेनापनि वैवं नन्नदापञ्चाच्छन्ने लौकिकाः
अशनायेति विसर्गलोपेन तत्रैवं सत्यद्भीरसादिभावेन नीतेनाशितेनान्नेन निष्पादितमिदं शरीरं वटक
णिकायामिव शुङ्गोऽङ्कुर उत्पतितस्तदुद्भूतत्वमिमं शुङ्गं कार्यं शरीरं वटवटादिशुङ्गवदिवदुत्पन्नमिति सोम्य वि
जानीहि किं तत्र वित्त्येत्यमस्तु च्यते मूलमिदं शुङ्गं शरीरं कार्यं त्वाद्वटीवनाम्नूलमूलमिदं न भविष्यति न भवि।
ष्यतीत्यत्र आह श्वेतकेतुः यद्येवं समूलमिदं शरीरं वटादिशुङ्गवत्तस्यास्य शरीरस्य कस्मूलं स्यादित्येवं
पृष्टः आह पिता न सहजमूलं स्यादन्यत्रान्नादन्नं मूलमित्यभिप्रायः कथमशितानेस्य न समद्भिर्दीप्तं तेजाद्दे।
णाग्निना पच्यमानं रसभावेन परिणमते रसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदसोऽस्थीनि अस्थिभ्यो
मज्जा मज्जायाः शुक्रं तथा योषिद्भुक्तं चान्नं रसादिक्रमेणैव परिणतं शोणितं भवति ताभ्यां शुक्रशोणिता
भ्यां संयुक्ताभ्यामन्नकार्याभ्यां शुक्रशोणिताभ्यां सन्नेनैवमशनवदन्नभोज्यमानेनाऽऽपूर्यमाणाभ्यां जायमिवं स्थितैः प्रत्यहमुपचीय

छा. भा.
१५

यमानेनाग्नमलो देहस्य शुङ्गाः परिनिष्पन्न इत्यर्थः यत्तु देहस्य शुङ्गाणां मूलमन्नं निर्दिष्टं तदपि देहवह्निनाग्नेरन्यत्रिस।
नाकसाक्षिन्नमूलादुत्पन्नं तेजःशुङ्गाणामेवेति निर्गतत्वात् यथा देहशुङ्गोऽन्नमूलस्य एवमेव सौम्यवत्त्वे शुङ्गेन कार्यभूते
नापो मूलमन्नस्य शुङ्गस्यान्निश्च प्रतिपद्यस्व अपामपि विनाशोत्पत्तिमत्त्वाच्छुङ्गत्वमेवेत्यद्भिः सौम्य शुङ्गेन।
कार्यरूपेण कारणं तेजो मूलमन्वि तेजसोऽपि विनाशोत्पत्तिमत्त्वाच्छुङ्गत्वमिति तेन सा सौम्य शुङ्गेन सन्मूलमे
कमेवाद्वितीयं परमार्थसत्यं यस्मिन्सर्वमिदं वाचारम्भणं विकारो नामधेयमनृतं रज्जुमिव सर्पादिविकल्प
जालमध्यस्तमविद्यया तदस्य जगतो मूलमतः सन्मूलाः सत्कारणा हे सोम्येमाः स्थावरजङ्गमलक्षणाः सर्वाः
प्रजाः न केवलं सन्मूला एवेदानीमपि स्थितिकाले सदायतनाः सदाश्रया एव न हि मृदमनाश्रित्य घटादेः
सत्त्वं स्थितिर्वास्ति अतो मृद्वत्सतो मूलत्वात्प्रजानां सदायतनं यासां ताः सदायतनाः प्रजाः अन्ते च सत्प्रतिष्ठाः
सदेव प्रतिष्ठा लयः समाप्तिरवसानं परिशेषो यासां ताः सत्प्रतिष्ठाः ॥ अथेदानीमपां शुङ्गद्वारेण सतो मूल
स्यानुगमः कर्तव्य इत्याह यत्र यस्मिन्काले पुरुषो नाम पिपासति पातुमिच्छतीति पुरुषो भवत्यशिशिषती
तिवदिदमपि गौणमेव नाम भवति इदानीं हृत्याशितस्यान्नस्य आपो नपुंगं देहस्केदयन्त्यः शिथिलीकुर्वन्त्यः धातु
स्याच्यदि तेजसा न शोष्यन्ते तर्हि नयन्त्यस्तेजसा शोष्यमाणाः स्वयं देहभावेन परिणममाना नानुपानमिच्छाकृत पुरुष
स्य जायते यत्तदा पुरुषः पिपासतीति नाम भवति तदाह तेज एव तत्तदा पीतमुदादि शोषयद्देहगतं लोहितप्राणभा
वेन नयन्ते परिणामयति तद्यथा गोनाय इत्यादि समानं एवं तत्तेज आचष्टे लोके उदन्येति उदकं नयतीत्यु
दन्या उदन्येतीति क्रोदकं तत्रापि सर्वं वदपाममप्येनदेव शुङ्गं नोत्पतिष्यते शुङ्गेनान्यदित्येवमादि समानमन्यत् सा
मर्थ्यात्तेजसोऽप्यन्नदेव शुङ्गाः सतोऽपः शुङ्गेन देहापो मूलं सामान्ये अद्भिः शुङ्गेन तेजो मूलं साम्यं तेन तेजसा शुङ्गेन

स्थूलेनाप्यनेन सूक्ष्मं देवं तेनोपनमयस्य देहस्थूलस्य वाचां भरणमात्रस्याशादिपरं पर्यायपरमार्थसत्यस्य
मूलमभयमसत्त्वासं निरोधायाप्रसूतमन्विकेति । एवंगामयित्वाशिशिषति । पिपासतो नाम प्रसिद्धिमात्रेण
पदस्य दिद्दासिस्वकरणेन तेजोधनानां भुक्तपीतानाम् अन्नमानानां कार्यकरणसंघातस्य देहस्थूलस्य जात्यस्य
कर्षणाय चयकारं तत् वक्तव्यं भाग्यं नदीतोक्तमेव हसू वर्णितमिति सूक्ष्मं तत्पदे प्राणिनि यथा तद्वलयेन प्रकारेण
मालेनोपधनात्योतिस्तोदेवताः परस्य प्राप्यनिहित्रि सुदेवैकाभवति तदुक्तं उत्तरादेव भवत्स्यतिन मन्त्रे
पाविधीयते इत्यादिना त्रिवृत्कमन्नादीनामभिमता नां येभ्य उत्पाधानबलेसाम्यधातुके प्राणी सन् पश्चिन्त्वेती
त्वकैमात्रे भवति सोऽहिते भवति संज्ञा भवतीति येन्तु निष्प्रधानवोमनः प्राणो वाचं च देहस्थानः करणे।
घातस्य पचिन्तेनीतिचोक्तं तत्मनो भवति सप्राणो भवति सा वाग्भवतिहतिसायं प्राणकरणसंघातो देहवि
मोर्णदेहानतं जीवापिहितोयेन क्रमेणात्मद्वेदेहान्तमस्थुनेनाक्तनितदा हाय देशेभ्यपुरुष आत्मियतोप्रिय
माणस्य वाङ्मनसि संपद्यते मनस्थुपसंहियते यत्तदा तु ज्ञातीने यान वदनीति मनः सर्वकोऽहि वाक्यापारेण यत्
हि मनसा ध्यायति तद्वाचा वदतीति श्रुतेः वाच्युपसंहृतायां मनसि मनोमनन व्यापारेण केवलेन वर्तते
मनोऽपि यदा प्राणे संह्रियते तदा मनः प्राणे संपन्नं भवति सुषुप्तिकाल एव तदा पार्श्वस्था ज्ञातेन यान विज्ञान
तीत्याहुः प्राणश्च तदा ऽऽध्यात्मिकाः प्रत्यात्मन्युपसंहृतबाह्यकरणः सर्वाणि विद्यायां दर्शनात् हस्तपादादीन्
विक्षिपन् मर्मस्थानानि निकृन्तन् इव उत्कलकर्मणोपसंहृत तेजसि संपद्यते तदाऽङ्गज्ञानयोनवलतीति
मतोवे तिवाविवि किंत्संतोदेहमालभमानाउत्सचेपलभमाना देहउत्सा जीवतीति यदा तदप्यास्यलिंगेन।
तेजउपसंह्रियते तदा तत्तेजः परस्यां देवतायां प्रप्नोति तदेवं क्रमेणोपसंहृतेन स्वं मूलं प्राप्ते च मनसि तस्याजो

छा.भा.
८

वोपि स्वशुभ्रकालवर्जनिमित्तोपसंहाराद्रुपसंह्रियमाणाः सन्तस्ताभिः संपिपूर्वकं चेद्रुपद्धियने सदेव संपद्यने
पुनर्देहान्तरायस्वशुभ्रमादिवोनिष्पन्ने यथालोके मभये देशो वर्तमानः कथंचिदिवाभयं देशं प्राप्य स्तद्वदित्यर्थः।
स्वनात्मस्तत्वस्मादेव मूलात्स्वशुभ्रमादिवोस्यायमृत्वा पुनः पुनर्देहजालमाविशति यस्मात्मूलादुत्थायेदं देह
माविशति जीवः स यः सदाख्य एष उक्तोऽणिमाणुर्भावो जगतो मूलमेतदात्म्यमेतत्सदात्मा यस्य सर्वस्य तदे
तदात्मा तस्य भावस्तेन तदात्म्यमनेन सदाख्येनात्मनात्मवत्सर्वमिदं जगन्नान्योस्त्यस्यात्मा संसारी नान्य
दतोस्ति द्रष्टा नान्यदतोस्ति श्रोत्रित्यादिश्रुत्यन्तरात् येन चात्मनात्मवत्सर्वं तदेव सदाख्यं कारणं सत्यं परमार्थसत्।
दतः स एवात्मा जगतः प्रत्यक्स्वरूपं सतत्वं याथात्म्यमात्मनः स्वाहृस्यानिरुपदस्य प्रत्यगात्मनिरावादिशाहृवत्रि
वृक्षत्वादतस्तस्मात् त्वमसि भवसि हे श्वेतकेत इत्येवं प्रत्यायितः पुत्र आह भूय एव मा भगवान्विज्ञापयत्व
स्वदुक्तं न तत्संदिग्धं ममाहन्यहनि सर्वाः प्रजाः सुषुप्ते सत्संपद्यन्त इत्येतेनैव न सत्संपद्य न विदुः सत्संपन्ना व।
यमित्येतेनोद्दृष्टेन मां प्रत्यायययितित्यर्थः एवमुक्तस्तथास्तु सोम्येति होवाच पिता यत्पृष्टमस्मदस्यहनि सत्
सम्पद्यनो विदुः सत्संपन्नाः स्म इति तत्कस्मादित्यत्र शृणु दृष्टान्तम् ॥ ८ ॥ यथा सोम्य मधु मधुकृतो निस्ति
ष्ठन्ति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयन्ति ते यथा तत्र न विवेकं लभन्तेमुष्याहं वृक्ष
स्य रसोस्म्यमुष्याहं वृक्षस्य रसोस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्यामह इति न त इह व्याघ्रो वा सिं
हो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति स य एषोऽणिमैतदा
त्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवा
च ॥ ९ ॥ यथा लोके हे सोम्य मधु मधुकृतो मधु कुर्वन्तीति मधुकृतो मधुकरमक्षिका मधु निस्तिष्ठन्ति निष्पादयन्ति

नितत्वाः संता कथं नानात्ययाणां नानागतीनां नानादिक्कालोपहृतानां रसानामवयवानां समाहृतैक्यकानामे
कभावं मधुत्वेन रसानामयं निमधत्वमापादयन्ति ते रसा मधुत्वेनैकतां गतास्तत्र मधुनि विवेकं न लभन्ते ।
कथं अमुष्याहं रसोऽमुष्य पनसस्याम्रस्य वाहं रसोऽस्म्यमुष्याहं अमुष्य पनसस्य वाहं रसोऽस्मीति यथा हि लो
के बहूनां चेतनावतां प्राणिनां समेतानां विवेकलाभो भवत्यमुष्याहं पुत्रोऽस्मीति ते च लब्धविवेकाः संतो न
संकीर्यन्ते न तथेहानेकप्रकारवृक्षरसानामपि मधुत्वेन स्थितानां कटुकादीनां मधुत्वेनैकतां गतानां म
धुरादिभावेन विवेको गृह्यत इत्यभिप्रायः यथायं दृष्टान्त एवमेव खलु सोम्येमाः सर्वाः प्रजा अहरहरहर्नि
ति संपद्य सुषुप्तिकाले मरणप्रलययोश्च न विदुर्न विजानीयुः सति संपद्य सद्द इति सत्संपन्ना इति वा यस्मा
द्वैवमात्मनः सद्रूपतामज्ञात्वैव सत्संपद्यन्तेऽतस्त इह लोके यत्कर्मनिमित्तां यां यां जातिं प्रतिपन्ना आसुः व्याघ्रा
दीनां व्याघ्रोऽहं सिंहोऽहमित्येवं ते तत्कर्मज्ञानवासनाङ्किताः सन्तः सत्प्रविष्टा अपि तद्भावेनैव पुनराभवन्ति पु
नः सत आगम्य व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यत्पूर्वमिह लो
के भवन्ति बभूवुरित्यर्थः तदेव पुनरागत्य भवन्ति युगसहस्रकोट्यन्तरितापि संसारिणो जन्तोर्या पूर्वा विभावि
ता वासना सा न नश्यतीत्यर्थः ताः प्रजा यस्मिन्प्रविश्य पुनराविर्भवन्ति यथा प्रसुप्ता इह संभवन्ति यस्मिन्नुत्
ये त्वितोऽन्ये सत्सत्याभिसंधा यमणुभावमात्मानं प्रविश्य नावर्तन्ते स य एषोऽणिमेत्यादि व्याख्यातं यथा लो
के स्वकीये गृहे सुप्त उत्थाय ग्रामान्तरं गतो जानाति स्वगृहादागतोऽस्मीत्येवं सत आगतोऽस्मीति च जन्तूनां कस्मा
द्विज्ञानं न भवतीति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच पिता शृण्वत्र दृष्टान्तं ॥ ९ ॥
इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति समुद्र एव भवति ता यथा

छा.भा.
६२

नत्र न विदुरियमहमस्मीति एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति त इ
ह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति स य एषो
ऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति
होवाच ॥ १० ॥ यथा सोम्येमा नद्यो गङ्गाद्याः पुरस्तात्पूर्वां दिशं प्रति प्रागञ्चनाः स्यन्दन्ते स्रवन्ति पश्चात्प्रतीच्यो।
च दिशं प्रति सिन्ध्वाद्याः प्रतीचीमञ्चन्तीति प्रतीच्यस्ताः समुद्रादम्भोनिधेर्जलदैराक्षिप्ताः पुनर्वृष्टिरू
पेण पतिता गङ्गादिनदीरूपिण्यः पुनः समुद्रमम्भोनिधिमेवापियन्ति स समुद्र एव भवन्ति ता नद्यो यथा तत्र
समुद्रे समुद्रात्मनैकतां गता न विदुर्न जानन्तीयं गङ्गाहमस्मीयं यमुनाहमस्मीयं नर्मदाहमस्मीति चैवमे
व खलु सोम्येमाः सर्वाः प्रजा यस्मात्सति सम्पद्य न विदुस्तस्मात्सत आगम्य न विदुः सत आगच्छाम इति आग
ता इति वा त इह व्याघ्र इत्यादि समानमन्यत्। इह लोके जलवीचितरङ्गफेनबुद्बुदादय उत्थिताः पुनस्तद्भा
वं गता विनष्टा इति जीवास्तु न कारणभावं प्रत्यहं गच्छन्तोऽपि सुषुप्तमरणप्रलयेषु च न विनश्यन्तीत्येतद्भूय।
एव मा भगवान्विज्ञापयतु दृष्टान्तेनेति तथा सोम्येति होवाच पिता पृष्टः सन् ॥ १० ॥ अस्य सोम्य महतो वृक्ष
स्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष जीवेनात्मनानुप्र
भूतः पेपीयमानो मोदमानस्तिष्ठति अस्य यदेकां शाखां जीवो जहात्यथ सा शुष्यति द्वितीयां जहात्यथ।
सा शुष्यति तृतीयां जहात्यथ सा शुष्यति सर्वं जहाति सर्वः शुष्यत्येवमेव खलु सोम्य विद्धीति होवाच।
जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वम
सि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच पिता ॥ ११ ॥ अस्यहे सोम्यमह।

तेनैकशाखादियुक्तस्य वृक्षस्यास्य सोम्येत्यग्रतः स्थितं वृक्षं दर्शयन्नाह यदिमं कश्चिदस्य मूलेऽभ्याहन्यात्परश्वादि।
ना सकृद्घातमात्रेण न शुष्यतीति जीवन्नेव भवति तदा तस्य रसः स्रवेत् तथा यो मध्येऽभ्याहन्याज्जीवन् स्रवेत् यो
ऽग्रेऽभ्याहन्याज्जीवन् स्रवेत् स एष वृक्ष इदानीं जीवेनात्मनानुप्रभूतोऽनुव्याप्तः पेपीयमानोऽत्यर्थं पिबन्नुदकं
भौमांश्च रसान्मूलैर्मोदमानो हृष्यंस्तिष्ठति तस्यास्य यद्येकां शाखां रोगग्रस्तामाहतां वा जीवो जहा।
त्युपसंहरति शाखायां विप्रसृतमात्मांशमथ सा शुष्यति वाङ्मनःप्राणकरणग्रामानुप्रविष्टो हि जीव इति
तदुपसंहारे उपसंह्रियते जीवेन च प्राणयुक्तेनाशितं च पीतं च रसतां गतं जीवच्छरीरं वृक्षं विवर्धयद्रसरूपे
ण जीवस्य सद्भावे लिङ्गं भवत्यशितपीताभ्यां हि देहे जीवस्तिष्ठति ते चाशितपीते जीवकर्मानुसारिणी
इति तस्यैकाङ्गवैकल्यनिमित्तं कर्म यदोपस्थितं भवति तदा जीव एकां शाखां जहाति शाखायाश्चात्मा-
नमुपसंहरति अथ तदा सा शाखा शुष्यति जीवस्थितिनिमित्तो रसो जीवकर्माक्षिप्तो जीवापसंहारेण निष्टति।
सोऽपगमे च शाखा शोषमुपैति तथा सर्वं वृक्षमेव यदा जहाति तदा सर्वोऽपि वृक्षः शुष्यति वृक्षस्य रसस्रव
णेन शोषणादिलिङ्गाज्जीवत्ववद्दृष्टान्तश्रुतेश्च चेतनावन्तः स्थावरा इति बौद्धकाणादमतमचेतनाः स्थावरा
इत्येतदसारमिति दर्शितं भवति यथास्मिन्वृक्षदृष्टान्ते दर्शितं जीवेन युक्तो वृक्षोऽशुष्को रसपानादियुक्तो जीव
तीत्युच्यते तदपेतश्च म्रियत इत्युच्यते एवमेव खलु सोम्य विद्धीति होवाच जीवापेतं जीवविप्रमुक्तं वाव किलेदं श
रीरं म्रियते इति कार्यशेषे च सुप्तोत्थितस्य ममेदं कार्यशेषमसमाप्तमिति स्मृत्वा समापनदर्शनाज्जातमात्रा
णां च जन्तूनां स्तन्याभिलाषभयादिदर्शनाच्चातीतजन्मान्तरानुभूतस्तनपानदुःखानुभवस्मृतिर्गम्यते अग्निहो।
त्रादीनां च वैदिकानां कर्मणामर्थवत्त्वाच्च जीवो म्रियत इति स एषोऽणिमेत्यादि समानं कथं पुनरिदमणी।

का॰भा॰
६२

स्यात्संहत्यश्चवादिनामरूपवज्जगदसत्येन सत्साम्नामरूपादिनात्मनोजायतेत्येतदृष्टेनेन भूय एव मा भगवा
न्विज्ञापयत्विति तथा सोम्येति होवाच पिता ॥ ११ ॥ न्यग्रोधफलमत आहरेति इदं भगव इति भिंधीति भि
न्नं भगव इति किमत्र पश्यसीति न किंचन भगव इति तं होवाच यं वै सोम्यैतमणिमानेन निभालयसे प तदात्म्यमिदं सर्वं तत्स
तस्य वै सोम्यैषोणिम्न एवं महान्न्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति स य एषोणिमेति तथा सोम्येति होवाच ॥ १२ ॥
नसं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा याचकार सः इदं भग।
यद्येतत्सत्सल्लीकर्तृमिकसिद्धं स्थितो सामान्यद्रेतो न्यग्रोधात्फलमेकमाहरेत्युक्तः तथा चकार तस्मादाह पिता किमत्र पश्यसीत्यु
वन्नुपसंहृतफलमिति दर्शिते वने मत्याद्र फलं भिंधीति भिन्नमित्याहेतरः तमाह पिता धानानो ददंगवन्नस्मि भिंधीत्युक्त
क्त आह अण्व्य इवेमा धाना बीजानि पश्यामि भगव इत्यासां धानानामेकां धानां भगव इति
आह भिन्ना भगव इति यदि भिन्नाया धानायाः किं पश्यसीत्युक्त आह न किंचन पश्यामि भगव इति तं
पितोवाच वटधाना या भिन्ना यां त्वं वटबीजाणिमानं हे सोम्य त्वं न निभालयसे न पश्यसि तस्यैतस्य सो
व किल हे सोम्य एष महान्न्यग्रोधो बीजस्याणिम्नः सूक्ष्मस्यादृश्यमानस्य कार्यभूतः स्थूलः शाखास्कंधोऽङ्कुर
ल्कफलपलाशवानुत्तिष्ठत्युद्भूतः सन्तिष्ठतीति वा उत्कृष्टो वाध्याहार्यः अतः श्रद्धत्स्व सोम्य सत एव निमित्तः स्थू
लेनामनामरूपादिमत्कार्यं जगदुत्पन्नमिति यद्यपि न्यायागमाभ्यां निर्धारितोऽर्थस्तथैवेत्यवगम्यते त
थाप्यत्यन्तसूक्ष्मेष्वर्थेषु बाह्यविषयासक्तमनसः स्वभावप्रवृत्तस्यासत्या गुरुतरायां श्रद्धायां दुरवगम।
त्वं स्यादित्याह श्रद्धत्स्वेति श्रद्धायां तु सत्यां मनसः समाधानं बुभुत्सितेऽर्थे भवेत्ततश्च तदर्थावगतिरित्यत्र।
मानानामभवमिमादि श्रुतेः सदुत्पन्नकार्यं यदि तन्मज्जगतो नाममूलं कस्मान्नोपलभ्यत इत्येतद्दृष्टेनेन दर्शयाम।

वान्भूयएवविज्ञापयत्वितितथासोम्येतिहोवाच विद्यमानमपिवस्तुनोपलभ्यतेप्रकारांतरेणतूपलभ्य
तेइतिसृणुअत्रदृष्टांतं ॥ २ लवणमेतदुदकेवधायाथमाप्रातरुपसीदथाइतिसहतथाचकार तंहो
वाचयद्दोषालवणमुदकेवाधाअंगतदाहरेतितद्धावमृश्यनविवेदयथाविलीनमेवाङ्गास्यांतादाचामेतिक
थमितिलवणमितिमध्यादाचामेतिकथमितिलवणमित्यंतादाचामेतिकथमितिलवणमितिअभि
प्रास्यैतदथमोपसीदथाइतितद्धतथाचकारतच्छश्वत्संवर्ततेतंहोवाचात्रवावकिलसत्सोम्यननिभाल
यसेत्रैवकिलेतिसयएषोणिमैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोइतिभूयएवमाभग
वान्विज्ञापयत्वितितथासोम्येतिहोवाचपिता ॥ १३ ॥ यदिचेत्समर्थंसम्यग्दोवगन्तुंनिकसिपिंडरूपंलवण
मेतदुदकेवधायप्रातरथमामांप्रातरुपसीदथा उपगच्छथाइतिसहपित्रोक्तमर्थंप्रत्ययीकर्तु
मिच्छंस्तथाचकारतंहोवाचपरेद्युःप्रातर्यल्लवणंदोषरात्रावुदकेवधानिहितवानसितदाहरेत्युक्तस
लवणंतवेक्ष्यतथापितच्चक्षुषास्पर्शनेनचपिंडरूपंलवणमगृह्यमाणंविद्यमानमेवाप्सूपलभ्यतेचोपायां
तरेणेत्येतच्छ्रद्धापयितुमिच्छन्स्तमाहांगास्योदकस्यांतादुपरिगृहीत्वाचामेत्युक्त्वातथाकृतवंतमु
वाचकथमिति इतरआहलवणंस्वादुइतितथामध्यादुदकस्यगृहीत्वाचामेतिकथमितिलवणमिति
तथांतादधोदेशाद्गृहीत्वाचामेतिकथमितिलवणमिति यद्येवमभिप्रास्यपरित्यज्यैतदुदकमाचम्याथमो
पसीदथाइतितद्धतथाचकारलवणंपरित्यज्यपितृसमीपमाजगामेत्यर्थः इदंवचनंब्रुवन्तल्लवणंतस्मि
न्नेवोदकेयन्मयारात्रौक्षिप्तंतच्छश्वन्नित्यंसंवर्ततेविद्यमानमेवसत्सम्यग्वर्ततेइत्येवमुक्तवंतंहोवाचपिता य
थेदंलवणंदर्शनस्पर्शनाभ्यांपूर्वंगृहीतंपुनरुदकेविलीनंताभ्यामगृह्यमाणमपिनाविद्यमानमेवाप्यनेरण

छा.भा.
५२

जिह्वयोपलभ्यमानत्वादेवमेवाश्चैवास्मिन्नेव तेजोबन्नादिकार्ये देहे पुंगेवावकिलेस्याचार्योपदेशसंस्कारप्रद।
र्शनार्थमत्रैव तेजोबन्नादिशुंगकारणं वटबीजाणिमवद्विद्यमानमेवेन्द्रियैर्नोपलभसे न निभालयसे य
था चास्मिन्नेवोदके दर्शनाभ्यामनुपलभ्यमानं लवणं विद्यमानमेव जिह्वयोपलब्धवानसि एवम
त्रैव किल विद्यमानं सज्जगन्मूलमुपायान्तरेण लवणवन्निभवद्उपलप्स्यसे इति वाक्यशेषः स इत्यादि स
मानम् ॥ यद्येवं लवणाणिमवद्दिन्द्रियैर्नुपलभ्यमानमपि जगन्मूलं सदुपायान्तरेणोपलब्धुं शक्य।
कमिति यदुपलम्भात्कृतार्थः स्यामनुपलम्भाच्चाकृतार्थः स्यामहं तस्योपलब्धौ क उपाय इत्येतदुपप
दस्व मा भगवान्विज्ञापयतु दृष्टान्तेन तथा सोम्येति होवाच ॥ १३ ॥ यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धा
क्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ् दोङ् वधाङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धा
क्षो विसृष्टः तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन्प।
डितो मेधावी गन्धारानेवोपसम्पद्येतैवमेवेहाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सं
पत्स्य इति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवा
न्विज्ञापयत्विति तथा सोम्येति होवाच ॥ १४ ॥ यथा लोके हे सोम्य पुरुषं यं कंचिद्गन्धारेभ्यो जनपदेभ्यो
ऽभिनद्धाक्षं बद्धचक्षुषमानीय यद्द्रव्यहर्ताऽङ्कवरलमभिनद्धाक्षमेव बद्धहस्तमरण्ये ततोऽतिजनेऽत्यन्त।
विगतजने देशे विसृजेत्स तत्र दिग्भ्रमोपेतो यथा प्राग्वा प्राग्वनः प्राङ् मुखो वा वत्यर्थः तथोदङ्वाधराङ्वा
प्रत्यङ्वा प्रध्मायीत शब्दं कुर्याद्विक्रोशेदभिनद्धाक्षोऽहं गन्धारेभ्यस्तस्करेणानीतोऽभिनद्धाक्ष एव च विसृष्ट
इत्येवं विक्रोशतस्तस्य यथाभिनहनं बन्धनं प्रमुच्य मुक्त्वा कारुणिकः कश्चिदेतां दिशमुत्तरतो गा

याऽपनीदिशं ब्रजेति प्रवृत्यात्मप्रवंकारुणिकेन बंधनान्मोहितोऽग्रामात्त्रामं नेष्टकम्संडितउपदेशावान्मे।
यावीपरीति दृष्टग्रामप्रवेशमार्गावधारणसमर्थः सनाऽधाराने वोऽपसंपद्यते नेनरोऽस्य मनिर्देशानरदर्पो
नकृत्वा यथायं दृष्टेनावीणिनः स्वविषयेभ्यो गंधारेभ्यः पुरुषलक्तैर्बध्निन्द्राक्षोऽविवेकादिकमूढोमाना
यापिपासादिवान् व्याघ्रेनस्कराद्यनेकभयानर्थव्रातजुन सरण्येप्रवेशितोऽङः त्राणोविक्रोशं वधनेभ्यो
नमत्तास्मिइति कथंचिदिवकारुणिकेन केनचिन्मोहितः स्वदेशगंधारानेवाप्रोग्निर्हृतः सत्वभूतये
वमेवमतो जगदात्मस्वरूपान्ते जोधत्रादिसद्यदे शरण्ये वानपिवकमहधिरव्रेदोमासास्थिमज्जाशुक्रकृमि
मूत्रपुरीषवत्क्रीलोमस्यापनेकद्रंद्वः स्वेवद्वेदेमादपरोऽभिनन्दो लोभाद्यो पुत्रमिवपशुबंधादिदृष्टेनकविष
यतृष्णापाशितः पुण्यपुण्यादिकर्मनस्करैः प्रवेशितोऽहममनुष्यपुत्रोऽमृनेनबांधवाः सर्वेदद्रुः स्वमृदः पिड
तो धार्मिको बंधुमान् जातोमृतो जीर्णः पापीपुत्रोमम मृतः नष्टंधनंदारा दग्नोऽस्मिकथं जीविष्यामि कामेवगतिः
किं मे त्राणमित्यनेकशानमदुष्टानर्थजालवान् विक्रोशन्कथं चिदिव पुण्यातिशयवशात्परमकारुणिके
कचित्सब्रह्मात्मविदविमुक्तबंधने ब्रह्मिष्ठयदासदायनिनेन च ब्रह्मविदाकारुणपादर्शितं संसारविषय।
दोषदर्शनमार्गोविरक्तः संसारविषयेभ्यो नास्मि संसारीत्यमनुष्यपुत्रत्वादिधर्मवान् किंतर्हिसद्यत्तत्त्वमसीति
विद्यामोहपटोऽभिनदुनान्मोहितोगांधारकपुरुषवत्स्वंसदात्मानमुपसंपद्यमानो विनिर्वृतः स्यादित्येतद्व।
णमाह आचार्यवान्पुरुषोवेदेति तस्यास्यैवमाचार्यवतोमुक्ताविद्याऽभिनदृतस्यानावदेवतावानेवकाल।
क्षिप्रं देपःसदात्मस्वरूपपत्तेरितिवाक्यशेषः कियत्कालं क्षिप्रमित्युच्यते यावद्येनकर्मणा विमोक्ष्यनहस्येन।
सहषवान्येनसामर्थ्याद्येन कर्मणा शरीरमारब्धं तस्योपभोगेनक्षयादेहपातो यावदित्यर्थः अथतदैव

ज्ञा.भा.
८४

सम्येपन्नेसमस्येपन्नानइत्येनन्सर्ववत् नहिदेहमोक्षसमस्येपन्नेष्वकालेभेदीक्तिरेनाथपार्हब्रनेनर्याथः।
स्यात् मनुयथास्तद्धिज्ञानानेनारम्भेवदेहपातः सम्येपन्निष्ठ्नभवतिकर्मशेषवशात्तथाप्रवृत्तफलानिप्रा
क्जनोन्त्येजन्मान्तरसंचितानन्यपिकर्माणि प्रतीतिनन्फलोपभोगार्थंपतितेस्मिन्शरीरेशरीरान्तरमारब्ध
व्यतन्त्येवज्ञानेयावज्जीवंविहितानिप्रतिषिद्धानिकर्माणिकरोत्येवतिनन्फलोपभोगार्थंयावत्पुनःशरी
रान्तरमारब्धव्यंतन्नष्टकर्माणिततःशरीरान्तरमितिज्ञानानर्थकंकर्मणांफलवत्त्वाद्यज्ञानवतःक्षीय
तेकर्माणितदाज्ञानप्राप्तिसमकालमेवज्ञानज्ञानसमसंपन्नेदेहनाशोमोक्षःस्यादितिशरीरपातस्या
नथाचाचार्यभावस्याचार्यवान्पुरुषोवेदेत्यनुपपत्तिःज्ञानान्मोक्षाभावप्रसंगाच्च देशान्तरप्राप्त्युपाय
ज्ञानवदनैकान्तिकफलत्ववाज्ज्ञानस्य कर्मणांप्रवृत्ताप्रवृत्तफलत्वविशेषानुपपत्तेः यदुक्तमप्रवृत्तफलानां
कर्मणांध्रुवफलत्वाद्ब्रह्मविदःशरीरेपतितेशरीरान्तरमारब्धव्यमप्रवृत्तफलकर्मफलोपभोगार्थमितितन्न
हसन् विद्वत्फलस्यतावदेवचिरमितिश्रुतेःप्रमाणात् ननुपुण्येपुण्येनकर्मणेत्यादिश्रुतेरपिप्रामाण्य
मेवसत्यमेवंतथापिप्रवृत्तफलानामप्रवृत्तफलानांचकर्मणांविशेषोस्ति कथंयानिप्रवृत्तफलानिक
र्माणियैर्विदुषःशरीरमारब्धंतेषामुपभोगेनैवक्षयोयथारब्धवेगस्यलक्ष्यमुक्तेषोरावेगक्षयादेवपातः।
निर्वेधेलक्ष्यवधसमकालमेवप्रयोजनंनास्तीतितद्वत् अन्यानितुप्रवृत्तफलानीह प्राक्ज्ञानोत्पत्तेरू।
र्ध्वंचकृतानिक्रियमाणानिवातीतजन्मान्तरकृतानिवाप्रवृत्तफलानितानिज्ञानेनदह्यन्तेप्रायश्चित्तेनेव
ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेतिस्मृतेःक्षीयन्तेचास्यकर्माणीतिचाथर्वणे अतोब्रह्मविदोजी
वितादिप्रयोजनाभावेपिप्रवृत्तफलानांकर्मणामवश्यमेवफलोपभोगःस्यादितिमन्त्रेषुवर्तमानतावदे

वविरमितियुक्तमेवोक्तोमिति यथोक्तदोषचोदनानुपपत्तेः ज्ञानोत्पत्त्यैऽर्थं च ब्रह्मविदः कर्माभावमेवोवा
च ब्रह्मसंस्थोऽमृतत्वमेतीत्यत्र न च संन्यासमदर्शयत इत्याद्युक्तार्थम् आचार्यवानित्याद्येन क्रमेण सत्संपद्य
तेनेकमेदृष्टान्तेन भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच १४ ॥ पुरुषं सोम्योपतापि
नं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेज
सि तेजः परस्यां देवतायां तावज्जानाति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति
भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ १५ ॥ पुरुषं हे सोम्योपतापिनं ज्वराद्युपतापवन्तं ज्ञा
तयो बान्धवाः परिवार्योपासते जानासि मां जानासि मामिति पितरं पुत्रं भ्रातरं वेति पृच्छन्तः तस्य मुमूर्षोर्यावद्व
वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामित्येतदुक्तार्थं संसारिणां यो मरणक्रमः स
एवायं विदुषोऽपि सत्संपत्तिक्रम इत्येतदाह परस्यां देवतायां तेजसि संपन्ने न जानाति अविद्वांस्तु तत उत्था
य यथाकर्म यथाश्रुतं व्याघ्रादिभावं देवमनुष्यादिभावं वा विशति विद्वांस्तु शास्त्राचार्योपदेशजनितज्ञानदीपप्रकाशि
तं सद्ब्रह्मात्मानं प्रविश्य नावर्तत इत्येष संपत्तिक्रमः अन्येन मूर्धन्यया नाड्योत्क्रम्यादित्यद्वारेण सद्गच्छन्तीत्या
हुः तदसत् देशकालनिमित्तफलाभिसंधानेन गमनदर्शनात् न च सदात्मैकत्वदर्शिनः सत्याभिसंधस्य
देशकालाद्यनृताभिसंधिरुपपद्यते विरोधात् अविद्याकामकर्मणां च गमननिमित्तानां सद्विज्ञानहुताशन
विप्लुष्टत्वाद्गमनानुपपत्तिरेव पर्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्रविलीयन्ति कामाः इत्याथर्वणे नद्यः समुद्रे
ऽनेन श्रुतेश्रुतय इत्यादि समानम् ॥ यदि मोक्षेप्सोर्मुमूर्षोर्वृत्तस्तत्सत्संपत्तिस्तुल्या विदुषस्सत्संपत्तौ नावर्तन्ते
आवर्तनेत्वविद्वानित्यत्र कारणं दृष्टान्तेन भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच स्मृतौ ॥ १५ ॥ ॐ

छा. भा.
८५

षं सोम्य हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति स यदि तस्याकर्ता भवति तत एव स-
त्यमात्मानं कुरुते स सत्याभिसंधः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते स यथा
तत्र नादाह्येतैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजिज्ञाविति विजिज्ञाविति ॥ १६
यथा सोम्य पुरुषं चौर्यकर्मणि संदिह्यमानं निग्रहाय परीक्षणाय वा नापि हस्तगृहीतमानयन्ति राजपुरु-
षाः किं कृतवानयमिति पृष्टाश्चाहुरपहार्षीद्धनमस्यायं किमपहरणमात्रेण बन्धनमर्हतीति अन्यथादत्ते-
ऽपि धनेऽपहरणसंभवादित्युक्ताः पुनराहुः स्तेयमकार्षीच्चौर्येण धनमपहार्षीदिति तेष्वेवं वदत्स्वितरोऽपह्नुते ना-
हं तत्कर्तेति ते चाहुः संदिह्यमानं स्तेयमकार्षीस्त्वमस्य धनस्येति तस्मिंश्चापह्नुवत्याहुः परशुमस्मै तपत शो-
धयत्वात्मानमिति स यदि तस्य स्तैन्यस्य कर्ता भवति बहिश्चापह्नुते स एवंभूतस्तत एवानृतमन्यथाभूतं सन्तमा-
त्मानमन्यथा कुरुते स तथानृताभिसंधोऽनृतेनात्मानमन्तर्धाय व्यवहितं कृत्वा परशुं तप्तं मोहात्प्रतिगृह्णाति
स दह्यतेऽथ हन्यते च राजपुरुषैः स्वकृतेनानृताभिसंधिदोषेण अथ यदि तस्य कर्मणोऽकर्ता भवति तत एव स-
त्यमात्मानं कुरुते स तथा स्तैन्याकर्तृतयात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स सत्याभिसंधः सन्न दह्य-
ते सत्यव्यवधानादथ मुच्यते च मृषाभियोक्तृभ्यः तप्तपरशुहस्ततलसंयोगस्य तुल्यत्वेऽपि कर्त्रकर्त्रोरनृताभि-
संधो दह्यते न तु सत्याभिसंधः यथा सत्याभिसंधस्तप्तपरशुग्रहणकर्मणि सत्यव्यवहितत्वान्न दह्यते तत्त्वा।
वादस्य नेमेन देवं सद्ब्रह्मसत्याभिसंधेतरयोः शरीरपातकाले तुल्यायां सत्संपत्तौ विद्वान्संपद्यते न पुनर्व्याघ्रादि-
देहग्रहणाय वर्तते अविद्वांस्तु विकारानृताभिसंधः पुनर्व्याघ्रादिभावं देवतादिभावं वा यथाकर्म यथाश्रुतं
प्रतिपद्यते यदात्माभिसंधानाभिसंधिकृते मोक्षबन्धने यच्च मूलं जगतो यदायतना यत्प्रतिष्ठाश्च सर्वाः प्रजाः

यदात्मकं च सर्वं यस्याज्ञमन्तं नेमध्ये महितीयेन स्संस्तब्धात्मानवान्नम्रमसि इदं श्वेतकेतो इत्युक्तार्थमसह
ह्राकाम् कः पुनरसौ श्वेतकेतुस्तब्धा हर्षीयोहं श्वेतकेतो रुदालकस्य पुत्रः इति वेदात्मानमादेशं पृष्टवानसता
विज्ञाय चाश्रुतमश्रुतमविज्ञातं विज्ञातेपि नयेन प्रश्न कथं नु भगवः स आदेशो भवतीति सर्वथाप्यशक्तः श्रुतो म
नाविज्ञाता विज्ञातो यत्र मध्ये कार्यकारणं संज्ञाने अविज्ञापरे वेदवान्नानास्वरूपव्याकरणाद्यादर्णास्मि वपुरुषः स
यीदि विजलादौ प्रतिबिम्बरूपेणाम्म आत्मानं कार्यकरणेभ्यः प्रतिभक्तं स्वरूपं सर्वमात्मानं श्राकृपितः श्रवण
त्र विज्ञेतो अधुनेदानीं पिता प्रतिबोधितः स्तब्धमसीति हेतुभि इदं एनं पुनरपि नामपृष्टा कि लोकं सर्वं दृष्टमसीति
विज्ञेतो विज्ञानवान् हि वचनमध्यायपरि समाप्य किं पुनरावृत्तैवा कस्मात् नन्न नित्य फले आत्मानि क
न्त्वभोक्तत्वयोरपि ह्नन्नविज्ञाननिवृत्तिः फलं सफलं वयमवेवाच नैतत्कवाच्यार्थं श्रोतेमनेनवाधिकृतनमवि
ज्ञानविज्ञानफलार्थं प्राकृचैतस्याज्ञानादहमेवकरिष्याम्यग्निहोत्रादीनि कर्माण्यहमग्निपितृतपंषोकर्म
णाफलमिन्द्रामत्रवाभ्यां देहान्ते वाकभिन्नत्ततकतेभ्यः स्वामिनं वकर्तृत्वभोक्तृत्वेयोर्थिहृतो नास्मीत्यात्मा
नियमविज्ञानमभूतत्तस्यतज्ज्ञानेनात्मलभेकमवाद्वितीयेन त्वमसीत्यनेनवाकोनप्रतिबद्धस्य निवर्तते वि
रोधात् नचेकस्मिन्नद्वितीये आत्मन्यहमस्मीति विज्ञाने समेदमन्यदनेन कर्तव्यमिदं कृतवास्य फलभोक्ष्यहीन
वाभेदविज्ञानेमपप्यनेनस्मात्स्मान्माद्वितीयात्मविज्ञानेविकारानृतजीवात्मविज्ञानेनिवर्तनेतद्भिप्रुक्तं नत्र
तत्त्वमसीम त्रनेमाहवाचेषेमध्रुडिरादिष्पने यथादित्यमन आदित्य ब्रह्मादित्युडिर्यथा लोके प्रतिमादिषु
विष्णादि बुद्धिलक्षणन त्रसदेव नमिनियदिमदेव श्वेतकेतः स्नाक यमात्मानं नजानीयात् श्वेतनसैनत्वमिस
पदिष्पनेनादित्यादिवाकायेसलक्षणादादित्यो ब्रह्मेत्यादाविनिशस्त्वमभानात्रमासाद्धस्मलंगमाने तृपादिम

का. भा.
५६

त्वाच्चादित्यादीनामकार्यमनसोऽब्रह्मनिषेधश्च यथा नादेवाब्रह्मत्वमिदन्तमन्नप्यवेद्यप्रवेशं दर्शयितानत्वमा
सीतिनिरंकुशस्य सदात्मभावमुपदिशति नेत्थंपराक्समादिगुणैः सिंहो माणवक इति नत्वमसीति स्यात् न च सदा
दादिवत्सदेकमेवाद्वितीयं सत्यमित्युपदेशात् नचोपचारविज्ञानात्तस्यतावदेवचिरमिति नत्वंपतिरूपदि
श्यते सुषानां उपचारविज्ञानस्य तत्सिंहोऽयं मरुरिव च नापि स्तनिरन्तुपाश्यनाक्रमेणवेदान्तापि सक्रेनकेवल
पोदेशेनस्मर्यते न हि रात्मदाममत्वमितिस्त्वत्तःस्यात् नापिमनःसर्वात्मनएकदेशनिरोधाश्रुतत्त्वमसीतिदे
शायपतेरिव प्रामाण्यहत्त्वमितिनचान्याशनिरिद्रसदात्मनोपदेशाद्यान्तरभूतासंभवति नेतुसदसी
तिबुद्धिमात्रमिह कर्तव्यतया चोद्यते न त्वज्ञातं मदसीति ज्ञाप्यते इति चेत् नत्वोऽस्मन्मतेऽप्यप्रवृत्तं प्रवृत्तं भवती
त्यायनुपपन्नेनसदसीतिबुद्धिविधिः स्तत्पर्यत्वात् नाचार्यवान्वेद नस्यतावदेवचिरमित्युपदेशात् यदि
ह्मिमद्रसीतिबुद्धिमात्रेकर्तव्यतया विधीयतेन नत्वेशाहव्याश्यमसरूपत्वमेव न तदा नाचार्यवान्वेदेतिस्या
नोपायोपादेशावाच्यः स्यात् यथाग्निहोत्रेजुहुयादित्येवमादिविधिषु यं प्राप्तमेवाचार्यवत्त्वमितिनह।
तस्यतावदेवचिरमितिचन्द्रोपकरणानुवृत्तं स्यात् सदात्मनत्वे विज्ञानेपि सहाह्बुद्धिमात्रकारणेसोस्त्वस्य
गात् नवतत्त्वमसीत्युक्ते नाहं सदिति प्रमाणवाक्यजनिता बुद्धिर्निवर्तयितुं शक्या नात्यन्तेनिवाशकं चक्षु
सर्वोपनिषद्वाक्यानां तत्परत्वेयैवं पेक्षयात् यथाग्निहोत्रविधिजनिताग्निहोत्रादिकर्तव्यताबुद्धीनामनं
थार्थत्वमनुत्पत्त्वेवाशक्यनेवर्कं नहन् यन्तेसदात्मा सन्नात्मानं कथं जानीयादितिनाशेषदोषः कार्यका
णसंघातव्यतिरिक्तोऽहंजीवःकर्ताभोक्तेत्यपि स्वभावतःप्राणिनां विज्ञानादर्शनात् किं तत्स्य सदात्मविज्ञानेन क
थमेवंव्यतिरिक्तविज्ञानेसति तेषां कर्तृत्वादिविज्ञानसंभवति रूपणेनच न हत्वं स्यापि देहादिष्वात्मबुद्धित्वात्।

स्यात्सदात्मविज्ञानेन तस्माद्विकारानृताधिकृतजीवात्मविज्ञाननिवर्तकमेवेदं वाक्यं तत्त्वमसीति सिद्धम्
इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ छांदोग्योपनि
षद्विवरणे षष्ठः प्रपाठकः ॥ ६ ॥ ॐ श्रीगणेशाय नमः ॐ परमात्मैकत्वोपदेशप्रधानः षष्ठोऽध्यायः सद
एकमेवनिर्णयपरतयैव पर्यवसन्नो न सतो वाग्विकारलक्षणानि तत्त्वानि निर्दिष्टानीत्यतस्तानि नामादीनि प्राणान्ता
नि क्रमेण निर्दिश्य तद्द्वारेणापि भूमाख्यं निरतिशयं तत्त्वं निर्देक्ष्यामीति शाखाचन्द्रदर्शनवदिति सप्त
मः प्रपाठक आरभ्यते अनिर्दिष्टेषु हि सतो वाग्विकारेषु सत्स्वेव निर्दिष्टेऽन्यदप्यविज्ञातं स्यादिति सा शंका कस्य
चित्स्यात्सा माभूदिति वा तानि निर्दिश्यन्त इति अथवा सोपानारोहणवत्स्थूलादारभ्य सूक्ष्मं सूक्ष्मतरं च बुद्धिविष
यं ज्ञापयित्वा तदतिरिक्ते स्वाराज्येऽभिषेक्ष्यामीति नामादीनि निर्दिदिक्षति अथवा नामाद्युत्तरोत्तरविशिष्टा
नि तत्त्वानि अतितरां च तेषामुत्कृष्टतमं भूमाख्यं तत्त्वमिति तत्स्तुत्यर्थं नामादीनां क्रमेणोपन्यासः आख्या
यिका परविद्यास्तुत्यर्था कथं नारदो देवर्षिः कृतकर्तव्यः सर्वविद्योऽपि सन्ननात्मज्ञत्वाच्छुशोचैव किमु वक्त
व्यमन्योऽल्पविज्ञानो जन्तुरकृतपुण्यातिशयः कृतार्थ इति अथवा नान्यदात्मज्ञानान्निरतिशयश्रेयःप्राप्तिसा
धनमस्तीत्येतत्प्रदर्शनार्थं सनत्कुमारनारदाख्यायिकारभ्यते येन सर्वविज्ञानसाधनशक्तिसम्पन्नस्या
पि नारदस्य देवर्षेः श्रेयो न बभूव येनोत्तमाभिजनविद्यावृत्तसाधनशक्तिसम्पत्तिनिमित्ताभिमानं हित्वा प्रा
कृतपुरुषवत्सनत्कुमारमुपससाद श्रेयःसाधनप्राप्तये अतः प्रख्यापितं भवति निरतिशयश्रेयःप्राप्तिसा
धनत्वमात्मविद्याया इति ॥ ॥ अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तं होवाच यद्वेत्थ तेन मो
पसीद ततस्त ऊर्ध्वं वक्ष्यामीति स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणमितिहासपुराणं

का. भा. ८८

पंचमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां
नक्षत्रविद्यां सर्पदेवजनविद्यामेतद्भगवोऽध्येमि सोऽहं भगवो मन्त्रविदेवास्मि नात्मविच्छ्रुतं ह्येव मे भगवद्दृशेभ्य
स्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति तं होवाच ॥ यद्वै किं
चैतदध्यगीष्ठा नामैवैतन्नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणः पंचमो वे
दानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्र
विद्या सर्पदेवजनविद्या नामैवैतन्नामोपास्स्वेति स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाका
मचारो भवति यो नाम ब्रह्मेत्युपास्तेऽस्ति भगवो नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवी
त्विति ॥१॥ अधीहीत्यधीष्व भो भगवन्निति ह किलोपससाद अधीहि भगव इति सनत्कुमारं योगीश्वरं
ब्रह्मिष्ठं नारद उपससन्नवान् तं न्यायत उपसन्नं होवाच यदात्मविषये किं वेत्थ तेन तन्माख्यापनेन ।
मामुपसीद अहं ज्ञानं इति ततोऽहं भवतो विज्ञानेनेतन्मद्भूयं ऊर्ध्वं वक्ष्यामीत्युक्तवति स होवाच नारद ऋ
ग्वेदं भगवोऽध्येमि स्मरामि यद्वेत्थेति विज्ञानस्य स्पष्टत्वात् तथा यजुर्वेदं सामवेदमाथर्वणं चतुर्थं वेदं वेदश्च ।
इत्यप्रकृतत्वादितिहासपुराणं पंचमं वेदं वेदानां भारतं पंचमानां वेदं व्याकरणमित्यर्थः व्याकरणेन हि
पदादिविभागशः ऋग्वेदादयो ज्ञायन्ते पित्र्यं श्राद्धकल्पं राशिं गणितं दैवमुत्पातज्ञानं निधिं महाकाला
दिनिधिशास्त्रं वाकोवाक्यं तर्कशास्त्रमेकायनं नीतिशास्त्रं देवविद्यां निरुक्तं ब्राह्मणा ऋग्यजुःसामाख्यस्य
विद्यां ब्रह्मविद्यां शिक्षाकल्पच्छन्दश्चितयो भूतविद्यां भूततन्त्रं क्षत्रविद्यां धनुर्वेदं नक्षत्रविद्यां ज्योतिषं सर्प
देवजनविद्यां गारुडं देवजनविद्यां गन्धयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानान्येतत्सर्वं हे भगवोऽध्येमि ।

सोऽहं भगवः एतत्सर्वं जानन्नपि मन्त्रविदेवास्मि शब्दार्थमात्रविज्ञानवानेवास्मीत्यर्थः सर्वो हि शब्दोऽभिधानमा
त्रमभिधानं च सर्वं मन्त्रेष्वन्तर्भवति मन्त्रविदेवास्मि मन्त्रवित्कर्मविदित्यर्थः मन्त्रेषु कर्माणीति हि वक्ष्यति ना
त्मवित् नात्मानं वेद्मि ननु आत्मापि मन्त्रैः प्रकाश्यत एवेति कथं मन्त्रवित् नात्मवित् न अभिधानाभिधेयभेद
स्य विकारत्वात् न च विकार आत्मेष्यते ॥ नन्वात्मा आत्मशब्देनाभिधीयते न यतो वाचो निवर्तन्ते यत्र नान्य
त्पश्यतीत्यादिश्रुतेः कथं तर्ह्यात्मैवाधस्तात् स आत्मेत्यादि शब्दा आत्मानं प्रत्याययन्ति नैष दोषः देहवति
प्रत्यगात्मनि भेदविषये प्रयुज्यमानः शब्दो देहादीनामात्मत्वे प्रत्याख्यायमाने यत्परिशिष्टं सदवाच्यमपि
प्रत्याययति यथा सराजिकायां सेनायां दृश्यमानायां छत्रध्वजपताकादिव्यवहितेऽदृश्यमानेऽपि राजनि
एष राजा दृश्यत इति भवति शब्दप्रयोगः ततः को राजेति राजविशेषनिरूपणायां दृश्यमानेतरप्रत्याख्याने
नान्यस्मिन्नदृश्यमानेऽपि राजनि राजप्रतीतिर्भवेत् तद्वत् तस्मात्सोऽहं मन्त्रवित्कर्मविदेवास्मि कर्मकार्यं च
सर्वो विकार इति विकारज्ञ एवास्मि नात्मवित् न प्रकृतिस्वरूपज्ञ इति अत एवोक्तमाचार्यवान्पुरुषो वेदेति
यतो वाचो निवर्तन्त इत्यादिश्रुतिभ्यश्च श्रुतं मया आगमज्ञानमस्त्येव हि यस्मान्मम भगवद्दृशेभ्यो युष्मत्सदृशे
भ्यस्तरति अतिक्रामति शोकं मनस्तापमकृतार्थबुद्धितामात्मविदित्यतः सोऽहमनात्मविद्वान् हे भगवः
शोचामि अकृतार्थबुद्ध्या संतप्ये सर्वदा तं मा मां शोकसागरस्य पारमन्तं भगवांस्तारयत्वात्मज्ञानोडुपेन कृतार्थ
बुद्धिमापादयत्वभयं गमयत्वित्यर्थः तमेवमुक्तवन्तं होवाच यद्वै किंचैतदध्यगीष्ठा अधीतवानसि अध्ययने
न तदर्थज्ञानमुपलक्ष्यते ज्ञानवानसीत्येतन्नामैवैतत् वाचारम्भणं विकारो नामधेयमिति श्रुतेः नाम वा ऋ
ग्वेदो यजुर्वेद इत्यादि नामैवैतत् नामोपास्स्व ब्रह्मेति ब्रह्मबुद्ध्या यथा प्रतिमां विष्णुबुद्ध्या उपास्ते तद्वदुपास्स्व

छा॰भा॰
८८

नाम ब्रह्मेत्युपास्ते ऽस्य फलं दृष्टं किमस्ति भगवो नाम्नो वाव भूयोऽधिकं यद्ब्रह्मदृष्ट्यर्हमन्यदित्यभिप्रा
यः सनत्कुमार आह नाम्नो वाव भूयोऽस्त्येवेत्युक्त आह यद्यस्ति तन्मे भगवान्ब्रवीत्विति ॥ १ ॥ वाग्वाव ना
म्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदा
नां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रवि
द्यां सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवांश्च मनुष्यांश्च पशूंश्च वयांसि च
तृणवनस्पतीञ्छ्वापदान्याकीटपतङ्गपिपीलकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं
चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृद
यज्ञो नाहृदयज्ञो वागेवैतत्सर्वं विज्ञापयति वाचमुपास्स्वेति स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचा
रो भवति यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचारो भवति यो वाचं ब्रह्मेत्युपास्तेऽस्ति भग
वो वाचो भूय इति वाचो वाव भूयोऽस्तीति तन्मे भगवान्प्रब्रवीत्विति ॥ २ ॥ वागितीन्द्रियं जिह्वामूलादिष्वष्ट
सु स्थानेषु स्थितं वर्णानामभिव्यञ्जकं वर्णाश्च नामेति नाम्नो वाग्भूयसीत्युच्यते कार्याद्धि कारणं भू
यो दृष्टं लोके यथा पुत्रात्पिता तद्वत् कथं च वाङ्नाम्नो भूयसीत्याह वाग्वा ऋग्वेदं विज्ञापयति अय
मृग्वेद इति तथा यजुर्वेदमित्यादि समानं हृदयज्ञं हृदयप्रियं तद्विपरीतमहृदयज्ञं यद्यदि वाङ्नाम
भविष्यद्धर्मादि न व्यज्ञापयिष्यत् वाक्‌श्रवणेऽध्ययनाभावोऽध्ययनाभावे तदर्थश्रवणाभावस्तच्छ्रवणाभा
वे धर्मादि न व्यज्ञापयिष्यत् विज्ञानमभविष्यदित्यर्थः तस्माद्वागेवैतदुच्चारणेन सर्वं विज्ञापयत्यतो भू
यसी वाङ्नाम्नः तस्माद्वाचं ब्रह्मेत्युपास्स्वेत्यन्यत्समानमन्यत् ॥ २ ॥ मनो वाव वाचो भूयो यथा वै द्वे वा कोले द्वा ८८

वात्तौ न श्रिरुभवतो वेवाचंचनामचमनोरुभवति सयदामनसामनस्यतिमंत्रानधीयीयेति अथाधी।
तेकर्माणिकुर्वीयेति अथकुरुते पुत्रांश्चपशूंश्चेच्छेयेत्यथेच्छत इमंचलोकममुंचेच्छेयेत्यथेच्छते मनोह्या
त्मामनोहिलोकोमनोहिब्रह्ममनउपास्वेतिसोयमनोब्रह्मेत्युपास्तेयावन्मनसोगतंतत्रास्यकामचारो
भवतियोमनोब्रह्मेत्युपास्तेऽस्तिभगवोमनसोभूयइतिमनसोवावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥ ३॥
मनोमनस्यनविशिष्टमंतःकरणंवाचोभूयस्तत्तद्धिमनस्यनव्यापारवद्वाचंवक्तव्येप्रेरयतितेनवाच्यनसं
तर्भवतितत्तसव्यापकत्वान्मनोभूयोभवति यथावैलोकेद्वेवामलकेद्वेवाकोलेद्वेवाक्षफलेद्वौवामलको
विभीतकफलेवामुष्टिरुभवतिमुष्टिस्तेफलेव्याप्नोति मुष्टिरिति अनुभवतःएवंवाचंचनामचामलका
दिवन्मनउभवति सयदापुरुषोयस्मिन्कालेमनसांतःकरणेनमनस्यतिमनस्यनंविवक्षाबुद्धिःकथंमं
त्रानधीयेयोच्चारयेयमित्येवंविवक्षांकृत्वाथधीते तथाकर्माणिकुर्वीयेतिचिकीर्षाबुद्धिंकृत्वाथकुरुते
पुत्रांश्चपशूंश्चेच्छेयेतिप्राप्तीच्छांकृत्वातत्प्राप्त्युपायानुष्ठानेनाथेच्छतेपुत्रादीन्प्राप्नोतीत्यर्थः तथेमंच।
लोकममुंचोपायेनेच्छेयेतितत्प्राप्त्युपायानुष्ठानेनाथेच्छतेप्राप्नोति मनोह्यात्मात्मनःकर्तृत्वंभोक्तृत्वं।
चसतिमनसिनान्यथेतिमनोह्यात्मेत्युच्यते मनोहिलोकःसत्येवमनसिलोकोभवतितत्प्राप्त्युपायानु।
ष्ठानंचेति मनोहिलोकयोस्तात्तस्मात्मनोहिब्रह्मयतनएवंतस्मात्मनउपास्वेति सोयमनइत्यादिसमानं २
संकल्पोवावमनसोभूयान्यदावैसंकल्पयतेऽथमनस्यत्यथवाचमीरयतितांनाम्नीरयतिनाम्निमंत्राए
कंभवंतिमंत्रेषुकर्माणितानिहवाएतानिसंकल्पैकायनानिसंकल्पात्मानिसंकल्पेप्रतिष्ठितानिसम
क्लृपतांद्यावापृथिवीसमकल्पेतांवायुश्चाकाशंचसमकल्पेतामापश्चतेजश्चतेषांसंक्लृप्त्यैवर्षंसंकल्प।

छा.भा.
६५

वृष्टेः संक्लृप्त्यै अन्नं संकल्पते अन्नस्य संक्लृप्त्यै प्राणाः संकल्पन्ते प्राणानां संक्लृप्त्यै लोकः संकल्पते लोकस्य संक्लृप्त्यै स
र्वं संकल्पते स एष संकल्पः संकल्पमुपास्स्वेति स यः संकल्पं ब्रह्मेत्युपास्ते क्लृप्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्य
थमानानव्यथमानोऽभिसिध्यति यावत्संकल्पस्य गतं तत्रास्य यथाकामचारो भवति यः संकल्पं ब्रह्मेत्युपा
स्तेऽस्ति भगवः संकल्पाद्भूय इति संकल्पाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ४ ॥ संकल्पोपि मनो
वदंतःकरणवृत्तिः कर्तव्याकर्तव्यविषयविभागेन समर्थने विभागेन हि समर्थिते विषये चिकीर्षाबुद्धि
र्मनस्यनं करोति कथं यदा वै संकल्पयते कर्तव्यादिविषयान्विभजते इदं कर्तुं युक्तमित्यथ मनस्यति मंत्रा
ध्यायीत्यादि अथानंतरं वाचमीरयति मंत्राद्युच्चारणे तां च वाचमु नाम्नि नामोच्चारणनिमित्तं विवक्षि
त्वेरयति नाम्नि नामसामान्ये मंत्राः शब्दविशेषाः संत एकं भवंति अंतर्भवंतीत्यर्थः सामान्ये हि विशेषोऽंत
र्भवति मंत्रेषु कर्माण्येकं भवंति मंत्रप्रकाशितानि कर्माणि क्रियंते नामंत्रकमस्ति कर्म यत्तु हि मंत्रप्र
काशनेन लब्धसत्ताकं सत्कर्म ब्राह्मणेनेदं कर्तव्यमस्मै फलायेति विधीयते याश्चोत्पत्तिर्ब्राह्मणेषु क
र्मणां दृश्यते सापि मंत्रेषु लब्धसत्ताकानामेव कर्मणां स्पष्टीकरणं न हि मंत्राप्रकाशितं कर्म किंचिद्ब्राह्म
णेऽन्यत्र दृश्यते त्रयीविहितं च कर्मेति प्रसिद्धं लोके त्रयीशब्दवाच्यश्च ऋग्यजुःसामसमाख्यो मंत्रेषु कर्माणि
कवशं यान्त्यवयविनिवावयवेण तस्माद्युक्तं मंत्रेषु कर्माण्येकं भवंतीति तानि ह वा एतानि मनआदीनि
संकल्पैकायनानि संकल्पायनेन गमनं प्रलयो येषां तानि संकल्पैकायनानि संकल्पात्मान्युत्पत्तौ संक
ल्पे प्रतिष्ठितानि स्थितानि समक्लृपतां संकल्पं कृतवत्याविव द्यौश्च पृथिवी च द्यावापृथिव्यौ निश्चले लक्ष्ये
तेई स्थैर्येणावा संक्लृप्तिमद्भवेति सर्वेषां संकल्पः स्थायते समकल्पेतां वायुश्चाकाशं चैतावपि संकल्पं कृतवंता

विव तथा समकल्पेतामापश्च तेजश्च स्वेन रूपेण निश्चलानि संकल्पन्ते यतस्तेषां द्यावापृथिव्यादीनां संक्लृप्त्यै संकल्पनिमित्तं वर्षं संकल्पते समर्थो भवति तथा वर्षस्य संक्लृप्त्यै संकल्पनिमित्तमन्नं संकल्पते वृष्टेर्ह्यन्नं भवति अन्नस्य संक्लृप्त्यै प्राणाः संकल्पन्ते अन्नमया हि प्राणा अन्नोपष्टम्भकाः अन्नं दामेति हि श्रुतिः तेषां संक्लृप्त्यै मन्त्राः संकल्पन्ते प्राणवान्हि मन्त्रानधीते नाबलः मन्त्राणां संक्लृप्त्यै कर्माण्यग्निहोत्रादीनि संकल्पन्तेऽनुष्ठीयमानानि मन्त्रप्रकाशितानि समर्थानि भवन्ति फलाय ततो लोकः फलं संकल्पते कर्तृसमवायितया समर्थो भवतीत्यर्थः लोकस्य संक्लृप्त्यै सर्वं जगत्संकल्पते स्वरूपावैकल्यायैतद्धीदं सर्वं जगद्यत्फलावसानं तत्सर्वं संकल्पमूलमतो विशिष्टः स एष संकल्पः अतः संकल्पमुपास्स्वेत्युक्त्वा फलमाह स यः संकल्पं ब्रह्मेत्युपास्ते क्लृप्तान्वै स धात्रास्मै लोकाः फलमिति क्लृप्तान्समर्थितान्संकल्पितान्स विद्वान् ध्रुवान्नित्यानत्यन्ताध्रुवापेक्षया ध्रुवश्च स्वयं लोकिनोऽस्य ध्रुवत्वे लोकध्रुवत्वमित्यर्थ इति ध्रुवः सन्प्रतिष्ठितानुपकरणसंपन्नानित्यर्थः पशुपुत्रादिभिः प्रतितिष्ठन्तीति दर्शनात्स्वयं च प्रतिष्ठित आत्मीयोपकरणसंपन्नोऽव्यथमानानमित्रादित्रासरहितानव्यथमानश्च स्वयमभिसिध्यत्यभिप्राप्नोतीत्यर्थः यावत्संकल्पस्य गतं संकल्पगोचरस्तत्रास्य यथाकामचारो भवति आत्मनः संकल्पस्य न तु सर्वेषां संकल्पस्येश्वरफलविरोधात् यः संकल्पं ब्रह्मेत्युपास्त इत्यादि पूर्ववत् ॥ ४ ॥ चित्तं वाव संकल्पाद्भूयो यदा वै चेतयतेऽथ संकल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि तानि ह वा एतानि चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि तस्माद्यद्यपि बहुविदचित्तो भवति नायमस्तीत्येवैनमाहुर्यदयं वेद यद्वा अयं विद्वान्नेत्थमचित्तः स्यादिति अथ यद्यल्पविच्चित्तवान्भवति तस्मा एवोत शुश्रूषन्ते चित्तं ह्येवैषामेकायनं चित्तमात्मा चित्तं प्रतिष्ठा।

छा॰ भा॰
५

चित्तमुपास्वेति स यश्चित्तं ब्रह्मेत्युपास्ते चित्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथ
मानोऽभिसिध्यति यावच्चित्तस्य गतं तत्रास्य यथाकामचारो भवति यश्चित्तं ब्रह्मेत्युपास्तेऽस्ति भगवश्चित्ताद्भूय।
इति चित्ताद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ५ ॥ चित्तं चेतयितृत्वं प्राप्तकालानुरूपबोधवत्त्वमती
तानागतविषयप्रयोजननिरूपणसामर्थ्यं च तत्संकल्पादपि भूयः कथं यदा वै प्राप्तमिदमेवं प्राप्तमिति
चेतयते तदा तदादानाय वा संकल्पयतेऽथ मनस्यतीत्यादि सर्वं वत् तानि संकल्पादीनि एकायनानि चित्तै।
कायनानि चित्तात्मानि चित्तोत्पन्नानि चित्ते प्रतिष्ठितानि विनश्यतानीत्यपि सर्वं वत् किं च चित्तस्य माहात्म्यं।
यस्माच्चित्तं संकल्पादिमूलं तस्माद्यद्यपि बहुविद्बहुशास्त्रादिपरिज्ञानवान्सन्नचित्तो भवति प्राप्तादिचेत।
यितृत्वसामर्थ्यविरहितो भवति तं निपुणा लौकिका नायमस्तीति विद्यमानमप्यसन्तमेवैनमाहुः यच्चायं
किंचिच्छास्त्रादि वेद श्रुतवांस्तदप्यस्य वृथैवेति कथयन्ति कस्माद्यद्ययं विद्वान्स्यादित्थमेव सचित्तो न स्यात्
तस्मादस्य श्रुतमप्यश्रुतमेवेत्याहुरित्यर्थः अथाल्पविदपि यदि चित्तवान्भवति तस्मा एतस्मै तदुक्तार्थ।
ग्रहणाय चेतापि शुश्रूषन्ते श्रोतुमिच्छन्ति यस्माच्च चित्तं ह्येवैषां संकल्पादीनामेकायनमित्यादि सर्वं वत्
चित्तानुपचितो बुद्धिमद्गुणैः स चित्तोपासको ध्रुवानित्यादि चोक्तार्थम् ॥ ५ ॥ ध्यानं वाव चित्ताद्भूयो ध्याय
तीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्वता ध्यायन्तीव देवमनुष्यास्तस्मा
य इह मनुष्याणां महत्तां प्राप्नुवन्ति ध्यानापादांशा इवैव ते भवन्त्यथ येऽल्पाः कलहिनः पिशुना उपवादिनः।
तेऽथ ये प्रभवो ध्यानापादांशा इवैव ते भवन्ति ध्यानमुपास्वेति स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रा
स्य यथाकामचारो भवति यो ध्यानं ब्रह्मेत्युपास्तेऽस्ति भगवो ध्यानाद्भूय इति ध्यानाद्वाव भूयोऽस्तीति तन्मे भग

वानब्रवीतिति ॥ ५ ॥ ध्यानं नाम शास्त्रोक्तेषु देवताद्यालम्बनेष्वचलो भिन्नजातीयैरनन्तरितः प्रत्ययसन्ता
न एकाग्रतेति यमाहुः दृश्यते च ध्यानस्य माहात्म्यं फलतः कथं यथा योगी ध्यायन्निश्चलो भवति ध्यान
फललाभ एवं ध्यायतीव निश्चला दृश्यते पृथिवी ध्यायतीवान्तरिक्षमित्यादि समानमन्यत् देवाश्च मनु
ष्याश्च देवमनुष्याः मनुष्या एव वा देवसमाना देवमनुष्याः शमादिगुणसम्पन्ना मनुष्या देवस्वरूपं न ज
हतीत्यर्थः यस्मादेवं गुणविशिष्टं ध्यानं तस्माद्य इह लोके मनुष्याणामेव धनेन विद्यया गुणैर्वा मह
त्तां महत्त्वं प्राप्नुवन्ति धनादिमहत्त्वहेतुं लभन्त इत्यर्थः ध्यानापादांशा इव ध्यानस्यापादनमापादो ध्यानफल
लाभ इत्येतत् तस्यांशोऽवयवः कलाकाचिद्ध्यानफललाभवन्त इवैव ते भवन्ति निश्चला इव लक्ष्यन्ते न
क्षुद्रा इवाथ ये पुनरल्पाः क्षुद्राः किञ्चिदपि धनादिमहत्त्वैकदेशमप्राप्तास्ते पूर्वोक्तविपरीताः कलहिनः
कलहशीलाः पिशुनाः परदोषोद्भासकाः उपवादिनः परदोषं सामीप्ययुक्तमेव वदितुं शीलं येषां त उपवा
दिनश्च भवन्ति अथ ये महत्त्वं प्राप्ता धनादिनिमित्तं तेऽन्यान्प्रति प्रभवन्तीति प्रभवा विद्याचार्यराजेश्वरादयो
ध्यानापादांशा इवेत्युक्तार्थं अतो दृश्यते ध्यानस्य महत्त्वं फलतोऽतो भूयश्चित्तादतस्तदुपास्स्वेत्याद्युक्तार्थे ॥ ६ ॥
विज्ञानं वाव ध्यानाद्भूयो विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपु
राणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां
नक्षत्रविद्यां सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवांश्च मनुष्यांश्च पशूंश्च वयांसि च तृण
वनस्पतीञ्छ्वापदान्याकीटपतङ्गपिपीलिकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदय
ज्ञं चान्नं च रसं चेमं च लोकममुं च विज्ञानेनैव विजानाति विज्ञानमुपास्स्वेति स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञान

छा॰भा॰
५१

वतोवैसलोकाञ्ज्ञानवतोभिसिध्यति यावद्विज्ञानस्यगतंतत्रास्ययथाकामचारोभवतियोविज्ञानंब्रह्मेत्यु
पास्तेस्तिभगवोविज्ञानाद्भूयइतिविज्ञानाद्वावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥ ७ ॥ विज्ञानंशा
स्त्रविषयकंज्ञानेनतस्यध्यानकारणत्वाज्ज्ञानाद्भूयस्त्वं कथंचतस्यभूयस्त्वमित्याह विज्ञानेनवैऋग्वे
दंविजानातीत्यृग्वेदमितिप्रमाणान्यायस्यार्थज्ञानेध्यानकारणे तथायजुर्वेदमित्यादिसमानम् किं
चपश्वादींश्चधर्माधर्मौचानृतंसिद्धसाधुसाधनीलोकतःस्मान्नैवादृष्टविषयेचसर्वंविज्ञानेनैवविजा
नातीत्यर्थः तस्मादुक्तंध्यानाद्विज्ञानस्यभूयस्त्वं अतोविज्ञानमुपास्वेतिशृणूपासनफलंविज्ञानवतो
विज्ञानेयेष्वविद्यन्तेलोकेष्वनानिज्ञानवतोलोकान् ज्ञानवतश्चाभिसिध्यति अभिप्राप्नोतिविज्ञानेस्यफला
र्थविषयंज्ञानमन्यविषयंनैपुण्यम् तद्वद्भिर्युक्ताँल्लोकान्प्राप्नोतीत्यर्थः यावद्विज्ञानस्येत्यादिसर्वंवत् ॥ ७
बलंवाववविज्ञानाद्भूयोपिह शतंविज्ञानवतामेकोबलवानाकम्पयते सयदाबलीभवत्यथोत्थाताभव
त्युत्तिष्ठन्परिचरिताभवतिपरिचरन्नुपसत्ताभवत्युपसीदन्द्रष्टाभवतिश्रोताभवति मन्ताभवतिबोद्धाभ
वतिकर्ताभवतिविज्ञाताभवतिबलेनपृथिवीतिष्ठतिबलेनान्तरिक्षं बलेनद्यौर्बलेनपर्वताबलेनदेवम
नुष्याबलेनपशवश्चवयांसितृणवनस्पतयःश्वापदान्याकीटपतङ्गपिपीलकं बलेनलोकस्तिष्ठति
बलमुपास्वेतिसयोबलंब्रह्मेत्युपास्तेबलवतोदृ लोकानभिसिध्यतियावद्बलस्यगतंतत्रास्ययथाका
मचारोभवत्यस्तिभगवोबलाद्भूयइतिबलाद्वावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥ ८ ॥ बलमित्यु
न्नोपयोगजनितंमनसोविज्ञेयप्रतिभानसामर्थ्यम् अनाशनादिरागादीनिनवैसाप्रतिभातिभोरनिष्ठतेः
शरीरेपिदेवोस्यानादिसामर्थ्याय स्माद्विज्ञानवतांशतमप्येकःप्राणीबलवानाकम्पयते यथाहस्तीमत्तो

मनुष्याणां प्राणेसम्बन्दिनमपि यस्मादेवमन्नाद्युपयोगनिमित्तं बलं तस्मात्तु हृष्टो बली बलेन तदा सम्भवस्य
योग्यतोत्थानस्य कर्तोत्तिष्ठंश्च गुरूणामाचार्यस्य परिचरिता परिचरणस्य शुश्रूषायाः कर्ता भवति परि
चरंश्चोपसत्ता तेषां समीपगोऽन्तरङ्गः प्रियो भवतीत्यर्थः उपसीदंश्च सामीप्यगः एकाग्रतयाचार्यस्यात्मन
योपदेष्टुर्गुरोर्द्रष्टा भवति ततस्तदुक्तस्य श्रोता भवति ततः इदमित्थमित्युक्तस्य वाक्यस्योपपत्तितस्तदुपपत्तितो मं
ता भवति मन्वानश्च बोद्धा भवति एवमेवेदमिति ततः एवं निश्चित्य तदुक्तार्थस्य कर्तानुष्ठाता भवति वि
ज्ञाता तदनुष्ठानफलस्यानुभविता भवतीत्यर्थः किं च बलस्य माहात्म्यं बलेन वै पृथिवी तिष्ठतीत्याद्युक्तार्थं
अन्नं वाव बलाद्भूयः यस्मात्तस्माद्यद्यपि दश रात्रीर्नाश्नीयाद्यद्यु ह जीवेदथवा द्रष्टाश्रोता मन्ता बोद्धा क
र्ता विज्ञाता भवति अथान्नस्यायै द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता
भवति अन्नमुपास्वेति स योऽन्नं ब्रह्मेत्युपास्तेऽन्नवतो वै स लोकान्पानवतोऽभिसिध्यति यावदन्नस्य गतं तत्रा
स्य यथाकामचारो भवति योऽन्नं ब्रह्मेत्युपास्तेऽस्ति भगवोऽन्नाद्भूय इत्यन्नाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवी
त्विति ॥ ८ ॥ अन्नं वाव बलाद्भूयो बलवद्धेतुत्वात्कथं बलहेतुत्वमित्युच्यते यस्माद्बलकारणमन्नं तस्मा
द्यद्यपि कश्चिद्दश रात्रीर्नाश्नीयात् सोऽन्नोपयोगनिमित्तस्य बलस्य हानान्म्रियते न चेन्म्रियते यद्युह जीवे
त् द्रष्टृत्वादिसामर्थ्यहीनः श्रोता नीवेनायचमजीवन्नपुद्रष्टा भवति गुरोरपि तत एवाश्रोतेत्यादि सर्ववि
परीतं सर्वं भवति अथ यदा बहूनि दिनान्यनशितो नोदर्शनादिक्रियासमर्थः सन्नन्नस्यायी आगमनमायोऽन्न
स्य प्राप्तिरित्यर्थः सा यस्य विद्यते सोऽन्नस्यायी अथैवन्नेन हृष्टो व्यस्य येनायान्नस्यायैद्रष्टेत्यपि पाठ एवमेवा
र्थः द्रष्टेत्यादिकार्यं श्रवणान्न द्रष्टेत्यन्नोपयोगे दर्शनादिसामर्थ्ये ततः स्पष्टमेवान्नमुपास्वेति।

॥ ८ ॥

फलं चान्नवतः प्रभूतान्नैः सलोकान्पानवतः प्रभूतोदकांश्चान्नपानयोर्नित्यसंबंधाल्लोकानभिसिध्यति
समानमन्यत् ॥ ९ ॥ आपो वावान्नाद्भूयस्तस्माद्यदा सुवृष्टिर्न भवति व्याधीयन्ते प्राणा अन्नं कनीयो भ
विष्यतीत्यथ यदा सुवृष्टिर्भवत्यानंदिनः प्राणा भवंति अन्नं बहु भविष्यतीति आप एवेमा मूर्ता येयं पृ
थिवी यदंतरिक्षं यद्द्यौर्यत्पर्वता यद्देवमनुष्या यत्पशवश्च वयांसि च तृणवनस्पतयः श्वापदान्याकीटपतं
गपिपीलकं आप एवेमा मूर्ता अप उपास्वेति स योऽपो ब्रह्मेत्युपास्ते आप्नोति सर्वान्कामांस्तृप्तिमान्भवति
यावदपां गतं तत्रास्य यथाकामचारो भवति योऽपो ब्रह्मेत्युपास्तेऽस्ति भगवोऽद्भ्यो भूय इत्यद्भ्यो वाव भूयोऽस्ती।
ति तन्मे भगवान्ब्रवीत्विति ॥ १० ॥ आपो वावान्नाद्भूयस्योऽन्नकारणत्वात् यस्मादेवं तस्माद्यदा यस्मिन्काले
सुवृष्टिः सस्यहिता शोभना वृष्टिर्न भवति तदा व्याधीयन्ते प्राणा दुःखिनो भवंति किंनिमित्तमित्याह अ
न्नमस्मिन्संवत्सरे नः कनीयोऽल्पतरं भविष्यतीति अथ पुनर्यदा सुवृष्टिर्भवति तदानंदिनः सुखिनो हृष्टाः
प्राणाः प्राणिनो भवंति अन्नं बहु प्रभूतं भविष्यतीत्यप्संभवत्वान्मूर्तस्यान्नस्य आप एवेमा मूर्ता मूर्तिभेदा
कारेण परिणता इति मूर्ताः येयं पृथिवी यदंतरिक्षमित्यादि आप एवेमा मूर्ता अतोऽप उपास्वेति फलं स
योऽपो ब्रह्मेत्युपास्त आप्नोति सर्वान्कामांस्तृप्तिमतो विषयानित्यर्थः अप्संभवत्वाच्च तृप्तेरपामुपासन
तृप्तिमांश्च भवति समानमन्यत् ॥ १० ॥ तेजो वावाद्भ्यो भूयस्तद्वा एतद्वायुमागृह्याकाशमभितपति तदाहु
र्निशोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते तदेतदूर्ध्वाभिश्च तिरश्चीभिर्वि
द्युद्भिराह्रादाश्चरंति तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते तेज
उपास्वेति स यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स तेजस्वतो लोकान्भास्वतोऽपहततमस्कानभिसिध्यति या।

वतेजसो गतं तत्रास्य यथाकामचारो भवति यस्तेजो ब्रह्मेत्युपास्तेऽस्ति भगवस्तेजसो भूय इति तेजसो वाव भूयो
ऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ११ ॥ तेजो वा अद्भ्यो भूयस्तेजसोऽप्कारणत्वात् कथमप्कारणत्वमित्याह यस्मा
द्धेतोस्तेजस्तस्मात्तद्वै एतत्तेजो वायुमागृह्यावष्टभ्य स्वात्मना निश्चलीकृत्य वायुमाकाशमभितपत्याका
शमभिव्याप्नुवत्तपति तदाहुर्लौकिकाः निशोचति संतपति नितपति देहानतो वर्षिष्यति
वै इति प्रसिद्धं हि लोके कारणमभ्युदयते इत्येवं ततः कार्यं भविष्यतीति विज्ञानं तेज एव तत्पूर्वमात्मान
मुद्भूतं दर्शयित्वाथानन्तरमपः सृजतेऽतोऽप्स्रष्टृत्वाद्भूयोऽद्भ्यस्तेजः किं चान्यत् तदेतत्तेज एव स्तनयित्नुरूपेण
वर्षहेतुर्भवति कथमूर्ध्वाभिरूर्ध्वगाभिर्विद्युद्भिस्तिरश्चीभिश्च तिर्यग्गताभिश्च सहाह्रादाः स्तनयित्नुशब्दा
श्चरन्तीति तस्मात्तद्दर्शनादाहुर्लौकिका विद्योतते स्तनयति वर्षिष्यति वा इत्याद्युक्तार्थं अतस्तेज उपास्स्वेति
तस्य तेजस उपासनफलं तेजस्वी वै भवति तेजस्वत एव च लोकान्भास्वतः प्रकाशवतोऽपहततमस्कानत्य
न्तापहततबाह्याध्यात्मिकादितमस्कानभिसिध्यति उक्तार्थमन्यत् ॥ ११ ॥ आकाशो वाव तेजसो भूयानाका
शो वै तत्सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राण्यग्निः आकाशेनाह्वयति आकाशेन प्रतिशृणोत्याकाशे रमत आ
काशे न रमत आकाशे जायते आकाशमभिजायते आकाशमुपास्स्वेति स य आकाशं ब्रह्मेत्युपास्त आका
शवतो वै स लोकान्प्रकाशवतोऽसंबाधानुरुगायवतोऽभिसिध्यति यावदाकाशस्य गतं तत्रास्य यथाकामचारो
भवति य आकाशं ब्रह्मेत्युपास्तेऽस्ति भगव आकाशाद्भूय इति आकाशाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवी
त्विति ॥ १२ ॥ आकाशो वाव तेजसो भूयान्वायुसहितात्तेजसः कारणत्वाद्व्योम्नो वायुमागृह्येति तेजसा
सहोक्तो वायुरिति पृथगिहोक्तः कल्पतः किं चातः कारणं हि लोके कार्याद्भूयो दृष्टं यथा घटादिभ्यो मृत्।

छा॰ भा॰ २२

तथाकाशश्च वायुसहितस्य तेजसः कारणमिति तेजसो भूयान् कथमाकाशे वै सूर्याचंद्रमसावुभौ तेजोरूपौ
विद्युन्नक्षत्राण्यग्निश्च तेजोरूपाण्याकाशेंतर्यच्च यस्यांतर्वर्ति तदल्पं भूय इतरत् किंचाकाशेनाह्वयत्यन्यम
न्यश्चाहूतश्च शृणोत्याकाशेन शृणोत्यन्योक्तंच प्रत्यन्यः प्रतिशृणोत्याकाशे रमते क्रीडत्यन्योन्यं सर्वस्तथा
न रमते चाकाशे बंधादिवियोगे आकाशे जायते न मूर्तेनावष्टब्धे तथाकाशमभिलक्ष्यांकुरादिर्जायते न।
प्रतिलोमम् अत आकाशमुपास्स्व फलं च शृण्वाकाशवतो वै विस्तारयुक्तान्सविधालोकान्प्रकाशवतः प्रकाशा
काशयोर्नित्यसंबंधात्प्रकाशवतश्च लोकानसंबाधान् संकथनसंबाधः संबाधोन्योन्यपीडनं तद्रहितान्
संबाधानुरुगायवतो विस्तीर्णगतीन्विस्तीर्णप्रचारान्लोकानभिसिध्यति यावदाकाशस्येत्याद्युक्तार्थम्
स्मरो वाव आकाशाद्भूयस्तस्माद्यद्यपि बहव आसीरन्न स्मरंतो नैव ते कंचन शृणुयुर्न मन्वीरन्न विजानीरन्यदा
वाव ते स्मरेयुरथ शृणुयुरथ मन्वीरन्नथ विजानीरन्स्मरेण वै पुत्रान्विजानाति स्मरेण पशून्स्म
रमुपास्स्वेति स यः स्मरं ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य यथाकामचारो भवति यः स्मरं ब्रह्मेत्युपास्तेऽस्ति भगवः
स्मराद्भूय इति स्मराद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ १३ ॥ स्मरणं स्मरोन्तःकरणधर्मः स च आकाशा
द्भूयानिति द्रष्टव्यम् लिंगव्यत्ययेन सति स्मरणे हि सत्याकाशादि सर्वमर्थवत्स्मरणवतो भोग्यत्वात् असति
स्मरणे सदप्यसदेव सत्त्वकार्याभावात् नापि सत्त्वं स्मृत्यभावे शक्यमाकाशादीनामवगंतुमिति अतः स्म
रणस्याकाशाद्भूयस्त्वं दृश्यते हि स्मरणस्य लोके भूयस्त्वं हि यस्मात्तस्माद्यद्यपि समुदिता बहव एकस्मिन्नासी
रन्नुपविष्टा उपविष्टास्तत्रासीनाश्च तेन्योन्यभाषितमपि न स्मरंतस्ते स्मरन्नैव ते कंचन शब्दं शृणुयुः तथा न मन्वीर
न्मंतव्यं चेत्स्मरेयुस्तदा मन्वीरन् स्मृत्यभावान्न मन्वीरन् तथा न विजानीरन् यदा वाव ते स्मरेयुः मंतव्यं वि ॥ १२ ॥

विज्ञातव्यं च श्रोतव्यं चाप्यस्मरणेव स्थमन्वीरन् अथ विजानीरन् तथा स्मरेणैव सम्पुत्रान्पशूनिति पुत्रानि
जानाति स्मरेण पशूनतो भूयस्त्वात्स्मरणस्य उपास्वेत्याद्युक्तार्थमन्यत् ॥ १३ ॥ आशा वाव स्मराद्भूयस्याशे-
द्धो वै स्मरो मन्त्रानधीते कर्माणि कुरुते पुत्रांश्च पशूंश्चेच्छत इमं च लोकममुं चेच्छत इत्याशामुपास्स्वे-
ति स य आशां ब्रह्मेत्युपास्ते आशयास्य सर्वे कामाः समृध्यन्त्यमोघा हास्याशिषो भवन्ति यावदाशाया गतं
तत्रास्य यथाकामचारो भवति य आशां ब्रह्मेत्युपास्ते । अस्ति भगव आशाया भूय इत्याशाया वाव भूयोऽस्तीति ।
तन्मे भगवान्ब्रवीत्विति ॥ १४ ॥ अप्राप्तवस्त्वाकाङ्क्षा आशा तृष्णा काम इति यामाहुः पर्यायैः सा च स्मराद्भूयसी ।
कथमाशया ह्यन्तःकरणस्थया स्मरति स्मर्तव्यमाशाविषयरूपं स्मरन्नसौ स्मरो भवति इत्यत आशेद्धः आ-
शया विवर्धितः स्मरभूतः स्मरन् ऋगादीन्मन्त्रानधीते अधीत्य च तदर्थं ब्राह्मणेभ्यो विधीश्च श्रुत्वा कर्माणि
कुरुते तत्फलाशयैव पुत्रांश्च पशूंश्च कर्मफलभूतानिच्छते अभिवाञ्छत्याशयैव तत्साधनान्यनुतिष्ठति
इमं च लोकमाशयैव स्मरन् लोकसंग्रहहेतुभिरिच्छते अमुं च लोकमाशयेद्धः स्मरंस्तत्साधनानुष्ठानेनेच्छते
इत्यत आशारशनावबद्धं स्मराकाशादिनामपर्यन्तं जगच्चक्रीभूतं प्रतिप्राणि । अत आशायाः स्मरादपि भूयस्त्व-
मित्यत आशामुपास्स्व यस्त्वाशां ब्रह्मेत्युपास्ते शृणु तस्य फलं आशया सदोपासितया अस्योपासकस्य सर्वे कामाः सम-
ृध्यन्तीति समृद्धिं गच्छन्ति अमोघा हास्याशिषः प्रार्थनाः सर्वा भवन्ति यत्प्रार्थितं तत्सर्वमवश्यं भवतीत्यर्थः यावदाशा-
या गतमित्यादि पूर्ववत् । नामोपक्रममाशान्तं कार्यकारणलेन निमित्तनैमित्तिकत्वेन चक्रीभूतं भूयस्तया-
वस्थितं यन्निमित्तं सद्भावमाशारशनापाशैर्विपाशितं सर्वतो विसृतं यस्मिन्प्राणे समर्पितं ये-
न च सर्वतो व्यापिनान्तर्बहिर्गतेन सूत्रे मणिगणा इव स्यूतं वेणे प्रथितं विधृतं च स एषः ॥ १४ ॥ प्राणो वाव आ-

शायाभूयान् यथावाअरानाभौसमर्पिताएवमस्मिन्प्राणेसर्वंसमर्पितंप्राणःप्राणेनयातिप्राणःप्राणंददा
तिप्राणायददातिप्राणोहपितामाताप्राणोभ्राताप्राणःस्वसाप्राणआचार्यःप्राणोब्राह्मणःसयदिपितरं।
वामातरंवाभ्रातरंवास्वसारंवाचार्यंवाब्राह्मणंवाकिंचिद्भृशमिवप्रत्याहधिक्त्वास्त्वित्येवैनमाहुःपितृहा।
वैत्वमसिमातृहावैत्वमसिभ्रातृहावैत्वमसिस्वसृहावैत्वमसि इति अथयद्यप्येनानुत्क्रान्तप्राणाञ्छूलेनस
मासंव्यतिषंदहेत् नैवैनंब्रूयुःपितृहासीतिनाचार्यहासीतिनब्राह्मणहासीतिप्राणोह्येवैतानिसर्वाणि।
भवतिसवाएषएवंपश्यन्नेवंमन्वानएवंविजानन्नतिवादीभवतितंचेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीत्
ब्रूयान्नापह्नुवीत॥१५ प्राणोवैआशायाभूयान् कथंतस्यभूयस्त्वमित्याहदृष्टान्तेनसमर्थयंस्तद्भूयस्त्वंयथा
वैलोकेरथचक्रस्याराःरथनाभौसमर्पिताःसंप्रोताःसंप्रविष्टाइत्येतदेवमस्मिंल्लिङ्गसंघातरूपेप्राणेप्रज्ञा
त्मनिदेहिकेमध्येयस्मिन्परदेवतानामरूपव्याकरणायादर्शादौप्रतिबिंबवज्जीवेनात्मनानुप्रविष्टाय
स्यमहाराजस्येवसर्वाधिकारीश्वरस्यकस्मिन्नहमुत्क्रान्तउत्क्रान्तोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रति
ष्ठास्यामीतिसप्राणमसृजतेतिश्रुतेः यश्चकार्येवानुगतईश्वरंतद्यथारथस्यारेषुनेमिरर्पितानाभावरा
अर्पिताएवमेवैताभूतमात्राःप्रज्ञामात्रास्वर्पिताःप्रज्ञामात्राःप्राणेऽर्पिताःसएषप्राणएवप्रज्ञात्मेतिनिर्दिष्टःकौ
षीतकिनमनएवमस्मिन्प्राणेसर्वंयथोक्तंसमर्पितमतःसएषप्राणोऽपरतन्त्रःप्राणेनस्वशक्त्यैवयातिनान्यकृ
तेनगमनादिक्रियास्वसामर्थ्यमित्यर्थः सर्वंक्रियाकारकफलभेदजातंप्राणएवनप्राणाद्बहिर्भूतमस्ती
तिमकारणार्थः प्राणःप्राणंददातियद्ददातितत्स्वात्मभूतमेव यस्मैददातितदपिप्राणायैव अतःपित्रा
द्यात्मापिप्राणएवपित्रादिशब्दानांप्रसिद्धार्थोऽस्तमनेनप्राणविषयत्वमिमदुच्यते सनिर्दिष्टःप्राणेपित्रादि।

षु पित्रादिशब्दप्रयोगात्तदुत्क्रान्तौ चाप्रयोगात् कथं तर्हि स्याद्यः कश्चित्पित्रादीनामन्यतमं यद्वि भृशमिव
तदननुरूपमिव किंचिद्वचनं त्वंकारादियुक्तं ब्रूयात् तदैनं पार्श्वस्था आहुर्विवेकिनो धिक्त्वास्तु धिगस्तु त्वा
मित्येवं पितृहा वै त्वं पितृहेत्यादि अथैनानेवोत्क्रान्तप्राणांस्त्यक्तदेहान्यद्यपि शूलेन समासं व्यत्य
तिषं दहेदेवमतिक्रूरमपि कर्म समासव्यासादिप्रकारेण दहन्नलक्षणं तदहः संबद्धमेव तं नैवैनं ब्रू
युः पितृहेत्यादि तस्मादन्वयव्यतिरेकाभ्यामवगम्यते एतत्पित्राद्याख्यापि प्राण एवेति तस्मात्प्राणो ह्येवैतानि
पित्रादीनि सर्वाणि भवति चलानि स्थिराणि च सर्वाण्येव प्राणविदेवं यथोक्तप्रकारेण पश्यन् फलतोऽत्र
भवत्येवमन्वान उपपत्तिभिश्चिन्तयन्नेवं विजानन्नुपपत्तिभिः संयोज्य तमेवेति निश्चयं कृत्वेत्यर्थः मनन
विज्ञानाभ्यां हि संभृतः शास्त्रार्थो निश्चितो दृढो भवेदेवं पश्यन्नतिवादी भवति नामाद्याशां तमतीत्य वद
नशीलो भवतीत्यर्थः तं चेद्ब्रूयुस्त्वमतिवादीति सर्वेदा सर्वः श्रुत्यैनोऽनाद्याशांतमतीत्य वर्तमाने प्राणमेव
वदतीत्येवं पश्यन्नतिवदनशीलमतिवादिनं ब्रूयादित्थं भयस्थेयं स्यज्ञतः प्राणमात्मात्वमिति ब्रुवाणं ब्रू
यादतिवाद्यसीति बाढमतिवाद्यस्मीति ब्रूयान्नापह्नुवीत कस्मात्स यस्मात्स नापह्नुवीत यस्मात्प्राणं सर्वेश्वरमहमस्मीति।
आत्मत्वेनोपगतः ॥ १५ ॥ एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव
विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति ॥ १६ ॥ अथ स एष नारदः सर्वातिशयं प्राणं स्वमात्मानं।
सर्वात्मानं श्रुत्वा नातः परमस्तीत्युपरराम न पृष्टवांस्तु किमस्ति भगवः प्राणाद्भूय इति पूर्ववत् तमेवंविकारा
नृतब्रह्मविज्ञानेन परितुष्टमकृतार्थं परमार्थसत्यातिवादिनमात्मानं मन्यमानं योग्यं शिष्यं मिथ्याग्रहाद्विमो
चयन्नाह भगवान्सनत्कुमारः एष तु वा अतिवदति यः मन्द्वं स्थापितं प्राणविदतिवादी परमार्थविज्ञाना

छा. भा.
५४

शाया भूयान् यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पितं प्राणः प्राणेन याति प्राणः प्राणं ददा
ति प्राणाय ददाति प्राणो ह पिता माता प्राणो भ्राता प्राणः स्वसा प्राणः आचार्यः प्राणो ब्राह्मणः स यदि पितरं वा
वा मातरं वा भ्रातरं वा स्वसारं वाचार्यं वा ब्राह्मणं वा किंचिद्भृशमिव प्रत्याह धिक्त्वास्त्वित्येवैनमाहुः पितृहा
वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमसि इति अथ यद्यप्येनानुत्क्रान्तप्राणाञ्छूलेन स
मासं व्यतिषं दहेत् नैवैनं ब्रूयुः पितृहासीति नाचार्यहासीति न ब्राह्मणहासीति प्राणो ह्येवैतानि सर्वाणि।
भवति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं चेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीति
ब्रूयान्नापह्नुवीत ॥ १५ प्राणो वा आशाया भूयान् कथं तस्य भूयस्त्वमित्याह दृष्टान्तेन समर्थयंस्तद्भूयस्त्वं यथा
वै लोके रथचक्रस्यारा रथनाभौ समर्पिताः संप्रोताः संप्रविष्टा इत्येतदेवमस्मिंल्लिंगसंघातरूपे प्राणे प्रज्ञा
त्मनि देहेन्द्रियेष्वनुगते यस्मिन्परदेवता नामरूपव्याकरणाय आदर्शादौ प्रतिबिंबवज्जीवेनात्मनानुप्रविष्टाय
स्य महाराजस्येव सर्वाधिकारी तस्य कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रति
ष्ठास्यामीति स प्राणमसृजतेति श्रुतेः यश्च छायेवानुगत ईश्वरं तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा
अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिताः स एष प्राण एव प्रज्ञात्मेत्युक्तं कौ
षीतकेऽत एवमस्मिन्प्राणे सर्वं यथोक्तं समर्पितमतः स एष प्राणोऽपरतन्त्रः प्राणेन स्वशक्त्यैव याति नान्यकृ
तेन गमनादिक्रियासु सामर्थ्यमित्यर्थः सर्वं क्रियाकारकफलभेदजातं प्राण एव न प्राणाद्बहिर्भूतमस्ती
ति प्रकरणार्थः प्राणः प्राणं ददाति यद्ददाति तत्स्वात्मभूतमेव यस्मै ददाति तदपि प्राणायैव अतः पित्रा
द्याख्योऽपि प्राण एव पित्रादिशब्दानां प्रसिद्धार्थोत्सर्गेण प्राणविषयत्वमित्युच्यते सति हि प्राणे पित्रादि।

शुपित्रादिशब्दप्रयोगान्नउक्तोनाचाप्रयोगात् कथंतर्हि स्यादित्यतः कश्चित्पित्रादीनामन्यतममयथावद्भृशमिव
तदननुरूपमिव किंचिद्वचनं त्वंकारादियुक्तं प्रत्याह तदैनं पार्श्वस्था आहुर्विवेकिनो धिक्त्वास्त्वित्यस्तु त्वा
मित्येवं पितृहा वै त्वं पितृहेत्यादि अथैनानेवोत्क्रान्तप्राणांस्त्यक्तदेहान् यद्यप्यशूलेन समासं व्यत्यस्य
तिषं दहेद्देवमतिक्रूरमपि कर्म समासव्यासादिप्रकारेण दहन्न स्थानान्तरे ह संबद्धमेव जीवाणि नैवैनं ब्रु
पितृहेत्यादि न स्यात् द्वयव्यतिरेकाभ्याममवगम्यते पुत्र पित्राद्याख्याऽपि प्राणेष्वेतितु तस्मान्प्राणा ह्येवैतानि
पित्रादीनि सर्वाणि भवन्ति चलानि स्थिराणि च सर्वाण्येव प्राणा विद्वेवं यथा तु पश्चात् प्रमाणपश्यन्नेवं तत्र
भवन्नेवमन्वानउपपत्तिभिर्निश्चिन्वन् एवं विजानन्नुपपत्तिभिः सेयानेवं मते इति निश्चयं कुर्वन्नित्यर्थः मनन
विज्ञानाभ्यां हि संभृतः शास्त्रार्थो निश्चितो रत्नो भवेदेवं पश्यन्नतिवादी भवति नामाद्याशान्तमतीत्य वद
नशीलोऽतिवादी भवतीत्यर्थः तं चेद्ब्रूयुस्त्वमेवमतिवादीति सर्वोदामर्वः प्राणो नामाद्याशान्तमतीत्यवर्तमाने प्राणमेव
वदतीत्येवं पश्यन्नतिवदनशीलमतिवादिनं ब्रूयादित्यभिप्रायेण सज्जनाः प्राणब्रह्मात्मास्मीति ब्रुवाणं ब्रू
युरित्यतिवाद्यसीति ब्राह्मणातिवाद्यसीति ब्रूयात्तान्नापह्नुवीत कस्माद्यस्मात् नापह्नुवीत यस्मात् प्राणो सर्वेश्वरः ह्यस्मसीति।
अत्मस्मेतोपगतः ॥ १५ ॥ एषतु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव
विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति ॥ १६ ॥ अथ स एष नारदः सर्वातिशयं प्राणं स्वमात्मानं
सर्वात्मानं श्रुत्वा नातःपरमस्तीत्युपरराम न पूर्ववत्किमस्ति भगवः प्राणाद्भूय इति पप्रच्छ यतस्तमेवं विका
नृतब्रह्मविज्ञानेन परितुष्टमकृतार्थं परमार्थसत्यातिवादिनमात्मानं मन्यमानं योग्यं शिष्यं मिथ्याग्रहाद्विमो
चयिष्यन्नाह भगवान्सनत्कुमार एष तु वा अतिवदतीत्यमहदेवस्याभिन्नप्राणविदतिवादी परमार्थविज्ञा

छा. भा.
५५

यथेदं तु न स्यातिवादित्वम् वस्तुभूमात्मेस्सर्वात्मकातं न त्वं परमार्थं स्मं वेद सो नातिवादीत्यत आह एष तु वा अ
तिवदति यः सत्येन परमार्थसत्यात्मविज्ञानवत्तयातिवदति सोऽहं त्वा प्रपन्नोऽहं भगवः सत्येनातिवदानि तथा
सोऽतिवदनक्षम भगवान्यथाहं सत्येनातिवदानीत्यभिप्रायः यद्येवं सत्येनातिवदितुमिच्छसि सत्यमेव तु तावद्
हि विजिज्ञासितव्यमित्युक्त आह नारदः अथ सत्यं नाहं सत्यं भगवो विजिज्ञास इति विशेषेण ज्ञातुमिच्छेयं त्वत्तोऽह
मिति ॥१६॥ यदा वै विजानात्यथ सत्यं वदति नाविजानन्सत्यं वदति विजानन्नेव सत्यं वदति विज्ञानं त्वेव वि
जिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञास इति ॥१७॥ यदा वै सत्यं परमार्थतो विजानाति इदं परमार्थ
तः सत्यमिति ततोऽनृतं विकारजातं वाचारंभणं हित्वा सर्वविकारावस्थं सदेवैकं सत्यमिति तदेवाथ वद
ति यद्वदति ननु विकारोऽपि सत्यमेव नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः प्राणा वै सत्यं तेषामेष सत्यमि
ति श्रुत्यन्तरात् सत्यमुक्तं न तु तत्र विकारस्य ननु परमार्थापेक्षा सा किं तर्हि इन्द्रियविषयत्वापेक्षं
सद्भूतत्वप्रत्ययमेव सत्यमित्युक्तम् न हि तेन परमार्थसत्यस्यापलाप इह विवक्षित इति माणवेसत्यं तेषामेष स
त्यमिति वाक्यमिति हृदयमिदमेव इहतु परमार्थविज्ञानात्प्राणविषयाभिमानाद्यपास्य नारद यत्सदेव
सत्यं परमार्थतो भूमाख्यं तद्विज्ञापयिष्यामीत्येवं विशेषतो विवदितो याः नाविजानान्सत्यं वदति यस्त्ववि
जानन् वदति स ह्याग्न्यादीन्नामादीन्परमार्थसद्रूपान्मन्यमानो वदति न तु ते रूपत्रयव्यतिरेकेण प
रमार्थतः सन्ति तथा नामरूपविकारा अपि सद्रूपेण सत्यानेव सन्तीत्यतो नाविजानन्सत्यं वदति विजानन्नेवं सत्यं
वदतीति न च तत्सत्यविज्ञानमविजिज्ञासितमपरोक्षीकर्तुं शक्यत इत्याह विज्ञानं त्वेव विजिज्ञासितव्यमिति
यद्येवं विज्ञानं भगवो विजिज्ञास इति ॥१७॥ यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति मत्वैव वि

जानाति मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति ॥ १८ ॥ एवं मत्यादीनां चोत्तरोत्तरकारणक-
रोत्वं तानोर्ध्वंर्ध्वं हेतुत्वमाख्येयं यदा वै मनुते इति स्वस्मिन्मननं तत्कारणं तद्विषयः आदरः ॥ १८ ॥ य-
दा वै श्रद्दधात्यथ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास इति १९ ॥
यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठञ्छ्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति निस्तिष्ठा त्वेव विजिज्ञासि-
तव्येति निस्तिष्ठां भगवो विजिज्ञास इति २० ॥ यदा वै करोत्यथ निस्तिष्ठतीति कृतिं भगवो विजिज्ञास
इति ॥ २१ ॥ आस्तिक्यबुद्धिः श्रद्धा निष्ठा तु गुरुशुश्रूषादितत्परत्वं ब्रह्मविज्ञानाय यदा वै करोतीति कृति-
रिन्द्रियसंयमश्चित्तैकाग्रताकरणं च तस्यां हि सत्यां निष्ठादीनि यथोक्तानि भवन्ति विज्ञानावसानानि ॥ २१
यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमि-
ति सुखं भगवो विजिज्ञास इति ॥ २२ ॥ साऽपि कृतिर्यदा सुखं लभते सुखं निरतिशयं वक्ष्यमाणं लब्धव्यं
मयेति मन्यते तदा भवतीत्यर्थः यथा दृष्टफलां कृतिं लब्ध्वापि नासुखं लब्ध्वा करोति भविष्यदपि फलं
लब्धव्यमपेक्ष्यैव इह हि पुरुषार्थप्रवृत्तेः अथेदानीं कृत्यादिषूत्तरोत्तरे सति सत्यं स्वयमेव प्रतिभासत इति
तद्विज्ञानाय पृथग्यत्नः कार्य इति प्राप्तेऽनन्तर इदमुच्यते सुखं त्वेव विजिज्ञासितव्यमित्यादि सुखं भगवो वि-
जिज्ञास इत्यभिमुखीभूयाह ॥ २२ ॥ यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासि-
तव्य इति भूमानं भगवो विजिज्ञास इति ॥ २३ ॥ यो वै भूमा महन्निरतिशयं बह्विति पर्यायाः तत्सुखं तेना-
र्वाक्सातिशयत्वादल्पं अतस्तस्मिन्नल्पे सुखं नास्त्यल्पस्याधिकतृष्णाहेतुत्वात् तृष्णा च दुःखबीजं न हि दुः-
खबीजं सुखं दृष्टं ज्वरादि लोके तस्माद्युक्तं नाल्पे सुखमस्तीत्यतो भूमैव सुखं तृष्णादिदुःखबीजासम्भवा-

छा॰ भा॰
९९

न भूत्वः किंलक्षणोऽसौ भूमेत्याह । यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाथ यत्रान्यत्
पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यं स भगवः कस्मिन्प्रतिष्ठित इति स्वे महि
ति स्वे महिम्नि यदि वा न महिम्नीति गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतना
नीति नाहमेवं ब्रवीमि ब्रवीमीति होवाचान्यो ह्यन्यस्मिन्प्रतिष्ठित इति २४ ॥ यत्र यस्मिन्भूम्नि तत्त्वे नान्य
द्द्रष्टव्यं अन्येन करणेन द्रष्टा विभक्तो दृश्यान्तरं न पश्यति तथा नान्यच्छृणोति नामरूपयोरेवान्तर्भावाद्विष
यभेदस्य तद्ग्राहकयोरेव दर्शनश्रवणयोर्ग्रहणमन्येषां चोपलक्षणार्थं मननं त्वत्रोक्तं द्रष्टव्यम्
न मनुत इति प्रायशो मननपूर्वकत्वाद्विज्ञानस्य तथा नान्यद्विजानातीत्येवंलक्षणो यः स भूमा किमत्र
प्रसिद्धान्यदर्शनाभावो भूम्न्युच्यते नान्यत्पश्यतीत्यादिना अथान्यन्न पश्यति आत्मानं पश्यतीत्यादिना
अथान्यन्न पश्यति आत्मानं पश्यतीत्येतत् किं चातो यद्यन्यदर्शनाद्यभावमात्रमुच्यते तदा द्वैतसंव्यवहा
रविलक्षणो भूमेत्युक्तं भवति अथान्यदर्शनविशेषप्रतिषेधेनात्मानं पश्यतीत्युच्यते तदैकस्मिन्नेव
क्रियाकारकफलभेदोऽभ्युपगतो भवेत् यद्येवं को दोषः स्यात् नन्वयमेव दोषः संसारानिवृत्तिः क्रिया
कारकफलभेदो हि संसार इत्यात्मैकत्व एव क्रियाकारकफलभेदः संसारविलक्षण इति चेन्न आत्मनो निर्वि
शेषकत्वाभ्युपगमे दर्शनादिक्रियाकारकफलभेदाभ्युपगमस्य शब्दमात्रत्वात् अन्यदर्शनाद्यभावोक्ति
पक्षेऽपि यत्रेत्यन्यन्न पश्यतीति च विशेषणमनर्थकं स्यादिति चेत् दृश्यते हि लोके यत्र शून्ये गेहेऽन्यमप
श्यतीत्युक्ते स्तंभादीनात्मानं चैव न पश्यतीति गम्यते एवमिहापीति चेन्न तत्त्वमसीत्येकत्वोपदेशादधिक
रणाधिकर्तव्यभेदानुपपत्तेः तथा सदेकमेवाद्वितीयं सत्यमिति षष्ठे निर्धारितत्वात् अदृश्येऽनात्म्येऽनि

रूपं निषतिरूपमस्य विज्ञातारमरे केन विजानीयादित्यादिश्रुतिभ्यः स्वात्मनि दर्शनाद्यनुपपत्तिः यत्रेति वि-
शेषणमनर्थकं प्राप्नोतीति चेन्न अविद्याकृतभेदापेक्षत्वात् यथा सत्त्वैकत्वाद्वितीयत्वं बुद्धिप्रकृतामपेक्ष्य
सदेकमेवाद्वितीयमिति संख्याद्यनर्हमप्युच्यते एवं भूम्न्येकस्मिन्नेव यत्रेति विशेषणमविद्यावस्थाया-
दर्शनाद्यनुवादेन च भूम्नस्तदभावलक्षणस्य विवक्षितत्वात् यत्रान्यत्पश्यतीति विशेषणं तस्मात्स्वरूपव्यव-
हारे भूम्नि नान्येतीति समस्तार्थः अथ यत्राविद्याविषयेऽन्योऽन्यत्पश्यतीति तदल्पमविद्याकालभावीत्य-
र्थः यथा स्वप्नदृष्टवस्तु नकालसम्भावि तद्वत् तत एव तन्मर्त्यं विनाशि स्वप्नवस्तुवदेव तद्विपरीतो भूमा यस्त-
दमृतं तेन कश्चिन्मृतत्वपरः स तर्हि एवंलक्षणो भूमा हे भगवन् कस्मिन्प्रतिष्ठित इत्युक्तवन्तं नारदं प्रत्याह सन-
त्कुमारः स्वे महिम्नीति स्वे आत्मीये महिम्नि माहात्म्ये विभूतौ प्रतिष्ठितो भूमा यदि प्रतिष्ठामिच्छसि क्वचिद्यदि
वा परमार्थमेव पृच्छसि न महिम्न्यपि प्रतिष्ठित इति ब्रूमो प्रतिष्ठितोऽनाश्रितो भूमा क्वचिदपीत्यर्थः यदि स्व-
महिम्नि प्रतिष्ठितो भूमा कथं तर्ह्यप्रतिष्ठित इत्युच्यते अत्र शृणु गोअश्वादीह महिम इत्याचक्षते गावश्चाश्वा-
श्च गोअश्वम् इहैकवद्भावः सर्वत्र गवाश्वादि महिमेति प्रसिद्धम् तदाश्रितस्तत्प्रतिष्ठश्चैत्रो भवति यथा
नाहमेवं स्वतोऽन्यं महिमानमाश्रितो भूमा चैत्रवदिति ब्रवीम्यत्र हेतुत्वेनान्योऽन्यस्मिन्प्रतिष्ठित इति व्यव-
हितेन संबन्धः किं त्वेवं ब्रवीमीति होवाच स एवेत्यादि कस्मात्पुनर्न क्वचित्प्रतिष्ठित इत्युच्यते ॥ २४ ॥ स
एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदं सर्वमिति अथातोऽहंकारादेश एवा-
हमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति स वा एष ए-
वं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड्भवति न स्य सर्वेषु लो-

छा॰भा॰
९१

षु कामचारो भवत्यथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषां सर्वेषु लोकेष्वकामचारो भवति ॥ २५
यस्मात्स एव भूमाधस्तात्तद्व्यतिरेकेणान्यद्द्वितीयं येन यस्मिन्प्रतिष्ठितः स्यात् न चोपरिष्टादित्यादि समानम् स
ति हि भेदेनान्यस्मिन्भूमा प्रतिष्ठितः स्यात् न तु तदस्ति स एव सर्वं न त्वस्मादन्योऽस्ति कश्चिद्यत्र प्रतिष्ठितो यत्र नान्यत्प
श्यतीत्यधिकरणाधिकर्तव्यतानिर्देशात् स एवाधस्तादिति च परोक्षेण निर्देशात् द्रष्टुर्जीवादन्यो भूमा स्यादि
ति शंका कस्यचिन्मा भूदित्यत आहाथातोऽहंकारादेशोऽहंकारेणादिश्यत इत्यहंकारादेशो द्रष्टुरनन्यत्वदर्श
नार्थं भूमैव निर्दिश्यतेऽहंकारेणाहमेवाधस्तादित्यादिनाहंकारेण देहादिसंघातोऽप्यादिश्यतेऽविवेकिभि
रित्यतस्तदाशंका मा भूदित्यथानन्तरमात्मादेश आत्मनैव केवलेन सत्स्वरूपेण शुद्धेनादिश्यते आत्मै
व सर्वतः सर्वमित्येकमजं सर्वतो व्योमवत्पूर्णमन्यशून्यं पश्यन्स वा एष विद्वान्मननविज्ञानाभ्यामात्मरति
रात्मन्येव रती रमणं यस्य सोऽयमात्मरतिस्तथात्मक्रीडो देहमात्रसाधना रतिर्बाह्यसाधना क्रीडा लोके स्त्रीभिः
सखिभिश्च क्रीडतीति दर्शनान्न तथा विदुषः किं तर्हि आत्मविज्ञाननिमित्तमेवोभयं भवतीत्यर्थः मिथु
नं द्वन्द्वजनितं सुखं तदपि द्वन्द्वनिरपेक्षमेव यस्य विदुषः तथात्मानन्दः शब्दादिनिमित्त आनन्दोऽविदुषां न त
था विदुषः किं तर्ह्यात्मनिमित्तमेव सर्वं सर्वदा सर्वप्रकारेण देहजीवितभोगादिनिमित्तं बाह्यवस्तुनिरपे
क्ष इत्यर्थः स एवंलक्षणो विद्वाञ्जीवन्नेव स्वाराज्येऽभिषिक्तः पतितेऽपि देहे स्वराडेव भवति यत एवं तस्य सर्वेषु
लोकेषु कामचारो भवति प्राणादिषु सर्वभूमिषु तथास्येति तावन्मात्रपरिच्छिन्नं कामचारत्वमुक्तं अन्यरा
जत्वं चार्थप्राप्तमिति प्रापयन्नाह यथाप्राप्तस्वाराज्यकामचारत्वानुवादेन तन्निवृत्तिरिहोच्यते स्वराडित्या
दिना अथ येऽतोऽन्यथातो उक्तदर्शनादन्यथा वैपरीत्येन यथोक्तमेव वा सम्यङ् न विदुस्तेऽन्यराजानो भवन्त्य

नः एव राजा स्वामी येषां तेऽन्यराजानस्ते च क्षय्यलोकाः क्षय्यो लोको येषां ते क्षय्यलोका भेददर्शनस्याल्पवि
षयत्वात् अल्पं च तेन मर्त्यमित्यवोचाम तस्माद्द्वैतदर्शिनस्ते क्षय्यलोकाः स्वदर्शीनां तद्विपरीतो च भवति त
त एव तेषां सर्वेषु लोकेषु कामचारो भवति तस्य ह वा एतस्यैवमादिश्या राज्यं प्राप्तस्य ॥ २५ ॥ तस्य ह वा ए
तस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मनः प्राणः आत्मत आशा आत्मतः स्मर आत्मत आकाश आत्म
तस्तेज आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानमात्मतश्चित्तमात्म
तः संकल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतो मंत्रा आत्मतः कर्माण्यात्मत एवेदं सर्वमिति ॥ ॥
तस्य ह वा एतस्यैवमादिश्या राज्यं प्राप्तस्य प्रकृतस्य विदुष इत्यर्थः प्राक् सदात्मविज्ञानात् स्वात्मनोऽन्यस्मात्सतः
प्राणादेरुत्पत्तिप्रलयावभूतां सदात्मविज्ञाने तु सतीदानीं स्वात्मन एवं संवृत्तौ तथा सर्वोऽप्यन्योऽपि व्य
वहार आत्मत एव विदुषः किं च तदेतस्मिन्नर्थे एष श्लोको मंत्रोऽपि भवति ॥ ॥ न पश्यो मृत्युं पश्यति न रोगं न
नोत दुःखतां सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः इति स एकधा भवति त्रिधा भवति पंचधा सप्तधा नवधा
चैव पुनश्चैकादश स्मृतः शतं च दश चैकश्च सहस्राणि च विंशतिराहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृ
तिः स्मृतिलाभे सर्वग्रंथीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान्सनत्कुमारस्तं स्कं
द इत्याचक्षते तं स्कंद इत्याचक्षते ॥ २६ ॥ इति छांदोग्ये सप्तमः प्रपाठकः ॥ ७ ॥ न पश्यतीति पश्यः यथोक्तदर्शी
विद्वानित्यर्थः मृत्युं मरणं रोगं ज्वरादिं दुःखतां दुःखभावं चापि पश्यति सर्वं ह सर्वमेव स पश्यः पश्यत्यात्मान
मेव सर्वं ततः सर्वमाप्नोति सर्वशः सर्वप्रकारैरिति किंच स विद्वान् प्राक् सृष्टिप्रभेदादेकधैव भवति एकधैव
सन् त्रिधादिभेदैरनंतभेदप्रकारो भवति सृष्टिकाले पुनः संहारकाले मूलस्वरूप एव पारमार्थिकमेकधाभावं भ

छा.भा.
८८

तिपद्यते स्वतंत्र एवेति विद्याफलेन प्ररोचयन्नेति अथेदानीं यथोक्ताया विद्यायाः सम्यगवभासकारणं
सत्त्वावभासकारणस्य वादेहस्य विशुद्धिकारणमुपदिश्यते आहारशुद्धौ आहियत इत्याहारः शब्दादि
विषयविज्ञानं भोक्तुर्भोगायाहियते तस्य विषयोपलब्धिलक्षणस्य विज्ञानस्य शुद्धिराहारशुद्धिः रागद्वे
षमोहदोषैरसंसृष्टं विषयविज्ञानमित्यर्थः तस्यामाहारशुद्धौ सत्यां तद्वतोऽन्तःकरणस्य सत्त्वस्य शुद्धिर्नै
र्मल्यं भवति सत्त्वशुद्धौ च सत्यां यथावगते भूमात्मनि ध्रुवाविच्छिन्ना स्मृतिरविस्मरणं भवति तस्यां च लब्धा
यां स्मृतिलम्भे सति सर्वेषामविद्याकृतानर्थपाशरूपाणामनेकजन्मान्तरानुभवभावनाकठिनीकृता
नर्थपाशरूपाणामनेकजन्मान्तरानुभवभावनाकठिनीकृतानां हृदयाश्रितानां ग्रन्थीनां विप्रमोक्षो
विशेषेण प्रमोक्षणं विनाशो भवतीति यत एतदुत्तरोत्तरं यथोक्तमाहारशुद्धिमूलं तस्मात्सा कार्येत्यर्थः स
र्वं शास्त्रार्थमशेषत उक्त्वाख्यायिकामुपसंहरति श्रुतिः तस्मै मृदितकषायाय वार्क्षादिरिव कषायो
रागद्वेषादिदोषः सत्त्वस्य रञ्जनारूपत्वात्तं ज्ञानवैराग्याभ्यासरूपक्षारेण क्षालितवते मृदितो विनाशितो यस्य
नारदस्य तस्मै योग्याय तमसोऽविद्यालक्षणात्परं पारं परमार्थतत्त्वं दर्शयति दर्शितवानित्यर्थः कोऽसौ भगवा
नुत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति सोऽयं धर्मा सनत्कुमा
रस्तमेव सनत्कुमारं देवं स्कन्द इत्याचक्षते तद्विदः द्विर्वचनमध्यायपरिसमाप्त्यर्थम् ॥ १ ॥ इति श्रीगो
विन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ छांदोग्योपनिषद्वि
वरणे सप्तमः प्रपाठकः ॥ ७ ॥ ॐ श्रीगणेशाय नमः यद्यपि दिग्देशकालादिभेदशून्यं ब्रह्म सदेवैकमे
वाद्वितीयमात्मैवेदं सर्वमिति षष्ठसप्तमयोरधिगतं तथापीह मन्दबुद्धीनां दिग्देशादिभेदवदस्तित्वं

भाविताबुद्धिर्नैपाकानेसद्रूपापरमार्थविषयाकर्तव्येमिति अनादिगम्यबन्धलनपुरुषार्थसिद्धिविनिवृ
पिराभायहृदयपुंडरीकदेशाउपदेश्यः यद्यपिसम्यक्प्रत्ययैकविषयंनिर्गुणंचात्मतत्त्वंतथापिमंद
डीनांगुणवत्त्वस्येष्टत्वात्सत्यकामादिगुणवत्त्वंचवक्तव्यं तथायद्यपिब्रह्मविदांस्यादिविषयेभ्यःस्वयमे
वोपरमोभवति तथाप्यनेकजन्मविषयसेवाभ्यासजनितात्विषयविषयात्तृष्णानसहसानिवर्तयितुं
शक्यतइति ब्रह्मचर्यादिसाधनविशेषोविधातव्यः तथायद्यप्यात्मैकत्वविदांगंतृगमनगंतव्याभा
वादविद्यादिशेषस्थितिनिमित्तस्ययेगगनस्यविद्युत्उद्भूतपववायुःहृदयेधनस्यवायोः स्वात्मन्येवनिवृ
त्तिः तथापिगंतृगमनादिवासितबुद्धीनांहृदयदेशगुणविशिष्टब्रह्मोपासकानांमूर्धन्यनाड्यागति
वक्तव्येत्यष्टमःप्रपाठकआरभ्यते दिग्देशगुणगतिफलभेदशून्यंहिपरमार्थसदद्वयंब्रह्ममंदबुद्धीनां
मसदिवप्रतिभातिसन्मार्गस्थास्तावद्भवंतु ततःशनैःपरमार्थसदपिग्राहयिष्यामीतिमन्यतेश्रुतिः ॥ ॥
अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोऽस्मिन्नंतरआकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यंतद्वावविजिज्ञा
सितव्यमिति तत्रेदमुच्यतेयदिदंब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोऽस्मिन्नंतरआकाशः किंतदत्रविद्यतेयदन्वेष्ट
व्यंपद्वावविजिज्ञासितव्यमिति सम्बन्धायाचोद्यानाख्यमाकाशस्तावनेवानहृदयआकाशउभेअस्मिन्न्या
वापृथिवीअंतरेवसमाहितेअथानंतरंयदिदंवक्ष्यमाणंदहरमल्पंपुंडरीकंपुंडरीकसदृशंवेश्मवेश्मद्वार
पालादिमत्त्वात्अस्मिन्ब्रह्मपुरेब्रह्मणःपरस्यपुरंराज्ञेनेकपुरुषनिमषयथापुरं तथेदमनेकेंद्रियमनोबु
द्धिभिःस्वामर्थकारिपुरमिति ब्रह्मपुरंपुरेचवेश्मराज्ञोयथातथातस्मिन्ब्रह्मपुरेशरीरेदहरंवेश्मब्रह्मण
उपलब्ध्यधिष्ठानमित्यर्थः यथाविष्णोःशालग्रामःअस्मिन्हिस्वविकारशुंगशरीरेनामरूपव्याकरणायप्र

छा.भा.
५५

विशेषसदात्वे ब्रह्मसतीवेनात्मनेन्द्रियकृतम् तस्मादस्मिन्हृदयपुंडरीके वेश्मन्युपसंहृतकरणैर्बाह्यविषयवि-
रक्तैर्विशेषतो ब्रह्मचर्यसत्यसाधनयुक्तैर्वेद्यमानगुणवद्ध्यायमानैर्ब्रह्मोपलभ्यत इति प्रकरणार्थः दहरोऽस्मि-
न्निति दहरोऽल्पतरः अस्मिन्दहरे वेश्मनि वेश्मनोऽल्पत्वात्तदन्तर्वर्तिनोऽल्पत्वमन्तराकाशस्य आकाशाख्यं ब्रह्म
आकाशो वै नामेति हि वक्ष्यति आकाशवदशरीरत्वात्सूक्ष्मत्वात्सर्वगतत्वादिसामान्याच्च तस्मिन्नाकाशाख्ये
यदन्तर्मध्ये तदन्वेष्टव्यं तद्वाव तदेव विशेषेण जिज्ञासितव्यं ज्ञातुमेष्टव्यं गुर्वाश्रयश्रवणाद्युपायैरि-
ष्यवसानकरणीयमित्यर्थः तं चेदेवमुक्तवन्तमाचार्यं यदि ब्रूयुरन्तेवासिनश्चोदयेयुः कथं यदिदमस्मि-
न्ब्रह्मपुरे शरीरे दहरं पुंडरीकं वेश्म ततोऽप्यन्तरल्पतरश्चाकाशः पुंडरीकवेश्मनि तावत्किं स्यात्के-
वलानल्पतरेवेयद्वेदितव्यमाहुः दहरोऽस्मिन्नन्तर आकाशः किं तदत्र विद्यते न किंचन विद्यत इत्यभिप्रायः य-
दि नाम वदहरमात्रे किमपि विद्यते किं तस्यान्वेषणेन विजिज्ञासनेन वा फलं विजिज्ञासितुः स्यादतो य-
त्रान्वेष्टव्यं विजिज्ञासितव्यं वा न तेन प्रयोजनमित्युक्तवतः स आचार्यो ब्रूयात्कृतेवंवचनं शृणुत तत्र
यद्युक्तं पुंडरीकान्तःखस्याल्पत्वात्तत्स्थमल्पतरं स्यादिति तदसत् नहि खं पुंडरीकवेश्मगतं पुंडरीकाद-
ल्पतरं मत्वा वाचावोचं दहरोऽस्मिन्नन्तराकाश इति किं तर्हि पुंडरीकमल्पं तदनुविधायि तत्स्थमन्तःकरणं पु-
ण्डरीकाकाशपरिच्छिन्नं तस्मिन्विशुद्धे संहृतकरणानां योगिनां स्वच्छ एवोदके प्रतिबिंबवद्रूपमादर्श इव।
च स्वच्छं स्वच्छे विज्ञानज्योतिरवभासनेन तावन्मात्रं ब्रह्मोपलभ्यत इति दहरोऽस्मिन्नन्तराकाश इत्यवोचाम
ऽन्तःकरणोपाधिनिमित्तं स्वतस्तया बाधप्रसिद्धेः परिमाणतोऽयमाकाशोऽवभासितो वा नैवैषो न हृदय
आकाशाख्यस्मिन्नन्वेष्टव्यं विजिज्ञासितव्यं चावोचाम नाप्याकाशान्नल्पपरिमाणत्वमभिप्रेत्य तावानिर्

श्रुते किं तदिह ब्रह्मणोऽणुत्वमपसृष्टं नानात्वस्याभावात् कथं पुनराकाशसममेव ब्रह्मेत्यवगम्यते येनाश्रुते
एवं च दिवं महीं च तस्माद्वा एतस्मादात्मन आकाशः संभूतः एतस्मिन्नुपलब्धे तेषामप्याकाशादुत्पत्तिश्रुति।
भः किं च भोऽस्ति न द्यावापृथिवी ब्रह्माकाशे हृद्याद्युपाधिविशिष्टेऽन्तरेव समाहिते सम्यगाहिते स्थिते।
यथा वायुरानाभौ विस्तृतेऽहि ॥ तथा ॥ उभावग्निश्च वायुश्च सूर्याचंद्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहा
स्ति यच्च नास्ति सर्वं तदस्मिन्समाहितमिति तं ब्रूयात् ॥ अस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि भूता
नि सर्वे च कामा यदेनज्जरा वाप्नोति प्रध्वंसते वा किं ततोऽतिशिष्यते इति स ब्रूयान्नास्य जरयैतज्जीर्यति नास्य
वधेनैतद्धन्यते एतत्सत्यं ब्रह्मपुरं अस्मिन्कामाः समाहिताः एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको वि
जिघत्सोऽपिपासितः सत्यकामः सत्यसंकल्पः ॥ अग्निश्च वायुश्चेत्यादि समानम् यच्चास्यात्मन आत्मीयत्वे
न देहवतो विद्यते इह लोके तथा यच्चात्मीयत्वेन न विद्यते नष्टं भविष्यच्च नास्तीत्युच्यते न त्वत्यन्तमेवास
त्तस्य हृदयाकाशे समाधानानुपपत्तेः तं चेदेवमुक्तवन्तं ब्रूयुः पुनरन्तेवासिनः अस्मिंश्चेद्यथोक्ते [illegible]दि ब्रह्म
पुरे ब्रह्मपुरोपलक्षितेऽन्तराकाशे इत्यर्थः इदं सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामाः कथमाचा
र्येणानुक्ताः कामाश्चान्तेवासिभिरुच्यन्ते नैष दोषः यच्चेहास्यास्ति यच्च नास्तीत्युक्ता एव ह्याचार्येण कामा
अपि च सर्वेषामाद्येन चोक्ता एव कामाः यदा यस्मिन्काले एतच्छरीरं ब्रह्मपुराख्यं जरा वलीपलितादिलक्ष
णा वयोहानिर्वाप्नोति शस्त्रादिना वा वृक्णं प्रध्वंसते विस्रंसते विनश्यति किं ततोऽतिशिष्यते घटाश्रितक्षी
रदधिस्नेहादिवत् घटनाशेऽपि देहाश्रयमन्तरोन्तरे सर्वं सर्वनाशान्नश्यतीत्यभिप्रायः एवं प्राप्ते नाशे किं
ततोऽन्यद्यथोक्तादतिशिष्यते अवशिष्टेन किंचनावशिष्यत इत्यर्थः एवमन्तेवासिभिश्चोदित आचार्य आह

छा॰ भा॰
१०

यान्नस्तन्मोहमपनयन् कथं अस्य देहस्य जरयैतद्यथोक्तमन्तराकाशाख्यं ब्रह्म यस्मिन्सर्वं समाहितं न जीर्यति
देहवन्न विक्रियत इत्यर्थः कार्यदेहादिदोषैर्न स्पृश्यत इत्येतदस्मिन्नेवमेव कथं यथा मेनन्य हननया संयोगमा
त्रादिति नाशाने इदं विरोचनाख्याधिकायमस्मीत्यस्याहृत्स्यामोक्तितः एतत्सत्यमवितथं ब्रह्मपुरं ब्रह्मैव
पुरम् शरीराख्यं तु ब्रह्मपुरं ब्रह्मोपलब्धिस्थानमात्रात् तत्त्वनृतमेव वाचारम्भणं विकारो नामधेयमिति श्रुतेः त
दनृतेन विकारेऽपि देहस्थे ब्रह्मोपलभ्यत इति ब्रह्मपुरमित्युच्यते व्यावहारिकं सत्यं तु ब्रह्मपुरमेतदेव ब्रह्म।
स्मिन्सर्वं व्यवहारास्पदत्वात् अतोऽस्मिन्पुण्डरीकोपलक्षिते ब्रह्मपुरे सर्वे कामा बहिर्भवद्भिः प्रार्थ्यन्ते तेऽस्मि
न्नेव स्वात्मनि समाहिताः तत्प्राप्त्युपायमेवानुतिष्ठत बाह्यकामतृष्णां त्यजतेत्यभिप्रायः एष आत्मा
भवतां स्वरूपं शृणुत तस्योपलक्षणम् अपहतपाप्मा अपहतः पाप्मा धर्माधर्माख्यो यस्य सोऽयमपहतपाप्मा।
तथा विजरो विगतजरो विमृत्युश्च ननूक्तं पूर्वमेव न वधेनास्य हन्यत इति किमर्थं पुनरुच्यते यद्यपि दे
हसंबन्धिभ्यां जरामृत्युभ्यां न सम्बध्यते अन्यथापि संबन्धस्ताभ्यां स्यादित्याशंकानिवृत्त्यर्थं विशोको विगत।
शोकः शोको नाम इष्टवियोगादिनिमित्तो मानसः सन्तापः विजिघत्सो विगताशनेच्छः अपिपासोऽपानेच्छः
ननु अपहतपाप्मत्वेन जरादयः शोकान्ताः प्रतिषिद्धा एव भवन्ति कारणप्रतिषेधात् धर्माधर्मकार्या हि त
इति जरादिप्रतिषेधेन वा धर्माधर्मयोः कार्याभावे विद्यमानयोरपि समत्वमिति पृथक्प्रतिषेधान
र्थक्यं स्यात् सत्यमेवं धर्मकार्याणां तु व्यतिरेकेण स्वाभाविकानेदोषयेष्वपि विज्ञानमानन्दमिति श्रुतेः
तथा धर्मकार्यं जरादिव्यतिरेकेणापि जरादिदुःखस्वरूपं स्वाभाविकं स्यादित्याशङ्कायां अतो युक्तस्तत्प्र
हाणेनैव जरादीनां धर्माधर्माभ्यां पृथक्प्रतिषेधः जरादिग्रहणं सर्वदुःखोपलक्षणार्थम् पापनिमित्तानां

दुःखानामा नेस्यात्प्रत्येकं वचनप्रतिषेधार्थं पुनरमेवापहतपाप्मत्ववचनम् सत्या अवितथाः कामा यस्य
सोऽयं सत्यकामः वितथा हि संसारिणां कामाः ईश्वरस्य तद्विपरीताः तथा कामहेतवः संकल्पा अपि सत्या
यस्य स सत्यसंकल्पः संकल्पाः कामाश्च शुद्धसत्त्वोपाधिनिमित्ता ईश्वरस्य चित्रगुवत् न स्वतो नेति नेतीत्युक्त
त्वात् यथोक्तलक्षण एवात्मा विज्ञेयो गुरुभ्यः शास्त्रतश्च आत्मसंवेद्यतया च स्वाराज्यकामैर्न चेद्विज्ञाय
ते को दोषः स्यादिति शृण्वत्र ॥ यथा ह्येव प्रजा अन्वाविशन्ति यथानुशासनं यं यमन्तमभिकामा भवन्ति
यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः
क्षीयते तद्य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेष्वकामचारो भवति अथ
य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति एवं तावत्
दोष उक्तस्तत्र यथा ह्येवेह लोके प्रजा अन्वाविशन्ति अनुवर्तन्ते यथानुशासनम् यद्यद्राजा अन्यस्वा
मिनं मन्यमाना अस्वातन्त्र्येण यथा यथानुशासनं तथा तथा अन्वाविशन्ति किं यं यमन्तं प्रत्यन्तं जनप
दं क्षेत्रभागं वाभिकामाश्रयिणो भवन्त्यात्मबुद्ध्या न रूपेतं तमेव च प्रत्यन्तादिमुपजीवन्ति तस्य दृष्टान्तस्य
नेष्वदोषं प्रति पुण्यफलोपभोगे अथान्यो दृष्टान्तस्तत्र यथेति न यथेह स्यादि तत्र यथेह लोके न
सामेव लाभसनुशासनाश्रवर्तिनो नाम प्रजानां सेवादिजितो लोकः पराधीनोपभोगः क्षीयते न वानवति
अथेदानीं दार्ष्टान्तिकमुपसंहरति एवमेवामुत्राग्निहोत्रादिपुण्यजितो लोकः पराधीनोपभोगः क्षीयत।
एवं त्वक्तदोषः प्रयासमिति विषयं दर्शयति तद्येति तत्र ये इहास्मिंल्लोके ज्ञानकर्मणोरधिकृता योग्याः सन्त।
आत्मानं यथोक्तलक्षणं शास्त्राचार्योपदिष्टमननुविद्य यथोपदेशमननसंवेद्यतामकृत्वा व्रजन्ति देहात्

का.भा.
८.२

साध्ययंति य एतांश्च यथोक्तान्सत्यान्स्वसंकल्पकार्यांश्च स्वात्मस्थाननुविद्य व्रजंति तेषां सर्वेषु लोकेष्वा-
कामचारोऽस्वतंत्रता भवति यथा राजानुशासनानुवर्तिनी नृपप्रजानामित्यर्थः अथ येऽन्य इह लोक आत्मानं
शास्त्राचार्योपदेशमनुविद्यानुसंवेद्य तामापद्य व्रजंति यथोक्तांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु काम-
चारो भवति राज्ञ इव सार्वभौमस्येह लोके कथं सर्वेषु लोकेषु कामचारो भवतीत्युच्यते यथात्मानं यथोक्तल-
क्षणं हृदि साक्षात्कृत्वानुस्यमाणा ब्रह्मचर्यादिसाधनसंपन्नः सन्त्यक्त्वा च सत्यान्कामानात्मनो देहोपरि पि-
तृलोककामः पितरो जनयितारः तेनैवसावेदेन तेन भागपवासा लोका उच्यंते ॥ ॥ स यदि पितृलोककामो भ-
वति संकल्पादेवास्य पितरः समुत्तिष्ठंति तेन पितृलोकेन संपन्नो महीयते अथ यदि मातृलोककामो भवति
संकल्पादेवास्य मातरः समुत्तिष्ठंति तेन मातृलोकेन संपन्नो महीयते ॥ तेषु कामाय यस्तैः पितृभिः संबंधे
कार्यं भवति तन्न संकल्पमात्रादेव पितरः समुत्तिष्ठंति आत्मसंबंधितामापद्यंते विशुद्धसत्त्वतयास्य
संकल्पनादीश्वरस्यैव तेन पितृलोकेन पितृणां भोगेन संपन्नः संपत्तिरिह संमिलनया समृद्धो महीयते स
स्वनेव वर्धते वा महिमानमनुभवति समानमन्यत् मातरो जनयित्र्योऽतीताः सावेदेन भूताः सामर्थ्यात् न हि शु-
द्धदेहभूताः ग्रामसकादि जन्मनि निमित्तासमानत्वशुद्धसत्त्वयोगितया इच्छानंतरं संबंधा वा सुगमः ॥ अथ य-
दि भ्रातृलोककामो भवति संकल्पादेवास्य भ्रातरः समुत्तिष्ठंति तेन भ्रातृलोकेन संपन्नो महीयते अथ यदि
स्वसृलोककामो भवति संकल्पादेवास्य स्वसारः समुत्तिष्ठंति तेन स्वसृलोकेन संपन्नो महीयते अथ यदि स-
खिलोककामो भवति संकल्पादेवास्य सखायः समुत्तिष्ठंति तेन सखिलोकेन संपन्नो महीयते अथ यदि
गंधमाल्यलोककामो भवति संकल्पादेवास्य गंधमाल्ये समुत्तिष्ठतः तेन गंधमाल्यलोकेन संपन्नो महीयते

अथयद्यन्नपानलोककामोभवति संकल्पादेवास्यान्नपानलोकाः समुत्तिष्ठन्ति तेनान्नपानलोकेन संपन्नोम
हीयते अथयदिगीतवादित्रलोककामोभवति संकल्पादेवास्यगीतवादित्रे समुत्तिष्ठतस्तेनगीतवादित्रलो
केनसंपन्नोमहीयते अथयदिस्त्रीलोककामोभवति संकल्पादेवास्यस्त्रियः समुत्तिष्ठन्ति तेनस्त्रीलोकेन
संपन्नोमहीयते यंयमन्तमभिकामोभवति यंकामंकामयते सोस्यसंकल्पादेवसमुत्तिष्ठति तेनसंपन्नोमहीय
ते २ ॥ यंयमन्तमप्रदेशमभिकामोभवति यंचकामंकामयते यथोक्तव्यतिरेकेणापिसाम्यान्तःप्रागभि
ष्टःकामःसोस्यसंकल्पादेवसमुत्तिष्ठत्यस्य तेनकामविधानयोभिप्रेतार्थप्राप्त्याच संपन्नोमहीयतेइत्यर्थः ॥ २
तइमेसत्याःकामाअनृतापिधानास्तेषांसत्यानांसतामनृतमपिधानंयोयोह्यस्येतः प्रैतिनतमिहदर्शनाय
लभते अथयेचास्येहजीवायेचप्रेतायच्चान्यदिच्छन्नलभतेसर्वंतदत्रगत्वाविंदतेत्रह्यस्यैतेसत्याःकामानृताद्य
थापिहिरण्यनिधिंनिहितमक्षेत्रज्ञाउपर्युपरिसंचरन्तोनविंदेयुरेवमेवेमाःसर्वाःप्रजाअहरहर्गच्छन्त
एतंब्रह्मलोकंनविंदन्त्यनृतेनहिप्रत्यूढाः सवाएषआत्माहृदितस्यैतदेवनिरुक्तंहृद्ययमितितस्माद्धृदय
महरहर्वाएवंवित्स्वर्गंलोकमेति अथयएषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरू
पेणाभिनिष्पद्यतएषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेति तस्यहवाएतस्यब्रह्मणोनामसत्य।
मिति तानिहवाएतानित्रीण्यक्षराणिसतीयमितितद्यत्सत्तदमृतं अथयत्तितन्मर्त्यं अथयद्यंतेनोभेयच्छ
ति यदनेनोभेयच्छतितस्माद्यमहरहर्वाएवंवित्स्वर्गंलोकमेति ॥ ३ ॥ यथाकामध्यानसाधनानुष्ठानंप्रति
साधकानसत्यादृजननार्थमनुक्रोशन्नाह कष्टमिदंखलुवर्ततेयत्स्वात्मस्थाःप्राकाम्याप्राप्तिरिमेसत्याः
कामाअनृतापिधानास्तेषामात्मस्थानांसतामेवसतामनृतंबाह्यविषयेषुत्तमभोजनाच्छादनादि

छा·भा·
१·२

पुरुषस्यानृतनिमित्तेव स्वेच्छाप्रचारं तस्मिन्मिथ्याज्ञाननिमित्तत्वादनृतमित्युच्यते तन्निमित्तं स्वात्मनां कामानामप्रा-
प्तिरित्यपिधानमिवापिधानं कथमनृतापिधाननिमित्तं तेषामलाभ इत्युच्यते यो यो हि यस्मादस्य जन्तोः पुत्रो
भ्राता वेष्ट इतोऽस्माल्लोकात्प्रैति प्रगच्छति म्रियते तं मृतं पुत्रं भ्रातरं वा स्वहृद्याकाशे विद्यमानमपीह पुनर्द-
र्शनायेच्छन्नपि न लभते अथ पुनर्ये चास्य विद्यमाना जीवा जीवन्ति इह पुत्रभ्रात्रादयो वा ये च प्रेता मृता इष्ट-
संबन्धिनो यच्चान्यदिह लोके वस्त्रान्नपानादि वा रत्नं लभमानेन तत्सर्वमत्र हृदयाकाशाख्ये ब्रह्मणि गत्वा यथोक्तेन वि-
न्दतेऽत्रास्मिन्हृदाकाशे हि यस्माद्यथोक्ताः सत्याः कामा वर्तन्तेऽनृतापिधानाः कथमिव तद्दृष्टान्तमित्युच्यते त-
त्र यथापि हिरण्यनिधिं हिरण्यमेव पुनर्ग्रहणाय निधातृभिः निधीयत इति निधिः तं हिरण्यनिधिं निहितं
भूमेरधस्तान्निहितमक्षेत्रज्ञा निधिशास्त्रनिधिक्षेत्रमजानन्तस्तन्निधेरुपर्युपरि संचरन्तोऽपि निधिं न विन्देयुः
शक्यवेदनमपि एवमेवेमाः अविद्यावन्त्यः सर्वाः प्रजा यथोक्तं हृदयाकाशाख्यं ब्रह्मलोकं ब्रह्मैव लोकं ब्रह्मलो-
कमहरहः प्रत्यहं गच्छन्त्योऽपि सुषुप्तकाले न विन्दन्ति न लभन्ते एषोऽहं ब्रह्मलोकमापन्नोऽस्मीति अनृतेन
हि यथोक्तेन प्रत्यूढा हृताः स्वरूपादविद्यादिदोषैर्बहिरपकृष्टा इत्यर्थः अतः कष्टमिदं वर्तते जन्तू-
नां यत्स्वायत्तमपि ब्रह्म न लभ्यत इत्यभिप्रायः स वा एष आत्मा अपहतपाप्मेति प्रकृतो वा शब्देन तं स्मारयति एष
विवक्षित आत्मा हृदि हृदयपुण्डरीकाकाशशब्देनाभिहितस्तस्यैतस्य हृदयस्यैतदेव निरुक्तं निर्वचनं नान्य-
त् हृदयमात्मा वर्तते इति यस्मात्तस्माद्धृदयं हृदयनाम निर्वचनप्रसिद्ध्यापि हृदयस्थ आत्मेत्यवगन्तव्यमित्यभिप्रा-
यः अहरहर्वै एवं हृदयमेवेति हृदयमात्मेति जानन् स्वर्गं लोकं हार्दं ब्रह्मेति प्रतिपद्यते ननु अनेवंविदपि सुषुप्ति-
काले हार्दं ब्रह्म प्रतिपद्यत एव सुषुप्तिकाले मनोऽस्मिन् तदा संपन्न इत्युक्तत्वात् बाढमेवं तथाप्यस्ति विशेषः

यथाज्ञानवज्ञानेन सर्वो जनः सदा ब्रह्मैव तथापि न तद्वेत्तीति श्रुतिर्बोधितो विद्वान्सदेव नात्येतीति ज्ञा
नेन सदेव भवति एवमेव विद्वानविद्वांश्च सुषुप्ते यद्यपि संपद्यते तथाप्येवंविदेव स्वर्गं लोकमेतीत्युच्यते
देहपातेऽपि विद्याफलस्यावश्यंभावित्वादित्येष विशेषः सुषुप्तकालेऽनेनाज्ञानात्मना संपन्नः सन्स्वयं प्रसीद
तीति ज्ञानात्मना याविषयेन्द्रियसंयोगजनितं कालुष्यं जहातीति संप्रसादः सोऽप्यपि सर्वं मनन्नोऽश्नाधारणेन
ह्याप्येवं विन्स्वर्गं लोकमेतीति प्रकृतत्वाद्यो संप्रसाद इति संनिहितविषयत्वे विशेषात् अथेदं शरीरमिति चास्मा
च्छरीरात्समुत्थाय शरीरात्मभावनां परित्यज्येत्यर्थः न त्वासनादिवत्स्थानोद्गमनेन इत्पेति विशेषण
त् न ह्यन्यत उत्थाय स्वरूपं संपद्यते स्वरूपमेव न भवति प्रतिपद्यते चेत्स्वात् परं परमात्मानं विज्ञप्तिस्व
भावं ज्योतिः स्वरूपं संपद्य स्वास्थ्यमुपगम्येत्येतत् स्वेनात्मीयेन रूपेणाभिनिष्पद्यते प्रागेतस्याः स्वरूपसं
पत्तेर्विपर्ययादेहमेव परं रूपमात्मत्वेनोपगत इति तदपेक्षयेदमुच्यते स्वेन रूपेणेति अशरीरता हि स्वमात्म
नः स्वरूपं यत्स्वरूपं ज्योतिःस्वरूपमापद्यते संप्रसाद एष आत्मेति होवाच सद्युपादितियः स्यानिश्रोते
वा शिष्येभ्यः किं चैतदमृतमविनाश्यभयं भयवर्जितो भूमात एतदमृतमभयमेतद्ब्रह्म अतएवाभयं भूमत्वादद्वितीयाभावात्
अतएव ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम नामाभिधानं किं तत्सत्यमिति सत्यं हि तत्यं ब्रह्म तत्सत्यमात्मे
